# महाभारतम्- वनपर्व

## लक्षालङ्कारटीका-पाठान्तरादिसहितम् (क्रिटिकल् एडिशन्)

## भाग-2




सम्पादकः

सि. आर. प्रदीपसिंहाचार्यः चतुर्वेदः



प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला - 9

वेदवेदान्ताध्ययनशोधसंस्थानम्

# श्रीमन्महाभारतम्

श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-

प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्

# वनपर्व-२

सम्पादकः

सि. आर्. प्रदीपसिंहाचार्यः, चतुर्वेदः

उपसम्पादकाः

देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्.

वसन्तकुञ्ज, नवदेहली.

2020

विश्वविद्याग्रन्थमाला- 9

**श्रीमन्महाभारतम्** **श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-**
**वनपर्व-२** **प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

**सम्पादकः** : सि. आर् प्रदीपसिंहाचार्यः, चतुर्वेदः
**उपसम्पादकाः** : देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

**प्रकाशनम् :** **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**

© **सर्वे अधिकाराः स्वायत्तीकृताः**

**प्रथममुद्रणम् :** **2020**

**ISBN :** **978-81-998716-0- 1**

**पृष्ठसङ्ख्या :** **12+400**

**प्रतयः :** **250**

**मूल्यम् :** **200 रूप्यकाणि**

**मुखचित्रविन्यासः:** **कार्तिकः**

**मुद्रणालयः:** **वाणिप्रेस्, मैसूरु**

# Vedic Vedantic Studies & Research Institute

# Śrīmanmahābhāratam

# Vanaparva vol-2

**"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra; including the Ancient Tulu Recension and Variant Readings.**

**Edited by:**

**C. R. Pradeepa simha achaya, chaturveda.**

**Sub-editors**

Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.

**Published by:**

**Vedic Vedantic Studies & Research Institute**

**(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)**

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

**2020**

**Vishvavidyagranthamala -9**

## Śrīmanmahābhāratam - Vanaparva vol-2

"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra;
including the Ancient Tulu Recension and Variant Readings.

**Edited by:** **C. R**. vd. **Pradeepa simha achaya, chaturveda.**

**Sub-editors :** **Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.**

**Published by:** **Vedic Vedantic Studies & Research Institute**
(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)
Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**ISBN :** **978-81-998716-0-1**

**Edition:** **2020**

**copies :** **250**

**©:** **Publishers**

**Price:** **200**

**pages** **12 + 400**

**printed by:** **vanipress.mysore**

# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

**पेजावरअधोक्षजमठः,उडुपि**

## अनुग्रहसन्देशः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

श्रीमन्महाभारतं नाम अस्माकं संस्कृतेरक्षय्यनिधिः । तत्र 'वनपर्व' तु पाण्डवानां तपस्याकालं, धैर्यपरीक्षाकालं च वर्णयति । इदानीं वेदवेदान्ताध्ययनशोधसंस्थानपक्षतः वनपर्वणः अयं द्वितीयः भागः प्रकाश्यते। अस्मिन् भागे 'इन्द्रलोकाभिगमनपर्व', 'नलोपाख्यानपर्व', 'तीर्थयात्रापर्व' च अन्तर्भवन्ति ।

अर्जुनस्य इन्द्रलोकगमनं भाविविजयाय पूर्वसन्नाहं सूचयति । विशेषतः अत्रत्यं 'नलोपाख्यानं' तु महाभारतस्य मुकुटमणिः इव राजते। "राजा नलोपि द्यूतदोषाद् राज्यं त्यक्त्वा बहु कष्टम् अनुभूतवान् । अतः हे युधिष्ठिर! त्वं मा शुचः" इति बृहदश्वमुनिना उक्तं सान्त्वनवचनं सर्वेषाम् आपद्ग्रस्तानां कृते धैर्यं यच्छति । तथैव 'तीर्थयात्रापर्व' अस्माकं पुण्यक्षेत्राणां महिमानं, भारतवर्षस्य सांस्कृतिकैक्यं च दर्शयति ।

अस्य ग्रन्थस्य सम्पादनं शास्त्रज्ञैः विद्वद्भिः श्रीप्रदीपसिंहाचार्यैः श्रद्धया कृतम्। तैः सह देवीप्रसादाचार्यः, श्रीविठोबाचार्यः, श्री वि.श्रीनिधिआचार्यश्च सहसम्पादकरूपेण महता परिश्रमेण कार्यं कृतवन्तः । एतेषां विदुषां शास्त्रसेवा श्लाघनीया ।

अनेन ग्रन्थपठनेन नलोपाख्यानादिपुण्यकथाश्रवणेन च सर्वेषां पापपरिहारः, मनश्शुद्धिश्च भवतु ।

ग्रन्थसम्पादकानां, प्रकाशकानां सर्वेषां च श्रीमन्मध्ववल्लभस्य, अनन्तकल्याणगुणपरिपूर्णस्य श्रीवासिष्ठकृष्णस्य पूर्णानुग्रहः सदा भवतु इत्याशास्महे

इति नारायणस्मृतयः

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचांसि

"वनं तु तपसो योग्यम्" इति वचनानुसारं, पाण्डवानां वनवासः केवलं कष्टकालः न आसीत्, अपि तु भाविजीवनस्य विजयस्य च आधारशिला आसीत्। महाभारतस्य अस्मिन् वनपर्वणि द्वितीयभागे दृश्यमानाः प्रसङ्गाः अस्माकं जीवनदृष्टिं परिवर्तयितुं समर्थाः सन्ति।

अस्मिन् ग्रन्थे मुख्यतया त्रीणि तत्त्वानि निरूपितानि सन्ति-

१. शक्तिसञ्चयः - अर्जुनसाधितः अस्त्रप्राप्त्यादिप्रसङ्गः बोधयतीदं यत्, 'धर्मस्य रक्षणाय शक्तिरप्यपेक्षिता' इति। निश्शक्तः धर्मं रक्षितुं न शक्नोति।

२. धैर्यधारणम् - नलोपाख्यानपर्व न केवलं काचित् कथा, अपि तु 'मनोवैज्ञानिकचिकित्सा' (Psychological healing) इव वर्तते। राज्यभ्रष्टस्य युधिष्ठिरस्य मनसि धैर्यपूरणे इयमेव कथा महौषधरूपेण जाता।

३. सांस्कृतिकैक्यम् - तीर्थयात्रापर्वणि वर्णितानि क्षेत्राणि आसेतुहिमाचलं व्यापृतस्य 'अखण्डभारतस्य' चित्रं प्रददति। अस्माकं पूर्वजाः तीर्थाटनद्वारा एव राष्ट्रस्य सांस्कृतिकम् ऐक्यं रक्षितवन्तः इति अत्र स्पष्टम्।

एतादृशस्य ग्रन्थस्य प्रकाशनं 'वेदवेदान्ताध्ययनशोधसंस्थानस्य' गौरवम् वर्धयति। अस्माकं संस्थायाः एषा प्रगतिः श्रीपेजावरमठाधीश्वराणां, परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणानां दिव्यदृष्ट्या, सततप्रोत्साहनेन च साध्या अभवत्। पूज्यपादानां "ज्ञानं सर्वजनहितं भवेत्" इति आदेशं शिरसा वहन्तः वयं तेषां पादपद्मयोः साष्टाङ्गप्रणामान् निवेदयामः।

ग्रन्थस्यास्य प्रधानसम्पादकाः विद्वान् श्रीप्रदीपसिंहाचार्याः न केवलं पाठसंशोधने, अपि तु ग्रन्थस्य अन्तर्निहितार्थस्य प्रकाशनेऽपि सफलाः जाताः। तेभ्यो मम विशेषधन्यवादाः। तथैव, सहसम्पादकाः विठोबाचार्यः, देवीप्रसादाचार्यः -वि-श्रीनिधिआचार्यश्च अहोरात्रं परिश्रम्य, ग्रन्थस्य सौष्ठवं वर्धितवन्तः। एतेषां सर्वेषां विदुषां समवायः (Team work) एवास्य ग्रन्थस्य साफल्यम्।

अनेन ग्रन्थेन वाचकवृन्दस्य विचारशक्तिः वर्धताम्, संस्कृतिं प्रति गौरवम् अधिकं भवतु इति श्रीहरिगुरुचरणौ प्रार्थये।

विद्वान् डा। धनञ्जयाचार्यः
निदेशकः

# सम्पादकीयम्

श्रीमन्महाभारतस्य वनपर्वणि (अरण्यपर्वणि) द्वितीयोऽयं भागः अत्यन्तं महत्त्वपूर्णः, वैविध्यपूर्णश्च वर्तते। अस्मिन् भागे 'इन्द्रलोकाभिगमनपर्वारभ्य तीर्थयात्रापर्वणि केचिदध्यायाः संयोजिताः । विश्वविख्यातं 'नलोपाख्यानम्' अपि अत्रैवान्तर्भवति, यत् साहित्यदृष्ट्या, नीतिदृष्ट्या च महाभारतस्य मुकुटमणिरिव शोभते।

१. इन्द्रलोकाभिगमनपर्व:-

अस्मिन् पर्वांशे अर्जुनस्य स्वर्गलोकयात्रा वर्णिता। पाशुपतास्त्रलाभानन्तरं देवेन्द्रस्य आमन्त्रणेन अर्जुनः अमरावतीं गत्वा, तत्र पञ्चवर्षाणि उषित्वा, विविधदिव्यास्त्राणां प्रयोगरहस्यं जानाति। तत्रैव उर्वशीशापप्रसङ्गोपि भवति, यः शापः अग्रे विराटपर्वणि अज्ञातवाससमये अर्जुनाय वररूपेण परिणतोऽभवत्। इतोऽपि, अर्जुनेन निवातकवचादीनां असुराणां संहारः कृतः इति वृत्तान्तः अत्र लभ्यते।

२. नलोपाख्यानपर्व:-

अर्जुनस्य वियोगेन खिन्नं धर्मराजं सान्त्वयितुं बृहदश्वमहर्षिः 'नल-दमयन्त्योः' कथां श्रावयति। "हे युधिष्ठिर! त्वत्तोऽपि अधिकं कष्टं नलेन अनुभूतम्, तथापि सः पुनः राज्यं प्राप्नोत्" इति धैर्यं बोधयितुम् इयं कथा उक्ता। कलिपुरुषस्य प्रभावः, नलस्य राज्यभ्रंशः, दमयन्त्याः पातिव्रत्यं, कर्कोटकदंशः, अन्ते च पुनर्मिलनम् — इत्येते विषयाः अत्र हृदयस्पर्शिरूपेण चित्रिताः। इदं उपाख्यानं आशावादस्य उत्तमं निदर्शनम्।

३. तीर्थयात्रापर्व: -

अस्मिन् पर्वांशे लोमशमहर्षिणा सह पाण्डवानां (विना अर्जुनं) भारतवर्षस्य पुण्यक्षेत्राणां दर्शनं वर्णितम्। नैमिषारण्यं, प्रयागः, गया, गङ्गाद्वारं, बदरिकाश्रमः इत्यादीनां तीर्थानां माहात्म्यं, स्नान-दानयोः फलं च अत्र सविस्तरं निरूपितम्। इदं पर्व अस्माकं प्राचीनभौगोलिकज्ञानस्य, सांस्कृतिकैकतायाः च परिचायकम् अस्ति।

कृतज्ञतासमर्पणम्

एतादृशस्य ज्ञानगर्भितस्य ग्रन्थस्य सम्पादनं मम परमं भाग्यम्। अस्य महतो ग्रन्थस्य प्रकाशने अस्माकं मुख्यप्रेरणास्रोतोभूताः, श्रीपेजावरमठाधीश्वराः, श्रीमज्जगद्गुरुमध्वाचार्यमहासंस्थानस्य पीठाधिपतयः परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणाः। तेषां वेदशास्त्रविषयिणीं श्रद्धां, मयि विद्यमानं वात्सल्यं च स्मरन् तेषां पादारविन्दयोः सश्रद्धं साष्टाङ्गप्रणामान् समर्पयामि।

तथैव, अस्मिन् कार्ये सर्वविधं सहकारं, प्रोत्साहनं च दत्तवद्भ्यः वेदवेदान्ताध्ययनशोध-संस्थानस्य निदेशकेभ्यः, डा। धनञ्जयाचार्येभ्यः अहं विशेषरूपेण कृतज्ञतां निवेदयामि। येषां प्रोत्साहेनैवेदं कार्यं सुष्ठु सम्पन्नम्।

अस्य ग्रन्थस्य सम्पादनकार्ये  सहसम्पादकैः महता परिश्रमेण साहाय्यं कृतम्। पाठशोधने, विषयविभागे च विद्वांसः देवीप्रसादाचार्यः, विठोबाचार्यः, श्रीवि.श्रीनिधिआचार्यश्च यत् साहाय्यम् अकुर्वन्, तत् सर्वथा श्लाघनीयम्। तेभ्यः सर्वेभ्यः मम धन्यवादाः।

अयं ग्रन्थः महाभारतजिज्ञासूनां, विदुषां, शोधच्छात्राणां च ज्ञानवृद्धये भूयात् इति आसासे

विद्वद्वशंवदः

प्रदीपसिंहाचार्यः , चतुर्वेदः

# किञ्चिन्निवेदनम्

‘देशे देशे तथा ग्रन्थान् दृष्ट्वा कतिपयान्’ इत्यादि श्रीमदाचार्यैः तात्पर्यनिर्णये अभिहितम् । तेन महाभारते नानाविधाः पाठभेदाः सन्तीति अवगम्यते । पूना महानगरगतभण्डार्कर् प्राच्यविद्यासंशोधनालयेन षट्त्रिंशद्वर्षपर्यन्तं महाभारतमूलपाठमधिकृत्य अधीत्य मुद्रितं च तत् क्रिटिकल्एडिषन्मुखेन । तदेव इदानीम् अत्यन्तप्राचीनपाठान्तरसंवलितः महाभारतपाठः इति अनेकेषां विदुषाम् अभिप्रायः । परन्तु, ततोऽपि अधिकप्राचीनतमपाठः उडुपीनगरस्थनानामठीय-ताळपत्रग्रन्थेषु इदानीं समुपलब्ध इति महान् सन्तोषः ।

पञ्चदशाधिकाः महाभारतताळपत्राः इदानीम् अस्मद्धस्तपथं गताः । तत्पर्यालोचनया मूलपाठनिर्धारणे वयं प्रभवाः स्मः । ताळपत्रगतपाठाः वाविळ्ळप्रेस्द्वारा मुद्रितमहाभारतपाठस्य अत्यन्तसंवादि । यत्र विसंवादस्तत्रापि तात्पर्यनिर्णयानुरोधि पाठ एवात्रादृतः । तदेवं अस्मिन् शुद्धपाठसमीक्षासमये अस्माभिः मूलश्लोकतया पलिमारुमठीयताळपत्रगतपाठः आदृतः । श्लोकसङ्ख्याविषये प्रायः वावीळ्ळक्रम आदृतः । क्वचित् मूलश्लोकाः वावीळ्ळपाठे अदृश्यमाना अपि ताळपत्रे, टि.आर् पाठे, बोरि पाठेपि विद्यमानाः अर्थ-तात्पर्यानुरोधात् अस्मिन् संस्करणे आदृताः ।

एतत्संस्करणाध्ययने अस्माभिरादृतः अध्येतृभिरवश्यं वेदितव्यः विना यद्वदेनेनात्रादृतक्रमानधिगमस्तदत्रैवं निरूप्यते ।

*. क्रिटिकल् एडिषन् मध्ये तालपत्रेषु वाविळ्ळे वा अविद्यमानाः श्लोकाः ‘अधिकः/ अथवा ins’ इति निर्दिष्टः । तद्यथा -

एतदिच्छाम्यहं श्रोतुं वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ।।

(२) व्यासतो for वदतो (क); विस्तरेण द्विजोत्तम (ग); द्विजोत्तमः; तपोधन;

after line 1 ins (६९६) वर्णसङ्करजो धर्मः कथं तं नास्पृशत्तदा ।
जरासश्चारणं चापि अन्यदेहेषु नः श्रुतम् ।। (अधिकः घपाठे)

* बोरि क्रिटिकल् पुस्तके appendix निर्दिष्टाः केचनश्लोकाः appendix इत्येव श्लोकाधस्तनभागे निर्दिष्टाः ।

*. क्वचितु soubstitute इति पाठान्तर एव निर्दिष्टाः ।

*. श्लोकसङ्ख्याविषये अयं क्रमः अदृतः । प्रारम्भगतसङ्ख्या आपर्वम् अनुवर्तते । अध्यायान्ते आहत-अध्याय-श्लोकसङ्ख्या निर्दिष्टा यथा ‘अस्मिन्नध्याये श्लोकाः सन्ति’ इत्येवम् ।

*. भागवतमहाभारतयोः ताळपत्रेषु अयमपि एकः पाठभेदः दरीदृश्यते । भागवतपाठेषु शुक उवाच; परीक्षिदुवाच; राजोवाच इत्यादि पठ्यते क्वचित् । क्वचित् श्रीशुकः इत्येव । महाभारते तु सर्वत्र उवाच इति नैव पठ्यते । कुम्भकोणमुद्रितपुस्तके एवं बोरि पुस्तकेपि उवाचशब्दः पठ्यते । अयं नास्माभिरादृतः । केवलं जनमेजयः; भीमसेनः इत्याद्येव ।

* बोरिपुस्तके मध्ये मध्ये अध्यायाः यत्र परिसमाप्यन्ते तत्र वाविळ्ळपुस्तके अध्यायः नैव समाप्यते । एवं टि. आर् कृष्णाचार्यपाठेपि । अत्र प्राचीनतौळवपाठ एव आदृतः । यत्र द्वयोरध्यायोः एकीभावः तत्र बोरिपुस्तकपत्रसङ्ख्या क्वचिद्दत्ता; क्वचिन्नैव ।

*. line interpretation; आनुपूर्वीव्यत्यासः’ यत्र दृश्यते तदपि सूचितः । तत्र निर्देशक्रमः एकरूपतया नैव निर्दिष्टः ।

*. पर्वारम्भे महाभारततात्पर्यनिर्णयगताः तत्पर्वकथासङ्ग्रहश्लोकाः उपनिबद्धाः ।

*. महाभारतकथाविषयानुक्रमणिकापि श्लोकानुसारेण प्रत्यध्यायं विस्तरतो निवेशिता

१*.यद्यपि महाभारतलक्षालङ्कारः एम्. एस्. पि द्वारा मुद्रितः । अत्र विद्यमानाध्याय-श्लोकसङ्ख्यादि न वावीळ्ळ-टि.आर् पाठानुसारी इति केवलं विषयमात्रमत्र निवेशितम् । अध्यायसङ्ख्यादि तौळवपाठानुसार्येवेति चावगन्तव्यम् ।।

*.लक्षालङ्कारे व्याख्याताः श्लोकाः क्वचित् वावीळ्ळपुस्तके नोपलभ्यन्ते । टि.आर् कृष्णाचार्यपाठे उपलभ्यन्त इति तेपि मूलश्लोकतया क्वचिद् ग्राह्या भवन्तीत्यस्माकमाशयः । महन्तः प्रष्टव्याः

*. मूलश्लोकाः बृहदक्षरै राराज्यन्ते । अधिकश्लोकाः अल्पाक्षरैः मूलश्लोकमध्य एव अर्थानुगुणाः विषयविशेषगर्भिताः मूलश्लोकानां पूर्वं पश्चाद्वा, पूर्वार्ध-उत्तरार्धमध्ये वा अनङ्कितसङ्ख्याः निवेशिताः । एतेषां महाभारतान्तर्गतत्वं वा अनन्तर्गतत्वं वा न निश्चेतुं प्रभवामः ।।

⁕.तत्र पाठान्तरदानसमये पूना(बोरि)पाठान्तराणि अपि निर्दिष्टानि । तद्यथा-

एवं पाठान्तरदानसमये आदृताः अपरेपि विशेषाः एवं निर्दिष्टाः –

सर्वमूलग्रन्थटीका-टिप्पणीषु महाभारतपाठः

⁕ श्रीमन्मध्वाचार्यैः तत्र तत्र महाभारतवचनानि 'भारते, मोक्षधर्मपर्वणि' इत्यादिरूपेण नामनिर्देशमात्रेणसूचितानि।तानिकेचनउपलभ्यन्ते,नोपलब्धानिबहूनिइत्यनेकेषांप्रवादः। अस्माभिः अस्मिन् संस्करणे श्रीमदाचार्योदाहृतवचननां आकरमपि पर्व-अध्याय-श्लोकसङ्ख्या-निर्देशपूर्वकमाकरः प्रादर्शि । यथा -गीताभाष्ये 'अनन्तग अनन्त' इत्येवोदाहृतम् । अस्माभिः अस्य शान्तिपर्वान्तर्गतत्वं संशोध्य '(सर्वमूलो-) गीताभाष्योदाहृत-महाभारतवचनानि 'इति सङ्गृह्य पर्वारम्भे स्थलनिर्देशपूर्वकं १२-१३१-५ इत्येवं निर्दिश्यते ।।

⁕ सर्वमूलेषु- महाभारतवचनतया अनुदाहृतान्यपि प्रमणवचनानि 'इतिच' इत्येवं रूपेण निबद्धानि । यथा गीताभाष्ये 'पृथिवी धर्ममूर्धनि' इति च ' इति। एतादृशानि वाक्यान्यपि अस्मदीयमहाभारतसंशोधनावसरे संशोध्य आकरप्रदर्शनपूर्वकं निर्दिष्टानि ।

⁕ किञ्च महाभारतवाक्यानि टिप्पणीषु तत्र तत्र प्रासङ्गिकतया उदाहृतानि ।

एवं भागवतयादुपत्ये -शर्यातिकथाप्रसङ्गे आदिपर्ववचनमुदाहृतम् - 'यथोक्तमादिपर्वणि-जिगीषया ततो देवा वव्रिरे.. इत्यारभ्य 'दुहिता वृषपर्वणः ' इत्यन्तः ८० श्लोकाः ।

भरतराट्कथाप्रसङ्गेपि - आदिपर्ववचनम् -'तां विशोध्य तदा राजा देवदूतेन भारत... इत्यारभ्य 'मया शुभे' इत्यन्तो भागः ।

विश्वामित्रप्रसङ्गे गदापर्ववचनमुदाहृतम् -'सतु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति । तथेति चावदद् ब्रह्मा सर्वलोकपितामहः इति गदापर्वणि' इति ।।

एवं उद्योगपर्ववचनम् -'प्रतिगृह्य ततो धर्मः... विश्वामित्रस्तथाभवत् ।

एवं शान्तिपर्ववचनम् -च्यवनाद्वरदानेन रुचिकस्य ... ब्राह्मण्यं समवाप्तवान् ।।'

एतादृशग्रन्थसम्पादनकाले सहकृतवभ्द्यः समेभ्यः विद्वभ्द्यः धन्न्यवादः ।।

सम्पादकमण्डली

# इन्द्रलोकाभिगमनपर्व

### महाभारततात्पर्यनिर्णये २२ अध्याये

इन्द्रोऽर्जुनं समागम्य प्राह प्रीतोऽस्मि तेऽनघ ।
रुद्रदेहस्थितं ब्रह्म विष्ण्वाख्यं तोषितं त्वया ।
तेन लोकं ममाऽगच्छ प्रेषयामि रथं तव ।। १४० ।।
इत्युक्त्वा प्रययाविन्द्रस्तद्रथेन च मातलिः ।
आयात् पार्थस्तमारुह्य ययौ तातनिकेतनम् ।। १४१ ।।

**महाभारते- वनपर्वणि ३७ अध्यायः**

## 03- 04- 037

## सप्तत्रिंशोऽध्यायः

हिमालयतः प्रस्थाय मातलिना सहार्जुनस्य स्वर्गलोकं प्रति गमनम् ।

वैशम्पायनः

**गतेषु लोकपालेषु पार्थः शत्रुनिबर्हणः । ****
**चिन्तयामास राजेन्द्र देवराजरथं प्रति ।। १ ।।(१)**

ततश्चिन्तयमानस्य गुडाकेशस्य धीमतः । **
**रथो मातलिसंयुक्त आजगाम महाप्रभः ।। २ ।।(२)**

**नभो वितिमिरं कुर्वञ्जलदान्पाटयन्निव । ****

---

(१) (४) रथं प्रति; समागमं
(२) (१)तस्य (for ततश् );

दिशः सम्पूरयन्नादैर्महामेघरवोपमैः ।। ३ ।।[१]

असयः शक्तयो भीमा गदाश्चोग्रप्रदर्शनाः । **

दिव्यप्रभावाः प्रासाश्च विद्युतश्च महाप्रभाः ।। ४ ।।[२]

तथैवाशनयश्चैव चक्रयुक्तास्तुलागुडाः । **

वायुस्फोटाः सनिर्घाता महामेघस्वनास्तथा ।। ५ ।।[३]

तत्र नागा महाकाया ज्वलितास्याः सुदारुणाः । **

सिताभ्रकूटप्रतिमाः संहताश्च यथोपलाः ।। ६ ।।[४]

दशवाजिसहस्राणि हरीणां वातरंहसाम् । **

वहन्ति यं नेत्रमुषं दिव्यं मायामयं रथम् ।। ७ ।।[५]

तत्रापश्यन्महानीलं वैजयन्तं महाप्रभम् । **

ध्वजमिन्दीवरश्यामं वंशं कनकभूषणम् ।। ८ ।।[६]

तस्मिन्रथे स्थितं सूतं तप्तहेमविभूषितम् । **

दृष्ट्वा पार्थो महाबाहुर्देवमेवान्वतर्कयत् ।। ९ ।।[७]

तथा तर्कयतस्तस्य फाल्गुनस्याथ मातलिः । **

सन्नतः प्रस्थितो भूत्वा वाक्यमर्जुनमब्रवीत् ।। १० ।।[८]

---

(१) (१)ततो (for नभो );, (३) च (for सं ),

(२) (३)पाशाश्च; दिव्याश्च ; वारुणाः पाशाः; दिव्यः प्रसादात्पाशाश्च, (४) ऋष्टयश्च ; शक्तयश्च

(३)(१)चैव (for तत्र );, (२) शक्तियुक्ताः; हलागुडाः; गुडागुलाः; तुलागुडाः; व्य० ) हुलाहुलाः; महामेघस्वनास्तथा; वह्निज्वालाबिभीषणाः; (४) बहिर्मेघनिभा० ०( स्वना ) स्तथा; प्रावृण्मेघनिभस्वनाः; शङ्खमेघ०निभास्तथा ( दा );

(४) (४)सहिताश्च; महाबलाः; तथोपलाः; महोपलाः,

(५) (३)ये (for यं ) ; (४) दिव्यं च परमं सुखं,

(६) (१)तदा पार्थः; महीपालः (for महानीलं); (४)कनकभूषितं,

(७) (२)मातलिं हेमभूषितं;,मातलिं हेम ( स्वर्ण )भूषणं; तप्तद्धेमविभूषणं;हेममाला ( जाल ) विभूषितं; (४)देवराजमतर्क,

(८) (२)फाल्गुनस्य; स (for (अ)थ ); (३) प्रस्थितो; सृतो;यतो (for श्रितो ),

मातलिः

भो भोः शक्रात्मज श्रीमाञ्छक्रस्त्वां द्रष्टुमिच्छति । **
आरोहतु भवाञ्छीघ्रं रथमिन्द्रस्य सम्मतम् ।। ११ ।।(९)

आह माममरश्रेष्ठः पिता तव शतक्रतुः । **
कुन्तीसुतमिह प्राप्तं पश्यन्तु त्रिदशालयाः ।। १२ ।।(१०)

एष शक्रः परिवृतो देवैरृषिगणैस्तथा । **
गन्धर्वैरप्सरोभिश्च त्वां दिदृक्षुः प्रतीक्षते ।। १३ ।।(११)

अस्माल्लोकाद्देवलोकं पाकशासनशासनात् । **
आरोह त्वं मया सार्धं लब्धास्त्रः पुनरेष्यसि ।। १४ ।।(१२)

अर्जुनः

मातले गच्छ शीघ्रं त्वमारोहस्व रथोत्तमम् । **
राजसूयाश्वमेधानां शतैरपि सुदुर्लभम् ।। १५ ।।(१३)

पार्थिवैः सुमहाभागैर्यज्वभिर्भूरिदक्षिणैः । **
दैवतैर्वा समारोढुं दानवैर्वा रथोत्तमम् ।। १६ ।। (१४)

नातप्ततपसा शक्य एष दिव्यो महारथः । **
द्रष्टुं वाप्यथवा स्प्रष्टुमारोढुं कुत एव च ।। १७ ।।(१५)

त्वयि प्रतिष्ठिते साधो रथस्थे स्थिरवाजिनि । **

---

(९) मातलिरु ( मातलिः); (१) श्रीमान् ; श्रीमन्,

(१०) (१)त्वाम् (for माम्); (४) त्रिदिवालयाः,

(११)(२) सर्षिं (for ऋषिं ),

(१२) (३)आरोहस्व; हय (for ह त्वं),

(१३)(१)शीघ्र त्वम् (for शीघ्रं त्वम् ); (२)आरोह रथमुत्तमं;त्वमारोह रथोत्तमं,

(१४)(३)दानवैश्च; देवतैर्वा०; दुरारोहं (for समारोढुं); (४) दैवतैर्वा;महारथं (थैः),

(१५)(१)शक्यम्; (२) ह्येष (for एष) ; रथोत्तमः (for महा ); (४) च; वा; ह (for तु ),

पश्चादहमथारोक्ष्ये सुकृती सत्पथं यथा ॥ १८ ॥[१]

वैशम्पायनः

तस्य तद्वचनं श्रुत्वा मातलिः शक्रसारथिः । **
आरुरोह रथं शीघ्रं हयान्येमे च रश्मिभिः ॥ १९ ॥[२]

ततोऽर्जुनो हृष्टमना गङ्गायामाप्लुतः शुचिः । **
जजाप जप्यं कौन्तेयो विधिवत्कुरुनन्दनः ॥ २० ॥

ततः पितन्यथान्यायं तर्पयित्वा यथाविधि । **
मन्दरं शैलराजं तमाप्रष्टुमुपचक्रमे ॥ २१ ॥[३]

लक्षालङ्कारः- मन्दरं शैलराजम् इत्यत्र मन्देन पुण्यजलेनसमयति ऋष्यादीनिति मन्दरः, मन्देन वायुना राति वृक्षादीनिति मन्दरः, मन्दान् पशुपक्ष्यादीनपि रमयतीति वा मन्दर इन्द्रकीलः ।

साधूनां पुण्यशीलानां मुनीनां पुण्यकर्मणाम् । **
त्वं सदा संश्रयः शैल स्वर्गमार्गाभिकाङ्क्षिणाम् ॥ २२ ॥[४]

त्वत्प्रसादात्सदा शैल ब्राह्मणाः क्षत्रिया विशः । **
स्वर्गं प्राप्ताश्चरन्ति स्म देवैः सह गतव्यथाः ॥ २३ ॥[५]

०१.प्राप्नुवन्ति गतिं पुण्यामिह तस्त्वा परं तपः ।

अद्रिराज महाशैल मुनिसंश्रय तीर्थवन् । **
गच्छाम्यामन्त्रयामि त्वां सुखमस्म्युषितस्त्वयि ॥ २४ ॥[६]

---

(१) (२)स्थितवाजिनि; रथवाहिनि; रथस्ते धृतवाहिनः; (४) सत्फलं (for सत्पथं ); विमानं सुकृती यथा,
(२) (४)संयम्य; योज्यैव; जग्राह (for येमे च ),
(३) (१)पितृन्पूज्य (for ततः पितृन् ); (२) च देवताः (for यथा ); (३)शैलराजानं (for राजं तं) ,
(४) (१)पुण्य (for धर्म );
(५) (१)महा (for सदा); अपि (for सह );
(६) (२)मुनिसंश्रित ; सिर्थवत्;,वान्; (३) (आ) मन्त्रयिस्वा त्वा (for त्वां); (४) अभ्युषितस् (for अस्म्यु ),

तव सानूनि कुञ्जाश्च नद्यः प्रस्रवणानि च । **
तीर्थानि च सुपुण्यानि मया दृष्टान्यनेकशः ॥ २५ ॥

फलानि च सुगन्धीनि भक्षितानि ततस्ततः । **
सुसुगन्धाश्च वार्योघास्त्वच्छरीरविनिःसृताः ।
अमृतास्वादनीया मे पीताः प्रस्रवणोदकाः ॥ २६ ॥[१]

शिशुर्यथा पितुश्चाङ्के सुखं शेते तटे तथा।
मया तवाङ्के च प्रभो ललितं नगसत्तम ॥ २७ ॥[२]

लक्षालङ्कारः- ललितं नगसत्तमम इत्यत्र ललितं यथा भवति तथा ।

अप्सरोगपसङ्कीर्णे ब्रह्मघोषानुनादिते।
सुखमस्म्युषितः शैल तव सानुषु नित्यदा ॥ २८ ॥[३]

वैशम्पायनः

एवमुक्त्वार्जुनः शैलमामन्त्र्य परवीरहा । **
आरुरोह रथं दिव्यं द्योतयन्निव भास्करः ॥ २९ ॥[४]

स तेनादित्यरूपेण दिव्येनाद्भुतकर्मणा । **
ऊर्ध्वमाचक्रमे धीमान्प्रहृष्टः कुरुनन्दनः ॥ ३० ॥[५]

सोऽदर्शनपथं यातो मर्त्यानां धर्मचारिणाम् । **
ददर्शाद्भुतरूपाणि विमानानि सहस्रशः ॥ ३१ ॥[६]

---

(१)(३) त्वच्छरीराद् (for त्वच्छरिर );०(५)अमृतस्वादनिया मे; अमृतं स्वादनीयं मे अमृतास्वाद तदृशाः;
(६)पीतः प्रस्रवणोदकं; पीताः ( शैल ); प्रस्रवणोद्भवाः, ,
(२) (१)मातुर् (for पितुर् ); चाङ्गे; चाङ्के; त्वङ्के (for अङ्के );नघ (for नग )सुखं शेते तटे तथा; (३)मया (for तथा ); लुलितं; शयितं;(४)महा (for मया )
(३) (२)घोषनिनादिते; (३)अध्यु (for अस्म्यु);(४) सानूनि (for सानुषु ); सुसुखे तव सानुनि,),
(४)(१) क०ख०-भास्करः; (२)आमन्त्रयत शत्रुहा ( ०हन् )
(५)(२)बहु; दिव्यं; नरं (for (आ) दित्य ) ,
(६)(१)गत्वा; यातो;, धृत्वा (for यात्वा ); (२)धर्म (for भूमि ) ,

न तत्र सूर्यः सोमो वा द्योतते न च पावकः । **
स्वयैव प्रभया तत्र द्योतन्ते पुण्यलब्धया ।। ३२ ।।[१]

तारारूपाणि यानीह दृश्यन्ते द्युतिमन्ति वै । **
दीपवद्विप्रकृष्टत्वात्तनूनि सुमहान्त्यपि ।। ३३ ।।[२]

तानि तत्र प्रभास्वन्ति रूपवन्ति च पाण्डवः । **
ददर्श स्वेषु धिष्ण्येषु दीप्तिमन्तः स्वयार्चिषा ।। ३४ ।।[३]

तत्र राजर्षयः सिद्धा वीराश्च निहता युधि । **
तपसा च जितं स्वर्गं सम्पेतुः शतसङ्घशः ।। ३५ ।।[४]

गन्धर्वाणां सहस्राणि सूर्यज्वलिततेजसाम् । **
गुह्यकानामृषीणां च तथैवाप्सरसां गणान् ।। ३६ ।।[५]

लोकानात्मप्रभान्पश्यन्फाल्गुनो विस्मयान्वितः । **
पप्रच्छ मातलिं प्रीत्या स चाप्येनमुवाच ह ।। ३७ ।।[६]

एते सुकृतिनः पार्थ स्वेषु धिष्ण्येष्ववस्थिताः । **
तान्दृष्टवानसि विभो तारारूपाणि भूतले ।। ३८ ।।[७]

वैशम्पायनः

ततोऽपश्यत्स्थितं द्वारि शुभं वैजयिनं गजम् । **

---

(१)(१) क०ख०न तत्र सूर्यस्सकोमो वा, सोमः; ( म ) सूर्यो; सोमसूर्यौ; (२) द्योतेते; नोत (for न च); युक्ता ,(for तत्र ); लक्षणाः (for लब्धया ) ,

(२) (३)आकाशे; अत्यन्त०;,द्वीपवद्; (४) तनूनि; उडूनि (for अणूनि ),

(३)(१)विमानानि;, सुभास्वन्ति; च भास्वन्ति; (२) स्म (for च ); (४)द्युतिमन्ति; दीप्तिमन्तः,

(४)(३)तापसाशू; स्वर्जितस्वर्गाः; च जितं स्वर्गं;, चार्जितं स्वर्गं, (४)समुपेताश्च सं,

(५)(२)ज्वलित०; (४)गणान्,

(६)(२)फाल्गुनो; (३) सम्पूज्य; अपृच्छन् (for पप्रच्छ ); (४)चास्येदम् (for चाप्येनम्),

(७)(२)विष्ठिता; (अ)वस्थिताः ); (३)तान् (for यान् ); दृष्टवानसि यानि; (न्हि )त्वं,

ऐरावतं चतुर्दन्तं कैलासमिव शृङ्गिणम् ।। ३९ ।।[१]

स सिद्धमार्गमाक्रम्य कुरुपाण्डवसत्तमः ।

व्यरोचत यथापूर्वं मान्धाता पार्थिवोत्तमः ।। ४० ।।

अभिचक्राम लोकान्स राज्ञां राजीवलोचनः ।[२]

०२. एवं स सङ्क्रमंस्तत्र स्वर्गलोके महायशाः । [३]

ततो ददर्श शक्रस्य पुरींताममरावतीम् ।। ४१ ।।

अस्मिन् इन्द्रलोकाभिगमनपर्वणि ३७ अध्याये ४१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि इन्द्रलोकाभिगमनपर्वणि सप्तत्रिंशोऽध्यायः ।। ३७ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

पूजितो दैवतैः सर्वैरिन्द्रेणैव निवेशितः ।

तेन सार्द्धमुपासीदत् तस्मिन्नैन्द्रे वरासने ।। १४२ ।।

महाभारते- वनपर्वणि ३८ अध्यायः

# 03- 01- 038
# अष्टत्रिंशोऽध्यायः

इन्द्रेणार्जुनस्य सबहुमानं स्वर्गासनारोपणम् ।। अत्रार्जुनस्य देवराजेन सह साक्षात्कारमिन्द्रसभायां तस्य समादरश्च ।।

वैशम्पायनः

ददर्श स पुरीं रम्यां सिद्धचारणसेविताम् । **

---

(१) (२)शुभं; स्थिरं; मत्तं (for सितं); विजयिनं; वैजयिकं;, (३)ऐरावणं; चतुर्दंष्ट्रं; (४)स्तूयमानं महर्षिभिः

(२)(१)अभि;, अनु (for अति );

(३) (४)नाग्ना (for ताम ),

पुरन्दरं सर्वर्तुकुसुमैः पुण्यैः पादपैरुपशोभिताम् ।। १ ।।[(१)]

तत्र सौगन्धिकानां च पुष्पाणां पुण्यगन्धिनाम् । **

उद्धीज्यमानो मिश्रेण वायुना पुण्यगन्धिना ।। २ ।।[(२)]

नन्दनं च वनं दिव्यमप्सरोगणसेवितम् । **

ददर्श दिव्यकुसुमैराह्वयद्भिरिव द्रुमैः ।। ३ ।।[(३)]

नातप्ततपसा शक्यो द्रष्टुं नानाहिताग्निना । **

स लोकः पुण्यकर्तणां नापि युद्धे पराङ्मुखैः ।। ४ ।।[(४)]

नायज्वभिर्नाव्रतिकैर्न वेदश्रुतिवर्जितैः । **

नानाप्लुताङ्गैस्तीर्थेषु यज्ञदानबहिष्कृतैः ।। ५ ।।[(५)]

नापि यज्ञहनैः क्षुद्रैर्द्रष्टुं शक्यः कथञ्चन । **

पानपैर्गुरुतल्पैश्च मांसादैर्वा दुरात्मभिः ।। ६ ।।[(६)]

स तद्दिव्यं वनं पश्यन्दिव्यगीतनिनादितम् । **

प्रविवेश महाबाहुः शक्रस्य दयितां पुरीम् ।। ७ ।।[(७)]

तत्र देवविमानानि कामगानि सहस्रशः । **

---

(१) (१)स ददर्श,

(२)(१)च (for स); (२) पुष्पाणां (for द्रुमाणां ); (३)उद्धीज्यमानो; उदीक्ष्यमाणो; उपसेव्यमानो;, तद्वीज्य;, तान्वीज्य,

(३) (१)पुण्यम् (for दिव्यम् ); (३) दिव्यविहगैर्,

(४) (१)शक्यं; शक्तं; (२)अ०द्रष्टुं नानाहिताग्नाना, नापि चानाहिता; (३) पुण्यकृति०( कीर्ती )नां; स हि लोक ,पुण्यकृतां; (४) युद्धे (for युद्ध ),

(५)(१)नानृतिकैर् ; नाव्रतिकैर्; नावृतिकर्; (२)वेदश्रुतिविवर्जितैः (र्जकैः); न वै श्रुतिविवर्जितैः; (३) नानाप्लुतैश्च (for ०प्लुतङ्गौस् ); सर्वे (for तीर्थे ); नाप्लुतागैः सुतीर्थेषु,

(६) (१)यज्ञहविः; हरैः; जिह्मैरपि; यज्ञहभिः; हलिः(for हनैः); यज्ञहरैरित्यपपाठः; क्रुद्धैः; द्रष्टुं (for क्षुद्रैः ); (२) शक्यं (for शक्यो) द्रष्टुं; द्रष्टुं शक्यं; क्षुद्रैः; शक्यः;, द्रष्टु यज्ञः; (३) न पापैर्;,मानसैर्; सुरापैद् (for पानपैर् ); (४) च;, न (for वा ),

(७) (२)समन्वितं; विना दितं; विभावितं,

संस्थितान्यभियातानि ददर्शायुतशस्तदा ॥ ८ ॥[१]

संस्तूयमानो गन्धर्वैरप्सरोभिश्च पाण्डवः । **
पुष्पगन्धवहैः पुण्यैर्वायुभिश्चानुवीजितः ॥ ९ ॥

०३. पुष्पोत्करैः शुभैः सोऽथ कीर्यमाणो नरर्षभः ।

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । **
हृष्टाः सम्पूजयामासुः पार्थमक्लिष्टकारिणम् ॥ १० ॥

आशीर्वादैः स्तूयमानो दिव्यवादित्रनिःस्वनैः । **
प्रतिपेदे महाबाहुः शङ्खदुन्दुभिनादितम् ॥ ११ ॥

नक्षत्रमार्गं विपुलं सुरवीथीति विश्रुतम् । **
इन्द्राज्ञया ययौ पार्थः स्तूयमानः समन्ततः ॥ १२ ॥

तत्र साध्यास्तथा विश्वे मरुतोऽथाश्विनौ तथा । **
आदित्या वसवो रुद्रास्तथा ब्रह्मर्षयोऽमलाः ॥ १३ ॥[२]

राजर्षयश्च बहवो दिलीपप्रमुखा नृपाः । **
तुम्बुरुर्नारदश्चैव गन्धर्वौ च हाहाहूहूः ॥ १४ ॥[३]

तान्स सर्वान्समागम्य विधिवत्कुरुनन्दनः । **
ततोऽपश्यद्देवराजं शतक्रतुमरिन्दमः ॥ १५ ॥[४]

ततः पार्थो महाबाहुरवतीर्य रथोत्तमात् । **
ददर्श साक्षाद्देवेशं पितरं पाकशासनम् ॥ १६ ॥[५]

---

(१)(३)तान्याभिजातानि; स्थितान्यपि ( भि ) ०प्रयातानि; (४)तथा (for तदा) ददर्शायुतशोर्जुनः,
(२) (२)तथा (for अपि );
(३) (१)बहुशो;, तत्रासन् (for बहवो ); (२) तथा (for नृपाः); दिलीपनहुषादयः;(३)तुम्बरुर्; (४) गन्धर्वाश्च; हाहाहुहू;
(४)(१)सर्वान् ; स; तांश्च सर्वान्समा;तान्स चान्यन्त्समागत्य; (३) तत्रा (for ,ततो ); (४) अरिन्दमः,
(५) (३)देवेशं (for देवेन्द्रं );

पाण्डुरेणातपत्रेण हेमदण्डेन चारुणा । **
दिव्यगन्धाधिवासेन व्यजनेन विधूयता ॥ १७ ॥[१]

विश्वावसुप्रभृतिभिर्गन्धर्वैः स्तुतिवन्दनैः । **
स्तूयमानं द्विजाग्र्यैश्च ऋग्यजुःसामसम्भवैः ॥ १८ ॥[२]

ततोऽभिगम्य कौन्तेयः शिरसाभ्यगमद्बली । **
स चैनं वृत्तपीनाभ्यां बाहुभ्यां प्रत्यगृह्णत ॥ १९ ॥[३]

ततः शक्रासने पुण्ये देवर्षिगणसेविते । **
शक्रः पाणौ गृहीत्वैनमुपावेशयदन्तिके ॥ २० ॥[४]

मूर्ध्नि चैनमुपाघ्राय देवेन्द्रः परवीरहा । **
अङ्कमारोपयामास प्रश्रयावनतं तदा ॥ २१ ॥[५]

सहस्राक्षनियोगात्स पार्थः शक्रासनं गतः । **
अध्यक्रामदमेयात्मा द्वितीय इव वासवः ॥ २२ ॥[६]

ततः प्रेम्णा वृत्रशत्रुरर्जुनस्य शुभं मुखम् । **
पस्पर्श पुण्यगन्धेन करेण परिसान्त्वयन् ॥ २३ ॥[७]

०४.दिव्यकान्तकराहूतवालव्यजनमारुतैः

---

(१) (१)पाण्डरेणा; (३)दिव्यगन्धादिवासेन; दिव्यं गन्धाधि;,दिव्यगन्धसु०; दिव्यगन्धाम्बु; (४) च धूयता; अ पि वीजितं (for विधू );

(२) (२)स्तुतिवन्दिभिः; वादिभिः; बन्दिकैः; (४) सम्भवैः,

(३) (२)अ भ्यगमद्; न्यपतद्; प्राणमद्; वशी (for बली ); वृत्तपीनाभ्यां (for अनुवृत्ता ) बाहु (for भुजा ); भुजाभ्यां पीनवृत्ताभ्यां प्रत्यगृह्णात्स चापि तं,

(४) (१)तत्र (for ततः ); (२) देवर्षिगणसेविते (पूजिते); देवराजर्षिसेविते,

(५) (२) कःख०देवेन्द्रः कपरवीरहा,परिरभ्य दृढं हरिः,

(६) (१)च (for स ); (२)गतः; तथा (for तदा); (३)कःख०आरुरुक्षुर, अध्याक्रामद्; यथाक्रामद्; अभ्या; अध्याक्रमद्;,प्राध्यक्रामद्; आरुरुक्षुर्;,समारुक्षद्;आरुरोहाप्रमेयात्मा,

(७) (१)प्रेम्णाग्रतः शक्रः; (२) शुभं ; मुखं,

प्रमार्जमानः शनकैर्बाहू चास्यायतौ शुभौ । **
ज्याशरक्षेपकठिनौ स्तम्भाविव हिरण्मयौ ।। २४ ।।(१)

वज्रग्रहणचिह्नेन करेण परिसान्त्वयन् । **
मुहुर्मुहुर्वज्रधरो बाहू चास्फोटयच्छनैः ।। २५ ।।(२)

स्मयन्निव गुडाकेशं प्रेक्षमाणः सहस्रदृक् । **
हर्षेणोत्फुल्लनयनो न चातृप्यत वृत्रहा ।। २६ ।।(३)

एकासनोपविष्टौ तौ शोभयाञ्चक्रतुः सभाम् । **
सूर्याचन्द्रमसौ व्योम चतुर्दश्यामिवोदितौ ।। २७ ।।(४)

तत्र स्म गाथा गायन्ति साम्ना परमफल्गुना । **
गन्धर्वास्तुम्बुरुश्रेष्ठाः कुशला गीतसामसु ।। २८ ।।

लक्षालङ्कारः- साम्ना परमफल्गुना इत्यत्र परं केवलं अफल्गुला श्रेष्ठेन साम्नैव गाथा गायन्ति, तुम्बुरुः श्रेष्ठो येषां ते ।

घृताची मेनका रम्भा पूर्वचित्तिः स्वयम्प्रभा । **
उर्वशी मिश्रकेशी च दण्डगौरी वरूथिनी ।। २९ ।।(५)

गोपाली सहजन्या च कुम्भयोनिः प्रजागरा । **
चित्रसेना चित्रलेखा सहा च मधुरस्वरा ।। ३० ।।(६)

---

(१) (१)प्रमार्जमानः; परिमार्जंश्च; परिमृज्याथ; परिमार्जयंश्च; (२) क०बहुज्याधानतञ्छनौ। ख०बाहू ज्यधातलोहितौ ।, बाहू ज्याघातलाञ्छनैः; (३) ज्याशरा; आसना; शरज्या,
(२) (२)पंरिसान्त्वयन् (for बलसूदनः); (४) संस्मारयन्;, संस्पर्श; चास्फोट०; सन्तोल; संस्कोट; शुभौ (for शनैः),
(३) (१)स्वयमेव (for स्मयन्निव ); (३) विस्मयो; (४) चातर्पत; ततर्प च (for चातृप्यत ); नातृप्यद्बलवृत्रहा,
(४) (२)शोभयामासतुः; (३) व्योम (for व्योम्नि०); (४)पौर्णमास्यामिवो,
(५) (२)विप्र (for पूर्व ); (३) ज्योत्स्त्र; गौरि दण्डगौरी।; ताक्ष्र्या गौरी; दण्डा गौरी; वपुर्गौरी;, सुतस्तु गौरी; धूम्रगौरी; धूम्रकेशी (for डुण्डु ); विभावरी (for वरु ),
(६) (२)पूर्वचित्तिः; विप्रचित्तिः (for कुम्भ ); तथैव च;, प्रभावनी; सहामता; प्रभाकरी (for प्रजा ); (४)

एताश्चान्याश्च ननृतुस्तत्र तत्र सहस्रशः । **
चित्तप्रसादने युक्ताः सिद्धानां पद्मलोचनाः ।। ३१ ।।[१]

०५.चित्तप्रमथनार्थाय पुंसां च विधिना कृताः

महाकटितटश्रोण्यः कम्पमानैः पयोधरैः । **
कटाक्षहावमाधुर्यैश्चेतोबुद्धिमनोहरैः ।। ३२ ।।[२]

अस्मिन् इन्द्रलोकाभिगमनपर्वणि ३८अध्याये ३२ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां
वनपर्वणि इन्द्रलोकाभिगमनपर्वणि इन्द्रसभादर्शने अष्टत्रिंशोऽध्यायः ।। ३८ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

प्रीत्या समाश्लिष्य कुरुप्रवीरं शक्रो द्वितीयां तनुमात्मनः सः ।
ईक्षन् मुखं तस्य मुमोद सोऽपि ह्युवास तस्मिन् वत्सरान् पञ्च लोके ।। १४३ ।।
अस्त्राणि तस्मा अदिशत् स वासवो महान्ति दिव्यानि तदोर्वशी तम् ।
सम्प्राप्य भावेन तु मानुषेण माता कुलस्येति निराकृताऽभूत् ।। १४४ ।।
षण्ढो भवेत्येव तयाऽभिशप्ते पार्थे शक्रोऽनुग्रहं तस्य चादात् ।
संवत्सरं षण्ढरूपी चरस्व न षण्ढता ते भवतीति धृष्णुः ।। १४५ ।।

महाभारते- वनपर्वणि ३९ अध्यायः

## 03- 01- 039

# एकोनचत्वारिंशोऽध्यायः

मधुरस्वनां,
(१) (२)सहस्रशः; सुविस्मिताः; शुचिस्मिताः (for वरा ); चित्तप्रसादने
(२) (३)कटाक्षभावमधुरैश्; रूपयौवनमाधुर्यैश्; कटाक्षभाव; (४) मनोहरैः

चित्रसेनोर्वशीसंवादः ।। १ ।।

वैशम्पायनः

आदावेवाथ तं शक्रश्चित्रसेनं रहोऽब्रवीत् । **
पार्थस्य चक्षुरुर्वश्यां सक्तं विज्ञाय वासवः ।। १ ।।
गन्धर्वराज गच्छाद्य प्रहितोऽप्सरसां वराम् । **
उर्वशीं पुरुषव्याघ्र सोपातिष्ठतु फाल्गुनम् ।। २ ।।
यथार्चितो गृहीतास्त्रो विद्यया मन्नियोगतः । **
तथा त्वया विधातव्यं स्त्रीषु सङ्गविशारदः ।। ३ ।।
एवमुक्तस्तथेत्युक्त्वा सोऽनुज्ञां प्राप्य वासवात् । **
गन्धर्वराजोऽप्सरसमभ्यगादुर्वशीं वराम् ।। ५ ।।
तां दृष्ट्वाऽविदिते हृष्टः स्वागतेनार्चितस्तया । **
सुखासीनः सुखासीनां स्मितपूर्वं वचोऽब्रवीत् ।। ५ ।।

लक्षालङ्कारः-तां दृष्ट्वाऽविदिते हृष्ट इत्यत्र अविदिते एकान्ते ।

विदितं तेऽस्तु सुश्रोणि प्रहितोऽहमिहागतः । **
त्रिदिवस्यैकराजेन त्वत्प्रसादाभिनन्दिना ।। ६ ।।
यस्तु देवमनुष्येषु प्रख्यातः सहजैर्गुणैः ।
श्रिया शीलेन रूपेण व्रतेन च दमेन च । **
प्रख्यातो बलवीर्येण सम्मतः प्रतिभानवान् ।। ८ ।।
वर्चस्वी तेजसा युक्तः क्षमावान्वीतमत्सरः । **
साङ्गोपनिषदान्वेदांश्चतुराख्यानपञ्चमान् ।। ९ ।।
योऽधीते गुरुशुश्रूषां मेधां चाष्टगुणाश्रयाम् । **

ब्रह्मचर्येण दाक्ष्येण प्रसवैर्वयसापि च ।। १० ।।

एको वै रक्षिता चैव त्रिदिवं मघवानिव । **

अकत्थनो मानयिता स्थूललक्ष्यः प्रियंवदः ।। ११ ।।

सुहृदश्चान्नपानेन विविधेनाभिवर्षति । **

सत्यवाक्पूजितो वक्ता रूपवाननहङ्कृतः ।। १२ ।।

भक्तानुकम्पी कान्तश्च प्रियश्च स्थिरसङ्गरः । **

प्रार्थनीयैर्गुणगणैर्महेन्द्रवरुणोपमः ।। १३ ।।

विदितस्तेऽर्जुनो वीरः स स्वर्गफलमाप्नुयात्।

त्वं तु शक्राभ्यनुज्ञातः पादावद्य प्रपद्यताम् ।[१] **

तदेवं कुरु कल्याणि प्रसन्नस्त्वां धनञ्जयः ।। १४ ।।

लक्षालङ्कारः- पादावद्य प्रपद्यतां इत्यत्र भवती तस्य पादौ प्रपाद्यतां गच्छत् ।

एवमुक्ता स्मितं कृत्वा सम्मानं बहु मन्य च । **

प्रत्युवाचोर्वशी प्रीता चित्रसेनमनिन्दिता ।। १५ ।।

यस्त्वस्य कथितः सत्यो गुणोद्देशस्त्वया मम । **

तं श्रुत्वाव्यथयं पुंसो वृणुयां किमतोऽर्जुनम् ।। १६ ।।

महेन्द्रस्य नियोगेन त्वत्तः सम्प्रणयेन च ।*

तस्य चाहं गुणौघेन फाल्गुने जातमन्मथा।

गच्छ त्वं हि यथाकाममागमिष्याम्यहं सुखम्।

वैशम्पायनः

ततो विसृज्य गन्धर्वं कृतकृत्यं शुचिस्मिता । **

---

(१) तस्य पादान्तिकं व्रज

उर्वशी चाकरोत्स्नानं पार्थदर्शनलालसा ।। १८ ।।

स्नानालङ्करलौपथ्यैर्गन्धमाल्यैश्च शोभनैः । **

धनजयस्य रूपेण शरैर्मन्मथचोदितैः ।। १९।।

लक्षालङ्कारः- स्नानालङ्कारैपथ्यैः इत्यत्र 'आकल्पवेषौ लैपथ्यम् ' इत्भिदानात् अलङ्कारैः वस्त्रालङ्कारैः नैपथ्यैः भूषणैः ।

अतिविद्धेन मनसा मन्मथेन प्रदीपिता । **

दिव्यास्तरणसंस्तीर्णे विस्तीर्णे शयनोत्तमे ।। २० ।।

चित्तसङ्कल्पभावेन सुचित्तानन्यमानसा । **

मनोरथेन सम्प्राप्तं रमत्येनं हि फाल्गुनम् ।। २१ ।।

निर्गम्य चन्द्रोदयने विगाढे रजनीमुखे । **

प्रस्थिता सा पृथुश्रोणी पार्थस्य भवनं प्रति ।। २२ ।।

मृदुकुञ्चितदीर्घेण कुमुदोत्करधारिणा । **

केशहस्तेन ललना जगामाथ विराजती ।। ६ ।।

भ्रूक्षेपालापमाधुर्यैः कान्त्या सौम्यतयापि च । **

शशिनं वक्त्रचन्द्रेण साऽऽह्वयन्तीव गच्छति ।। ७ ।।

दिव्याङ्गरागौ सुमुखौ दिव्यचन्दनरूषितौ । **

गच्छन्त्या हाररुचिरौ स्तनौ तस्या ववल्गतुः ।। ८ ।।

लक्षालङ्कारः- ववल्गतुः चकम्पाते ।

स्तनोद्वहनसङ्क्षोभान्नम्यमाना पदे पदे । **

त्रिवलीदामचित्रेण मध्येनातीवशोभिना ।। ९ ।।

अधो भूधरविस्तीर्णं नितम्बोन्नतपीवरम् । **

मन्मथायतनं शुभ्रं रसनादामभूषितम् ।। १० ।।

ऋषीणामपि दिव्यानां मनोव्याघातकारणम् । **

सूक्ष्मवस्त्रधरं रेजे जघनं निरवद्यवत् ।। ११ ।।

गूढगुल्फशिरौ पादौ ताम्रायततलाङ्गुली । **

कूर्मपृष्ठोन्नतौ चास्याः शोभेते किङ्किणीकिणौ ।। १२ ।।

लक्षालङ्कारः- गूढगुल्फशिरौ पादौ इत्यत्र 'नाडी तु धमनिः शिरा' इत्यभिधानात् गूढा गुल्फयोः शिरा नाढी ययोस्तौ । किङ्किणीकिणौ इत्यत्र किङ्किणीनां सङ्घर्षणात् व्रणाकाररक्तरेखावन्तौ ।

शीधुपानेन चाल्पेन तुष्टा च मदनेन च । **

विलासनैश्च विविधैः प्रेक्षणीयतराभवत् ।। १३ ।।

लक्षालङ्कारः- शीधुपानेन इत्यत्र 'मैरेयमासवः शीधुः' इत्यभिधानात् अल्पेन शीधुपानेन मद्यपानेन ।

सिद्धचारणगन्धर्वैः सा प्रयाता विलासिनी । **

बह्वाश्चर्येऽपि वै स्वर्गे दर्शनीयतमाकृतिः ।। १४ ।।

सुसूक्ष्मेणोत्तरीयेण मेघवर्णेन राजता । **

तनुरभ्रावृता व्योम्नि चन्द्रलेखेव गच्छति ।। १५ ।।

ततः प्राप्ता क्षणेनैव मनःपवनगामिनी । **

भवनं पाण्डुपुत्रस्य फाल्गुनस्य शुचिस्मिता ।। १६ ।।

तत्र द्वारमनुप्राप्ता द्वारस्थैश्च निवेदिता । **

अर्जुनस्य नरश्रेष्ठ उर्वशी शुभलोचना ।। १७ ।।

उपातिष्ठत तद्वेश्म निर्मलं सुमनोहरम् । **

स शङ्कितमना राजन्प्रत्युद्गच्छत तां निशि ।। १८ ।।

दृष्ट्वैव चोर्वशीं पार्थो लज्जासंवृतलोचनः । **
तदाभिवादनं कृत्वा गुरुपूजां प्रयुक्तवान् ।। १९ ।।

अर्जुनः

अभिवादये त्वां शिरसा प्रवराप्सरसां वरे । **
किमाज्ञापयसे देवि प्रेष्यस्तेऽहमुपस्थितः ।। २० ।।
फाल्गुनस्य वचः श्रुत्वा गतसञ्ज्ञा तदोर्वशी । **
गन्धर्ववचनं सर्वं श्रावयामास तं तदा ।। २१ ।।

उर्वशी

यथा मे चित्रसेनेन कथितं मनुजोत्तम । **
तत्तेऽहं सम्प्रवक्ष्यामि यथा चाहमिहागता ।। २२ ।।
उपस्थाने महेन्द्रस्य वर्तमाने मनोरमे । **
तवागमनतो वृत्ते स्वर्गस्य परमोत्सवे ।। २३ ।।
रुद्राणां चैव सान्निध्यमादित्यानां च सर्वशः । **
समागमेऽश्विनोश्चैव वसूनां च नरोत्तम ।। २४ ।।
महर्षीणां च सङ्घेषु राजर्षिप्रवरेषु च । **
सिद्धचारणयक्षेषु महोरगगणेषु च ।। २५ ।।
उपविष्टेषु सर्वेषु स्थानमानप्रभावतः । **
ऋद्ध्या प्रज्वलमानेषु अग्निसोमार्कवर्ष्मसु ।। २६ ।।
वीणासु वाद्यमानासु गन्धर्वैः शक्रनन्दन । **
दिव्ये मनोरमे गेये प्रवृत्ते पृथुलोचन ।। २७ ।।
सर्वाप्सरस्समस्यासु प्रनृत्तासु कुरूद्वह । **

त्वं किलानिमिषः पार्थ मामेकां तत्र दृष्टवान् ॥ २८ ॥

लक्षालङ्कारः- सर्वाप्सरस्समस्यासु इत्यत्र 'समस्या तु समासार्था' इति वचनात् सर्वाप्सरसां गूढार्थकमिथोवार्तासु ।

तत्र चावभृथे तस्मिन्नुपस्थाने दिवौकसाम् । **
तव पित्राभ्यनुज्ञाता गताः स्वं स्वं गृहं सुराः ॥ २९ ॥
तथैवाप्सरसः सर्वा विशिष्टाः स्वगृहं गताः । **
अपि चान्याश्च शत्रुघ्न तव पित्रा विसर्जिताः ॥ ३० ॥
ततः शक्रेण सन्दिष्टश्चित्रसेनो ममान्तिकम् । **
प्राप्तः कमलपत्राक्ष स च मामब्रवीदथ ॥ ३१ ॥
त्वत्कृतेऽहं सुरेशेन प्रेषितो वरवर्णिनि । **
प्रियं कुरु महेन्द्रस्य मम चैवात्मनश्च ह ॥ ३२ ॥
शक्रतुल्यं रणे शूरं सदौदार्यगुणान्वितम् । **
पार्थं प्रार्थय सुश्रोणि त्वमित्येवं तदाब्रवीत् ॥ ३३ ॥
ततोऽहं समनुज्ञाता तेन पित्रा च तेऽनघ । **
तवान्तिकमनुप्राप्ता शुश्रूषितुमरिन्दम ॥ ३४ ॥
त्वद्गुणाकृष्टचित्ताहमनङ्गवशमागता । **
चिराभिलषितो वीर ममाप्येष मनोरथः ॥ ३५ ॥

वैशम्पायनः

तां तथा ब्रुवतीं श्रुत्वा भृशं लज्जाऽऽवृतोऽर्जुनः । **
उवाच कर्णौ हस्ताभ्यां पिधाय त्रिदशालये ॥ ३६ ॥

अर्जुनः

दुःश्रुतं मेऽस्तु सुभगे यन्मां वदसि भामिनि । **
गुरुदारैः समाना मे देववारा वरानने ।। ३७ ।।

लक्षालङ्कारः- देववारा वरानने इत्यत्र देवानां वाराः चन्द्रदित्यादयः वाराःसङ्केतिता याभिस्ता देववाराः, देवानां वाराङ्गना इत्यर्थः ।

यथा कुन्ती महाभागा यथेन्द्राणी शची मम । **
तथा त्वमपि कल्याणि नात्र कार्या विचारणा ।। ३८ ।।
यच्चेक्षितासि विस्पष्टं विशेषेण मया शुभे । **
तच्च कारणपूर्वं हि शृणु सत्यं शुचिस्मित ।। ३९ ।।
इयं पौरववंशस्य जननी मुदितेति ह । **
त्वामहं दृष्टवांस्तत्र विज्ञायोत्फुल्ललोचनः ।। ४० ।।
न मामर्हसि कल्याणि अन्यथा ध्यातुमप्सरः । **
गुरोर्गुरुतरा मे त्वं मम त्वं वंशवर्धिनी ।। ४१ ।।

उर्वशी

अनावृताश्च सर्वाः स्म देवराजाभिनन्दन । **
गुरुस्थाने न मां वीर नियोक्तुं त्वमिहार्हसि ।। ४२ ।।
पिररः सोदसाः पुत्रा नप्तारो वा त्विहागताः । **
तपसा रमयन्त्यस्मान्न च तेषां व्यतिक्रमः ।। ४३ ।।

लक्षालङ्कारः-पितरः सोदराइत्यत्र तपसा इह स्वर्गे आगता इति सम्बन्धः ।

तत्प्रसीद न मामार्तां विसर्जयितुमर्हसि । **
हृच्छयेन च सन्तप्तां भक्तां च भज मानद् ।। ४४ ।।

अर्जुनः

शृणु सत्यं वरारोहे यत्त्वां वक्ष्याम्यनिन्दिते । **
शृण्वन्तु मे दिशश्चैव विदिशश्च सदेवताः ।। ४५ ।।
यथा कुन्ती च माद्री च शची चैव ममानघे । **
तथा च वंशजननी त्वं हि मेऽद्य गरीयसी ।। ४६ ।।
गच्छ मूर्ध्ना प्रपन्नोऽस्मि पादौ ते वरवर्णिनि । **
त्वं हि मे मातृवत्पूज्या रक्ष्योऽहं पुत्रवत्त्वया ।। ४७ ।।

वैशम्पायनः

एवमुक्ता तु पार्थेन उर्वशी क्रोधमूर्च्छिता । **
वेपन्ती भ्रुकुटीवक्रा शशापाथ धनञ्जयम् ।। ४८ ।।

उर्वशी

तव पित्राभ्यनुज्ञातां स्वयं च गृहमागताम् । **
यस्मान्मां नाभिनन्देथाः कामबाणवशङ्गताम् ।। ४९ ।।
तस्मात्त्वं नर्तनः पार्थ स्त्रीमध्ये मानवर्जितः । **
अपुमानिति विख्यातः षण्ढवद्विचरिष्यसि ।। ५० ।।
एवं दत्त्वार्जुने शापं स्फुरदोष्ठी श्वसन्त्यथ । **
पुनः प्रत्यगता क्षिप्रमुर्वशी गृहमात्मनः ।। ५१ ।।
ततोऽर्जुनस्त्वरमाणश्चित्रसेनमरिन्दमः । **
सम्प्राप्य रजनीवृत्तं तदुर्वश्या यथातथम् ।। ५२ ।।
निवेदयामास तदा चित्रसेनाय पाण्डवः । **
तत्र चैवं यथावृत्तं शापं चैव पुनः पुनः ।। ५३ ।।
अवेदयच्च शक्रस्य चित्रसेनोऽपि सर्वशः । **

तत आनाय्य तनयं विविक्ते हरिवाहनः ।। ५४ ।।

सान्त्वयित्वा शुभैर्वाक्यैः स्मयमानोऽभ्यभाषत । **

सुपुत्राद्य पृथा तात त्वया पुत्रेण सत्तम ।। ५५ ।।

ऋषयोऽपि हि धैर्येण जिता वै ते महाभुज ।। ७२ ।।

लक्षालङ्कारः- सुपुत्राऽद्य पृथा तात इत्यत्र त्वया पृथा कुन्ती सुपुत्रा शोभनपुत्रवती ।

यत्तु दत्तवती शापमुर्वशी तव मानद् । **

स चापि तेऽर्थकृत्तात साधकश्च भविष्यति ।। ७३ ।।

अज्ञातवासो वस्तव्यो भवद्भिर्भूतलेऽनघ । **

वर्षे त्रयोदशे वीर तत्र त्वं क्षपयिष्यसि ।। ७४ ।।

तेन नर्तकवेषेण अपुंसाऽऽत्म्येन वै भव । **

वर्षमेकं विहृत्यैव ततः पुंस्त्वमवाप्स्यसि ।। ७५ ।।

लक्षालङ्कारः- अपुंसाऽऽत्म्येन वै भव इत्यभ आत्म्येन आत्मनः सम्बन्धी आत्म्यः पुमान्न भवतीत्यपुमान् तेन अपुंसा वेषेण भव ।

वैशम्पायनः

एवमुक्तस्तु शक्रेण फाल्गुनः परवीरहा । **

मुदं परमिकां लेभे न च शापं व्यचिन्तयत् ।। ७६ ।।

चित्रसेनेन सहितो गन्धर्वेण यशस्विना । **

रेमे स स्वर्गभवने पाण्डुपुत्रो धनञ्जयः ।। ७७ ।।

इदं यः शृणुयाद्वृत्तं नित्यं पाण्डुसुतस्य वै । **

न तस्य कामः कामेषु पापकेषु प्रवर्तते ।। ७८ ।।

इदममरवरात्मजस्य जस्य घोरं शुचि चरितं विनिशम्य फाल्गुनस्य।

व्यातमददम्भरागदोषास्त्रिदिवगताऽ भिरमन्ति मानवेन्द्राः ।। ७९ ।।

**लक्षालङ्कारः- य इदममरवरात्मजस्य इत्यत्र इदं शापाशङ्कनं धृतिं कामजयं च ।**

**अस्मिन् इन्द्रलोकाभिगमनपर्वणि ३९अध्याये ७९ श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि**

**इन्द्रलोकाभिगमनपर्वणि इन्द्रसभादर्शने अष्टात्रिंशोऽध्यायः ।। ३९ ।।**

# ।। चत्वारिंशोध्यायः ।।

शक्रेण स्वर्गमागतं लोमशं प्रति पार्थमहिमानुवर्णनपूर्वकं युधिष्टिराय तद्वृत्तान्तकथनप्रार्थना ।। अर्जुनस्यास्त्रसङ्गीतयोः शिक्षणम् ।।

**वैशम्पायनः**

**ततो देवाः सगन्धर्वाः समादायार्घ्यमुत्तमम् । ****
**शक्रस्य मतमाज्ञाय पार्थमानर्चुरञ्जसा ।। १ ।।(१)**

**पाद्यमाचमनीयं च प्रतिगृह्य नृपात्मजम् । ****
**प्रवेशयामासुरथो पुरन्दरनिवेशनम् ।। २ ।।(२)**

**लक्षालङ्कारः- प्रतिगृह्य प्रतिग्राह्य ।**

**एवं सम्पूजितो जिष्णुरुवास भवने पितुः । ****
**उपशिक्षन्महास्त्राणि ससंहाराणि पाण्डवः ।। ३ ।।(३)**

**शक्रस्य हस्ताद्दयितं वज्रमस्त्रं च दुःसहम् । ****

---

(१) (३) ख०ध०मास्थाय,

(२)(२) गृह्य ; त्मजः(४) क०ख०ग्राह्य,

(३)(३)उपाशिक्ष,

अशनीं च महानादा मेघबर्हणलक्षणाम् ।। ४ ।।[१]

गृहीतास्त्रस्तु कौन्तेयो भ्रातन्सस्मार पाण्डवः । **

पञ्चाब्दमवसत् तत्र पाकशासनशासनात् ।। ५ ।।[२]

ततः शक्रोऽब्रवीत्पार्थं कृतास्त्रं काल आगते । **

नृत्यं गीतं च कौन्तेय चित्रसेनाद् अवाप्नुहि ।। ६ ।।[३]

वादित्रं देवविहितं नृलोके यन्न विद्यते । **

तदाज्ञाय च कौन्तेय श्रेयो वै ते भविष्यति ।। ७ ।।[४]

सखायं प्रददौ चास्य चित्रसेनं पुरन्दरः । **

स तेन सह सङ्गम्य रेमे पार्थो धनञ्जयः ।। ८ ।।[५]

०६. गीतवादित्रनृत्यानि भूय एवादिदेश ह ।
तथापि नालभच्छर्म तपस्वी द्यूतकारितम्।।

०७.दुःशासनवधामर्षी शकुनेः सौबलस्य च ।
ततस्तेनातुलां प्रीतिमुपागम्य क्वचित्क्वचित् ।।

०८.गान्धर्वमतुलं नृत्यं वादित्रं चोपलब्धवान् ।।

०९.स शिक्षितो नृत्यगुणाननेकान्वादित्रगीतार्थगुणांश्च सर्वान्।

१०.न शर्म लेभे परवीरहन्ता भ्रातन्स्मरन्मातरं चैव कुन्तीम्। [६]

११. तदिन्द्रस्तस्य विज्ञाय चिकीर्षितमनुत्तमम्

कदाचिदटमानस्तु महर्षिरुत लोमशः । **

---

(१)(१) स शक्रहस्ताद्; (२) सुदारुणं; च( सु); दुःसहं; सुदुर्जयं; दुरासदं (for दुरु ),(३)अशनिं च नादा; (४)बर्हिणां (,बृंहित; बृंहण)० लक्षणां,

(२) (१) क०ख०पुरन्दरनियोगाच्च पञ्चाब्दमवस् सुखी ।,पञ्चाब्दान्; सुधीः; सुखं (for सुखी );

(३)(१)वाक्यं (for पार्थं ); (३) गीतं नृत्तं; नृत्यं गीतं; गतिं नृत्यं,

(४) (१)वादितं; (३) तदाज्ञाय च ; मदाज्ञया च (for तदर्ज),

(५)(२) क०ख०निरामयः,(४)धनञ्जयः ( निरामयः );

(६)उपलभ्य; उपागम्य; नित्यं (for नृत्यं );गीतानु (for गीतार्थ ),

**जगाम शक्रभवनं पुरन्दरदिदृक्षया** ।। ९।।[१]

**स समेत्य नमस्कृत्य देवराजं महामुनिः । ****
**ददर्शार्धासनगतं पाण्डवं वासवस्य हि** ।। १० ।।[२]

ततः शक्राभ्यनुज्ञात आसने विष्टरोत्तरे । **
**निषसाद द्विजश्रेष्ठः पूज्यमानो महर्षिभिः** ।। ११ ।। [३]

तस्य दृष्ट्वाभवद्बुद्धिः पार्थमिन्द्रासने स्थितम् । **
**कथं नु क्षत्रियः पार्थः शक्रासनमवाप्तवान्** ।। १२ ।।

किं त्वस्य सुकृतं कर्म के लोका वै विनिर्जिताः । **
**स एवमनुसम्प्राप्तः स्थानं देवनमस्कृतम्** ।। १३ ।।[४]

तस्य विज्ञाय सङ्कल्पं शक्रो वृत्रनिषूदनः । **
**लोमशं प्रहसन्वाक्यमिदमाह शचीपतिः** ।। १४ ।। [५]

इन्द्रः

**ब्रह्मर्षे श्रूयतां यत्ते मनसैतद्विवक्षितम् । ****
**नायं केवलमर्त्यो वै मानुषत्वमुपागतः** ।। १५ ।। [६]

**महर्षे मम पुत्रोऽयं कुन्त्यां जातो महाभुजः । ****
**अस्त्रहेतोरिह प्राप्तः कस्माच्चित्कारणान्तरात्** ।। १६ ।।

---

(१)(१)कदाचिद्भगवांस्तत्र,) ; (२) अथ (for उत )
(२)(१)नमस्कृत्वा०; (४) हि तु; च (for ह),
(३) (२)विष्टरोत्तमे; चास्तृतोत्तरे ०घ,
(४) (१)न्वस्य; चास्य (for त्व ); किं वानेन कृतं कर्म; (२)वे के (के वै) (for वा के ); लोका वा के न निर्जिताः; के लोका वै विनि; लोकपाल०,विनिर्जितं; (३) यद् (for य); एनं (for एवं);अनु०(for उप०),
(५) (२)निसूदनः; विमर्दनः; विनाशनः; (४)प्राह (for आह ),
(६) (१)देवर्षे०घ, (for ब्रह्मर्षे ); यत्तन् (,क्य यत्ते ); (२) मनस्येतद्विचिन्तितं; विचेष्टितं; व्ययस्थितं; (३) भूत् ०घ(for वै ); (४) मानुष (for क्षत्रिय),

अहो नैनं भवान्वेत्ति पुराणमृषिसत्तमम् । **
शृणु मे वदतो ब्रह्मन्योऽयं यच्चास्य कारणम् ॥ १७ ॥
नरनारायणौ यौ तौ पुराणावृषिसत्तमौ । **
ताविमावनुजानीहि हृषीकेशधनञ्जयौ ॥ १८ ॥ [१]

वैशम्पायनः

यन्न शक्यं सुरैर्द्रष्टुमृषिभिर्वा महात्मभिः । **
तदाश्रमपदं पुण्यं बदरीनाम विश्रुतम् ॥ १९ ॥ [२]
स निवासोऽभवद्विप्र विष्णोर्जिष्णोस्तथैव च । **
यतः प्रववृते गङ्गा सिद्धचारणसेविता ॥ २० ॥ [३]
तौ मन्नियोगाद्ब्रह्मर्षे क्षितौ जातौ महाद्युती । **
भूमेर्भारावतरणं महावीर्यौ करिष्यतः ॥ २१ ॥
उद्धत्ता ह्यसुराः केचिन्निवातकवचा इति । **
विप्रियेषु स्थितास्माकं वरदानेन मोहिताः ॥ २२ ॥[४]
तर्कयन्ते सुरान्हन्तुं बलदर्पसमन्विताः । **
देवान्न गणयन्त्येते तथा दत्तवरा हि ते ॥ २३ ॥ [५]
पातालवासिनो रौद्रा दनोः पुत्रा महाबलाः । **

---

(१) (१)तौ हि;; यौ तु ; एतौ (for यौ तौ); (३)अनु (for अभि०);
विख्यातौ त्रिषु लोकेषु नरनारायणावृषी ।
कार्यार्थमवतीर्णौ तौ पृथ्वीं पुण्यप्रतिश्रयाम् ॥ क-पाठान्तरम् ।

(४)यतो जातो महाभुजः,

(२) (१)न स शक्यः; ( न शक्यः स) सु;

(३) (३)प्रवर्तते; यतः प्रवृत्ता गङ्गा सा

(४) १)उद्धूता;; उद्धता;; उद्धृत्ता; (३) विप्रियेष्वास्थिता; (४)दर्पिताः (for मोहि),

(५) (१)नर्कयन्ति (२) वीर्यं (for दर्प ); (३) गणयन्त्येते०घ (for यन्त च ) (४) इति (for हि ो),

तथा सर्वदेवनिकाया हि नालं योधयितुं हि तान् ।। २४ ।।[१]

योऽसौ भूमिगतः श्रीमान्विष्णुर्मधुनिषूदनः । **

कपिलो नाम देवोऽसौ भगवानजितो हरिः ।। २५ ।।

येन पूर्वं महात्मानः खनमाना रसातलम् । **

दर्शनादेव निहताः सगरस्यात्मजा विभो ।। २६ ।। [२]

तेन कार्यं महद्ब्रह्मन्नस्माकं द्विजसत्तम । **

पार्थेन च महायुद्धे समेताभ्यामसंशयम् ।। २७ ।। [३]

लक्षालङ्कारः- तेन कार्यं महद्ब्रह्मन् इत्यत्र तेन कपिलात्मककृष्णेन ।

१२. सोऽसुरान्दर्शनादेव शक्तो हन्तुं सहानुगान्।

१३.निवातकवचान्सर्वान्नागानिव महाह्रदे।

१४.किं तु नाल्पेन कार्येण प्रबोध्यो मधुसूदनः ।

१५.तेजसः सुमहाराशिः प्रबुद्धः प्रदहेज्जगत्। *

अयं तेषां समस्तानां शक्तः प्रतिसमासने । **

तान्निहत्य रणे शूरः पुनर्यास्यति मानुषान् ।। २८ ।।[४]

भवानस्मन्नियोगेन या तु तावन्महीतलम् । **

काम्यके द्रक्ष्यसे वीरं निवसन्तं युधिष्ठिरम् ।। २९ ।।[५]

स वाच्यो मम सन्देशाद्धर्मात्मा सत्यसङ्गरः । **

---

(१) (३)क०ख०सर्वे देव,सर्व० (for सर्वे०); (४) हि (for स्म),

(२) (२)मही (for रसां ); (३) निर्दग्धाः (for निहताः),

(३) (१)कर्म (for कार्य ); (२) कं हि द्विजोत्तम; (४)न संशयः (for असंशयम् );

(४) (१)च शक्तानां (for समस्तानां ); अयं० च तेषां सक्तानां;; अयं तेषां तु शत्रूणां; (२) समापने; निवारणे;; शक्रप्रतिमतेजसा; (४) मानुषं०घ,

(५) (१) च,

नोत्कण्ठा फाल्गुने कार्या कृतास्त्रः शीघ्रमेष्यति ।। ३० ।। (१)

नाशुद्धबाहुवीर्येण नाकृतास्त्रेण वा रणे । **

भीष्मद्रोणादयो युद्धे शक्याः प्रतिसमासितुम् ।। ३१ ।। (२)

गृहीतास्त्रो गुडाकेशो महाबाहुर्महामनाः । **

नृत्यवादित्रगीतानां दिव्यानां पारमीयिवान् ।। ३२ ।।(३)

भवानपि विविक्तानि तीर्थानि मनुजेश्वर । **

भ्रातृभिः सहितः सर्वैर्द्रष्टुमर्हत्यरिन्दम ।। ३३ ।। (४)

तीर्थेष्वाप्लुत्य पुण्येषु विपाप्मा विगतज्वरः । **

राज्यं भोक्ष्यसि राजेन्द्र सुखी विगतकल्मष ।। ३४ ।।(५)

भवांश्चैनं द्विजश्रेष्ठ पर्यटन्तं महीतलम् । **

त्रातुमर्हति विप्राग्र्य तपोबलसमन्वितः ।। ३५ ।। (६)

१६.एवमुक्तो महेन्द्रेण बीभत्सुरपि लोमशम्।

१७.उवाच प्रयतो वाक्यं रक्षेथाः पाण्डुनन्दनम्।

१८.यथा गुप्तस्त्वया राजा चरेत्तीर्थानि सत्तम ।

१९.दानं दद्याद्यथा चैव तथा कुरु महामुने।

गिरिदुर्गेषु च सदा देशेषु विषमेषु च । **

---

(१) (३)फाल्गुने ; ( त्वर्जुने ); (४)क्षिप्रम्;; पुनद् (for शीघ्रम्),

(२) वीराः शक्याः; शक्या युद्धे; समापितुं; समाधितुं;;

(३) (१)गुडाकेशो महाबाहुर्; परन्तपः (for महामनाः ); (३) नृत्य; (४)ईथिवान् (for एयि ); परं पारं समेयिवान्,

(४) (४)अर्हसि (for अर्हति),

(५) (१)रम्ये (for पुण्ये ); (३) धर्मेण (for राजेन्द्र );राजेन्द्र भोक्ष्यसे राज्यं,

(६) (१) (ए)व; (ए)तद् ; (ए)नं पर्यटन्तं (for द्विज); (२)तीर्थेषु च (for पर्य ); (३)तलं; अर्हसि; (४) समन्वयात्

वसन्ति राक्षसा रौद्रास्तेभ्यो रक्षां विधास्यति ।। ३६ ।।(१)

तथेति सम्प्रतिज्ञाय लोमशः सुमहातपाः । **

काम्यकं वनमुद्दिश्य समुपायान्महीतलम् ।। ३७ ।। (२)

ददर्श तत्र कौन्तेयं धर्मराजमरिन्दमम् । **

तापसैर्भ्रातृभिश्चैव सर्वतः परिवारितम् ।। ३८ ।। (३)

अस्मिन् इन्द्रलोकाभिगमन पर्वणि ४०अध्याये ३८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि इन्द्रलोकाभिगमनपर्वणि चत्वारिंशोऽध्यायः ।। ४० ।।

# ४१.एकचत्वारिंशोऽध्यायः

अर्जनस्य पाशुपतास्त्रलाभस्वर्लोकगमनादिश्रवणेन परिखिद्यता धृतराष्ट्रेण सञ्जयाग्रे स्वपुत्रान् प्रति परिशोचनम् ।।

जनमेजयः

अत्यद्भुतमिदं कर्म पार्थस्यामिततेजसः । **

धृतराष्ट्रो महाप्राज्ञः श्रुत्वा विप्र किमब्रवीत् ।। १ ।।(४)

वैशम्पायनः

शक्रलोकगतं पार्थं श्रुत्वा राजाम्बिकासुतः । **

द्वैपायनादृषिश्रेष्ठात्सञ्जयं वाक्यमब्रवीत् ।। २ ।।(५)

धृतराष्ट्रः

(१)(१)च सदा; देशेषु (for हि सदा ); (२)वने; समे (for देशे); (३)घोराम् (for रौद्राय), (४)सदा भवान्; तेभ्यो रक्षां विधास्यति;

(२) (१)तथेति स ( सं०); प्र; तथेत्यथ (२)यशाः(for तपाः),

(३) (१) क०ख०राजं युधिष्ठिरम्, ,

(४) (३)महाप्राज्ञः; महा०राजः; (४) तत्र (for विप्र),

(५) पार्थं श्रुत्वा महाबाहो ( तदा राजा ; महाराज); धृतराष्ट्रोम्बिकासुतः,

श्रुतं मे सूत कात्स्न्येन कर्म पार्थस्य धीमतः । **
कच्चित्तवापि विदितं याथातथ्येन सारथे ।। ३ ।।(१)

प्रमत्तो ग्राम्यधर्मेषु मन्दात्मा पापनिश्चयः । **
मम पुत्रः सुदुर्बुद्धिः पृथिवीं घातयिष्यति ।। ४ ।।(२)

यस्य नित्यमृता वाचः स्वैरेष्वपि महात्मनः । **
त्रैलोक्यमपि तस्य स्याद्योद्धा यस्य धनञ्जयः ।। ५ ।।(३)

लक्षालङ्कारः- यस्य धर्मराजस्य ।

अस्यतः कर्णिनाराचांस्तीक्ष्णाग्रांश्च शिलाशितान् । **
कोऽर्जुनस्याग्रतस्तिष्ठेदपि मृत्युर्जरातिगः ।। ६ ।।(४)

लक्षालङ्कारः- अस्यतः कर्णिनाराचान् इत्यत्र कर्ण एषां वर्तत इति कर्णिनः आकर्णान्ताकृष्टा इत्यर्थः । ते कच ते नाराचाश्च ।

मम पुत्रा दुरात्मानः सर्वे मृत्युवशानुगाः । **
येषां युद्धं दुराधर्षैः पाण्डवैः प्रत्युपस्थितम् ।। ७ ।।(५)

तथैव च न पश्यामि युधि गाण्डीवधन्वनः । **
अनिशं चिन्तयानोऽपि य एनमुदियाद्रथी ।। ८ ।।(६)

लक्षालङ्कारः- तस्य गाण्डीवधन्वनः युधि योधिनं अर्जुनं यः अभियात्, तं न पश्यामि ।

---

(१) (४) यथा (for यथा );
(२) (१)प्रवृत्तो०घ; ग्राम्यभोगेषु; धर्मेण;
(३) (४)योद्धा ०घ; यस्य,
(४) (१) कर्णि (र्ण ); नालीकान्; (२) शिलीमुखान्; (३) ना (for को ); (४)क०जराधिकः; ध०जरन्तिगः, मृत्यु०(for मृत्युर् )
(५) (२)मृत्युवशानुगाः; (३) तेषां (for येषां, ; (४)समु (for प्रत्यु ),
(६) (१)तथैव (for तस्यैव); हि न; न हि (for च न); (२)श्वन्विनः,(३)वै (for ऽपि); (४) उदयाद्; उपयाद्; रणे; वशी; युधि (for रथी),

द्रोणकर्णौ प्रतीयातां यदि भीष्मोऽपि वा रणे । **
महान्स्यात्संशयो लोके तत्र पश्यामि नो जयम् ।। ९ ।।[(१)]

घृणी कर्णः प्रमादी च आचार्यः स्थविरो गुरुः । **
अमर्षी बलवान्पार्थः संरम्भी दृढविक्रमः ।। १० ।।[(२)]

भवेत्सुमुलं युद्धं सर्वस्याप्यपराजितम् । **
सर्वे ह्यस्त्रविदः शूराः सर्वे प्राप्ता महद्यशः ।। ११ ।।[(३)]

अपि सर्वेश्वरत्वं हि ते वाञ्छन्त्यपराजिताः । **
वधे नूनं भवेच्छान्तिरेतेषां फाल्गुनस्य वा ।। १२ ।।[(४)]

लक्षालङ्कारः- सर्वेऽपि अस्त्रविदः, सर्वे महद्यशाः प्राप्ताः, सर्वेऽपि परैः शत्रुभिरजिताश्च । अत एव ते सर्वे एकेकस्य सर्वेभ्यः ईश्वरत्वं न वाञ्छेरन् । समानस्कन्धत्वादिति भावः ।

न तु हन्तार्जुनस्यास्ति जेता वास्य न विद्यते । **
मन्युस्तस्य कथं शाम्येन्माश्चैव प्रति संहितः ।। १३ ।।[(५)]

त्रिदशेशसमो वीरः खाण्डवेऽग्निमतर्पयत् । **
जिगाय पार्थिवान्सर्वान्राजसूये महाक्रतौ ।। १४ ।।[(६)]

शेषं कुर्याद्गिरेर्वज्रो निपतन्मूर्ध्नि सञ्जय । **

---

(१) (३) क०कख०ऽपि वा रणे,सुमहान् (for महान्त्यात)।; (४)न च; तत्र; न हि (for न तु)।;तं; वै (for नो),

(२) (४)दृढधन्वा जितक्लमः;

(३) (१)भवेत्तु; सम्भवेत् (for भवेत्स); (२)सर्वतः; सर्वस्य (for सर्वशः);श्चपराजयं (for ऽप्य० )

(४) (१)अथ (for अपि,); (२)ते वाञ्छत्यपराजिताः ते ;वाञ्छत्यप्यपरा;वाञ्छेरन्नपरा; (४)नैषां वा; एतेषां; एषां वा (for तेषां वा );फाल्गुनस्य,(४)शाम्येन्मन्दान्प्रति समुत्थितः)

(५) (२)चास्य (for वास्य); (४) मां (मा);वै प्रति;समुच्छ्रितः;द्यतः;मां चैव प्रतिसंहितः,

(६) (१)त्रिदशेशं विनिर्जित्य,

न तु कुर्युः शराः शेषं क्षिप्तास्तात किरीटिना ।। १९ ।।[(१)]

लक्षालङ्कारः- अस्ताः 'असु क्षेपणे' इति धातोः प्रयुक्ताः ।

यथा हि किरणा भानोस्तपन्तीह चराचरम् । **
तथा पार्थभुजोत्सृष्टाः शरा स्तप्यन्ति मे सुतान् ।। १६ ।।[(२)]

लक्षालङ्कारः- तप्यन्ति मे सुतान् इत्यत्र मे सुतान् तप्यन्ति । तृप्यतीतिवत् तप्यतीत्यपि पदम् । तपन्तीत्यर्थः ।

अपि रथघोषेण भयार्ता सव्यसाचिनः । **
प्रतिभाति विदीर्णेव सर्वतो भारती चमूः ।। १७ ।।[(३)]

लक्षालङ्कारः- अपीमां रथघोषेण इत्यत्र इमां महीं सर्वतः विदीर्णेवेति सम्बन्धः ।।

य उद्धरन्प्रवपंश्चैव बाणान् स्थाताऽऽततायी समरे किरीटी । **
सृष्टोन्तकः सर्वहरो विधात्रा भवेद्यथा तद्वदपारणीयः ।। १८।।[(४)]

लक्षालङ्कारः- य उद्धरन् प्रवपन्न इत्यभ उद्धरन् बाणान् प्रवपंश्च, तथा आततायी ' आततायी वधोद्यत' इत्यभिधानात् शत्रुवधोद्यतो यः किरीटी ।

सञ्जयः
यदेतत्कथितं राजंस्त्वया दुर्योधनं प्रति । **

---

(१) (१)वज्रो; (३) च (for तु); मुक्तास्; क्षिसास् (for अस्तास्),

(२) करो (for भुजो); (४)ख०तपक्स्यन्ति मेदिनीम्; तप्यन्ति; मत०(for मे );शरास्तप्यन्ति मेदिनीं

(३) (१)तद्; मे; (इ) यं; सा (for वा)।; मे शर (for वा रथ );भयार्ताः भारती चमूः (for सव्य); (३)च; (ए) व;(for (इ)व ); (४)सर्वथा;सर्वतः सव्यसाचिना,

(४)(१)यदुद्धमन्;; द्धहन्;; दहन्;; समुद्धरन्; यदोद्धहन्;;यथोद्धवन् (for यदुद्गपन्) द्ध्यसन्कक्ष्णशश्चैव बाणान्; अस्यन्नमर्षेण शराननेकान् (२)त्वा ; तानां ; तथा (for स्थाता)०;(३)हि (for वि );तत्कथं रक्ष्णायं; नद्धंवारणीयः

सर्वमेतद्यथातथ्यं न तु मिथ्या महीपिते ।। १९ ।।[१]

लक्षालङ्कारः-दुर्योधनं प्रति दुर्योधनमुद्दिश्येत्यर्थः । तथ्यमनतिक्रम्य वर्तमानं यथा तथ्यम् ।

मन्युना हि समाविष्टाः पाण्डवास्ते महौजसः । **
दृष्ट्वा कृष्णां सभां नीतां धर्मपत्नीं यशस्विनीम् ।। २० ।।[२]

दुःशासनस्य ता वाचः श्रुत्वा ते दारुणोदयाः । **
कर्णस्य च महाराज जुगुप्सन्तीति मे मतिः ।। २१ ।।[३]

श्रुतं हि मे महाराज यथा पार्थेन संयुगे । **
एकादशतनुः स्थाणुर्धनुषा परितोषितः ।। २२ ।।[४]

लक्षालङ्कारः- एकादशातनुः स्थाणुः इत्यत्र रुद्रणामेकादशत्वात् एकादश तनवो यस्य स तथोक्तः ।

२०.कैरातं वेषमास्थाय योधयामास फाल्गुनम् ।[५]

२१.जिज्ञासुः सर्वदेवेशः कपर्दी भगवान्स्वयम्।

लेभे पाशुपतं चापि परमास्त्रं महाद्युतिः ।।२३।।

तत्रैनं लोकपालास्ते दर्शयामासुरर्जुनम् । **
अस्त्रहेतोः पराक्रान्तं तपसा कौरवर्षभम् ।। २४ ।।[६]

नैतदुत्सहते चान्यो लब्धुमन्यत्र फाल्गुनात् । **

---

(१) (१)थथा ; तद् (for यद्); (३) यथार्थस्वं; यथातथ्यं (वृतं); (४) तनू ; तू (for (ए)तनू ); भविश्यति (for महि)

(२)(२)तु (for ते ) ;महौ (for मितौ); कृष्णां ;नीतां;

(३) तां वाचं; वै (for ते) कटुकोदयाः; (२) क०ख०कटुकोदमुः,दारुणो दयां; दुःशसनसमाविष्टामेकवस्त्रां, रजस्वलां; (४) न क्षंस्यतीति;,जुग्रप्सन्ती

(४)(१)मे (for ते)०; श्रूयते च महा; (२) धीमता (for संयुगे ); (४) तपसा (for धनुषा)

(५)(१)कैरात ।;वपुर (for वेषम् ); (२)फाल्गुनं

(६)(२)अच्युतं (for अर्जुनम्); (४) ०र्षभ

**साक्षाद्दर्शनमेतेषामीश्वराणां नरो भुवि ॥ २५ ॥**(१)

महेश्वरेण यो राजन्न जीर्णो ह्यष्टमूर्तिना । **

**कस्तमुत्सहते वीरो युद्धे न जरयितुं पुमान् ॥ २६ ॥** (२)

आसादितमिदं घोरं तुमुलं लोमहर्षणम् । **

**द्रौपदीं परिकर्षद्भिः कोपयद्भिश्च पाण्डवान् ॥ २७ ॥** (३)

यत्तु प्रस्फुरमाणौष्ठो भीमः प्राह वचोऽर्थवत् । **

**दृष्ट्वा दुर्योधनेनोरू द्रौपद्या दर्शितावुभौ ॥ २८ ॥**(४)

ऊरू भेत्स्यामि ते पाप गदया भीमवेगया । **

त्रयोदशानां वर्षाणामन्ते दुर्द्यूतदेविनः ॥ २९ ॥ (५)

सर्वे प्रहरतां श्रेष्ठाः सर्वे चामिततेजसः । **

**सर्वे सर्वास्त्रविद्वांसो देवैरपि सुदुर्जयाः ॥ ३० ॥**(६)

मन्ये मन्युसमुद्भूताः पुत्राणां तव संयुगे । **

**अन्तं पार्थाः करिष्यन्ति भार्यामर्षसमन्विताः ॥ ३१ ॥**(७)

धृतराष्ट्रः

**किं कृतं सूत कर्णेन वदता परुषं वचः । ****

---

(१)(१) क०कख०वैतदुत्सपते,उत्पत्स्यते; उत्पद्यते (for उत्सहते);चान्यः; ऽन्यो वै; (ऽ) न्योपि०;फाल्गुनात्,

(२) (२)विदीर्णो; न दीर्णो; ह्यष्ट (रत्र); भूर्तिना; ग्रस्तमूर्तिना,जीर्णो ग्रस्तश्च मूर्ति; (३) क०ख०जरयितुं; वीरः(for वीरं ),

(३)(२) तुमलं; रोम (for लोमं )।; (३)अप (for परि),

(४)(१)यत्तु; एवं;विस्फुरमाणौष्ठो; प्रस्फुरमाणौ;(णो) ष्ठो; (२)प्रति (for प्राह); (ऽ) र्थवत्; (ऽ)वदत् वदन् (for महत्); (४)दर्शितं बलात् (for दर्शिताबुभौ)

(५)(१)पार्थः; पार्थ; राजन्; मन्द (for पाप); (२)भीमवेगा(रूप) या (for वज्रं),

(६) (३) सर्वास्त्रविदुषः सर्वे,क०ख०दिदुषस्सर्वे,

(७) (१)सर्वे (for मन्ये);समुद्भूताः; (२)सङ्गरे (for संयुगे)।; (४)भार्या,

पर्याप्तं वैरमेतावद्यत्कृष्णा सा सभां गता ।। ३२ ।।[१]

अपीदानीं मम सुतास्तिष्ठेरन्मन्दचेतसः । ✻✻

येषां भ्राता गुरुर्ज्येष्ठो विनये नावतिष्ठते ।। ३३ ।। [२]

ममापि वचनं सूत न शुश्रूषति मन्दभाक् । ✻✻

दृष्ट्वा मां चक्षुषा हीनं निर्विचेष्टमचेतसम् ।। ३४ ।।

ये चास्य सचिवा मन्दाः कर्णसौबलकादयः । ✻✻

ते तस्य भूयसो दोषान्वर्धयन्ति विचेतसः ।। ३५ ।।[३]

स्वैरमुक्ता ह्यपि शराः पार्थेनामिततेजसा।

निर्दहेयुर्मम सुतान्किं पुनर्मन्युनेरिताः ।। ३६ ।।[४]

पार्थबाहुबलोत्सृष्टा महाचापविनिःसृताः । ✻✻

दिव्यास्त्रमन्त्रमुदिताः सादयेयुः सुरानपि ।। ३७ ।।[५]

यस्य मन्त्री च गोप्ता च सुहृच्चैव जनार्दनः ।

हरिस्त्रैलोक्यनाथः स किं नु तस्य न निर्जितम् ।। ३८ ।। [६]

इदं हि सुमहच्चित्रमर्जुनस्येह सञ्जय । ✻✻

---

(१)(३)पर्याप्त (for पर्याप्तं); (४) कृष्णा सा हि; यस्मात्कृष्णा; यत्सा कृष्णा; कृष्णा यत्सा (for यत्कृष्णासा);सभा गता; (अ) थ भारत,

(२)(२)तिष्ठेयुर्; ध्रियेरन् (for तिष्ठेरन्); (३)गुरूः श्रेष्ठो; कुरुश्रेष्ठो; (४)तिष्ठति/✻

/✻(२)शुश्रूषति न; न शृणोति हि; (४) अचेतसं; अरिन्दमः,

(३)(१) (ऽ) प्यस्य; त्वस्य (for चास्य); (३)ये (for ते);तस्य (for ऽध्यस्य),

(४)(१)स्वैरं (for ० स्वैरी);च हि।।; ह्यपि; (अ)पि हि (for अपि); (४)मन्युनाति (०भि) समीरिताः

(५) (३)नुदिताः; विदिताः; चुदिताः; (३)घात ; पातं; साध (for सादं)

(६)(१)तस्य (for यस्य), (२) सारथिश्च (for सुहृच्चैव); (३)सन्; स्यात् (for स); (४)तेन (for तस्य )

**महादेवेन बाहुभ्यां यत्समेत इति श्रुतिः ।। ३९ ।।** (१)

**प्रत्यक्षं सर्वलोकस्य खाण्डवे यत्कृतं पुरा । ****

**फाल्गुनेन सहायार्थे वह्नेर्दामोदरेण च ।। ४० ।।** (२)

**सर्वथा न हि मे पुत्राः सहामात्याः ससौबलाः । ****

**क्रुद्धे पार्थे च भीमे च वासुदेवे च सात्वते ।। ४१ ।।**(३)

**अस्मिन् इन्द्रलोकाभिगमन पर्वणि ४१अध्याये ४१श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि इन्द्रलोकाभिगमनपर्वणि एकचत्वारिंशोऽध्यायः ।। ४१ ।।**

## ४२.द्विचत्वारिंशोऽध्यायः

वैशम्पकायनेन जनमेजयं प्रति पाण्डवानां वने भोज्यवस्तुकथनम् ।। १ ।। वने पाण्डवानामाहारः । सञ्जयकर्तृकं धृतराष्ट्रवार्तानुमोदनं धृतराष्ट्रस्य सन्तापश्च । लस्वर्गलोके महेन्द्रार्जुनाभ्यां सह मिलित्वा तदीयं सन्देशमादाय लोमशस्य काम्यकवने गमनम् ।।

**जनमेजयः**

**यदिदं शोचितं राज्ञा धृतराष्ट्रेण वै मुने । ****

**प्रव्राज्य पाण्डवान्वीरान्सर्वमेतन्निरर्थकम् ।। १ ।।**

**कथं च राजा पुत्रं तमुपेक्षेताल्पचेतसम् । ****

**दुर्योधनं पाण्डुपुत्रान्कोपयानं महारथान् ।। २ ।।**(४)

**किमासीत्पाण्डुपुत्राणां वने भोजनमुच्यताम् । ****

---

(१) (१)तु; हि (for च ); (२) न संशयः; (इ) ह संयुगे (for (इ)ह सञ्जय) (४)यः (for यत् );स्मृतिः; श्रुतं; श्रुतःक क०ख०श्रुतिः,

(२) (३)फाल्गुनेन;पाण्डवेन;सहायेन;(अ) सहायेन (for सहायार्थे); (४)विना (for वह्न्चदर्,) /*

सर्वेनसन्तिमे पुत्राः; (२)बन्धुभिः (for बान्धवः);सहामात्याः;ससौबलाः; सामात्याः सहबान्धवाः; (३) पार्थे; भीमे

(३)(१)समर्था; शमार्था (for सर्वथा);न हि (for नास्ति);पुत्राः (for पुत्रः);

(४) (१)च; नु (for हि);राजपुत्रं (for राजा पुत्रं);तम् (for स्वम्); (२)चेतनं,

वन्य वाऽप्यथवा कृष्टमेतदाख्यातु नो भवान् ।। ३ ।।[१]

लक्षालङ्कारः- कृष्टं कृषिसम्बन्धि कलमादिधान्यम् ।

वैशम्पायनः

वानेयांश्च मृगांश्चैव शुद्धैर्बाणैर्निपातितान् । **
ब्राह्मणानां निवेद्याग्रमभुञ्जन्पुरुषर्षभाः ।। ४ ।।[२]
तांस्तु शूरान्महेष्वासांस्तदा निवसतो वने । **
अन्वयुर्ब्राह्मणा राजन्साग्रयोऽनग्रयस्तथा ।। ५ ।।[३]
ब्राह्मणानां सहस्राणि स्नातकानां महात्मनाम् । **
दश मोक्षविदां तत्र यान्बिभर्ति युधिष्ठिरः ।। ६ ।।[४]
रुरून्कृष्णमृगांश्चैव मेध्यांश्चान्यान्वनेचरान् । **
बाणैरुन्मथ्य विविधैर्ब्राह्मणेभ्यो न्यवेदयत् ।। ७ ।।[५]
न तत्र कश्चिद्दुर्वर्णो व्याधितो वापि दृश्यते । **
कृशो वा दुर्बलो वापि दीनो भीतोऽपि वा पुनः ।[६]
तत्राविनयः कश्चिददृश्यत तदा द्विजः ।। ८ ।।
पुत्रानिव प्रियान्भ्रातञ्ज्ञातीनिव सहोदरान् । **

---

(१) (२) क०ख०मिच्छताम्,(३)वन्यं वाप्यं (for वानेयम);, (४)नो०घ(for मे );एतदाख्यातुमर्हसि,
(२)(१)वा;(व) नेयांश्च (for वानेयं च);ते तु (for चैव); (४)ह्यभुञ्जन् (for अभुजन्);भरत (for पुरुष);ह्युपभुञ्जन्नरर्षभाः; अभुञ्जत; (भुञ्जते ते; अभुञ्जन्त);महारथाः,
(३)(१)स्म शूशन्; श्रुत्वाथ (for तु शूरान्); (२) तदानीं वस,
(४) (३)तत्र;,राजन् (for तद्वद्);
(५)(२)मनोरमान्; महारथाः(for वनेचरान्); (३)विशिखैर्; विविधैर् (for विधिवद् );(४)निवेदयन्; न्यवेदयन्;
(६)(१)तत्र; कश्चित्; दुर्वृत्तो ;मलिनो (for दुर्वर्णो); (२) व्यथितो; वापि दृश्यते; (४)पुनः०घ; भवेत् (for नरः);

**पुपोष कौरवश्रेष्ठो धर्मराजो युधिष्ठिरः ।। ९ ।।[१]**

पतींश्च द्रौपदी सर्वान्द्विजातींश्च यशस्विनी । **

**मातृवद्भोजयित्वाग्रे शिष्टमाहारयत्तदा ।। १० ।।[२]**

प्राचीं राजा दक्षिणां भीमसेनो यमौ प्रतीचीमथ वाप्युदीचीम् । **

धनुर्धरा मांसहेतोःमृगाणां क्षयं चक्रुर्नित्यमेवोपगम्य ।। ११ ।।[३]

तथा तेषां वसतां काम्यके वै विहीनानामर्जुनेनोत्सुकानाम्।

पञ्चैव वर्षाणि तथा व्यतीयुरधीयतां जपतां जुह्वतां च ।। १२ ।।[४]

**अस्मिन् इन्द्रलोकाभिगमनपर्वणि ४२अध्याये १२श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां संहितायां वनपर्वणि इन्द्रलोकाभिगमनपर्वणि द्विचत्वारिंशोऽध्यायः ।। ४२ ।।**

# ४३. त्रिचत्वारिंशोऽध्यायः

धृतराष्ट्रेण सञ्जयाग्रे पाण्डवपरीक्रमस्मरणेन पुत्रान् प्रति परिशोचनम् ।।१।। सञ्जयेन धृतराष्ट्रं प्रति स्वस्य चारमुखात् पाण्डवदिदृक्षया वनं गतानां कृष्णादीनां दुर्योधनादि-वधप्रतिज्ञाकथनम् ।।२।। सञ्जयस्य धृतराष्ट्रं प्रति श्रीकृष्णप्रभृतिकृताया दुर्योधनादि-वधविषयकप्रतिज्ञाया वृत्तान्तस्य निवेदनम् ।।

**वैशम्पायनः**

---

(१)(२)ज्ञातीन् ; भ्रातृन्,

(२)(१)यतींश्च (for प ); तु (for च); (२) द्विजातींश्च (for द्विजांश्चैव);मातृवद् (for मातेव); भोजयेत्पुत्रान्;

(३)(३)धनुर्धराणां सहितो मृगाणां; (४)क्षेमं; क्षेपं (for क्षयं);कुर्युर (चक्रुर्); अभि (for उप );

(४) (१)तेषा तथा ; एवं तथा; तथैव तेषां; तदा तेषां; ,तदा (तथा) चैषां;यथाजोषं; (३) (अ ) थ (for (ए) व ); तथा; ततो (for तदा); व्यतीता; (अ)भ्यतीयुः; (४)व्यधयिता; ,अधीयिनां; अधीयतां जुह्वतां चैव राजन्,

सुदीर्घमुष्णं च निःश्वस्य धृतराष्ट्रोऽम्बिकासुतः । **
अब्रवीत्सञ्जयं सूतमामन्त्र्य पुरुषर्षभ ॥ १ ॥

२२. तेषां तच्चरितं श्रुत्वा मनुष्यातीतमद्भुतम् ।
चिन्ताशोकपरीतात्मा मन्युनाभिपरिप्लुतः ॥ (१)

२३. रात्रौ न दिवा सूत शान्तिं प्राप्नोमि वै क्षणम् । **

२४. संश्चिन्त्य दुर्नयं घोरमतीतं द्यूतजं हि तत्॥ (२)

२५. तेषामसह्यवीर्याणां शौर्यं धैर्यं धृतिं पराम् । **

२६. अन्योन्यमनुरागं च भ्रातृणामतिमानुषम्॥ (३)

धृतराष्ट्र

देवपुत्रौ महाभागौ देवराजसमद्युती । **
नकुलः सहदेवश्च पाण्डवौ युद्धदुर्मदौ ॥ २ ॥

दृढायुधौ दूरपातौ युद्धे च कृतनिश्चयौ । **
शीघ्रहस्तौ दृढक्रोधौ नित्ययुक्तौ तरस्विनौ ॥ ३ ॥(४)

भीमार्जुनौ पुरोधाय यदा तौ रणमूर्धनि।
स्थास्येते सिंहविक्रान्तावश्विनाविव दुःसहौ । **
न शेषमिह पश्यामि मम सैन्यस्य सञ्जय ॥ ४ ॥(५)

तौ ह्यप्रतिरथौ युद्धे देवपुत्रौ महारथौ । **
द्रौपद्यास्तं परिक्लेशं न क्षंस्येते त्वमर्षिणौ ॥ ५ ॥(६)

---

(१) तु (for तच्); ईदृशं (for अद्भुतम्);च (for (अ) भि ); (१)स (for सु ); दीर्घमुष्णं च निः; (४) पुरुषर्षभ;
(२)रात्रि (for रात्रौ,); आप्नोभि; आप्नोति; निर्णयं (for दुर्नयं);
(३) तेषामशक्यं ( षां शक्यं तु ) ;वीराणां शौर्यधैर्यधनु (धृति) ष्मतां
(४)(१)दूरपाती; पाते ; दुराधर्षौ; (२)उभौ च; तौ युद्धे (for युद्धे च); (४) तपस्विनौ; रथे स्थितौ,
(५) (३)रण युधि (for सिंह ); (३) हि प्र०; अनु (for इह); मम (for तदा ); पुत्र (for सैन्य०);
(६) (१)ततस्तौ ह्यप्रतिरथौ; (३) सं (for तं); (४) क्षंस्यते; क्षमेते;सुमर्षिणौ;

वृष्णयोऽथ महेष्वासाः पञ्चाला वा महौजसः
**युधि सत्याभिसन्धेन वासुदेवेन रक्षिताः ।। ६ ।।**

**प्रधक्ष्यन्ति रणे पार्थाः पुत्राणां मम वाहिनीम् ।। ७ ।।**[(१)]

रामकृष्णप्रणीतानां वृष्णीनां सूतनन्दन । **
**न शक्यः सहितुं वेगः सर्वैस्तैरपि संयुगे ।। ८ ।।**[(२)]

तेषां मध्ये महेष्वासो भीमो भीमपराक्रमः । **
**शैक्यया वीरघातिन्या गदया विचरिष्यति ।। ९ ।।**[(३)]

लक्षालङ्कारः- शैक्यया वीरघातिन्या इत्यत्र शैक्यया शिक्यसम्बन्धिन्या शिक्योपरि बद्ध्वा स्थापितयेत्यर्थः । 'भारयष्टिस्तदासम्बः शिक्यं काच' इत्यभिधानात् ।

तथा गाण्डीवनिर्घोषं विस्फूर्जितमिवाशनेः । **
**गदावेगं च भीमस्य नालं सोढुं नराधिपाः ।। १० ।।**

ततोऽहं सुहृदां वाचो दुर्योधनवशानुगः । **
**स्मरणीयाः स्मरिष्यामि मया या न कृताः पुरा ।। ११ ।।**[(४)]

सञ्जयः

**व्यतिक्रमोऽयं सुमहांस्त्वया राजन्नुपेक्षितः । ****
**समर्थेनापि यन्मोहात्पुत्रस्तु न निवारितः ।। १२ ।।**

श्रुत्वाऽयं निर्जितान्द्यूते पाण्डवान्मधुसूदनः । **

---

ह्यमदर्ष(र्षि) णौ; हि मोक्षणे; त्या (त्व ) मर्षणौ; तर०स्विनौ,

(१)(१)ऽथ (for वा); (२) पञ्चाला; महारथः०घ; (अ)मितौजसः (for महै ); (४)पालिताः (for रक्षि ); (३)वसिः(for पार्थाः);

(२) (१)प्रतीतानां; (४)सर्वैस्तैरपि; दुःसहः (for संयुगे),

(३) (३)सैक्यया; ,सैन्यया; , महत्या,

(४)(१)तत्राहं; अतो; तदा।; (४) मयो या; मया पुरा;

त्वरितः काम्यके पार्थान्समभावयदच्युतः ।। १३ ।।[१]

लक्षालङ्कारः- समभावयदच्युत इत्यत्र समभावयत् सम्भावयामास ।

द्रुपदस्य तथा पुत्रा धृष्टद्युम्नपुरोगमाः । **
विराटो धृष्टकेतुश्च केकयाश्च महारथाः ।। १४ ।।[२]

तैश्च यत्कथितं राजन्दृष्ट्वा पार्थान्पराजितान्।
चारेण विदितं सर्वं तन्मयाऽऽवेदितं च ते ।। १५ ।।

२७.ख०-कृष्णाजिनोत्तरासङ्गान् पाण्डवान् पृथुलोचनान् ।[३]

समागम्य वृतस्तत्र पाण्डवैर्मधुसूदनः । **
सारथ्ये फाल्गुनस्याजौ तथेत्याह च तान्हरिः ।। १६ ।।[४]

अमर्षितो हि कृष्णोऽपि दृष्ट्वा पार्थांस्तथा गतान् । **
कृष्णाजिनोत्तरासङ्गानब्रवीच्च युधिष्ठिरम् ।। १७ ।।[५]

भगवान्

या सा समृद्धिः पार्थानामिन्द्रप्रस्थे बभूव ह । **
राजसूये मया दृष्टा नृपैरन्यैः सुदुर्लभा ।। १८ ।।

यत्र सर्वान्महीपालाञ्छस्त्रतेजोभयार्दितान् । **
सवङ्गाङ्गान्सपौण्ड्रोड्रान्सचोलद्राविडान्ध्रकान् ।। १९ ।।[६]

---

(१) (१)तान्; वि ;(अ ) पि, ;यन्; च (for हि);सर्वान् (for धूते); (२)धर्मचारिणः(for मधु ),
(२) (४)केकेया;; कैकेया;; कैकया,
(३) (१)तत् (for यत् )।।; राजन् (for तत्र ); (२)समागतैः; तथागतान् (for परां);(३)कथितं (for विदितं); (४)यन्मया; तव च ये (for च ते),
(४) (१)तत (for वृत); (३)फाल्गुनस्य; (४)ततोभ्याह;स (for च ),
(५) (१)अमर्षी स (for ०र्षिता); ह; (ऽ)पि; च (for हि )।; हि (for ऽपि);
(६)(१)सर्व०(त्तीसर्वान्);(३)अङ्गवगपुण्ड्ररोत्थान् पौण्ड्रान्०ख०घ; अङ्गान्वगान्कलिङ्गांश्च; सवङ्गाङ्गासजलान्; सवङ्गागम्पुलिन्दोड्र; गम०रुडोण्डान्; सवङ्काङ्गान्मरून्पौण्ड्रान्; अङ्गवगकरूशांश्च; अङ्गवङ्गमरुत्पौण्ड्रान्; (४)सचोलान्द्र०( ०न्द्रा) मिडाञ्छकान्; सचोलद्राविडान्ध्रकान्; सचोडद्रविडाद्रकान् (०द्रमिडाध्रकान्);

सागरानूपकांश्चैव ये च प्रान्ताभिवासिनः । **
सिंहलान्बर्बरान्म्लेच्छान्ये च लङ्कानिवासिनः ॥ २० ॥[१]

पश्चिमानि च राष्ट्राणि शतशः सागरान्तिकान् । **
पह्लवान्दरदान्सर्वान्किरातान्यवनाञ्छकान् ॥ २१ ॥[२]

हारहूणांश्च चीनांश्च तुषारान्सैन्धवांस्तथा । **
जागुडान्रामठान्मुण्डान्स्त्रीराज्यमथ तङ्गणान् ॥ २२ ॥[३]

२८.तांश्चान्यांश्च सुबहूनाहूतान्भरतर्षभ ॥ *[४]

एते चान्ये च बहवो ये च ते भरतर्षभ। *
केकयान्मालवांश्चैव तथा काश्मीरकानपि ॥ २३ ॥[५]

अद्राक्षमहमाहूतान्यज्ञे ते परिवेषकान्।

सा ते समृद्धिर्यैरात्ता चपला प्रतिसारिणी । **
आदाय जीवितं तेषामाहरिष्यामि तामहम् ॥ २४ ॥[६]

रामेण सह कौरव्य भीमर्जुनयमैस्तथा । **

---

सचोलद्राविडान्धकान्; सचौडद्रवि०डान्ध्र (ध)कान्; सचोलद्राविडाच्छकान्; सचोला द्रमिढान्द्रकान्; सञ्जयसचोलद्रमिडान्धकान्; सचोलद्रमिलाध्रकान्; सचोलद्रमिलातकान्; श्वोल० (for श्वोद्ध्य);

(१)(१)सागरानूपकां (०रूपकां;०नूपजां)श्चैव; सागरानापगाश्चैव ; (२)प्रान्तनिवासिनः;प्रत्यन्त०; पर्वत; प्रान्ताभि;तथा; यथा (for ये च );लङ्कानिवासिनः; मुद्गल,

(२) (१)राष्ट्राणि (for राज्यानि);पश्चिमावर्तराज्यानि; (२)सागरान्तिके।; (३)दुर्वान्;दार्वन्; चैव (for सर्वान् );

(३)(१)दीनांश्च; गुल्मांश्च; (२)तुषारान् (for तुखा );चीनाश्च (दीनान्वै),तुषारांश्चैव सैन्धवान्;
(३)जाहुडान्हमिडान्हीनान्; जाहुडा० न्मागधान्द्रणान्; जाङ्गलानश्रमठांश्चापि;जागुडान्रामहान्कण्डान्; ०न्दामठान्हुण्डान्; ०न्रामठान्मुण्डान्; जाहुडान्( जान्हुरान् ; जाङ्गणान्), जागरान्रमया( ०न्द्रमिला) न्पुण्ड्रान्; सागरानूपजानपौंड्रान्; सैन्धवान्पुण्डकांस्तत्र; (४)स्त्रीराज्यमथः; स्त्रीराज्यान्यथ,कङ्कणान्; कोङ्कणान्; , शङ्कणान् ; स्त्रीराज्यानसैंधवांस्तथा; तथा स्त्रीराज्यतङ्गणान्

(३) अ०घ०अर्घपश्चकं नास्ति,अद्राक्षमहमाहूतान्; (४)तथा देशविदेश०कान्;

(५)केक ( कैके / कैक)यान्मालवांश्चैव तथा काश्मीरकानपि;

(६) (१)येषां (for सा ते);आप्ता (for आत्ता); (४)ते महीं (for तामहम्);

अक्रूरगदसाम्बैश्च प्रद्युम्नेनाहुकेन च ।। २५ ।।

धृष्टद्युम्नेन वीरेण शिशुपालात्मजेन च । **

दुर्योधनं रणे हत्वा सद्यः कर्णं च भारत।

दुःशासनं सौबलेयं यश्चान्यः प्रतियोत्स्यते ।। २६ ।।

ततस्त्वं हास्तिनपुरे भ्रातृभिः सहितो वसन्।(१)

धार्तराष्ट्रीं श्रियं प्राप्य प्रशाधि पृथिवीमिमाम् ।। २७ ।।(२)

युधिष्टिरः

अथैनमब्रवीद्राजा तस्मिन्वीरसमागमे । **

शृण्वत्स्वेतेषु वीरेषु धृष्टद्युम्नमुखेषु च ।। २८ ।।(३)

युधिष्ठिरः

प्रतिगृह्णामि ते वाचमिमां सत्यां जनार्दन ।**

मित्रान्मे महाबाहो सानुबन्धान्हनिष्यसि ।। २९ ।।(४)

वर्षात्त्रयोदशादूर्ध्वं सत्यं मां कुरु केशव । **

प्रतिज्ञातो वने वासो राजमध्ये मया ह्ययम् ।। ३० ।।(५)

सञ्जयः

तद्धर्मराजवचनं प्रतिश्रुत्य सभासदः । **

धृष्टद्युम्नपुरोगास्ते समयामासुरञ्जसा ।। ३१ ।।(६)

---

(१)(४)यो वान्यः;प्रति०योत्स्यति;

(२)(१)हस्तिन०;धार्तराष्ट्रात् ;सं (for प्र );जितारिः पृथिवीपाल सुहृदो नन्दयिष्यसि;

(३)(३)शृणुष्व, (ए)तेषु (for ते );वीरेषु (for सर्वे ); (४)वै (for च ),

(४) (१)क०ख०प्रति,प्रतिवाचमिमां सत्यां।; (२)नसत्यां च; इमां सत्यां (for सत्यामेतां); सत्यामभिगतो ( हितो) ह्यसि; सत्यां मम हितो ह्यसि,

(५) (४)राज्ञां (for राज०);तथा; यथा (for मया );च य(त) तू(for ह्यम्);

(६)(१)धर्मराजस्य व०घ; (२) श्रुत्वा सर्वे (for प्रति); (३) च (for ते ); सम (for शम); समयामासुः समं युक्तमित्याचरव्युः । समशब्दात्तदाचष्ट इति णिचू लिटि आम् ;

केशवं मधुरैर्वाक्यैः कालयुक्तैरमर्षितम्  ।  ॎॎ
पाञ्चालीं प्राहुरक्लिष्टां वासुदेवस्य शृण्वतः  ।। ३२ ।।(१)

भगवान्

दुर्योधनस्तव क्रोधाद्देवि त्यक्ष्यति जीवितम्  ।  ॎॎ
प्रतिजानीमहे सत्यं मा शुचो वरवर्णिनि  ।। ३३ ।।(२)

ये स्म तेऽक्षजितां कृष्णे दृष्ट्वा त्वां प्राहसंस्तदा  ।  ॎॎ
मांसानि तेषां खादन्तो हरिष्यन्ति वृकद्विजाः  ।। ३४ ।।(३)

पास्यन्ति रुधिरं तेषां गृध्रा गोमायवस्तथा  ।  ॎॎ
उत्तमाङ्गानि कर्षन्तो यैः कृष्टासि सभातले  ।। ३५ ।।(४)

तेषां द्रक्ष्यसि पाञ्चालि गात्राणि पृथिवीतले  ।  ॎॎ
क्रव्यादैः कृष्यमाणानि भक्ष्यमाणानि चासकृत्।। ३६ ।।(५)

परिक्लिष्टासि यैस्तत्र यैश्चासि समुपेक्षिता  ।  ॎॎ
तेषामुत्कृत्तशिरसां भूमिः पास्यति शोणितम्  ।। ३७ ।।(६)

सञ्जयः

एवं बहुविधा वाचस्त ऊचुर्भरतर्षभ  ।  ॎॎ

---

(१) (२) ख०इत्यारण्यपर्वणि सप्तचत्वारिंशो अध्यायः,(३) क०ख०चाहुरक्लिष्टां, वासुदेवस्य शृण्वतः।

(२) (१)प्राहुर् (for चाहुर्);पाञ्चालीं चाबुवङ्क्लिष्टां; (३)प्रतिजानामि;ते नित्यं; सत्यं ते (ऽ,च) प्रति०जानीमः; प्रतिजानीमहे सत्यं,

(३) येषां त्वं;; यत्किञ्चित्;; ते स्म ते;; ये तत्र;; यस्मात्ते; ये च ते; क्षजितां; कुरवः (for  कुपितां);कृष्णे ,दृष्ट्वा; दृष्ट्वा त्वां; (४)हरिष्यन्ति;; भविष्यन्ति;वृका द्विजाः; वृक; गुप्त मृगा द्विजाः,

(४)(२)गृध्रगोमा०;गृध्र०गोमायुवायसाः;अङ्गैरङ्गानि कर्षन्तो; (४)कृष्टासि; आकृष्टा (for त्वं कृष्टा);मही (for सभा);यैस्त्वं कृष्टासि भाविनि;यैस्त्वं नीता सभां पुरा०घ (गता );

(५) (१)कल्याणि (for  पाञ्चालि); (२)शिरांसि (for  गात्राणि );कृष्य भक्ष्य;

(६)  (२) (अ)सि (for  (अ)पि ); (३) क०ख०मुत्कृत्त,उत्कृत्य; ;उत्कृष्य (for  उत्कृत्त )

सर्वे तेजस्विनः शूराः सर्वे चाहव(त)लक्षणाः ।। ३८ ।।[१]

ते धर्मराजेन वृता वर्षादूर्ध्वं त्रयोदशात् । **

पुरस्कृत्योपयास्यन्ति वासुदेवं महारथाः ।। ३९ ।।[२]

रामश्च कृष्णश्च धनञ्जयश्च प्रद्युम्नसाम्बौ युयुधानभीमौ । **

माद्रीसुतौ केकयराजपुत्राः पाञ्चालपुत्राः सह मत्स्यराज्ञा ।। ४० ।।[३]

एतान्सर्वाँल्लोकवीरानजेयान्महात्मनः सानुबन्धान्ससैन्यान् । **

को जीवितार्थी समरेऽभ्युदीयात्क्रुद्धान्सिंहान्केसरिणो यथैव ।। ४१ ।।[४]

लक्षालङ्कारः- केसरिणः कोपादुन्नम्रकेसरवतः सिंहानित्यर्थः ।

धृतराष्ट्रः

यन्माब्रवीद्विदुरो द्यूतकाले त्वं पाण्डवाञ्जेष्यसि चेन्नरेन्द्र । **

ध्रुवं कुरूणामयमन्तकालो महाभयो भविता शोणितौघः ।। ४२ ।।[५]

मन्ये तथा तद्भवितेति सूत यथा क्षत्ता प्राह वचः पुरा माम् । **

असंशयं भविता युद्धमेतद्गते काले पाण्डवानां यथोक्तम् ।। ४३ ।।

अस्मिन् इन्द्रलोकाभिगमनपर्वणि ४३अध्याये ४३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि इन्द्रलोकाभिगमनपर्वणि त्रिचत्वारिंशोऽध्यायः ।। ४३ ।।

।। वनपर्वणि आरण्यपर्वणि इन्द्रलोकाभिगमनपर्व समाप्तम् ।।

---

(१) (२)ताम्रूचु;त ऊचुः; ऊचुस्ते; तामुक्त्वा; ते चोचुः;भरतर्षभ;;भरतर्षभाः० (४)चाहवलक्षणाः; चाहितं;;अहतलक्षणाः अखण्डितध्वजाः);

(२) (३)पुरस्कृत्य समेष्यन्ति।;);

(३) (१)रामं च कृष्णं च;धनञ्जयं च; (३)कैकय;राजपुत्रान्; (४)पुत्रान्;मत्स्य;मद्र (for धर्मं),

(४) (१)एतान्हि (for एवं हि); सर्वान्समरेष्व०जेयान्; (३)प्रत्युपेयात्; भ्युर्दी०यात; (४)क्रोष्टा (for क ८द्धान्),

(५)(१)यन्मां ब्रवीद्; यन्मामब्र; यो मामब्र; (२)पाण्डवं; (३)महाहवो;;महाभयं;घोररूपः(for शोणि) );

# तीर्थयात्रापर्वणि नलोपाख्यानपर्व

## 03- 04 - 044

## ४४.चतुश्चत्वारिंशोऽध्यायः

**भीमसेनयुधिष्ठिरसंवादसमये बृहदश्वागमनम् ।।१।। युधिष्ठिरं प्रति बृहदश्वेन नलोपाख्यानकथनम् ।।२।।**

जनमेजयः

अस्त्रहेतोर्गते पार्थे शक्रलोकं महात्मनि । **
युधिष्ठिरप्रभृतयः किमकुर्वत पाण्डवाः ।। १ ।।[१]

वैशम्पायनः

अस्त्रहेतोर्गते पार्थे शक्रलोकं महात्मनि । **
आवसन्कृष्णया सार्धं काम्यके भरतर्षभाः ।। २ ।।[२]
ततः कदाचिदेकान्ते विविक्त इव शाद्वले ।
दुःखार्ता भरतश्रेष्ठा निषेदुःसह कृष्णया ।। ३ ।।
धनञ्जयं शोचमानाः साश्रुकण्ठाः सुदुःखिताः ।[३]
तद्वियोगादितान्सर्वाञ्छोकः समभिपुप्लुवे ।। ४ ।।
धनञ्जयवियोगाच्च राज्यभ्रंशाच्च दुःखिताः ।
अथ भीमो महाबाहुर्युधिष्ठिरमभाषत ।। ५ ।।[४]

**भीमसेनः**

---

(१) (२)इन्द्र (for शक्रं ); (४) अकुर्वत);
(२) (३)आवसन्; निवसन्; (४) भरतर्षभाः; पाण्डव;);
(३) (२) मृदु० (for इव ); शाले; (३) पुरषश्रष्टा; (४)सह कृष्णया; सास्र ( ०श्रु ); नेत्राः (for साश्रुकण्ठाः);)
(४)(१)तद्वियोगान्वितान्; दितान् (for द्वि तान्); सर्वेषां (for तत्सर्वाम्); (४)राज्यभ्रंशाच्च;);

निदेशात्ते महाराज गतोऽसौ भरतर्षभः । **

अर्जुनः पाण्डुपुत्राणां यस्मिन्प्राणाः प्रतिष्ठिताः ।। ६ ।।[१]

यस्मिन्विनष्टे पाञ्चालाः सह पुत्रैस्तथा वयम् । **

सात्यकिर्वासुदेवश्च विनश्येयुर्न संशयः ।। ७ ।।[२]

योऽसौ गच्छति धर्मात्मा बहून्क्लेशान्विचिन्तयन् । **

भवन्नियोगाद्बीभत्सुस्ततो दुःखतरं नु किम् ।। ८ ।।[३]

यस्य बाहू समाश्रित्य वयं सर्वे महात्मनः । **

मन्यामहे जितानाजौ परान्प्राप्तां च मेदिनीम ् ।। ९ ।।[४]

यस्य प्रभावान्न मया सभामध्ये महाबलाः । **

नीता लोकममुं सर्वे धार्तराष्ट्राः ससौबलाः ।। १० ।।[५]

लक्षालङ्कारः- यस्य प्रभावान्न मया इत्यत्र प्रभावात् सामवचनसामर्थ्यात् अमुं लोकं परलोकम्
।

यस्य प्रभावाद्धि वयं सभामध्ये धनुष्मतः ।

जितान्मन्यामहे सवर्छधार्तराष्ट्रान्तसौवलान् ।। ११ ।।

ते वयं बाहुबलिनः क्रोधमुत्थितमात्मनः । **

सहामहे भवन्मूलं वासुदेवेन पालिताः ।। १२ ।।

लक्षालङ्कारः- सहामहे भवन्मूलम् इत्यत्र भवन्मूलं भवानेव मूलं यथा भवति तथा ।

वयं हि सह कृष्णेन हत्वा कर्णमुखान्परान् । **

---

(१) (३)नियोगात्ते; महाबाहुः; महाभाग; भस्तर्वभः ( ०भ); पुस्मर्षभ;);

(२) (१)तस्मिन्वि; (२)पुत्रास्तथा; (४)न संशयः; नसंशयं; );

(३) (१)धर्मात्मा (for तेजस्वी ); (२) विचिन्तयन् (for अ ); (३) गर्हय याति ीभत्सुः;);

(४) जितामाजौ; परां प्राप्तां; सर्वान्प्राप्तां; परान्प्राप्तान्; );

(५) (१)यस्य प्रसादाद्धि वयं ; (२)वपुष्मतः; महाबलाः (for धनु ); (३)०नीताः सर्वे मृत्युलोकं; (४) धार्तराष्ट्रश्च सौबलः; द्रा महाबलाः;;

स्वबाहुविजितां कृत्स्नां प्रशासेम वसुन्धराम् ।। १३ ।।[१]

भवतो द्यूतदोषेण सर्वे वयमुपप्लुताः । **

अहीनपौरुषा बाला बलिभिर्बलवत्तराः ।। १४ ।।[२]

लक्षालङ्कारः- अवप्लुताः अधः पातिताः ।

क्षात्रं धर्मं महाराज त्वमवेक्षितुमर्हसि।

न हि धर्मो महाराज क्षत्रियस्य वनाश्रयः ।। १५ ।।

राज्यमेव परं धर्मं क्षत्रियस्य विदुर्बुधाः ।[३]

स क्षत्रधर्मविद्राजा मा धर्म्यान्नीनशः पथः ।। १६ ।। [४]

लक्षालङ्कारः- मा..स्मान्विनशनः पथ इत्यत्र विनशलः विशेषेण नशनं नाशो यस्मात् स विनशनः मा भूरिति सम्बन्धः ।

प्राग्द्वादशसमा राजन्धार्तराष्ट्रान्निहन्महि । **

निवर्त्य च वनात्पार्थमानाय्य च जनार्दनम् ।। १७ ।।[५]

व्यूढानीकान्महाराज जवेनैव महामते । **

धार्तराष्ट्रानमुं लोकं गमयामि विशाम्पते ।। १८ ।।[६]

सर्वानहं हनिष्यामि धार्तराष्ट्रान्ससौबलान् । **

---

(१)(१)मया (for वयं ); (४) प्रशासेमां; प्रशाधीमां; ;

(२) (३)बाला (for राजन् ); अहीनाः;(न) पौरुषाद्राजन् ( अहनिपौरुषाः सर्वे० ); (४)रिपुभ्यो; बाहुभिर् (for बलिभिर् ); ०त्तराः(for त्तमाः ) ;

(३) (१)क्षत्रधर्मं; (२) त्वमु ( ०म )पेक्षितुम्; त्वमवे०; त्वमेवे०; नन्ववे ;

(४) (१)क०ख०धर्माद्विनशः पथः,

(५) (१) न त्वं (for स ); राजा (for राजन् ); (२) धर्मात् (for धर्म्यात् ); विनशः (for नीनशः ); (३) समाद् (for समा ); यच्च (for राजन् ); प्राग्द्वादशेभ्यः; सामात्यान् ( ०शभ्यः समाभ्यः ) तदुत्तिष्ठ महाबाहो,(४) हृदयेन विचिन्त्यताम् ,निहन्महे

(६)(१)वचनात् (for च वनात्); निवर्तय वनात्पार्थं; (३) व्यूढानीके; ०नीका; सर्वे वै मिलितान्सर्वान्; (४) महामते (for हवे) नाशयामि; गमयाम; गमयामो,

दुर्योधनं च कर्णं च यो वान्यः प्रतियोत्स्यते ।। १९ ।।[१]

मया प्रशमिते पश्चात्त्वमेष्यसि वनात्पुनः । **

एवं कृते न ते दोषा भविष्यन्ति विशाम्पते ।। २० ।।[२]

यज्ञैश्च विविधैस्तात कृतं पापमरिन्दम । **

अवधूय महाराज गच्छेम स्वर्गमुत्तमम् ।। २१ ।।[३]

एवमेतद्भवेद्राजन्यदि राजा न बालिशः । **

अस्माकं दीर्घसूत्रः स्याद्भवान्धर्मपरायणः ।। २२ ।।[४]

लक्षालङ्कारः- 'दीर्घसूत्रश्चिरक्रिय' इत्यभिधानात् दीर्घसूत्रः चिरेण कार्यकारी ।

निकृत्या निकृतिप्रज्ञा हन्तव्या इति निश्चयः । **

न हि नैकृतिकं हत्वा निकृत्या पापमुच्यते ।। २३ ।।[५]

तथा भारत धर्मेषु धर्मज्ञैरिह दृश्यते । **

अहोरात्रं महाराज तुल्यं संवत्सरेण हि ।। २४ ।।[६]

तथैव वेदवचनं श्रूयते नित्यदा विभो । **

संवत्सरो महाराज पूर्णो भवति कृच्छ्रतः ।। २५ ।।[७]

यदि वेदाः प्रमाणास्ते दिवसादूर्ध्वमच्युत । **

त्रयोदश समाः कालो ज्ञायतां परिनिष्ठितः ।। २६ ।।[८]

---

(१) (१)वधि (for हनि ); (२) महाहवे (for ससौब० ) (४) यश्चान्यः; यथान्यः; योत्सति,

(२) (१) प्रशासिते (for प्रशमिते ); (२) वनं (for वनात्); ततः (for पुनः ); दोषा भविष्यति,

(३)(१)पार्थ; दानैः (for तात ); (४)गच्छेयुः; गच्छेथाः,

(४)(१)एव (for एतद्); राष्ट्रं; राज्यं (for राजन् ) (३) सूत्रत्वाद् (for सूत्रः स्याद् ) ,

(५) (२) इति निश्चितं ,

(६)(१)भरतधर्मेषु ; (४) ह; तु (for हि )

(७) (२) दृश्यते (for श्रूय ) ,

(८) (१)प्रमाणास्ते; (२)अ०घ०मुच्यते, उच्यते (for अच्युत ); (३) त्रयोदशसमः; कालो; त्रयोदशादितः ( ०शदिनः; शोदितः) कालो,

कालो दुर्योधनं हन्तुं सानुबन्धमरिन्दम । **
एकाग्रां पृथिवीं सर्वां पुरा राजन्करोति सः ।। २७ ।।[१]
द्यूतप्रियेण राजेन्द्र तथा तद्भवता कृतम् । **
प्रायेणाज्ञातचर्यायां वयं सर्वे निपातिताः ।।
न तं देशं प्रपश्यामि यत्र सोऽस्मान्सुदुर्जनः । **
न विज्ञास्यति दुष्टात्मा चारैरिति सुयोधनः ।।
अधिगम्य च सर्वान्नो वनवासमिमं ततः । **
प्रव्राजयिष्यति पुनर्निकृत्याधमपूरुषः ।।
यद्यस्मानभिगच्छेत पापः स हि कथञ्चन । **
अज्ञातचर्यामुत्तीर्णान्दृष्ट्वा च पुनराह्वयेत्।।
द्यूतेन ते महाराज पुनर्द्यूतमवर्तत । **
भवांश्च पुनराहूतो द्यूते नैवापनेष्यति।।
स तथाक्षेषु कुशलो निश्चितो गतचेतनः । **
चरिष्यसि महाराज वनेषु वसतीः पुनः ।।
यद्यस्मान्सुमहाराज कृपणान्कर्तुमर्हसि । **
यावज्जीवमवेक्षस्व वेदधर्मांश्च कृत्स्नशः ।।
निकृत्या निकृतिप्रज्ञो हन्तव्य इति निश्चयः । **
अनुज्ञातस्त्वया गत्वा यावच्छक्ति सुयोधनम्।।
यथैव कक्षमुत्सृष्टो दहेदनिलसारथिः । **
हनिष्यामि तथा मन्दमनुजानातु मे भवान्।।

वैशम्पायनः

(१) (३) कृतां (for सर्वां ) ,

एवं ब्रुवाणं भीमं तु धर्मराजो युधिष्ठिरः । **
उवाच सान्त्वयन्राजा मूर्ध्न्युपाघ्राय पाण्डवम् ।। २८ ।।[१]

युधिष्ठिरः

असंशयं महाबाहो हनिष्यसि सुयोधनम् । **
वर्षात्त्रयोदशादूर्ध्वं सह गाण्डीवधन्वना ।। २९ ।।

यत्त्वमाभाषसे पार्थ प्राप्तः काल इति प्रभो । **
अनृतं नोत्सहे वक्तुं न ह्येतन्मम विद्यते ।। ३० ।।[२]

अन्तरेणापि कौन्तेय निकृतिं पापनिश्चयम् । **
हन्ता त्वमसि दुर्धर्ष सानुबन्धं सुयोधनम् ।। ३१ ।।[३]

एवं ब्रुवति भीमं तु धर्मराजे युधिष्ठिरे । **
आजगाम महाभागो बृहदश्वो महानृषिः ।। ३२ ।।[४]

तमभिप्रेक्ष्य धर्मात्मा सम्प्राप्तं धर्मचारिणम् । **
शास्त्रवन्मधुपर्केण पूजयामास धर्मराट् ।। ३३ ।।

आश्वस्तं चैनमासीनमुपासीनो युधिष्ठिरः । **
आश्वस्तं चैनमासीनमुपासीनो युधिष्ठिरः । **
अभिप्रेक्ष्य महाबाहुः कृपणं बह्वभाषत ।। ३४ ।।[५]

लक्षालङ्कारः- कृपणं बह्वभाषत इत्यत्र कृपणं यथा भवति तथा ।

---

(१) (३) राजन्; वाक्यं (for राजा); (४) पाण्डवः ,

(२) (१)यत्त्वम्; यदि (for यच्च ); मां भाषसे; आभाषसे; स्वं मन्यसे (for मा भाषसे) (२) प्राप्तकालम्; प्राप्तकाल; (३) कर्तुं; हन्तुं (for वक्तुं ); (४) मम (for मयि ); ,

(३) (२) क०ख०-निकृतिं(३)दुर्धर्षं; निहनिष्यसि दुर्धर्षु,

(४)(३)महा बाहो; राज; योगी; ०तेजा (for भागो ) (४) महामतिः; महामुनिः (for षिः ) ,

(५) (१)आसने (for आश्वस्तं); चैवम् (for चैनम्); आसने समुपासीनम्; (२) उपास्त० स्थो; आश्वास्य च (for उपासीनो); (४) तमृषिं (for कृपणं) सोभ्यभाषत; प्रत्य; सम ,

**युधिष्टिरः**

**अक्षद्यूते च भगवन्धनं राज्यं च मे हृतम् । ****
**आहूय निकृतिप्रज्ञैः कितवैरक्षकोविदैः ।। ३५ ।।**[१]

अनक्षज्ञस्य हि सतो निकृत्या पापनिश्चयैः । **
**भार्या च मे सभां नीता प्राणेभ्योऽपि गरीयसी ।। ३६ ।।**[२]

पुनर्द्यूतेन मां जित्वा वनवासं सुदारुणम् । **
**प्राव्राजयन्महारण्यमजिनैः परिवारितम् ।। ३७ ।।**

अहं वने दुर्वसतीर्वसन्परमदुःखितः । **
**अक्षद्यूताधिकारे च गिरः शृण्वन्सुदारुणाः ।। ३८ ।।**[३]

आर्तानां सुहृदां वाचो द्यूतप्रभृति शंसताम् । **
अहं हृदि श्रिताः स्मृत्वा सर्वरात्रीर्विचिन्तयन् ।। ३९ ।।[४]

यस्मिंश्चैव समस्तानां प्राणा गाण्डीवधन्वनि । **
**विना महात्मना तेन गतसत्त्व इवाभवम् ।। ४० ।।**

कदा द्रक्ष्यामि बीभत्सुं कृतास्त्रं पुनरागतम् । **
**प्रियवादिनमक्षुद्रं दयायुक्तमतन्द्रितः ।**
**सम्प्राप्तानां च सुहृदां शृण्वन्सत्याभिसंश्रिताः** [५]

---

(१) (१)पूते च (for पूतेन ) ,
(२) (१) क०ख०सतो,च (for हि) अनक्षज्ञतयाहं वै (३)(अ) पि (for च),
(३) (१)( सोहं (for अहं ); दुर्वसतिं; शये; वसे (for वसन् ); (३)अक्षद्यूताभि ( नु )षगेण; गिर शृगान्द्रदारुणान् मर्मगः; क-ख-घ-सह्यगाः; मर्मगाः; सह्यगां; सह्यगः (for शंसताम् )
(४) सर्वा रात्रीर्; रात्रीः सर्वा (for सर्वरात्री ); यस्मिंश्च वयमायत्ताः सदा; सर्वे (for प्राणा ) , महात्मनातेन विना ( विना तेन ) गतसत्वा श्वा०( हा ) स्महे; ०द्रितः (for द्रितम् )
(५)( त्यं हि संश्रिताः; ०न्निन्तः;(for ०श्रिता ); कृताः; स्थिताः (for श्रिताः ); द्यूतान्प्रभृति धर्मघ्नी; द्यत्रात्प्र ( ०तप्र )भृति मर्मघ्नी ( ०घ्ना ) ;

/*महेष्वासाः; महात्मानं ( नः ); चाप्यर्थं; नात्यर्थं; नास्त्वर्थो; वसु किञ्चिन्न ( चन ) विद्यते

इति सर्वे महेष्वासं चिन्तयाना धनञ्जयम्।
अनेन तु विषण्णोऽहं कारणेन सहानुजः ।। ४१ ।।
वनवासान्निवृत्तं मां पुनस्ते पापबुद्धयः ।
जानन्तः प्रीयमाणा वै देवने भ्रातृभिस्सह ।। ४२ ।।
द्यूतेनैवाह्वयिष्यन्ति बलादक्षेषु तद्विदः ।। ४३ ।।
आहूतश्च पुनर्द्यूते नास्मि शक्तो निवर्तितुम् । **
पणे च मम नात्यर्थं विद्यते वसु किञ्चन ।। ४४ ।।
एतत्सर्वमनुध्यायंश्चिन्तयामि दिवानिशम्।
न मत्तो दुःखिततरः पुमानस्तीह कश्चन ।। ४५ ।।
नास्ति राजा मया कश्चिदल्पभाग्यतरो भुवि।
भवता दृष्टपूर्वो वा श्रुतपूर्वोऽपि वा क्वचित् । **
न मत्तो दुःखिततरः पुमानस्तीति मे मतिः ।। ४६ ।।[१]

लक्षालङ्कारः- नास्ति राजा मया कश्चित् इत्यत्र मया समः अल्पभाग्यतरः कश्चिन्नास्तीति सम्बन्धः ।

अल्पभाग्यतरो वापि कश्चिदस्ति महामुने ।
इति ब्रुवाणं राजानं बृहदश्वोऽब्रवीन्मुनिः ।
एवं ब्रुवन्तं राजानमुवाच भगवानृषिः । **
शोकं व्यपनुदन्राज्ञो धर्मराजस्य धीमतः ।। ४७ ।।
न विषादे मनः कार्यं त्वया बुद्धिमतां व।
आगमिष्यति बीभत्सुः अमित्रांश्च विजेष्यति ।। ४८ ।।

**बृहदश्वः**

(१) (१) अपि (for अस्ति ०ख); (४) क्वचित् (for भवेत् )

यद्ब्रवीषि महाराज न मत्तो विद्यते क्वचित् । **
अल्पभाग्यतरः कश्चित्पुमानस्तीति पाण्डव ।। ४९ ।।

अत्र ते वर्णयिष्यामि यदि शुश्रूषसेऽनघ । **
यस्त्वत्तो दुःखिततरो राजाऽऽसीत्पृथिवीपते ।। ५० ।।[१]

वैशम्पायनः

अथैनमब्रवीद्राजा ब्रवीतु भगवानिति । **
इमामवस्थां सम्प्राप्तं श्रोतुमिच्छामि पार्थिवम् ।। ५१ ।।[२]

**बृहदश्वः**

शृणु राजन्नवहितः सह भ्रातृभिरच्युत । **
यस्त्वत्तो दुःखिततरो राजाऽऽसीत्पृथिवीपते ।। ५२ ।।[३]

निषधेषु महीपालो वीरसेन इति श्रुतः । **
तस्य पुत्रोऽभवन्नाम्ना नलो धर्मार्थकोविदः ।। ५३ ।।[४]

स निकृत्या जितो राजा पुष्करेणेति नः श्रुतम् । **
वनवासं सुदुःखार्तो भार्यया न्यवसत्सह ।। ५४ ।।[५]

लक्षालङ्कारः- पुष्करेण पुष्कराख्यराज्ञा ।

न तस्य दासा न रथो न भ्राता न च बान्धवाः । **
वने निवसतो राजञ्छिष्यन्ते स्म कदाचन ।। ५५ ।।[६]

---

(१)(१)वर्त; वर्ण (for कथ ); (२) नृप (for ऽनघ ); (४) पतिः; तले ( पते )
(२) (१) (ए)वम् (for (ए) नम् );, (४) तं नृपं (for पार्थिवम् )
(३) (२)भ्रातृभिः सह यत्नतः; (३)यस्त्वया (for प्रयस्त्वत्तो ); (४) तले; पतिः(for पते)
(४)(१)महीपाल ; (२)श्रुतः (for स्म ह ); (४) नलो (for नलो ); कोविद; ०तत्ववित्; ०दर्शनः
(५)(१)राज्यं; राजन् (for राजा ) (३) वासं सुदुः खार्तः; (४) तदा सुधीः(for सह ); न्यवनत्सह भार्यया
(६) (१)न तस्य दासा ( दासो; देशो ) न रथो; न तस्याश्व न च रथो ० (था) ; न तस्याश्वो नानुचरो; न चाप्यश्वा न च रथा (२)बान्धवः (४)दृश्यते स्म; अश्रूयन्त; देम् नाश्रूयत (for शिष्यन्ते स्म )

भवान्हि संवृतो वीरैर्भ्रातृभिर्देवसम्मितैः । **
ब्रह्मकल्पैर्द्विजाग्र्यैश्च तस्मान्नार्हसि शोचितुम् ।। ५६ ।।(१)

युधिष्ठिरः

विस्तरेणाहमिच्छामि नलस्य सुमहात्मनः । **
चरितं वदतां श्रेष्ठ तन्ममाख्यातुमर्हसि ।। ५७ ।।(२)

अस्मिन् तीर्थयात्रापर्वणि ४४ अध्याये ५७ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि नलोपाख्यानपर्वणि चतुश्चत्वारिंशोऽध्यायः ।। ४४ ।।

पर्वणि ......ऽध्यायः

## 3- 04- 044

# ४५. पञ्चचत्वारिंशोऽध्यायः

दमयन्त्यां समुत्कण्ठितेन नलेन वने विहरत्सु हंसेष्वेकतमस्य ग्रहणम् ।।१।। प्रतिक्रियाप्रतिज्ञानेन आत्मानं मोचितवता हंसेन नलगुणानुवर्णनेन दमयन्त्या नले रागोत्पादनम् ।।२।।

बृहदश्वः

आसीद्राजा नलो नाम वीरसेनसुतो बली । **
उपपन्नो गुणैरिष्टै रूपवानश्वकोविदः ।। १ ।।(३)

यज्वा दानपत्तिर्दक्षस्सदा शीलपुरस्कृतः ।
अतिष्ठन्मनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।

(१) (१)स भवान् (for भवानि ); सहितो (for संवृतो ) भवानसि वृतो वीरः; कृष्णया सहितो वीर (२) संमतैः; ०संनिभैः; निर्मिन्तैः (४) ख०घ०न्नार्हसि,नार्हति
(२)(१) ख०इतमर्धद्वयं न,(४)तदाख्यस्तुमिहा (०तु त्वम) र्हसि
(३) (१)न नल० (३)युक्तो; सर्वै (for इष्टै ); (४) अक्ष; अर्थं; अस्व (for अश्व )

उपर्युपरि सर्वेषामादित्य इव तेजसा ।। २ ।।[१]

च ब्रह्मण्यो वेदविच्छूरो निषधेषु महीपतिः । **

अक्षप्रियः सत्यवादी महानक्षौहिणीपतिः ।। ३ ।।[२]

ईप्सितो वरनारीणामुदारः संयतेन्द्रियः । **

रक्षिता धन्विनां श्रेष्ठः साक्षादिव मनुः स्वयम् ।। ४ ।।[३]

तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः । **

शूरः सर्वगुणैर्युक्तः प्रजाकामः स चाप्रजः ।। ५ ।।[४]

स प्रजार्थे परं यत्नमकरोत्सुसमाहितः । **

तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत ।। ६ ।।[५]

तं स भीमः प्रजाकामस्तोषयामास धर्मवित् । **

महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम् ।। ७ ।।[६]

तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ । **

कन्यारत्नं कुमारांश्च त्रीनुदारान्महायशाः ।। ८ ।।[७]

दमयन्तीं दमं दान्तं दमनं च सुवर्चसम् । **

उपपन्नान्गुणैः सर्वैर्भीमान्भीमपराक्रमान् ।। ९ ।।[८]

दमयन्ती तु रूपेण तेजसा यशसा श्रिया । **

---

(१)(४)तेजसां०

(२)(१)शान्तो; क्रतो (for शूरो ); (४) ( अक्षों अक्षौ ),

(३)(१)नर (for वर० ); (२) संयतेन्द्रियः

(४)(३)शूरः सर्वैर्गुणैर्युक्तः; शूरः सर्वगुणोपेतः; शूरश्च सद्गुणैर्युक्तः (४)स; च

(५)(१)प्रजार्थं; (२)स; च (for सु ) (३) देवर्षिर् (for ब्रह्म ) (४) पार्थिवः; भार्गवः (for भारत०घ )

(६)(१) तं स (३) राजेन्द्र (४)सुवर्चसा; समाहितः

(७)(३)त्रीन् (for च) (४) चतुरोभून्महा ; उदारान्सुमहा

(८)(१)शमं (for दमं ) (२) सुवर्ण सूर्यवर्चसं (३) सर्वान् (for सर्वै ०)(४) भैमान् (for भीमान्)

सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ।। १० ।।(१)

अथ तां वयसि प्राप्ते दासीनां समलङ्कृताम् । **

शतं शतं सखीनां च पर्युपासच्छचीमिव ।। ११ ।।(२)

तत्र स्म राजते भैमी सर्वाभरणभूषिता।

सखीमध्येऽनवद्याङ्गी विद्युत्सौदामनी यथा ।। १२ ।।

अतीव रूपसम्पन्ना श्रीरिवायतलोचना।(३)

न देवेषु न यक्षेषु तादृग्रूपवती क्वचित् ।। १३ ।।

मानुषेष्वपि चान्येषु दृष्टपूर्वाथवा श्रुता । **

चित्तप्रसादनी बाला देवानामपि सुन्दरी ।। १४ ।।(४)

नलश्च नरशार्दूलो लोकेष्वप्रतिमो भुवि । **

कन्दर्प इव रूपेण मूर्तिमानभवत्स्वयम् ।। १५।।(५)

तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् । **

नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ।। १६ ।।(६)

तयोरदृष्टः कामोऽभूच्छृण्वतोः सततं गुणान् । **

---

(१)(१)दमयं० त्यति (for ०यन्ती तु ) (२) बपुषा (for यशसा ) (३) लोकेस्मिन् (for षु ) (४) तारव्यूपवती क्वचित्

(२)(१)अथैतां व प्राप्तां (for से ) (२) दासीभिः कृतां दासीदासम० लङ्कृतम् (३) समं (for शतं) च शतं; सततं; च तदा ( च तथा ); शतं शतं सखीनां च ; सतीं सखि० गणां चैतां ; (४) पर्युपासत ; पास्त

(३)(१)ततः स; ततः सा ; सा तदा ( तथा ) (for तत्र स्म ) राजते (for भ्रा ) (४) सौदामनी

(४)(३)मनुष्येष्वपि वाक्येषु; राजेन्द्र; वा नान्या; वा चान्या ( नैवान्या ; वाथान्या) (for चान्येषु) मानुषीष्वपि चान्यासु; मानुषीषु तथा न्यासु ; (४) (अ)थ वा; पि वा; न वा; तथा (for न च ) पूर्वा श्रुताथवा; प्रसादनी; प्रसादिनी; प्रमथनी; ०प्रमथिनी; (for अपि),

(५)(१)नलस्तु ; शार्दूल; (२) गुणैर्; लोकेषु (for रूपेण )

(६)(३)च (for तु ) (४) जना पुनः; पुनद्धनाः,

अन्योन्यं प्रति कौन्तेय स व्यवर्धत हृच्छयः ।। १७ ।।(१)

अशक्नुवन्नलः कामं तदा धारयितुं हृदा । **

अन्तःपुरसमीपस्थे वन आस्ते रहोगतः ।। १८ ।।(२)

कस्यचित्त्वथ कालस्य नलः पार्थिवसत्तमः

स ददर्श ततो हंसान्जातरूपपरिष्कृतान् । **

वने विचरतां तेषामेकं जग्राह पक्षिणम् ।। १९ ।।(३)

ततोऽन्तरिक्षगो वाचं व्याजहार नलं तदा ।। २० ।।

हन्तव्योऽस्मि न ते राजन्करिष्यामि तव प्रियम्।(४)

दमयन्तीसकाशे त्वां कथयिष्यामि नैषध ।। १९ ।।

यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित्।(५)

तव चैव यथा भार्या भविष्यति तथानघ ।

विधास्यामि नरव्याघ्र सोऽनुजानातु मा भवान् ।। २२ ।। (६)

एवमुक्तस्ततो हंसमुत्ससर्ज महीपतिः । **

ते तु हंसाः समुत्पत्य विदर्भानगमंस्ततः ।। २३ ।।(७)

विदर्भनागरीं गत्वा दमयन्त्यास्तदान्तिके । **

---

(१)(१)दृष्टकामो दृष्टपूर्वो; दृष्टः कामो (२)श्रुण्वतोः सततं (४)संव्यवर्धत; सोभ्यवर्ध (for र्त )त; सोभ्यपद्यत

(२) अगच्छच्च (for अशक्नुवन्); नलः तदा हृदि (for हृदा ); (३) समीपस्थः; अन्तःपुरं प्रवि०श्याथ (४) ततोतिष्ठत दुर्मनाः;

(३)(१)ततो (for तदा ); (२) परिष्कृतान्

(४)(१)नलं तदा; ततो नलं; (३) हन्तव्योस्मि न ते राजन्; (४) ष्यामीति ते; ०ष्यामि तव; ०ष्यामि च ते

(५)(२)तेनघ ( नैषध ); (४) सा न नानु; न स्म; काङ्क्ष्यति; रंस्यति (for मं ) न च सा कामयिष्यति

(६) तथावयं; तदानघ (for तथा ); विधास्यामः नो; मां (for मा ); स मामुत्स्रष्टुमर्हसि; सोत्र जानात्ततो भवान्

(७) (३)स तु हंसः स; (४) विदर्भाम्; पुनः; तदा (for ततः )

निपेतुस्ते गरुत्मन्तः सा ददर्श च तान्खगान् ॥ २४ ॥[१]

सा तानद्भुतरूपान्वै दृष्ट्वा सखिगणावृता । **
हृष्टा ग्रहीतुं खगमांस्त्वरमाणोपचक्रमे ॥ २५ ॥[२]

अथ हंसा विससृपुः सर्वतः प्रमदावने । **
एकैकशस्तदा कन्यास्तान्हंसान्समुपाद्रवन् ॥ २६ ॥[३]

दमयन्ती तु यं हंसं समुपाधावदन्तिके । **
स मानुषीं गिरं कृत्वा दमयन्तीमथाब्रवीत् ॥ २७ ॥[४]

हंसः

दमयन्ति नलो नाम निषधेषु महीपतिः । **
अश्विनोः सदृशो रूपे न समास्तस्य मानुषाः ॥ २८ ॥[५]

तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि । **
सफलं ते भवेज्जन्म रूपं चेदं सुमध्यमे ॥ २९ ॥[६]

वयं हि देवगन्धर्वमनुष्योरगराक्षसान् । **
दृष्टवन्तो न चास्माभिर्दृष्टपूर्वस्तथाविधः ॥ ३० ॥[७]

त्वं चापि रत्नं नारीणां नरेषु च नलो वरः । **

---

(१) (१)नगरं; (२) दमयन्त्या० स्तदन्तिके; ०त्यासनान्तिके; ०तीसमन्तिके; (४)ददर्शाथ च; सा ददर्श च; ताभाणान्; ददर्शाथ वनान्स्वगान्,

(२) (२)सखी (for सखि ) (३) स्वयं (for दृष्टा ); स्वमृगान्; च खगान् (for खगमान् ); खगान्महीतुं हृष्टा सा,

(३)(१)ते तु (for अथ०); (२) सर्वथा; सततं (for सर्वतः ); (३) तदा (for ततः ); एकैकशस्ततः सख्यः ; ०शश्च कन्यास्ताः; ०शश्चञ्चास्तान् (४)खगमान् हंसास्ताः; हंसाश्च; हंसास्तु; हंसान्वै (for तान्हंसान्),

(४) (१)तं (for यं) (२)अन्तिकं; अन्तिकात् (for के); उपाधावत्तदन्तिके,

(५)(४) मानवाः (for मानुषाः ); न समस्त ( ०मोस्म ) स्य मानुषः

(६)(१)तस्य यदि; तस्यैव; तस्य त्वं (for तस्य वै ); भार्या स्याः; वै भार्या (for भार्या त्वं); (२) सभाग्या; सभार्या (भवेथा ); वर्णिनी,

(७)तु (for हि); ०गन्धर्वान्मनुष्योरगं; गन्धर्वसयक्षोरग; (३) दृष्ट्वाग्रं ते (for दृष्ट )

विशिष्टया विशिष्टेन सङ्गमो गुणवान्भवेत् ॥ ३१ ॥[१]

एवमुक्ता तु हंसेन दमयन्ती विशाम्पते । **
अब्रवीत्तत्र तं हंसं त्वमप्येवं नले वद ॥ ३२ ॥[२]

तथेत्युक्त्वाण्डजः कन्यां विदर्भस्य विशाम्पते । **
पुनरागम्य निषधान्नले सर्वं न्यवेदयत् ॥ ३३ ॥[३]

वयं हि देवगन्धर्वाः शप्ताश्चेन्द्रेण कारणात् ।
अस्मान्त्रस्पृश्य पाणिभ्यां यथा मोक्षे व्रजामहे ।
एवमुक्तस्ततो हंसान्प्रममज्ञाथ नैषधः ।
नैषधेन तु संस्पृष्टा इन्द्रलोकं पुनस्ताः ।

अस्मिन् तीर्थयात्रापर्वणि ४५ अध्याये ३३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि नलोपाख्यानपर्वणि हंसदमयन्तीसंवादे पञ्चचत्वरींशोऽध्यायः ॥ ४५ ॥

तीर्थयातात्रापर्वणि ......ऽध्यायः

## 03- 01- 045

# ४६.षट्चत्वारिंशोऽध्यायः

नारदेनान्द्रादीन् प्रति दमयन्तीकुणानुवर्णनपूर्वकं तत्स्वयंवरप्रवृत्तिकथनम् ॥ १ ॥ तत स्वयंवरार्थमागच्छत्भिरिन्द्रादिभिः पथि दृष्टस्य नलस्य दमयन्तीधटनायां दूतत्वेन वरणम् ॥ २ ॥ नलेन द्यन्त्यामिन्द्रादिनिदेशनिवेदनम् ॥ ३ ॥

---

(१)(२)नराणां (for नरेषु ); नलः पुमान्; वरो नलः (३) विशिष्टया; ०क्तेषु (for ०ष्टाया ); (४) सङ्ग्रामः; सङ्गमः पुण्यवान्,

(२)(२)सुविस्मिता (for विशां पते); (३) अब्रवीत्साधु तत्र त्वं; ०वीत्तं द्रुतं हंसं; (४) स्वम् (for तम्); नले (for ०लं )

(३)(१) क०..ण्डजः,(२)विदर्भस्य; वैदर्भेषु; (३) निषधं (for ०धान् )

### बृहदश्वः

दमयन्ती तु तच्छ्रुत्वा वचो हंसस्य भारत ।**
ततः प्रभृति न स्वस्था नलं प्रति बभूव सा ॥ १ ॥ [१]

ततश्चिन्तापरा दीना विवर्णवदना कृशा ।**
बभूव दमयन्ती तु निःश्वासपरमा तदा ॥ २ ॥ [२]

ऊर्ध्वदृष्टिर्ध्यानपरा बभूवोन्मत्तदर्शना ।**
न शय्यासनभोगेषु रतिं विन्दति कर्हिचित् ॥ ३ ॥ [३]

पाण्डुवर्णा क्षणेनाथ हृच्छयाविष्टचेतना ।[४]
न नक्तं न दिवा शेते हाहेति रुदती पुनः ।
तामस्वस्थां तदाकारां सख्यस्ता जज्ञुरिङ्गितैः ॥ ४ ॥ [५]

ततो विदर्भपतये दमयन्त्याः सखीजनः ।**
न्यवेदयत्तामस्वस्थां दमयन्तीं नरेश्वरे ॥ ५ ॥ [६]

तच्छ्रुत्वा नृपतिर्भीमो दमयन्तीं सखीगणात् ।**
चिन्तयामास तत्कार्यं सुमहत्स्वां सुतां प्रति ।[७]

---

(१)(१)ततः (for तु तत् ); ज्ञात्वा (for श्रुत्वा ); (३) ततः (for तदा) चास्वस्था (for नस्वस्था) (४) सुमध्यमा(for बभूव सा) ,

(२) (१)पराधीना (for परा दीना); (२) °वदनाकृतिः(४) तथा; सदा (for तदा); सा निः श्वासपरायणा,

(३) (२)चेतना (for दर्शना),

(४) चेतसा (for चेतना ); (४) बध्नाति (for विन्दति ),

(५) (१)वापि (for शेते ); (२) रुदती (for व ); पुनः (for मुहुः ); (३) अवस्थां (for अस्वस्थां ); महाकारां; तथा; तदा दृष्ट्वा; अनाहारां (for तदाकारां ); (४)क° जज्ञिरेङ्गतैः, सख्यस्तां; तत्सख्यः (for सख्यस्ताः) ययुद् (for जक्षुर्); सख्यस्ता जज्ञिरेगितैः; सख्यो ज्ञात्वा तदिगितैः,

(६) (२)सखीजनः; (३) नस्वस्था ( °स्ता); चास्व ( ब ) स्यां; चास्वस्था (for नस्वस्थां); न्यवेदयत्तामस्व ( व ) स्थाः; (४) दमयन्ती; नरेश्वरे,

(७) (१)भूपतिर् (for नृपतिर् ° ); (२) दमयन्त्याः; दमयन्तीं; (४) सुहृद्भत्त्या; सुमहस्त्व° ,

**किमर्थं दुहिता मेऽद्य नातिस्वस्थेव लक्ष्यते ॥ ६ ॥** [(१)]

स समीक्ष्य महीपालः स्वां सुतां प्राप्तयौवनाम् ।**

**अपश्यदात्मना कार्यं दमयन्त्याः स्वयंवरम् ॥ ७ ॥** [(२)]

स सन्निमन्त्रयामास महीपालान्विशाम्पतिः ।**

**एषोऽनुभूयतां वीराः स्वयंवर इति प्रभो ॥ ८ ॥** [(३)]

श्रुत्वा तु पार्थिवाः सर्वे दमयन्त्याः स्वयंवरम् ।**

**अभिजग्मुस्ततो भीमं राजानो भीमशासनात् ॥ ९ ॥** [(४)]

हस्त्यश्वरथघोषेण पूरयन्तो वसुन्धराम् ।**

**विचित्रमाल्याभरणैर्बलैर्दृश्यैः स्वलङ्कृतैः ॥ १० ॥** [(५)]

तेषा□ भीमो महाबाहुः पार्थिवाना□ महात्मनाम् ।

यथार्हमकरोत्पूजा□ तेऽवस□स्तत्र पूजिताः ।

एतस्मिन्नेव काले तु सुराणामृषिसत्तमौ ।**

**अटमानौ महात्मानाविन्द्रलोकमितो गतौ ॥ ११ ॥** [(६)]

नारदः पर्वतश्चैव महाप्राज्ञौ महाव्रतौ ।**

**देवराजस्य भवनं विविशाते सुपूजितौ ॥ १२ ॥** [(७)]

तावर्चयित्वा मघवा ततः कुशलमव्ययम् ।**

---

(१) (१)किमस्मद्; किमत्र; ° स्वस्थोपलक्ष्यते,

(२) (१)महीपालान्; (३) आत्मना,

(३) (१)° मन्त्र° (for पात )पालान्; ; (२) पतिः ( पते ); (३) एषोनुभूयतां वीराः; अन्वीयतामयं वीराः; आहूयतां महावीराः(४) स्म ह; प्रभुः° (for प्रभो ),

(४) (१) (अ)थ (for तु ); (३) अभिपेतुः ततो; यथा; यथा (for तदा); वसि (for भीमं ),

(५) (१)वेगेन; (२)पूर° (for नाद ); दमयन्त्याः स्वयंवरं; (३) ° भरणा; (४) शोभमानाः समन्ततः; वलैर्णै (° रश्वै) रलङ्कृताः; ध्वजैश्चित्रै (° र्ध्वयै)रलंङ्ग्यैः,

(६) (२)सुराणामृषिं; महात्मानौ इन्द्रलोकं; समा° ; उपा° (for इतो ) ,

(७) (२) क° ध° द्युती,महाप्राज्ञौ; महा° प्रभौ; महाद्युती,

पप्रच्छानामयं चापि तयोः सर्वगतं विभुः ॥ १३ ॥ [१]

नारदः

आवयोः कुशलं देव सर्वत्रगतमीश्वर ।**

लोके च मघवन्कृत्स्ने नृपाः कुशलिनो विभो ॥ १४ ॥ [२]

बृहदश्वः

नारदस्य वचः श्रुत्वा पप्रच्छ बलवृत्रहा ॥ १५ ॥

इन्द्रः

धर्मज्ञाः पृथिवीपालस्त्यक्तजीवितयोधिनः ।[३]

शस्त्रेण निधनं काले ये गच्छन्त्यपराङ्मुखाः ।**

अयं लोकोऽक्षयस्तेषां यथैव मम कामधुक् ॥ १६ ॥

क्व नु ते क्षत्रियाः शूरा न हि पश्यामि तानहम् ।**

आगच्छतो महीपालान्दयितानतिथीन्मम ॥ १७ ॥ [४]

एवमुक्तस्तु शक्रेण नारदः प्रत्यभाषत ।

शृणु मे मघवन्येन न दृश्यन्ते महीक्षितः ॥ १८ ॥ [५]

नारदः

विदर्भराज्ञो दुहिता दमयन्तीति विश्रुता ।**

रूपेण समतिक्रान्ता पृथिव्यां सर्वयोषितः ॥ १९ ॥ [६]

---

(१) (१)अर्चयित्वा (for तावर्चित्वा ); तावर्चयित्वा मघवा (for देवेद्रस्; भगवान् ); (२) ततो वचनमब्रवीत् (३)चैव; देवम् (for चापि ) (४) भुवि; प्रभुः (for विभुः); तथा सर्वगतः प्रभुः ,

(२) (१)वीर (for देव ) (३) लोकेषु; लोकेश(for लोके च) भगवन् (for मघ° ); सर्वे; कृत्स्ना (for कृत्स्ने ); (४) लोकाः; भूपाः(for नृपाः ),

(३) (२)वलं (for बलं ); शक्रः प्रोवाच शत्रुहा; (४) सङ्ग्रामे त्यक्तजीविताः,

(४) (२)नाहं; नेह (for न हि); (४) अतिथीन् दर्स्थतान्; क्व श्व; विभो (for मम),

(५) (१) क° घ° प्रत्यभाषत,नारद उं; (३)मध (for भग ),

(६) (१)राज्ञो दुहिता; राजर्षिसुता; °राजतनया ,

तस्याः स्वयंवरः शक्र भविता न चिरादिव ।**
तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ।। २० ।। (१)

तां रत्नभूतां लोकस्य प्रार्थयन्तो महीक्षितः ।**
काङ्क्षन्ति स्म विशेषेण बलवृत्रनिषूदन ।। २१ ।। (२)

बृहदश्वः

एतस्मिन्कथ्यमाने तु लोकपालाश्च साग्निकाः ।**
आजग्मुर्देवराजस्य समीपममरोत्तमाः ।। २२ ।। (३)

ततस्ते शुश्रुवुः सर्वे नारदस्य वचो महत् ।**
श्रुत्वैव चाब्रुवन्हृष्टा गच्छामो वयमप्युत ।। २३ ।। (४)

ततः सर्वे महाराज सगणाः सहवाहनाः ।**
विदर्भानभिजग्मुस्ते यतः सर्वे महीक्षितः ।। २४ ।। (५)

नलोऽपि राजा कौन्तेय श्रुत्वा राज्ञां समागमम् ।**
अभ्यगच्छददीनात्मा दमयन्तीमनुव्रतः ।। २५ ।। (६)

अथ देवाः पथि नलं ददृशुर्भूतले स्थितम् ।
साक्षादिव स्थितं मूर्त्या मन्मथं रूपसम्पदा ।। २६ ।।

तं दृष्ट्वा लोकपालास्ते भ्राजमानं यथा रविम् ।
तस्थुर्विगतसङ्कल्पा विस्मिता रूपसम्पदा ।। २७ ।।

---

(१) (४)सहस्रशः; च वासव (for च सर्वशः),
(२) (१)रत्नभूमिं; (२) मनीषिणः (for मही ); (४) वल; ॰सूदन),
(३) (१)एतेषु; एतच्च (for एतस्मिन्); एवं क ( एतत्क ); थयतस्तस्य (द्वी); एतेषु कथ्यमानेषु ),
(४) (१)ते तु; च (for तत् ); (३) श्रुत्वैव चाब्रुवन्; सर्वे; दृष्टं (for हृष्टा); (४) गच्छाम; अच्युत; इत्युत (for अप्युत)),
(५) (३)विदर्भाम् (for ॰र्भान् ); अभिजग्मुस्ते (for अभितोजग्मुर् ); (४) यतः; यथा ( तथा; यदा) (for यत्र),
(६) (१)राजा नळोपि; (३) अमेयात्मा (for अदीनां ); (४) यतव्रतः; अनुस्मरन् (for अनुव्रतः ),

ततोऽन्तरिक्षे विष्टभ्य विमानानि दिवौकसः ।**
अब्रुवन्नैषधं राजन्नवतीर्य नभस्तलात् ।। २९ ।। (१)

देवाः

भो भो निषधराजेन्द्र नल सत्यव्रतो भवान् ।**
अस्माकं कुरु साहाय्यं दूतो भव नरोत्तम ।। २९ ।। (२)

बृहदश्वः

तेभ्यः प्रतिज्ञाय नलः करिष्य इति भारत ।**
अथैतान्परिपप्रच्छ कृताञ्जलिरुपस्थितः ।। ३० ।। (३)

नलः

के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ।**
किं च तद्वो मया कार्यं कथयध्वं यथातथम् ।। ३१ ।। (४)

बृहदश्वः

एवमुक्तो नैषधेन मघवानभ्यभाषत ।

इन्द्रः

अमरान्वै निबोधास्मान्दमयन्त्यर्थमागतान् ।। ३२ ।। (५)

अहमिन्द्रोऽयमग्निश्च तथैवायमपां पतिः ।**
शरीरान्तकरो नणां यमोऽयमपि पार्थिव ।। ३३ ।। (६)

त्वं वै समागतानस्मान्दमयन्त्यै निवेदय ।। ३४ ।।

---

(१) (१)अतरीक्षे; ऽवष्टभ्य (for वि ); (४) त्रिविष्टपात्; नभ॰ स्थलात,
(२) (१)निषध॰ (for नैषध ); (२) नल सत्यपराक्रम; (४) नरेश्वर (for नरो ),
(३) (१)नृपः (for नलः ); (३) अथैतान् (for नान् ); (४) उप॰ (for अव॰ ),
(४) (१)भवन्तश्च (for वै भवन्तः ); (३) वा (for च ); तद्वो (for तत्र ); तत्त्वेन परिपृच्छामि,
(५) (१) क॰ मधवान् प्रत्यभाषत,उक्तो (for उक्ते ); (२) भगवान् (for मध ); अभ्य (for प्रत्य ),
(६) (१)तु (for च ); (३) यः सर्वान्तकरो नुणां,

लोकपाला महेन्द्राद्याः समायान्ति दिदृक्षवः ।[१]
प्राप्तुमिच्छन्ति देवास्त्वां शक्रोऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतित्वे वरयस्व ह ॥ ३५ ॥[२]

**बृहदश्वः**

एवमुक्तः स शक्रेण नलः प्राञ्जलिरब्रवीत् ।**

**नलः**

एकार्थसमुपेतं मां न प्रेषयितुमर्हथ ॥ ३६ ॥[३]
कथं तु जातसङ्कल्पः स्त्रियमुत्सृजते पुमान् ।
परार्थमीदृशं वक्तुं तत्क्षमन्तु महेश्वराः ॥ ३७ ॥[४]

बृहदश्वः

एवमुक्तो नैषधेन भगवान्पुनरब्रवीत् ॥ ३८ ॥

इन्द्रः

करिष्य इति संश्रुत्य पूर्वमस्मासु नैषध ।**
न करिष्यसि कस्मात्त्वं व्रज नैषध मा चिरम् ॥ ३९ ॥
स वै त्वमागतानस्मान्दमयन्त्यै निवेदय ।**
श्रेयसा योक्ष्यसे हि त्वं कुर्वन्नमरशासनम् ।[५]

बृहदश्वः

---

(१) (१)त्वं (for स ); त्वं (for वै ); समा (for त्वमा° ); सर्वान् (for अस्मान् ); (२) निबोधय (for निवेद° ) (३) सहेद्रास्त्वा; म (for स )हेन्द्राद्याः(४) समायाता; दमयन्ति,
(२) (१)एषाम् (for तेषाम् ); एकतरं (for अन्यतमं ); (४) वरयेति (for यस्व ),च(for ह) वरय स्वयं (for ° यस्व ह),
(३) (१)तु (for स ); (३) एकार्थं समुपेतं; °र्थसमुपेतं; र्थं(०र्थे ); समवेतं; (४) अर्हसि (for अर्हथ ),
(४)(१)नु; हि (for तु); सङ्कल्पां नरः (for पुमान् ) क्षमध्वं ममेश्वराः; (क) मरेश्वराः(for महे ); तद्वै ( °द्धि; व ) पश्यामरेश्वर; पश्य माममरेश्वर; तद्वै पश्य सुरेश्वर,
(५)(२) न्यवेदय; निबोधयः,

**एवमुक्तः स देवैस्तैर्नैषधः पुनरब्रवीत्** ।। ४० ।।

नलः

सुरक्षितानि वेश्मानि प्रवेष्टुं कथमुत्सहे ।। ४१ ।। [१]

**अस्माकं मायया छन्नस्त्वं प्रवेक्ष्यसि निश्चयम् ।**

**इति शक्रो नैषधं तं पुनरेवाभ्यभाषत ।**

प्रवेक्ष्यसीति तं शक्रः पुनरेवाभ्यभाषत ।**

**जगाम स तथेत्युक्त्वा दमयन्त्या निवेशनम्** ।। ४२ ।। [२]

ददर्श तत्र वैदर्भीं सखीगणसमावृताम् ।**

**देदीप्यमानां वपुषा श्रिया च वरवर्णिनीम्** ।। ४३ ।। [३]

अतीवसुकुमाराङ्गीं तनुमध्यां सुलोचनाम् ।**

**आक्षिपन्तीमिव प्रभां शशिनः स्वेन तेजसा** ।। ४४ ।।[४]

तस्य दृष्ट्वैव ववृधे कामस्तां चारुहासिनीम् ।**

**सत्यं चिकीर्षमाणस्तु धारयामास हृच्छयम्** ।। ४५ ।। [५]

ततस्ता नैषधं दृष्ट्वा सम्भ्रान्ताः परमाङ्गनाः ।**

**आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः** ।। ४६ ।।

प्रशशंसुश्च सुप्रीता नलं ता विस्मयान्विताः ।**

**न चैनमभ्यभाषन्त मनोभिस्त्वभ्यपूजयन्** ।। ४७ ।। [६]

---

(१) (१)एवमुक्तोथ;त्कस्तु वै दैवैद्; देवेन (for देवैस्तैर्); तु; च; ° स(for तैर् ); (२) व्रजन्नेव स उक्तवान्;०धः प्रत्युवाच ह,

(२) (३)जगाम स ,

(३) (१)राजा (for तत्र ); (२) ° जनं (for गण ); (३) दीप्य° मानां स्ववपुषा,

(४) (३)च भाः ; प्रभां; च सा; विभा; विभां; च तां आक्षिपन्तीमिवाभिख्यां; ° पन्तीं प्रभां भानोः (४)शशिनं,

(५) (४)क° घार,वार (for धार ),

(६) (१)तु सुप्रीता; च सम्प्रीत्या ( ता); तदा प्रीता; (२) तं (for ता ); (४) भ्यपूजयन्,

अहो रूपमहो कान्तिरहो धैर्यं महात्मनः ।**
कोऽयं देवोऽथवा यक्षो गन्धर्वो वा भविष्यति ।। ४८ ।। (१)

न तास्तं शक्नुवन्ति स्म व्याहर्तुमपि किञ्चन ।**
तेजसा धर्षितास्तस्य लज्जावत्यो वराङ्गनाः ।। ४९ ।। (२)

अथैनं स्मयमानं तु स्मितपूर्वाभिभाषिणी ।**
दमयन्ती नलं वीरमभ्यभाषत विस्मिता ।। ५० ।। (३)

### दमयन्ती

कस्त्वं सर्वानवद्याङ्ग मम हृच्छयवर्धन ।**
प्राप्तोऽस्यमरवद्वीर ज्ञातुमिच्छामि तेऽनघ ।। ५१ ।। (४)

कथमागमनं चेह कथं चासि न लक्षितः ।**
सुरक्षितं हि मे वेश्म राजा चैवोग्रशासनः ।। ५२ ।। (५)

### बृहदश्वः

एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।**
नलं मां विद्धि कल्याणि देवदूतमिहागतम् ।। ५३ ।। (६)

### नलः

देवास्त्वां प्राप्तुमिच्छन्ति शक्रोऽग्निर्वरुणो यमः ।**

---

(१) कान्तिर् धैर्य; (३) नु (for ऽयं ); (ऽ)थ (for नु ); ऽथ वा यक्षः (for नु यक्षो नु) ;वा ()यं; ()थ (for नु ); (४)वा; ऽथ (for नु ),
(२) (१)तास्तं; चैनं; त्वेवं; त्वेव (for त्वेनं ); (३) श्रुत्वा; तस्य (for सर्वा ),
(३) (१)स्मयमानं तु (for मानेव ); (३) वीक्ष्य (for वीरम् ); (४) विस्मयत्थि (तु।); लज्जया; भामिनी,
(४) (१)कथं (for कस्त्वं ); ° वद्याङ्गः(२)क° हच्छय, वर्धनः(४) ° च्छाम हेनघ,
(५) (१)चागमनं (for आग ); चैव (for चेह ); (२) वासि न; आसीर्न; आसीन्न (for चासि न ); कथं वा नासि लक्षितः; कथमासीदलक्षितः (३) च (for हि ); मद्° (for मे ); (४) राज्ञश्चैवोग्रशा° सनात् ,
(६) (२)प्रत्यभाषत (for प्रत्युवाच ह ); नल उ,

तेषामन्यतमं देवं पतिं वरय शोभने ॥ ५४ ॥ (१)

तेषामेव प्रभावेण प्रविष्टोऽहमलक्षितः ।**

प्रविशन्तं न मां कश्चिदपश्यन्नाप्यवारयत् ॥ ५५ ॥ (२)

एतदर्थमहं भद्रे प्रेषितः सुरसत्तमैः ।**

एतच्छुत्वा शुभे बुद्धिं प्रकुरुष्व यथेच्छसि ॥ ५६ ॥ (३)

अस्मिन् तीर्थयात्रापर्वणि ४६ अध्याये ५६ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

तीर्थयातात्रापर्वणि ......ऽध्यायः

## 03- 01- 047

# ४७.सप्तचत्वारिंशोऽध्यायः

नलदमयन्तीसंवादः ॥ १ ॥ नलेनेन्द्रादीन् प्रति दमयन्तीवचननिवेदनम् ॥ २ ॥

### बृहदश्वः

सा नमस्कृत्य देवेभ्यः प्रहस्य नलमब्रवीत् ।**

### दमयन्ती

प्रणयस्व यथाश्रद्धं राजन्किं करवाणि ते ॥ १ ॥ (४)

अहं चैव हि यच्चान्यन्ममास्ति बसु किञ्चन ।**

---

(१) (१)द्रष्टुम् (for प्राप्तुम् ); (३) एकतरं; ; एकतमं (for अन्य ); वीरं ( देवं),

(२) (१)प्रभावेण; (२) न लक्षितः (for अल); (३) न (for हि ); नैवं (for काश्चिन् ); (४) अपश्यन् (for नाप॰ ); नापः ( पि ); वारयत्; नाभ्य,

(३) (१)दर्थे ह्यहं (for ॰ दर्थमहं ); (३) तु मे वाक्यं (for शुभे बुद्धि ); (४) प्रकुरु त्वं यथेप्सितं,

(४) (२)प्रहसन्तीदमब्रवीत्; (३) वर (for प्रण॰ ); महाराज (for यथा ); प्रणयं भावयत्यस्पिन्,

तत्सर्वं तव विश्रब्धं कुरु प्रणयमीश्वर ॥ २ ॥ (1)

हंसानां वचनं यत्तु तन्मां दहति पार्थिव ।**

त्वत्कृते हि मया वीर राजानः सन्निपातिताः ॥ ३ ॥ (२)

यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद् ।**

विषमग्निं जलं रज्जुमास्थास्ये तव कारणात् ॥ ४ ॥ (३)

**बृहदश्वः**

एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।**

नलः

तिष्ठत्सु लोकपालेषु कथं मानुषमिच्छसि ॥ ५ ॥ (४)

येषामहं लोककृतामीश्वराणां महात्मनाम् ।**

न पादरजसा तुल्यो मनस्ते तेषु वर्तताम् ॥ ६ ॥ (५)

विप्रियं ह्याचरन्मर्त्यो देवानां मृत्युमृच्छति ।**

त्राहि मामनवद्याङ्गि वरयस्व सुरोत्तमान् ॥ ७ ॥ (६)

**बृहदश्वः**

विरजा□सि च वासा□सि दिव्याश्चित्राः स्रजस्तथा ।**

भूषणानि तु मुख्यानि देवान्प्राप्य तु भुङ्क्ष्व वै ॥

य इमा□ पृथिवी□ कृत्स्ना□ सङ्क्षिप्य ग्रसते पुनः ।

---

(१) (१)चैव हि; किञ्चित् (for चान्यत् ); (२) यच्चास्ति (for ममास्ति ); पार्थिव (for किञ्चन ); (३) तत्सर्वं, सर्वतस्; सर्वं तु; सर्वं नस्; विस्मब्धं; विश्रब्धः ,

(२) (१)यत्तु; श्रुत्वा; यच्च (for यत्तत्); (२) मा (for मां ); (३) महाराज° घ, (for मया वीर); (४) संनिमन्त्रिताः ,

(३) (१)वै मां; त्वं (for चेद् ); वै (for मां ); (४) मृत्यु° (for तव ),

(४) समाह्वानं; (१) उक्ते तु (for उक्तस्तु ); (२) प्रत्यभाषत (for प्रत्युवाच ह ); (४) अर्हसि (for इच्छ ),

(५) (१)भ्रताम् (for कृताम् ); (४) मनस्तेषु प्रवर्तताम्,

(६) (२)मन्युम् (for मृत्युम् ); इच्छ° ति; अर्छ; अर्हं (for ऋच्छ ); (३) पाहि (for त्रा ),

हुताशमीश□ देवाना□ का त□ न वरयेत्पतिम् ।।

यस्य दण्डभयात्सर्वे भूतग्रामाः समागताः ।

धर्ममेवानुरुध्यन्ति का त□ न वरयेत्पतिम् ।।

धर्मात्मान□ महात्मान□ दैत्यदानवमर्दनम् ।

महेन्द्र□ सर्वदेवाना□ का त□ न वरयेत्पतिम् ।।

क्रियतामविशङ्केन मनसा यदि मन्यसे ।

वरुण□ लोकपालाना□ सुहृद्वाक्यमिद□ शृणु ।।

नैषधेनैवमुक्ता सा दमयन्ती वचोऽब्रवीत् ।

समाप्लुताभ्या□ नेत्राभ्या□ शोकजेनाथ वारिणा ।।

देवेभ्योऽह□ नमस्कृत्य सर्वेभ्यः पृथिवीपते ।

वृणे त्वामेव भर्तार□ सत्यमेतद्ब्रवीमि ते ।।

तामुवाच ततो राजा वेपमाना□ कृताञ्जलिम् ।

दौत्येनागत्य कल्याणि तथा भद्रे विधीयताम् ।।

कथ□ ह्यह□ प्रतिश्रुत्य देवताना□ विशेषतः ।

परार्थे यत्नमारभ्य कथ□ स्वार्थमिहोत्सहे ।।

एष धर्मो यदि स्वार्थो ममापि भविता ततः ।

एव□ स्वार्थं करिष्यामि तथा भद्रे विधीयताम् ।।

**बृहदश्वः**

**ततो बाष्पाकुलां वाचं दमयन्ती शुचिस्मिता ।****

**प्रत्याहरन्ती शनकैर्नलं राजानमब्रवीत् ।। ८ ।।** [१]

**उपायोऽयं मया दृष्टो निरपायो नरेश्वर ।।**

---

(१) (१)बाष्पाकुलां; वार्याकुलां; बाष्पाकुला; बाष्पाकुलं; (३) प्रत्या॰ ; अपां (for प्रव्या॰ ),

येन दोषो न भविता तव राजन्कथश्चन ॥ ९ ॥ [१]

त्वं चैव हि नरश्रेष्ठ देवाश्चेन्द्रपुरोगमाः ।**

आयान्तु सहिताः सर्वे मम यत्र स्वयंवरः ॥ १० ॥ [२]

ततोऽहं लोकपालानां सन्निधौ त्वां नरेश्वर ।**

वरयिष्ये नरव्याघ्र नैवं दोषो भविष्यति ॥ ११ ॥ [३]

एवमुक्तस्तु वैदर्भ्या नलो राजा विशाम्पते ।**

आजगाम पुनस्तत्र यत्र देवाः समागताः ॥ १२ ॥ [४]

तमपश्यंस्तथाऽऽयान्तं लोकपाला महेश्वराः ।**

दृष्ट्वा चैनं ततोऽपृच्छन्वृत्तान्तं सर्वमेव तम् ॥ १३ ॥ [५]

**देवाः**

कच्चिद्दृष्टा त्वया राजन्दमयन्ती शुचिस्मिता ।**

किमब्रवीच्च नः सर्वान्वद भूमिप तेऽनघ ॥ १४ ॥ [६]

**नलः**

भवद्भिरहमादिष्टो दमयन्त्या निवेशनम् ।**

प्रविष्टः सुमहाकक्षं दण्डिभिः स्थविरैर्वृतम् ॥ १५ ॥ [७]

प्रविशन्तं च मां तत्र न कश्चिद्दृष्टवान्नरः ।**

---

(१) (१)उपायोयं (for अस्तुपायो ); नलो (for मया ); (३) यथा (for येन ),

(२) (१)त्वयैव (for स्वं चैव ); (२) देवाश्चेन्द्रा ( देवाः साग्नि; देवा इन्द्र )पुरो; लोकपालाश्च साग्निकः,

(३) (१)तत्राहं; (२) त्वा (for त्वां ); नरेश्वरं; (४) नैष (for नैवं ),

(४) (२)महायशाः; विशां पतिः(३) नलस्; जवात्; ततस् for पुनस् ); सवासवाः; व्यवस्थिताः (for समा ),

(५) (१)तत्रा (for तम ); अथा (for तथा ); (२) महेश्वराः; नरेश्वरं (for सहे ); (३) अथा; तथा ( क्य ततो° ); (४) तं (for तत् ),

(६) (१)वीर (for दृष्टा ); दृष्टा; वीर (for रजन्); (४)नल (for नघ ),

(७) (१)त्वहम् (for अहम् ); (३) सुमहत्° (for सुमहा° ); कक्षं,

ऋते तां पार्थिवसुतां भवतामेव तेजसा ।। १६ ।। (१)

सख्यश्चास्या मया दृष्टास्ताभिश्चाप्युपलक्षितः ।**
विस्मिताश्चाभवन्सर्वा दृष्ट्वा मां विबुधेश्वराः ।। १७ ।। (२)

वर्ण्यमानेषु च मया भवत्सु रुचिरानना ।**
मामेव गतसङ्कल्पा वृणीते सा सुरोत्तमाः ।। १८ ।। (३)

अब्रवीच्चैव मां बाला आयान्तु सहिताः सुराः ।**
त्वया सह नरव्याघ्र मम यत्र स्वयंवरः ।। १९ ।। (४)

तेषामहं सन्निधौ त्वां वरयिष्यामि नैषध ।**
एवं तव महाबाहो दोषो न भवितेति ह ।। २० ।। (५)

एतावदेव विबुधा यथावृत्तमुपाहृतम् ।**
मयाशेषे प्रमाणं तु भवन्तस्त्रिदशेश्वराः ।। २१ ।।(६)

अस्मिन् तीर्थयात्रापर्वणि ४७अध्याये २१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां

वनपर्वणि सप्तचत्वारिंशो..ध्यायः ।। ४७ ।।

तीर्थयात्रापर्वणि चतुर्थोऽध्यायः

## 03- 04- 048

---

(१) (२)तत्र कस्चित्; (३) विना (for ऋते ),
(२) (१)तस्या (for चास्या ); (२) अस्मि (for अपि ); दृष्ट्वा सर्वा,
(३) (३)मामेवागत; (४) वृणोति; सा सुरोत्तमाः,
(४) (१)मा (for मां ); (२) सुर° सत्तमाः (for सहिताः सुराः); (३) नरव्याघ्र (for श्रेष्ठ ),
(५) (१)त्वा (for त्वां ); (२) नरेश्वर; नृपोत्तम; न संशयः (for नरो ); वरयिष्यामि नैषध ( सत्तम ); (३) एव (for तव );भाग (for बाहो ); (४) न दोषो° ; भवितेति हि; हति च; ता त्विह; ता तव,
(६) (१)एवं; एतद् (for एव ); (२) उपा° (for उदा ); (३) मया शेषे; अतः परं (४)° भवन्तु; सुरसत्तमाः (for त्रिदशे ),

# ४८. अष्टचत्वारिंशोऽध्यायः

स्वयंवरमण्डपे इन्द्राग्नियमवरुणैर्नलसारूप्येण तत्पार्श्वसमुपवेशनम् ॥ १ ॥ दमयन्त्या स्वगुणसंतुष्टेन्द्रादिप्रसादेन नलस्यैव वरणम् ॥ २ ॥

**बृहदश्वः**

**अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा ।****
**आजुहाव महीपालान्भीमो राजा स्वयंवरे ॥ १ ॥ (१)**

**तच्छ्रुत्वा पृथिवीपालाः सर्वे हृच्छयपीडिताः ।****
**त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः ॥ २ ॥ (२)**

**कनकस्तम्भरुचिरं तोरणेन विराजितम् ।****
**विविशुस्ते नृपा रङ्गं महासिंहा इवाचलम् ॥ ३ ॥ (3)**

**तत्रासनेषु विविधेष्वासीनाः पृथिवीक्षितः ।****
**सुरभिस्रग्धराः सर्वे प्रमृष्टमणिकुण्डलाः ॥ ४ ॥ (४)**

**तां राजसमितिं पुण्यां नागैर्भोगवतीमिव ।****
**सम्पूर्णां पुरुषव्याघ्रैर्व्याघ्रैर्गिरिगुहामिव ॥ ५ ॥ (५)**

देवगन्धर्वपतयो ददृशुर्विस्म्ययान्वित ।
पौरजानपदाश्चैव ये तत्रासन्त्यमाहिताः ।

**तत्र स्म पीना दृश्यन्ते बाहवः परिघोपमाः ।****

---

(१) (१)तु सं (for शुभे ); (२) पुण्य क्षणे; पुण्यर्क्षगे ( के ); (४) राजन् (for राजा ),
(२) (१) ते श्रुत्वा; तु महीं (for पृथिवी° ); एतच्छ्रुत्वा महीं,
(३) (१)° रचितं (२) मणिरक्षविभू षितं तं (for ते ) तदा (for महा ) महा नृपाः,
(४) (४)प्र सं° ; स° (for सु° ),
(५) (१)पुण्यां; यूनां (for पूर्णां ); (२) यथा (for इव ) प्रविवेश नलो देवै पुण्यश्लोको नराधिप (३)सुपूर्णां; सम्पूर्णः,(नृ ) षभस्कधैर्; (४) सिंहैर् (for व्याघ्रैर् ),

आकारवर्णसुश्लक्ष्णाः पञ्चशीर्षा इवोरगाः ।। ६ ।। [१]

सुकेशान्तानि चारूणि सुनासाक्षिभ्रुवाणि च ।**

मुखानि राज्ञां शोभन्ते नक्षत्राणि यथा दिवि ।। ७ ।। [२]

दमयन्ती ततो रङ्गं प्रविवेश शुभानना ।**

मुष्णन्ती प्रभया राज्ञां चक्षूंषि च मनांसि च ।। ८ ।।

तस्या गात्रेषु पतिता तेषां दृष्टिर्महात्मनाम् ।**

तत्र तत्रैव सक्ताभून्न चचाल च पश्यताम् ।। ९ ।।

ततः सङ्कीर्त्यमानेषु राज्ञां नामसु भारत ।**

ददर्श भैमी पुरुषान्पञ्चतुल्याकृतीनिह ।। १० ।। [३]

तान्समीक्ष्य ततः सर्वान्निर्विशेषाकृतीन्स्थितान् ।

सन्देहादथ वैदर्भी नाभ्यजानान्नलं नृपम् ।। ११ ।।

निर्विशेषं वयोवेषरूपाणां तत्र सा शुभा ।। १२ ।। [४]

यं यं हि ददृशे तेषां तं तं मेने नलं नृपम् ।[५]

सा चिन्तयन्ती बुद्ध्याथ तर्कयामास भाविनी ।**

कथं हि देवाञ्जानीयां कथं विद्यां नलं नृपम् ।। १३ ।। [६]

एवं सञ्चिन्तयन्ती सा वैदर्भी भृशदुःखिता ।**

---

(१) (१)नृपाः सु (for तत्र स्म); तेषां (for पीना ); (२) परिधोपमवाहवः(३) आकारवर्णसुश्लक्ष्णाः; तः सुश्लिष्टाः; तः सुश्लाघ्या,

(२) (२)सुनस्रानि; सुहा सुनासाक्षिभ्र° वाणि च (३)दृश्यन्ते (for शोभन्ते ),

(३) (४)इह; अथ (for इव ),

(४) (१) (अ)थ सा; (अ)थ वै (for ततः ); (२) असौ; इव (for स्थितान् ); कृति ( कृती )स्थितान्; (४) नाभ्यजानन्; नाज्ञासीच्च तथा; तदा (for नृपम् ),

(५) पश्यते; दर्शयन् (for ददृशे ),

(६) (४)तु तं; सा (for (अ)थ); ° सा तु ( सा तं; सा च; सैव) चितयती बुद्ध्या (२) भाविनी ( कामिनी); मानिनी (३)हि ( न) (for नु ),

**श्रुतानि देवलिङ्गानि तर्कयामास भारत ।। १४ ।।** [(१)]

देवानां यानि लिङ्गानि स्थविरेभ्यः श्रुतानि मे ।**

**तानीह तिष्ठतां भूमावेकस्यापि न लक्षये ।। १५ ।।** [(२)]

सा विनिश्चित्य बहुधा विचार्य च पुनः पुनः ।**

**शरणं प्रति देवानां प्राप्तकालममन्यत ।। १६ ।।** [(३)]

वाचा च मनसा चैव नमस्कारं प्रयुज्य सा ।

**देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत् ।। १७ ।।**

**दमयन्ती**

हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः ।**

**पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे ।। १८ ।।** [(४)]

मनसा वचसा चैव यथा नाभिचराम्यहम् ।**

**तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे ।। १९ ।।** [(५)]

यथा देवैः स मे भर्ता विहितो निषधाधिपः ।**

**तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ।। २० ।।** [(६)]

यथेद☐ व्रतमारब्ध☐ नलस्याराधने मया ।[(७)]

स्वं चैव रूपं कुर्वन्तु लोकपाला महेश्वराः ।**

**यथाहमभिजानीयां पुण्यश्लोकं नराधिपम् ।। २१ ।।** [(८)]

---

(१) (१)सैवं ( व) चितयती बुद्ध्या (४) तर्कयामास; गणं भामिनी; भाविनी,

(२) (२)स्थविरेषु वै (for मे ),

(३) (१) एवं विचित्य (for सा विनि ) मनसा; विबुधा (for बहुधा) (२) सा विचार्य (for विचार्य च),

(४) (१)सत्वेन (for सत्येन ) (४) देवाः सम्प्रति सन्तु मे,

(५) (१)वचसा (for वाचा च ) मनसा वचसा चैव(२) नातिचरामि; नान्यं वृणोमि तं (for (अ)हं ),

(६) (३)वै (for मे) विबुधाम् (for मे देवास् ) पतित्वे तेन सत्येन(४) विबुधाः (for तमेव ) ,

(७) आदिष्टं (for आरब्धं ) वरणे (for (आ)राधने ),

(८) (१) पश्यन्तु; कुर्वन्तु; ; पुष्णतु (for पुष्यन्तु ); (२) महे (for सहे ) (३) अपि (for अभि),

निशम्य दमयन्त्यास्तत्करुणं परि(प्रति)देवितम् ।**
**निश्चयं परमं तथ्यमनुरागं च नैषधे ॥ २२ ॥** (१)

मनोविशुद्धि बुद्धि च भक्ति रागं च नैषधे ।**
**यथोक्तं चक्रिरे देवाः सामर्थ्यं लिङ्गधारणे ॥ २३ ॥** (२)

सापश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान् ।**
**हृषितस्रग्रजोहीनान्स्थितानस्पृशतः क्षितिम् ॥ २४ ॥** (३)

छायाद्वितीयो म्लानस्रग्रजःस्वेदसमन्वितः ।**
**भूमिष्ठो नैषधश्चैव निमेषेण च सूचितः ॥ २५ ॥** (४)

सा समीक्ष्य तु तान्देवान्पुण्यश्लोकं च भारत ।**
**नैषधं वरयामास भैमी धर्मेण पाण्डव ॥ २६ ॥** (५)

विलज्जमाना वस्त्रान्तं जग्राहायतलोचना ।
**स्कन्ध देशेऽसृजत्तस्य स्रजं परमशोभनाम् ॥ २७ ॥**

वरयामास चैवैनं पतित्वे वरवर्णिनी ।(६)
**ततो हाहेति सहसा मुक्तः शब्दो नराधिपैः ॥ २८ ॥**

---

(१) (१)तु (for तत्); (२) प्रति (for परि); (३) च परं (for परमं); तस्या (for तथ्यम्); निश्चयं परमत्यर्थं,

(२) (१) मनोविशुद्धं भक्ति च महाबुद्धि च भक्ति च(२) बुद्धि (for भक्ति) नैषधे (for भारत); (४) समस्तं लिङ्गधारणं,

(३) (१)विविधान् (for विबुधान्); देवान् (for सर्वान्); (२) निःस्वेदान् स्तब्धचक्षुषः (३) हृषितस्रजोनुलिप्ताङ्गान्; हृषितस्तनुलिप्ताङ्गान्; हृषितास्रग्रजोधारान्; अम्लानस्रग्रजोहीनान्,

(४) छायान्वितो हि (for ° द्वितीयो); छाया सा तृतीयमाम्लानस्रग्; छायाद्वितीय° (यं)म्लानस्ररजःस्वेदसमादृतेः; स° मन्वितं छायाद्वितीयमम्लानस्रग्रजःस्वेदसंयुतं(३) भूमिस्थो; भूमिष्ठं; भूमिस्थं नैषधं चैव (४) सूचिते तं,

(५) (१)तु तान्; तदा (for ततो); (२) भाविनी; भामिनी; नैषधं (for भारत); (३) वरयामास तं तत्र (४) पाण्डव; पार्थिव (for भारत),

(६) (१)वस्त्रान्तं (३) कण्ठ° (for स्कन्ध); स्रजं (for सृज); तस्य (for चास्य); (४) (अ)सृजत् (for स्रजं); प्रेग्परमशोभना; प्राक्षिपद्वरवर्णिधनी धर्मवत्सलाः धर्मतः स्थिता; धर्मतांस्थिता (for वर),

**देवैर्महर्षिभिस्तत्र साधु साध्विति भारत ।****

**विस्मितैरीरितः शब्दः प्रशंसद्भिर्नलं नृपम्   ।। २९ ।।** [१]

दमयन्ती□ तु कौरव्य वीरसेनसुतो नृपः ।**

आश्वासयद्वरारोहा□ प्रहृष्टेनान्तरात्मना ।। ३० ।।

यत्त्व□ भजसि कल्याणि पुमा□स□ देवसन्निधौ ।**

तस्मान्मा□ विद्धि भर्तारमेव□ ते वचने रतम् ।। ३१ ।।

यावच्च मे धरिष्यन्ति प्राणा देहे शुचिस्मिते ।**

तावत्त्वयि भविष्यामि सत्यमेतद्ब्रवीमि ते ।। ३२ ।।

दमयन्ती तथा वाग्भिरभिनन्द्य कृताञ्जलिः ।**

तौ परस्परतः प्रीतौ दृष्ट्वा त्वग्निपुरोगमान् ।। ३३ ।।

तानेव शरण□ देवाञ्जग्मतुर्मनसा तदा ।[2]

**वृते तु नैषधे भैम्या लोकपाला महौजसः ।**

**प्रहृष्टमनसः सर्वे नलायाष्टौ वरान्ददुः   ।। ३० ।।**

**प्रत्यक्षदर्शनं यज्ञे गतिं चानुत्तमां शुभाम् ।****

**नैषधाय ददौ शक्रः प्रीयमाणः शचीपतिः   ।। ३१ ।।** [३]

**अग्निरात्मभवं प्रादाद्यत्र वाञ्छति नैषधः ।****

**लोकानात्मप्रभांश्चैव ददौ तस्मै हुताशनः   ।। ३२ ।।**[४]

**लक्षालङ्कारः- अग्निरात्मभवम् इत्यत्र आत्मनः भवः सत्ता तम् ।**

---

(१) (१)वचसा; सञ्जज्ञे (for सहसा ); (२) मुक्तः शब्दो जनाधिपैः; नरेतरैः; नरोत्तमैः(३) तत्र (for चैव ); ईतितैः, शब्दैः नलं नृपं,

(२) एनं; एवं; एतं (for एतत् ); दमयति; ° ती

(३) (१)दर्शनं प्रति यज्ञस्य (२) मतिं (for गतिं ); स्थितिं (for शुभाम्),

(४) (३)तां लोकानात्मप्रभवांस्च; लोकानात्मभवांश्चैव,

यमस्त्वन्नरसं प्रादाद्धर्मे च परमां स्थितिम् ।**

**अपां पतिरपां भावं यत्र वाञ्छति नैषधः ।। ३३ ।।** (१)

**लक्षालङ्कारः- यमस्त्वन्नरसम् इत्यत्र यमः अन्नरसम् अन्नाभावे..पि अन्नास्वादनाज्ज्ञातसत्वम्, रसवदन्नरचनासामर्थ्यं वा ।**

स्रजश्चोत्तमगन्धाढ्याः सर्वे च मिथुनं ददुः ।**

**वरानेवं प्रदायास्य देवास्ते त्रिदिवं गताः ।। ३४ ।।** (२)

लक्षालङ्कारः- अपांपतिरपां भावम् इत्यत्र अपां भावं यत्र गिरिगाह्वरादौ नैषधः नलः अतितृषावशादुदकं वाञ्छति तत्र अकस्मात् अपाम् उदकानां भावं स्थितिम्।

एतत्सर्वं नलोऽपश्यद्दमयन्ती च भारत ।**

**यथा स्वप्नं महाराज तथैव ददृशुर्जनाः ।। ३५ ।।**

ततस्स्वयंवरं चक्रे भीमो राजाऽतिमानुषम् ।**

**समागतेषु सर्वेषु भूपालेषु विशाम्पते ।। ३६ ।।**

दमयन्त्यपि तत्रैषा राजमण्डलमृद्धिमत् ।

**अभिवीक्ष्य नैषधं वव्रे भैमी धर्मेण भारत ।। ३७ ।।** (३)

वृते च नैषधे भैम्या निवृत्ते च स्वयंवरे ।।

**दमयन्त्याश्च मुदिताः प्रतिजग्मुर्यथागतम् ।। ३८ ।।** (४)

पार्थिवाश्चानुभूयास्य विवाह□ विस्मयान्विताः ।

गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः ।

---

(१) (२) मनसः (for परमां ); गतिं (for स्थितिम् ),

(२) (१)चं स्रजश्चोत्तमगन्धाढ्याः(३) एतान् (for एवं ); (अ)स्मै (for (अ)स्य ); (४) सर्वे ते (for देवास्ते ); ययुः (for गताः ),

(३) (२) क॰ अन्वीक्ष्य; व॰ अभीक्ष्य,

(४) (अ)स्य (for (अ)स्या ); वृते च नैषधे भैम्या निवृत्ते च स्वयंवरे; (३) च मुदिताः; ततः सर्वे (for प्रमु); सर्व एव महीपालाः (४) विप्र (for प्रति ),

**विवाहं कारयामास दमयन्त्या नलस्य च ।। ३९ ।।** (१)

उष्य तत्र यथाकाम□ नैषधो द्विपदा□ वरः ।

भीमेन समनुज्ञातो जगाम नगर□ स्वकम् ।(२)

**अवाप्य नारीरत्नं तु पुण्यश्लोकोऽपि पार्थिवः ।****

**रेमे सह तया राजञ्छच्येव बलवृत्रहा ।। ४० ।।** (३)

**अतीव मुदितो राजा भ्राजमानोंऽशुमानिव ।****

**अरञ्जयत्प्रजा वीरो धर्मेण परिपालयन् ।। ४१ ।।** (४)

**ईजे चाप्यश्वमेधेन ययातिरिव नाहुषः ।****

**अन्यैश्च बहुभिर्धीमान्क्रतुभिश्चाप्तदक्षिणैः ।। ४२ ।।** (५)

**पुनश्च रमणीयेषु वनेषूपवनेषु च ।****

**दमयन्त्या सह नलो विजहारामरोपमः ।। ४३ ।।** (६)

जनयामास च ततो दमयन्त्या□ महामनाः ।

इन्द्रसेन□ सुत□ चापि इन्द्रसेना□ च कन्यकाम् ।

**एवं स यजमानश्च विहरंश्च नराधिपः ।****

**ररक्ष वसुसम्पूर्णां वसुधां वसुधाधिपः ।। ४४ ।।** (७)

**अस्मिन् तीर्थयात्रापर्वणि ४८अध्याये ४४श्लोकाः सन्ति**

---

(१) भैम्या धर्मेण भारत,

(२) तस्य (for उष्य ); यथाकालं,

(३) (१)तु; च (for तत् ); (२) नराधिपः; ()पि भारत; (३) राजन् (for राजा ); (४) वल (for बलं ); यथा शच्या पुरन्दरः ,

(४) (१)भ्राजते (for मुदितो); (३) रञ्जयन्वसुधां वीते (४)प्रति(for परि) ,

(५) (१)इयाजा (for ईजे चा ); (ऽ)पि च; चैव; (२) नाघुषः; बहुभि॰ ( विविधै ) धीमान्क्रतुभिशू; प्राप्त; त्वाप्त; स्वाप्त (for चाप्त ),

(६) (१)पुरेषु; पुण्येषु (for पुनश्च ); (२) जले (for वने ),

(७) (१)सं (for स ); तु (for च ); (२) तु (for च ),

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पश्चचत्वारिंशोऽध्यायः ।।
४८ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

# 03- 04- 049

# ४९.एकोनपञ्चाशोऽध्यायः

**दमयन्तीस्वयंवरादनन्तरं दिवं गच्छतामिन्द्रादीनां मध्येमार्गं कलिद्वापरयोर्दर्शनम् ।। १ ।। तैः स्वयंवरे दमयन्त्या नलवरणं निवेदितेन द्वापरद्वितीयेन कलिना नलपरीभवप्रतिज्ञानम् ।। २ ।। कलिचोदनया पुष्करेण नलाह्वानम् ।। ३ ।। नलपुष्करयोरक्षदेवनम् ।। ४ ।।**

बृहदश्वः

**वृते तु नैषधे भैम्या लोकपाला महौजसः ।****
**यान्तो ददृशुरायान्तं द्वापरं कलिना सह ।**
**अथाब्रवीत्कलिं शक्रः सम्प्रेक्ष्य बलवृत्रहा ।। १ ।।**

**इन्द्रः**

**द्वापरेण सहायेन कले ब्रूहि क्व यास्यसि ।। २ ।।** [१]

**बृहदश्वः**

**ततोऽब्रवीत्कलिः शक्रं दमयन्त्याः स्वयंवरम् ।****
**गत्वा हि वरयिष्ये तां मनो हि मम तां गतम् ।। ३ ।।** [२]

**तमब्रवीत्प्रहस्येन्द्रो निर्वृत्तः स स्वयंवरः ।****
**वृतस्तया नलो राजा पतिरस्मत्समीपतः ।। ४ ।।** [३]

---

(१) (१)प्रेक्ष्य (for शक्रः); शक्रः स (for सम्प्रेक्ष्य ); (२)परवीरहा; वलवृत्र॰ हा (३) सहासीनं; सहानेन;
(४) क्व यास्यसि कले वद,
(२) (३)हि (for हं ); (४) तां; हृद्॰ (for तद्॰ ); ममापि मनस्तद्गतं,
(३) (१)ततो (for तम ); (२) निवृत्तः नलो राजा पतिस्तस्या बभूव स महाद्युतिः ( ते ),

एवमुक्तस्तु शक्रेण कलिः कोपसमन्वितः ।**
देवानामन्त्र्य तान्सर्वानुवाचेदं वचस्तदा ॥ ५ ॥

कलिः

देवानां मानुषं मध्ये यत्सा पतिमविन्दत ।**
ततस्तस्या भवेन्याय्यं विपुलं दण्डधारणम् ।[१]
एवमुक्ते तु कलिना प्रत्यूचुस्ते दिवौकसः ॥ ६ ॥

देवाः

अस्माभिः समनुज्ञाते दमयन्त्या नलो वृतः ।
यो वेद धर्मानखिलान्यथावच्चरितव्रतः ॥ ७ ॥ (2)
का च सर्वगुणोपेतं नाश्रयेत नलं नृपम् ।**
योऽधीते चतुरो वेदान्सर्वानाख्यानपञ्चमान् ॥ ८ ॥ [३]
नित्यं तृप्ता गृहे यस्य देवा यज्ञेषु धर्मतः ।**
अहिंसानिरतो यश्च सत्यवादी दृढव्रतः ॥ ९ ॥ [४]
यस्मिन्दाक्ष्यं धृतिर्ज्ञानं तपः शौचं दमः शमः ।**
ध्रुवाणि पुरुषव्याघ्रे लोकपालसमे नृपे ॥ १० ॥ [५]
एव□रूप□ नल□ यो वै कामयेच्छपितु□ कले ।
आत्मानं स शपेन्मूढो हन्यादात्मानमात्मना ॥ ११ ॥
एवङ्गुणं नलं यो वै कामयेच्छपितुं कले ॥ १२ ॥ [६]

---

(१) (३)तत्र; ततम् (for ननु ) तस्य (for तस्या ),
(२) (१)तं (for ते ) (३) ज्ञाते (for ज्ञातो ),
(३) (१)का च; कश्चित्; किं च;का स्वित् धर्मगुणो, (४) साङ्गान् (for सर्वान् )
(४) नित्य॰ (for नित्यं ); अहिंसायां रतो नित्यं (for यश्च ) धर्म (for सत्य ),
(५) (१)दाक्ष्यं ( दानं ); सम्यक्;सत्यं ज्ञानं; दाक्ष्यं ( दानं) (२) शौर्यं (for शौचं); क्षमा दमः सदा क्षमा; दया क्षमा (for दमः शमः ),
(६) (१)संशपेन्; शपते; शम॰ येन्; (२) च; (३) एवम्भूतं; हि (for वै ); (४) शासितुं; वासितुं; पीडितुं

कृच्छ्रे स नरके मज्जेदगाधे विपुले ह्रदे ।

एवमुक्त्वा कलिं देवा द्वापरं च दिवं ययुः ।(१)
ततो गतेषु देवेषु कलिर्द्वापरमब्रवीत् ॥ १३ ॥

**कलिः**

संहर्तुं नोत्सहे कोपं नले वत्स्यामि द्वापर ।(२)
भ्रंशयिष्यामि तं राज्यान्न भैम्या सह रंस्यते ॥ १४ ॥

त्वमप्यक्षान्समाविश्य साहाय्यं कर्तुमर्हसि ।(३)
मम प्रियकृते तस्मिन्कृतवांश्च भविष्यसि ॥ १५ ॥

**बृहदश्वः**

एवं स समयं कृत्वा द्वापरेण कलिः सह ।**
आजगाम ततस्तत्र यत्र राजा स नैषधः ॥ १६ ॥ (४)

स नित्यमन्तरप्रेप्सुर्निषधेष्ववसच्चिरम् ।**
अथास्य द्वादशे वर्षे ददर्श कलिरन्तरम् ॥ १७ ॥ (५)

कृत्वा मूत्रमुपस्पृश्य सन्ध्यामन्वास्त नैषधः ।**
अकृत्वा पादयोः शौचं तत्रैनं कलिराविशत् ॥ १८ ॥ (६)

स समाविश्य च नलं समीपं पुष्करस्य च ।**

---

(for शपितुं ); ,
(१) (१)असकृन् (for कृच्छ्रे स); (२) विपुले ह्रदे; विपुलप्लवे,
(२) (१)गतेषु तेषु दे; (३) संयन्तुं (for संहर्तुं ),
(३) (१)ध्वंस (for भ्रंश ); (२) रंस्यति; (४) साहाय्यं कर्तुम्; कर्तुं मे साह्यम्; साह्यं मे कर्तुम्,
(४) समाह्वानं; (२) तदा (for सह ); (३) कलिम् (for ततम् ),
(५) (१)प्रेप्सुर् (for प्रेक्षी ),
(६) (२)शय्याम् (for सन्ध्याम् ); अध्यास्त; आस्ते स; भेजे स; अन्वास्त ( सोऽऽस्ते स्म ); अन्वास्य (for आस्ते स्म ) ,

**एहि दिव्य नलेलेति गावां पुष्करमब्रवीत्   ।। १९ ।।** [(१)]

**लक्षालङ्कारः- गावां पुष्करमब्रवीत् इत्यत्र गवाम् अधिपं पुष्करं पुश्करारव्यं द्वापरम् ।**

**अक्षद्यूते नलं जेता भवान्हि सहितो मया ।****

**निषधान्प्रतिपद्यस्व जित्वा राज्यं नलं नृपम्   ।। २० ।।** [(२)]

एवमुक्तस्तु कलिना पुष्करस्तमभाषत ।

पुष्कर उवाच

मुष्टौ दीव्यते वीर नास्ति वित्त□ पणाय मे ।

नेन च नलः क्रीडते न मया सह । कलिर्वचनमब्रवीत् ।

**भविष्येऽहं वृषश्रेष्ठस्तेन दीव्य पणेन वै ।**[(३)]

**भविष्येहं नरश्रेष्ठ सखा दीव्य नलेन कैः**

**एवमुक्तस्तु कलिना पुष्करो नलमभ्ययात् ।**

**कलिश्चैव वृषो भूत्वा गवां पुष्करम् अभ्ययात्   ।। २१ ।।** [(४)]

**आसाद्य तु नलं वीरं पुष्करः परवीरहा ।****

**दीव्यावेत्यब्रवीद्भ्राता वृषेणेति मुहुर्मुहुः   ।। २२ ।।** [(५)]

**न चक्षमे ततो राजा समाह्वानं महामनाः ।****

**वैदर्भ्याः प्रेक्षमाणायाः पणकालममन्यत ।**[(६)]

आहूतो न निवर्तेत यूतादपि पणादपि ।

---

(१) (१)च (for तु ); (२) च; तु (for ह ); (४) अक्षैर् (for एहि ),

(२) (१)जित्वा (for जेता ); (२) च॰ ; स (for हि ); (४) राज्यं (for राजन् ),

(३) कथ ॰ (for ॰ न )

(४) (२)अभ्यगात्; (४) तं वै; बहून् (for गवां ); अभ्यगात्; अन्वियात्; अन्वगात,

(५) (१)च (for तु ); (३) प्रीत्या; भ्रात्रा (for भ्राता ), एहि दीव्याम ( व )हे राजन्; (४) पुनः पुनः ( मुहुर्मुहुः),

(६) (२)समाह्वानं; (२) समाहूय; महायशाः(३) वैदर्भ्या माणायां; (४) प्राप्त (for पण ),

ततः स राजा सहसा देवितुं सम्प्रचक्रमे ॥ २३ ॥

भ्रात्रा दैवाभिभूतेन दैवाविष्टो जनाधिपः ।

हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम् ॥ २४ ॥

आविष्टः कलिना द्यूते जीयते स्म नलस्तदा ॥ २५ ॥ (१)

तमक्षमदसम्मत्तं सुहृदां न तु कश्चन ।**

निवारणेऽभवच्छक्तो दीव्यमानमरिन्दमम् ॥ २६ ॥ (२)

ततः पौरजनाः सर्वे मन्त्रिभिः सह भारत ।**

राजानं द्रष्टुमागच्छन्निवारयितुमातुरम् ॥ २७ ॥ (३)

ततः सूत उपागम्य दमयन्त्यै न्यवेदयत् ।**

**सूतः**

एष पौरजनो देवि द्वारि तिष्ठति कार्यवान् ॥ २८ ॥ (४)

निवेद्यतां नैषधाय सर्वाः प्रकृतयः स्थिताः ।**

अमृष्यमाणा व्यसनं राज्ञो धर्मार्थदर्शिनः ॥ २९ ॥

**बृहदश्वः**

ततः सा बाष्पकलया वाचा दुःखेन कर्शिता ।**

उवाच नैषधं भैमी शोकोपहतचेतना ॥ ३० ॥ (५)

राजन्पौरजनो द्वारि त्वां दिदृक्षुरवस्थितः ।**

---

(१) (२)रत्नानां चैव; यानयुग्यसु; वाससः(४) क॰ दीव्यन्ते स्म,हीयते; दीव्यते (for जीयते ); पुनः पुनः (for नलस्तदा ),

(२) (४)दीव्यते तम् (for दीव्यमानम् ); अरिन्दमं (for अचेतसम् ),

(३) (१)जनाः सर्वे; (२) दुःखशोकसमन्वितः ( ताः ); (३) राजानं द्रष्टुं; इच्छन्ति (for आग॰ च्छत् ); (४) आतुराः ( ॰ रः),

(४) (१)तत्र (for सूत ); (३) देवि (for सर्वो ); पौरजानपदः सर्वो ( दाः सर्वे ); (४) द्वारे,

(५) (१)ततः स; ततस्ता; स दृष्ट्वा; (२) चार्ता (for वाचा ); मूर्छिता; कर्षिता,

मन्त्रिभिः सहितः सर्वै राजभक्तिपुरस्कृतः ।। ३१ ।।

तं द्रष्टुमर्हसीत्येवं पुनः पुनरभाषत ।(१)

वृद्धैर्ब्राह्मणमुख्यैश्च वणिग्भिश्च समन्वितः ।

आगतं सहितं राजंस्त्वत्प्रसादावलम्बिनम् ।। ३२ ।। (२)

तां तथा रुचिरापाङ्गीं विलपन्तीं तथाविधाम् ।**

आविष्टः कलिना राजा नाभ्यभाषत किञ्चन ।। ३३ ।। (३)

ततस्ते मन्त्रिणः सर्वे ते चैव पुरवासिनः ।**

नायमस्तीति दुःखार्ता व्रीडिता जग्मुरालयान् ।। ३४ ।। (४)

तथा तदभवद्द्यूतं पुष्करस्य नलस्य च ।**

युधिष्ठिर बहून्मासान्पुण्यश्लोकस्त्वजीयत ।। ३५ ।।(५)

अस्मिन् तीर्थयात्रापर्वणि ४९अध्याये ३५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि एकोनपञ्चाशोऽध्यायः ।। ४९ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

# 03- 04- 050

# ५०.पञ्चाशोऽध्यायः

द्यूते नलपरीजयमुपपश्यन्त्या दमयन्त्या चोदितेन सारथिना तत्पुत्रमिथुनस्य रथारोपणेन

---

(१) एष (for राजन् ); उप° स्थितः मन्त्रिणसवां ( ° स्त्वा; तैस्ते ); महा° राज दिदृक्षव उपस्थिताः(३) सर्वो (for सर्वै ), (४) राजन् (for राजा); पुरः सरः,

(२) तान् (for तं ),

(३) (१)रुचिरापागां; (२) तथा विधा ( मुहुर्मुहुः ); शुचिस्मितां (for सुमम् ),

(४) (२)तथैव (for ते चैव ); (४) आलयं,

(५) (१)तदा (for तथा ); सम (for एतद ),

**भीमनगरप्रापणम् ।। १ ।। द्यूते पुष्करजितेन नलेन दमयन्त्या सह वरप्रवेशः ।। २ ।। अन्तरिक्षे पक्षिरूपेण समुत्पतद्भिरक्षैरात्मजिघृक्षो नलस्य अन्तरीयवस्त्रापकर्षणेन पलायनम् ।। ३ ।। नलेन स्वपन्त्या दमयन्त्या वस्त्रार्धच्छेदनपूर्वकं परित्यागोपायः।।**

**बृहदश्वः**

**दमयन्ती ततो दृष्ट्वा पुण्यश्लोकं नराधिपम् ।****
**उन्मत्तवदनुन्मत्ता देवने गतचेतसम् ।। १ ।।** (१)

भयशोकसमाविष्टा राजन्भीमसुता ततः ।**
**चिन्तयामास तत्कार्यं सुमहत्पार्थिवं प्रति ।। २ ।।** (२)

सा शङ्कमाना तत्पापं चिकीर्षन्ती च तत्प्रियम् ।**
**नलं च हृतसर्वस्वमुपलभ्येदमब्रवीत् ।। ३ ।।** (३)

बृहत्सेनामतियशा□ ता□ धात्री□ परिचारिकाम् ।**✻✻**
हिता□ सर्वार्थकुशलामनुरक्ता□ सुभाषिताम्

**दमयन्ती**

**बृहत्सेने व्रजामात्यानानाय्य नलशासनात् ।****
**आचक्ष्व यद्धृतं द्रव्यमवशिष्टं च यद्वसु ।। ४ ।।** (४)

**ततस्ते मन्त्रिणः सर्वे विज्ञाय नलशासनम् ।****

---

(१) (१)तथा (for तुतं ) (for ततो ); (४) दैवेन(for देवने ); गतचेतनं; कृतचेतसं(नं),
(२) (२)वैदर्भी ससुता सली भ्रीमसुता (४) नैषधं (for पार्थिवं),
(३) (१) शङ्कमाना च; आशकमाना तत्कार्यं (२) चिकीर्षतं, तत्कथं; तत्परं, (४) लक्ष्ये (for लभ्ये° ) ,
(४) (२)आसाद्य; आनीय नृपशासनात् (३) दिव्यं; वित्तं (for द्रव्यं ) (४) तु (for च ) °
वृहदश्वः
इत्येवं सा समादिष्टा बृहत्सेना नरेश्वर।
उवाच देव्या वचनं मन्त्रिणां सा समीपतः ।।५।।
/* ( देव्या वचनं ),

अपि नो भागधेयं स्यादित्युक्त्वा नलमाव्रजन् ।। ६ ।। [१]

तास्तु सर्वाः प्रकृतयो द्वितीयं समुपस्थिताः ।**
न्यवेदयद्भीमसुता न च तत्प्रत्यनन्दत ।। ७ ।। [२]

वाक्यमप्रतिनन्दन्तं भर्तारमभिवीक्ष्य सा ।**
दमयन्ती पुनर्वेश्म व्रीडिता प्रविवेश ह ।। ८ ।। [३]

निशम्य सततं चाक्षान्पुण्यश्लोकपराङ्मुखान् ।**
नलं च हृतसर्वस्वं धात्रीं पुनरुवाच ह ।। ९ ।। [४]

### दमयन्ती

बृहत्सेने पुनर्गच्छ वार्ष्णेयं नलशासनात् ।**
सूतमानय कल्याणि महत्कार्यमुपस्थितम् ।। १० ।। [५]

लक्षालङ्कारः- वार्ष्णेयं नलशासनात् इत्यत्र वार्ष्णेयं वृष्णिकुलोत्पन्नं सूतं सारथिम् ।

### बृहदश्वः

बृहत्सेना तु सा श्रुत्वा दमयन्त्याः प्रभाषितम् ।**
वार्ष्णेयमानयामास पुरुषैराप्तकारिभिः ।। ११ ।। [६]

वार्ष्णेयं तु ततो भैमी सान्त्वयञ्श्लक्ष्णया गिरा ।**
उवाच देशकालज्ञा प्राप्तकालमनिन्दिता ।। १२ ।। [७]

---

(१) (३)अपीदानीं विधेयंस्याद् (४)° नलम् (for पुन ) अब्रुवम् (for आव्रजन्),
(२) (१)प्रकृतीस्तास्तथा ( तो ) दृष्ट्वा, (४) स (for न ) स (for च ) स; तं; ताः (for तत् ) प्रत्य° पद्यत,
(३) (१)प्रतिवाक्यमदातारं (२) प्रसमीक्ष्य; अपि वीक्य(अभि),
(४) (१)निशम्य, हि(for च ) निशम्य चाक्षान्वै सर्वान् (२)° पराक्रमान् ( क्रमं ),
(५) (१)गत्वा (for गच्छ ); (२) मम (for नल° ); (३) आनाय, (४)° बृहत् (for महत्),
(६) (१)तु सा; ततः (for तु तत् ); (२) दमयत्या, (३) सूतं तम् (for वार्ष्णेयम् ), सूतमानाययामास, (४) आशु (for आप्त ),
(७) (१)वासुदेवं (for वार्ष्णेयं तु ); च (for तु ) ; तथा (for ततो ); (२) सान्त्वयत् ( सारथिं); सान्त्वया; सान्त्वित (for सान्त्वयन् ) श्लक्ष्णया परया (मधुरं); स्निग्धया) गिरा; श्लक्ष्णं मधुरया गिरा, (४) देश (for

**दमयन्ती**

**जानीषे त्वं यथा राजा सम्यग्वृत्तः सदा त्वयि ।****

**तस्य त्वं विषमस्थस्य साहाय्यं कर्तुमर्हसि ।। १३ ।।** [१]

**यथा यथा हि नृपतिः पुष्करेणैव जीयते ।****

**तथा तथास्य वै द्यूते रागो भूयोऽभिवर्धते ।। १४ ।।** [२]

**यथा च पुष्करस्याक्षाः पतन्ति वशवर्तिनः ।****

**तथा विपर्ययश्चापि नलस्याक्षेषु दृश्यते ।। १५ ।।** [३]

**सुहृत्स्वजनवाक्यानि यथावन्न शृणोति च ।****

**ममापि च तथा वाक्यं नाभिनन्दति मोहितः ।। १६ ।।** [४]

**यथा राज्ञः प्रदीप्तानां भाग्यानामद्य सारथे ।**[५]

**नूनं मन्ये न दोषोऽस्ति नैषधस्य महात्मनः ।। १७ ।।** [६]

**यत्तु मे वचनं राजा नाभिनन्दति मोहितः**

**शरणं त्वां प्रपन्नास्मि सारथे कुरु मद्वचः ।****

**न हि मे शुध्यते भावः कदाचिद्विनशेदपि ।। १८ ।।** [७]

**नलस्य दयितानश्वान्योजयित्वा मनोजवान् ।****

---

प्राप्तं ) अरिन्दम (for अनिन्दिता ),

(१) (१)सदा; यदा (for यथा),

(२) (२) (ए)व; हि( (इ)ह) (३)भूयो वै; वै चूते; भूयोपि, (४) सूते रागो भूयो रागो।; रागो सूतेः ऽपि वि° ; हि; ऽस्य; थ (for ऽभि° ); वैराग्येण ह भूयते,

(३) (१)तथा (for यथा ); हि (for च ); (२) पतन्ति; पतन्ते (for वर्तन्ते ); (४) वर्तते (for दृश्य ),

(४) (१)सुहृत्युजन, (२) यथायन; यथा यं न, सः; यः (for च ), (२)यथा (for तथा ); (४)जानाति (for नन्दति ), नैषधः (for मोहितः ),

(५) (१)तथा (for यथा ); तथास्य राज्ञो दीप्तानां; (२) अस्य; अत्र (for अद्य ),

(६) (३) दोषो (for शेषो ); नूनमन्ये विरोधोस्ति,

(७) (१)यत्तु मे; ममैव; तत्र मे (for यत्र मे ); (३) त्वा (for त्वां ); (४) मे (for मद्), विनमेद् (for विनशेद्); अपि (for इति ) विनाशं प्रति सारथे,

**रथमारोप्य मिथुनं कुण्डिनं यातुमर्हसि ॥ १९ ॥** [१]

लक्षालङ्कारः- रथमारोप्य मिथुनम् इत्यत्र मिथुनं स्त्रीपुंसरूपं पुत्रद्वयम् ।

मम ज्ञातिषु निक्षिप्य दारकौ स्यन्दनं तथा ।**

**अश्वांश्चेमान्यथाकामं वस वान्यत्र गच्छ वा ॥ २० ॥** [२]

दमयन्त्यास्तु तद्वाक्यं वार्ष्णेयो नलसारथिः ।**

**न्यवेदयदशेषेण नलामात्येषु मुख्यशः ॥ २१ ॥** [३]

तैः समेत्य विनिश्चित्य सोऽनुज्ञातो महीपते ।**

**ययौ मिथुनमारोप्य विदर्भांस्तेन वाहिना ॥ २२ ॥** [४]

लक्षालङ्कारः- वाहिना वाहवता रथेन ।

हयांस्तत्र विनिक्षिप्य सूतो रथवरं च तम् ।**

**इन्द्रसेनां च तां कन्यामिन्द्रसेनं च बालकम् ॥ २३ ॥** [५]

आमन्त्र्य भीमं राजानमार्तः शोचन्नलं नृपम् ।**

**अटमानस्ततः अयोध्यां जगाम नगरीं तदा ॥ २४ ॥** [६]

क नु यास्यामि मनसा चिन्तयानो मुहुस्ततः ।[७]

ऋतुपर्णं स राजानमुपतस्थे सुदुःखितः ।**

**भृतिं चोपययौ तस्य सारथ्येन महीपते ॥ २५ ॥** [८]

---

(१) (२) मनो (for महा ); (३) रथम् (for इदम्); नगरं ( क्यमिथुनं ); (४) विदर्भ कुण्डिनं,

(२) (२)स्यन्दनं बालकौ (कं) तथा; (३) चेमानू; चैव (for चैतान् ); विनिक्षिप्य (for यथाकामं ); (४) वसेहान्यत्र; वात्रैव; वान्येन (for वान्यत्र ); मम वाक्येन गच्छेथाः(त),

(३) (१)ततो (for तु तद् ); (४) नित्यशः; सर्वशः; मुख्यतः,

(४) (३)आदाय (for आरोप्य ); (४) विय भां तेन, यायिना,

(५) (१)ततो (for तत्र ); स विन्यस्य (for विनिक्षिप्य ;) इयांस्तु तत्र निक्षिप्य,

(६) (२)प्रति (for नृपम् ),

(७) (३)ततः सूतो (ऽ) ओध्याया, (४) तथा; ततः (for तदा),

(८) (१)चः तु (for स ); (२) स्वरान्वितः (for सुदुः° ); (३) तत्र (for तस्य ); लेभे तत्र भृतिंसोपि;

**बृहदश्वः**

**ततस्तु याते वार्ष्णेये पुण्यश्लोकस्य दीव्यतः ।****
**पुष्करेण हृतं राज्यं यच्चान्यद्वसु किञ्चन ।। २६ ।।** [(१)]

हृतराज्यं नलं राजन्प्रहसन्पुष्करोऽब्रवीत् ।

**पुष्करः**

**द्यूतं प्रवर्ततां भूयः प्रतिपाणोऽस्ति कस्तव ।। २७ ।।** [(२)]

**शिष्टा ते दमयन्त्येका सर्वमन्यज्जितं मया ।****
**दमयन्त्याः पणः साधु वर्ततां यदि मन्यसे ।। २८ ।।** [(३)]

**लक्षालङ्कारः- पाणः पणः ।**

**पुष्करेणैवमुक्तस्य पुण्यश्लोकस्य मन्युना ।****
**व्यदीर्यतेव हृदयं न चैनं किञ्चिदब्रवीत् ।। २९ ।।** [(४)]

**ततः पुष्करमालोक्य नलः परममन्युमान् ।****
**उत्सृज्य सर्वगात्रेभ्यो भूषणानि महायशाः ।। ३० ।।** [(५)]

उवाच विद्यतेऽन्यच्च धन□ मम नराधम ।

**पणन्निव च निक्षिप्य पुण्यश्लोकस्तु दुर्मनाः ।**
**उत्तरीयं तथा वस्त्रं तस्याश्चाभरणानि च ।। ३१ ।।** [(६)]

---

भृतिं चस ददौचास्य, (४) सात्मजेन, महीपते; नि ( तु; च ) योज्रितः,
(१) (१)प्र (for तु ); (२) धीमतः (for दीम्य° ); (४) यद्वान्यद्; यच्चापि,
(२) (२)पुष्करो वाक्यमब्रवीत, (४)तु (for (अ)स्ति ),
(३) (२)एतद् (for अन्यद्), जितं (for हृतं ), पूर्व सा विजिता मया, (३) दमयत्या,
(४) (१)उक्तस्तु; उक्तस्च (for स्य ), (२) भन्युमत, नलः परममन्युना, (३) विदीर्यतेव; व्यदीर्यतास्य,
(५) (२)मन्युना,
(६) (१) अ° घ° पणं यश्च विक्षिप्य,पणन्निव च निक्षिप्य; पणोस्त्विति विनिक्षिप्य, तथा (for तदा ), (३) उद्धृत्य, (४) महामनाः (for यशाः ),

एकवासा ह्यसंवीतः सुहृच्छोकविवर्धनः ।। ३२ ।।

निश्चक्राम ततो राजा त्यक्त्वा सुविपुलां श्रियम् ।[१]

दमयन्त्येकवस्त्राथ गच्छन्तं पृष्ठतोऽन्वगात् ।। ३३ ।।

स तया बाह्यतः सार्धं त्रिरात्रं नैषधोऽवसत् ।। ३४ ।। [२]

पुष्करस्तु महाराज घोषयामास वै पुरे ।**

**नले यः सम्यगातिष्ठेत्स गच्छेद्वध्यतां मम ।। ३५ ।।** [३]

पुष्करस्य तु वाक्येन तस्य विद्वेषणेन च ।**

**पौरा न तस्य सत्कारं कृतवन्तो युधिष्ठि ।। ३६ ।।** [४]

स तथा नगराभ्याशे सत्कारार्हो न सत्कृतः ।**

**त्रिरात्रमुषितो राजा जलमात्रेण वर्तयन् ।। ३७ ।।** [५]

पीड्यमानः क्षुधा तत्र फलमूलानि कर्षयन् ।

प्रातिष्ठत ततो राजा दमयन्ती तमन्वगात् ।[६]

क्षुधया पीड्यमानस्तु नलो बहुतिथेऽहनि ।**

**अपश्यच्छकुनान्कांश्चिद्धिरण्यसदृशच्छदान् ।। ३८ ।।** [७]

---

(१) (१)ह्यसंवीतः; सुसंवीतः; परीधानः (for असं ), एकवासोभि ( सो हि; सः सु ) संवीतः (२) सुहृच्छोकसमन्वितः; सुहृदां शोकवर्धनः (३) ततो; महा° ; नलो (for तदा ), राजन् (for राजा ), (४) स (for सु° ), त्यक्त्वा तु विपुलं धनं,

(२) (१) एकवस्त्रां; वस्त्रं; (अ)थः तु; च (for तं ); (२) ()भ्यगात्; ()न्वयात्; (३) तथा (for तया); नगरा( नैषधाः) भ्याशे (for बाह्यतः सार्ध ), (४) तां रात्रीं (for त्रिरात्रं), नैषधः सहितोवसत,

(३) (१)स्तु महाभागः(३) अनुव्रजेन्नलं यस्तु; (४) मम वध्यतां; वध्यता° मिति, गच्छेद्वै वध्यतामिति,

(४) (१)च (for तु ), (२) प्रजा° ; सूत° (for तस्य ), (३) न तस्य ( तस्य न ) (for न तस्मिन् ), (४) नराधिप (for युधि ),

(५) (१)तया; नलो (for तथा ); नगराभ्यासे; (३) भूत्वो; राजन् (for राजा ),

(६) क्षुधः सम्पीड्यमानश्च फल; वर्त (for कर्ष ); ततोन्वगात्; ततोन्वियात् (for तमन्व ),

(७) (१)क्षुधया; तथा स्त्रं (for क्षुधासं° ); मानश्च; ° मानोपि, (२) ° तिथं; तिथी (for इति° ), पथि; ऽध्वनि (for ऽहनि ),

स चिन्तयामास तदा निषधाधिपतिर्बली ।**

**अस्ति भक्षयो ममाद्यायं वसु चेदं भविष्यति ।। ३९ ।।** [१]

लक्षालङ्कारः- अस्ति भश्र इत्यत्र अद्य पक्षिणाम् मांसस्य भक्ष्यत्वात् भक्षो..प्यस्ति । हिरण्यपक्षत्वात् इदमेव वसु च भविष्यतीति योजना ।

ततस्तान्परिधानेन वाससा स समावृणोत् ।**

**तस्य तद्वस्त्रमादाय सर्वे जग्मुर्विहायसा ।। ४० ।।** [२]

लक्षालङ्कारः- ततस्तानुत्तरीये इत्यत्र उत्तरीयेण स्वधृतैकवस्त्रोत्तरभागेन । तस्योत्तरीयमादाय इत्यत्र उत्तरभागसहितस्वधृतवस्त्रं बलादादाय । अन्यथा प्रागुक्तैकवस्त्रत्वायोगाद्वक्ष्यमाणनग्नत्वायोगाच्च ।

उत्पतन्तः खगा वाक्यमेतदाहुस्ततो नलम् ।**

**दृष्ट्वा दिग्वाससं भूमौ स्थितं दीनमधोमुखम् ।। ४१ ।।** [३]

**खगाः**

**वयमक्षाः सुदुर्बुद्धे तव वासो जिहीर्षवः ।**

**आगता न हि नः प्रीतिः सवाससि गते त्वयि ।। ४२ ।।** [४]

लक्षालङ्कारः- आगता न हि इत्यत्र सवाससि त्यति गते सति नः प्रीतिर्न हि ।

**बृहदश्वः**

**तान्समीपगतानक्षानात्मानं च विवाससम् ।**

---

(१) (३)भक्ष्यो; भक्ष्यं; समादेशं; ममाद्याहं; ममाद्योयं; ममापीह; ममाद्यापि; मम ह्यद्य; (४) बहु (for वसु ),
(२) (१)उत्तरीयेण; परिधानेन (for अन्तरीयेण ) (२) समवावृणोत्; स सा ( म )मावृणोत्; स समास्तु; स समावृणोत् (for समवास्तृणोत् ); वस्त्रेणैवसमावृणोत्; (३) तस्योत्तरीयम्; तस्य तद्वस्त्रम्; आसाद्य; (४)जग्मुः सर्वे; विहायसः; विहङ्गमाः; क्हायसं,
(३) (१)तत्तु; तं तु; वाक्यं (for ते तु ), (२) एतद् (for वाक्यम् ), ततो (for तदा ); (३) दिष्ट्या (for दृष्ट्वा ); दीनं (for भूमौ); (४) स्थितमेनम्; दीनं स्थितम्,
(४) (२)तव ॰ वासोपहारिणः(३) अस्माकं हि कथं प्रीतिः; नागच्छति ततः प्रीतिः(४) सु (for स॰ ),

पुण्यश्लोकस्तदा राजन्दमयन्तीमथाब्रवीत् ।। ४३ ।। (१)

**नलः**

येषां प्रकोपादैश्वर्यात्प्रच्युतोऽहमनिन्दिते ।**
प्राणयात्रां न विन्देयं दुःखितः क्षुधयान्वितः ।। ४४ ।। (२)

येषां कृते न सत्कारमकुर्वन्मयि नैषधाः ।**
इमे ते शकुना भूत्वा वासो भीरु हरन्ति मे ।। ४५ ।। (३)

वैषम्यं परमं प्राप्तो दुःखितो गतचेतनः ।**
भर्ता तेऽहं निबोधेदं वचनं हितमात्मनः ।। ४६ ।। (४)

एते गच्छन्ति बहवः पन्थानो दक्षिणापथम् ।**
अबन्तीमृक्षवन्तं च समतिक्रम्य पर्वतम् ।। ४७ ।। (५)

एष विन्ध्यो महाशैलः पयोष्णी च समुद्रगा ।**
आश्रमाश्च महर्षीणां बहुमूलफलान्विताः ।। ४८ ।। (६)

एष पन्था विदर्भाणाम् असौ गच्छति कोसलान् ।**
अतः परं च देशोऽयं दक्षिणे दक्षिणापथः ।। ४९ ।। (७)

एतद्वाक्य□ नलो राजा दमयन्ती□ समाहितः ।

---

(१) (१)समीप॰ (for समीक्ष्यक्ष्य ); (२) गत॰ (for च वि॰ );(३) तदा; ऽपि वै (for ततो); राजन् (for राजा); (४) तथा; तदा (for अथा ) ,

(२) (१)एषां (for येषां); (३) विन्देयं; विदेत (for विदे च ); (४) क्षुधयान्वितः; क्षुत्तडषार्दितः; च क्षुधा॰ न्वितः क्षुधितो दुःखितस्तथा,

(३) (१)एषां; प्रकोपात् (for कृते न); (२) मम (for मयि ); (३) ते इमे; (४) वासो भीरु; वासो व्यप॰ ; वास॰ श्चापि,

(४) (३)ते सं॰ ; ते सा (for तेऽहं ),

(५) (१)बहुशः (for बहवः ); (२) सुस्वं;दिशं(for पथम्) (३) अवन्तीनृक्ष,

(६) (१)महाञ् (for महा ); (४) बहुमूलफलो; द्रुमाः पुष्प्य॰ फला; अमी पुष्पफलद्रुमाः,

(७) (२)असौ; एष (for अयं ); यास्यति (for गच्छति); कोशलां; कौशलान्; कोश॰ लान्; कौशला; कोशलं, रमणीयः शिवः समः(३) क॰ अतः परं च, ततः (for अतः) (४) दक्षिणो (for पे ) विदर्भाणां महाद्युते,

उवाचासकृदार्तो हि भैमीमुद्दिश्य भारत ।[१]

**बृहदश्वः**

**ततः सा बाष्पकलया वाचा दुःखेन कर्शिता ।****
**उवाच दमयन्ती तं नैषधं करुणं वचः ॥ ५० ॥** [२]

**दमयन्ती**

**उद्वेजते मे हृदयं सीदन्त्यङ्गानि सर्वशः ।****
**तव पार्थिव सङ्कल्पं चिन्तयन्त्याः पुनः पुनः ॥ ५१ ॥** [३]

**हृतराज्यं हृतद्रव्यं विवस्त्रं क्षुच्छ्रमान्वितम् ।****
**कथमुत्सृज्य गच्छेयमहं त्वां निर्जने वने ॥ ५२ ॥** [४]

**श्रान्तस्य ते क्षुधार्तस्य चिन्तयानस्य तत्सुखम् ।****
**वने घोरे महाराज नाशयिष्याम्यहं क्लमम् ॥ ५३ ॥** [५]

**न च भार्यासमं किञ्चिद्विद्यते भिषजां मतम् ।****
**औषधं सर्वदुःखेषु सत्यमेतद्ब्रवीमि ते ॥ ५४ ॥** [६]

**नलः**

**एवमेतद्यथाऽऽत्थ त्वं दमयन्ति सुमध्यमे ।****
**नास्ति भार्यासमं मित्रं नरस्यार्तस्य भेषजम् ॥ ५५ ॥** [७]

---

(१) उवाच चासङ्कदार्तः,
(२) (२)पीडिता; कर्षिता; मूर्छिता (३)(इ) दं (for तं ); (४) परमं; कृपणं (for करुणं ),
(३) (१)सवेपते; उद्वेजते; (२) सर्वतः; भारत (for सर्वशः ),
(४) (१)हृतराष्ट्रं; हृतद्रव्यं; (२) क्षुत्प्रपीडितं; क्षुधयान्वितं; क्षुत्समन्वितं; तृट्सम( ° श्रमा )° न्वितं ; (४) त्वामहं; विसृज्य; त्वा; हि (for त्वां ); निर्जने (for वि ),
(५) (१)च (for ते ); (४) तं (for ते ),
(६) (१)हि (for च ); (२) भेवजामृतं; भेषजं मतं; भैषजं मतं; ह्येष मन्मतं; (३) नित्यं हि (for औषधं ),
(७) (१)सत्यम् (for एवम्); एव (for एतद्); (३) रम्यं; किञ्चित्; वित्तं (for मित्रं ); (४) विद्यते भेषजं मतं ( षजा° मृतं ),

न चाहं त्यक्तकामस्त्वां किमलं भीरु शङ्कसे ।**
त्यजेयमहमात्मानं न चैव त्वामनिन्दिते ।। ५६ ।। (१)

दमयन्ती

यदि मां त्वं महाराज न विहातुमिहेच्छसि ।**
तत्किमर्थं विदर्भाणां पन्थाः समुपदिश्यते ।। ५७ ।। (२)

अवैमि चाहं नृपते न तु मां त्यक्तुमर्हसि ।**
चेतसा त्वपकृष्टेन मां त्यजेथा महीपते ।। ५८ ।। (३)

पन्थानं हि ममाभीक्ष्णमाख्यासि च नरोत्तम ।**
अतो निमित्तं शोकं मे वर्धयस्यमरोपम ।। ५९ ।। (४)

यदि चायमभिप्रायस्तव ज्ञातीन्व्रजेदिति ।**
सहितावेव गच्छावो विदर्भान्यदि मन्यसे ।। ६० ।। (५)

विदर्भराजस्तत्र त्वां पूजयिष्यति मानद ।**
तेन त्वं पूजितो राजन्सुखं वत्स्यसि नो गृहे ।(६)

बृहदश्वः

इत्युक्तस्सकतदा देव्या नलो वचनमब्रवीत् ।। ६१ ।।

---

(१) (१)त्यक्तमिच्छामि; (२) किमलं (for किमर्थं ); भाषसे (for शङ्कं ); (३) प्रजह्याम्; प्रसह्यम् (for त्यजेयम्); (४) चैव (for स्वेव),

(२) (१)मा (for मां ); एष पन्था विदर्भाणां किमर्थमुपदिश्यते,

(३) (२)तु; च (for त्वं ); इच्छसि (for अर्हसि); (३) तेजसा; त्वपकृष्टसवं;मा (for मां ),

(४) (१)पन्थानो; (२)विबुधोत्तम; च (for त्वं ); नरोत्तम; विमुधोपम; यस्तुरोपम (for नर ); (३) शोको; शङ्का; (४)अमरोपम; अनलप्रभ; वर्धयिष्यति ( सि ); शङ्कया; वर्धयिष्यसि मानद; वर्धते चानिशं प्रभो; वर्तते त्वयि नषध,

(५) (१)वा (for चा ); (२) इति; इयं (for तव ); तीन् (for राजन् ) ; भवेदिति; कथञ्चन; भविष्यति (for व्रजेदिति ); (३) गच्छामो; गच्छाव; (४) विदर्भा यदि,

(६) (१)त्वा (for त्वां ); ततः स राजा त्वां दृष्ट्वा, (२) पूजयित्वा च मानद; (३) ततम् (for तेन ); (४) मे (for नो ),

**नलः**

**यथा राज्यं तव पितुस्तथा मम न संशयः ।****
**न तु तत्र गमिष्यामि विषमस्थः कथञ्चन ।। ६२ ।।**

**बृहदश्वः**

इत्युक्तः स तदा देव्या नलो वचनमब्रवीत् ।(1)

**कथं समृद्धो गत्वाहं तव हर्षविवर्धनः ।****
**परिच्युतो गमिष्यामि तव शोकविवर्धनः ।। ६३ ।।** (२)

**बृहदश्वः**

**इति ब्रुवन्नलो राजा दमयन्तीं पुनः पुनः ।****
**सान्त्वयामास कल्याणीं वाससोऽर्धेन संवृताम् ।। ६४ ।।** (३)

**तावेकवस्त्रसंवीतावटमानावितस्ततः ।****
**क्षुत्पिपासापरिश्रान्तौ सभां काश्चिदुपेयतुः ।। ६५ ।।** (४)

**तां सभामुपसम्प्राप्य तदा स निषधाधिपः ।****
**वैदर्भ्या सहितो राजा निषसाद महीतले ।। ६६ ।।** (५)

**स वै विवस्त्रो विकटो मलिनः पांसुगुण्ठितः ।****
**दमयन्त्या सह श्रान्तः सुष्वाप धरणीतले ।। ६७ ।।** (६)

---

(१) (१)तव पितुस् (for पितुस्ते तत् ); ते तु; त्वेतत्;
त्वेवं; ते वै (for ते तत् ); (२) मे (for मम ); (३) च (for तु ); (४) तव शोकविवर्धनः,
(२) (१)भूत्वा (for गत्वा° ); (३) कथं दनिक्षो; परिच्युतो; परिभूतो; कृपणोद्य ,
(३) (१)एवं (for इति); ततो (for नलो); (४) वास° सार्धेन; वस्त्रार्धेन तु; संवृतः ,
(४) (२)समन्ततः (for इतस्ततः ); (४) प्रपां (for सभां ); उपस्थितौ; उपोषतुः (for उपेयतुः ); सभामासेदतुः क्वचित,
(५) (१)तां प्रपाम्; तु सु; अनु (for उप ); (२)क° तदा स निषधाधिपः, वनमध्ये खिलीकृता; (३) राजन् (for राजा); (४) महीपतिः (for तले),
(६) चैकवरो (for वै विवस्त्रो); विकटो; विकचो (for मलिनो ); मलिनः; विक्तः (for विकचः ); पांश्र गुठितः; पासुङ्कठितः ,

दमयन्त्यपि कल्याणी निद्रयापहृता ततः ।**

**सहसा दुःखमासाद्य सुकुमारी तपस्विनी ।। ६८ ।।** (१)

सुप्तायां दमयन्त्यां तु नलो राजा विशाम्पते ।**

**शोकोन्मथितचित्तात्मा न स्म शेते तथा पुरा ।। ६९ ।।** (२)

स तद्राज्यापहरणं सुहृत्त्यागं च सर्वशः ।**

**वने च तं परिध्वंसं प्रेक्ष्य चिन्तामुपेयिवान् ।। ७० ।।** (३)

किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।**

**किं नु मे मरणं श्रेयः परित्यागो जनस्य वा ।। ७१ ।।** (४)

मामियं ह्यनुरक्तैवं दुःखमाप्नोति मत्कृते ।**

**मद्विहीना त्वियं गच्छेत्कदाचित्स्वजनं प्रति ।। ७२ ।।** (५)

मयि निःसंशयं दुःखमियं प्राप्स्यत्यनुव्रता ।**

**उत्सर्गे संशयः स्यात्तु विन्देतापि सुखं क्वचित् ।। ७३ ।।** (६)

स विनिश्चित्य बहुधा विचार्य च पुनः पुनः ।**

**उत्सर्गं मन्यते श्रेयो दमयन्त्या नराधिप ।। ७४ ।।** (७)

न चैषा तेजसा शक्या कैश्चिद्धर्षयितु□ पथि ।

यशस्विनी महाभागा मद्भक्तेय□ पतिव्रता ।।

---

(१) (२)पतिता (for (अ)पहृता ); तदा (for ततः); निद्रयोपहृता तदा; (४) सुकुमारा; मनस्विनी,
(२) (३)शोकोन्मथितचित्तोसौ; शोकोन्मथन; ( शोकोपहृत ) चित्तः सन्; (४) पुनः; पुरं (for पुरा ),
(३) (३)निवासं च अरण्यस्य; वनेन च परि° क्लिन्नं,
(४) (३)स्यात्तु; स्याधु; स्याच्च (for किं नु ); (४) वै; च (for वा ),
(५) (१)मयेयं; यामियं; हि; तु (for हि ); ( वं (ह )यं (इ)दं ); भामेवा° त्यनुरक्तेयं; (२) प्राप्नोति (for आप्नो ); दारुणं ( सुस्मिते ) (for मत्कृते ); (३) कथं; स्वयं (for त्वियं ); मद्वियोगाद्धि यं गच्छेत्; महि हीना न्वयं गच्छेत्; (४) स्वगृहं (for स्वजनं ),
(६) (१)मयि (for मया ); (२) इदं (for इयं ); प्राप्नोति; लब्धति (for प्राप्स्यति ); अनिदिता; अनुव्रता; नुत्तमं; (३)च (for तु ); उत्सर्गे दमयन्त्यास्तु ; (४) विन्दतेपि; विन्देच्चापि; थापि; ° द्वापि; सुखं क्वचित्,
(७) (१)विबुधो; मनसा (for बहुधा ); (३) उत्सर्गं; मन्यते (for मन्यत ); (४) नराधिप,

एव□ तस्य तदा बुद्धिर्दमयन्त्या□ न्यवर्तत ।
कलिना दुष्टभावेन दमयन्त्या विसर्जने ।।

**सोऽवस्त्रतामात्मनश्च तस्याश्चाप्येकवस्त्रताम् ।**
**चिन्तयित्वाध्यगाद्राजा वस्त्रार्धस्यावकर्तनम्** ।। ७५ ।।[१]

**कथं वासो विकर्तेयं न च बुध्येत मे प्रिया ।**
**विचिन्त्यैवं नलो राजा सभां पर्यचरत्तदा** ।। ७६ ।।[२]

**परिधावन्नथ नल इतश्चेतश्च भारत ।**
**आससाद सभोद्देशे विकोशं खड्गमुत्तमम्** ।। ७७ ।।[३]

**तेनार्धं वाससश्छित्त्वा निवस्य च परन्तपः ।**
**सुप्तामुत्सृज्य वैदर्भीं प्राद्रवद्गतचेतनाम्** ।। ७८ ।।[४]

**ततो निवृत्तहृदयः पुनरागम्य तां सभाम् ।**
**दमयन्तीं तदा दृष्ट्वा रुरोद निषधाधिपः** ।। ७९ ।।[५]

**नलः**

**यां न वायुर्न चादित्यः पुरा पश्यति मे प्रियाम् ।**
**सेयमद्य सभामध्ये शेते भूमावनाथवत्** ।। ८० ।।[६]

---

(१) (१)वि (for सोऽ ); (२) तथा चाप्ये° ; (३) (अ)भ्यगाद्; (अ)त्य; तदा (for (अ)ध्यगाद्); (४) वस्त्रस्यार्धाव ( ध )कर्तनं; वस्त्रार्धस्यावकृतनं,

(२) (१) ()र्धकृत्येयं; () वकृत्तेयं; विकध व्यं; ()वकतेय; निकृत्येयं; ()वकृन्तेयं; ()पकर्तेयं; (for विकर्तेयं); (३) ध्यात्वैवं (for चिन्त्यै ); विन्निन्त्यैवं नलो राजा; (४) स तां; प्रपां (for सभां); तां पर्यटत् (for पर्यचरत्); नृपः (for तदा); तां प्रपाम्पयर्टस्तदा,

(३) (२)सत्वरः; सत्वरं; सर्वशः (for भारत); (३) प्रपादेशे; सभामध्ये (for सभो ); (४) विकोषं,

(४) (१)वाससि (for सह् ); तेनाधं वास आच्छिद्य; (२) व्यवस्य; निश्वस्य; निरस्य; स्र्मव; अथ (for च ); परन्तप; नरर्षभः; परं ततः(३) छित्वा चोत्सृज्य; स तामुत्सृज्य; (४) गतचेतना; हृतचेतनः ,

(५) (१)निवृत्तहृदयः; निबद्धस्नेहेन; निरुद्धहृदयन्; वब (° वबु )द्ध; (२) आगत्य शुभा; प्रपा (for सभाम् ); (३) ततो; तदा (for तथा ); (४) द स नराधिपः,

(६) (१)यावन्न वायुरा ( वायुर्ना )दित्यः(२) मे पश्यतां ( त° ; तः; (अ)प° श्यत तां; मे पश्यति ); (३)

**इयं वस्त्रावकर्तेन संवीता चारुहासिनी ।****
**उन्मत्तेव वरारोहा कथं बुद्ध्वा भविष्यति ।। ८१ ।।** (१)

**कथमेका सती भैमी मया विरहिता शुभा ।****
**चरिष्यति वने घोरे मृगव्यालनिषेविते ।। ८२ ।।** (२)

आदित्या वसवो रुद्रा अश्विनौ समरुद्गणौ ।
रक्षन्तु त्वा□ महाभागे धर्मेणासि समावृता ।
एवमुक्त्वा प्रिया□ भार्यां रूपेणाप्रतिमा□ भुवि ।
कलिनापहृतज्ञानो नलः प्रातिष्ठदुद्यतः ।(३)

**बृहदश्वः**

**गत्वा गत्वा नलो राजा पुनरेति सभां मुहुः ।****
**आकृष्यमाणः कलिना सौहृदेनावकृष्यते ।। ८३ ।।** (४)

**द्विधेव हृदयं तस्य दुःखितस्याभवत्तदा ।****
**दोलेव मुहुरायाति याति चैव सभां प्रति ।। ८४ ।।** (५)

**अवकृष्टस्तु कलिना मोहितः प्राद्रवन्नलः ।****
**सुप्तामुत्सृज्य तां भार्यां विलप्य करुणं बहु ।। ८५ ।।** (६)

**नष्टात्मा कलिना स्पृष्टस्तत्तद्विगणयन्नृपः ।****
**जगामैकां वने शून्ये भार्यामुत्सृज्य दुःखितः ।। ८६ ।।**(७)

---

प्रपा (for सभा ),
(१) (१)वस्त्रार्धं; (३) मया हीना (for वरारोहा ); (४) बुद्धा; ध्या (for द्वा ),
(२) (१)एकाकिनी (for एका सती ); (४) ° समाकुले,
(३) नलः प्रातिष्ठतान्यतः,
(४) (२)प्रपां; मुहुर् (for सभां ); सोपकृष्टस्तु कं; (४) सौहार्देना° ; (अ)भुवकृष्यते,
(५) (१)द्विरेव; द्विधैव; द्विविधं (३)पुनर्; बहिर् (for मुहुर् ); (४) सभां पुनः; सभां प्राते; पुनः; मुहुर्मुहुः ,
(६) (१)अव (for सोऽप ); च (for तु ); (३) बालां (for भार्यां ); (४) मुहुः (for बहुं ),
(७) (१) (अ)विष्टम् (for स्पृष्टस् ); (२) बहु; मुहुः (for नृपः ); (३) जगामैकां; मैवं; मैको; म वै (for

अस्मिन् तीर्थयात्रापर्वणि ५० अध्याये ८६ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पञ्चशोऽध्यायः ।। ५० ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

# 03- 04- 051

## ५१. एकपञ्चाशोऽध्यायः

वने चरन्त्या दमयन्त्या अजकरेण ग्रहणम् ।। १ ।। वनचरेण व्याधेन तां ग्ररता अजगरस्य वधः ।। २ ।। दमयन्त्या विलापोऽजगरव्याधाभ्या□ भीतायास्तस्याः प्राणाना□ सतीत्वस्य च रक्षण□ तदीयपातिव्रत्यप्रभावेण व्याधस्य विनाशश्च दमयन्त्या आत्मकामुकस्य तद्व्याधस्य स्वपातिव्रत्यमहिम्ना हननम् ।। ३ ।।

**बृहदश्वः**

अपक्रान्ते नले राजन्दमयन्ती गतक्लमा ।**
अबुध्यत वरारोहा सन्त्रस्ता विजने वने ।। १ ।। (१)

अपश्यमाना भर्तारं शोकदुःखसमन्विता ।**
प्राक्रोशदुच्चैः सन्त्रस्ता महाराजेति नैषधम् ।। २ ।। (२)

**दमयन्ती**

हा नाथ हा महाराज हा स्वामिन्किं जहासि माम् ।**
हा हतास्मि विनष्टास्मि भीतास्मि विजने वने ।। ३ ।। (३)

ननु नाम महाराज धर्मज्ञः सत्यवागसि ।**

---

मैव ); कानने (for क्विव वने ); घोरे; नान्यां (for शून्ये ); (४) मो हितः (for दुःखि ),

(१) (३)अवबुध्य (for अबु ); महाराज (for वरा ),

(२) (१)अपश्यमाना (for सा ); भर्तारं सा स्वपश्यन्ती; (२) शोकदुःख (३)साक्रोश; आक्रोश; (४) हा राजन्नि° ति भारत,

(३) (२)स्वामिन्कि वि(त्वं); जहासि मां; (४) भीताहं; हीनास्मि (for भीतास्मि),

**कथमुक्त्वा तथा सत्यं सुप्तामुत्सृज्य कानने ।। ४ ।।** [(१)]

**कथमुत्सृज्य गन्तासि दक्षां भार्यामनुव्रताम् ।****

**विशेषतोऽनपकृते परेणापकृते सति ।। ५ ।।** [(२)]

**शक्यसे ता गिरः सम्यक्कर्तुं मयि नरेश्वर ।****

**यास्तेषां लोकपालानां सन्निधौ कथिताः पुरा ।। ६ ।।** [(३)]

(२४९) अधिकपाठः ० कपाठे

नाकाले विहितो मृत्युर्मर्त्यानां□ पुरुषर्षभ ।******

तत्र कान्ता त्वयोत्सृष्टा मुहूर्तमपि जीवति ।

**पर्याप्तः परिहासोऽयमेतावान्पुरुषर्षभ ।****

**भीताहमतिदुर्धर्ष दर्शयात्मानमीश्वर ।। ७ ।।** [(४)]

**दृश्यसे दृश्यसे राजन्नेष दृष्टोऽसि नैषध ।****

**आवार्य गुल्मैरात्मानं किं मां न प्रतिभाषसे ।। ८ ।।** [(५)]

**आधार्यमाणेषु मया शोकस्तेषु दुःखितः ।। ९ ।।** [(६)]

**नृशंसं बत राजेन्द्र यन्मामेवं गतामिह ।****

**विलपन्तीं समागम्य नाश्वासयसि पार्थिव ।। १० ।।** [(७)]

---

(१) (२)सत्यवानसि; इति विश्रुतः (३)मां त्वं; सात्वं (for सत्यं ), कथम्भुक्त्वा तथा साध्वीं; कथमुत्सृज्य तां सुप्तां; कथं तथाविधस्त्वं हि; (४) कानने ( नैषध) (for मां गतः ); गतवान्काननादतः,

(२) (१)क्त्वम्; वनम् (for कथम्); यातोसि (for गन्ता); क्व परित्यज्य गन्तासि; पुनः कथं नु भविता; (२) दक्षां; त्यक्त्वा (for वश्यां ); च सुव्रतां (for अनुव्रतां ); (३) नापकृते; नापकृतः; नपकृतां; भम कृते (for नपकृते ); (४) (अ)पि कृते; (अ)पकृतो; (उ)पेक्षितो (for (अ)° पकृते ); भवान्; ह्यसि (for सति ),

(३) (१)वक्ष्यसे; शक्यसे; वदस्व; शक्यमेता (for शक्य° से ता); सा; न (for ता); सम्यक् (for सत्याः); (२) कर्तुं मयि कर्तुं मे निषधेश्वर; साम्प्रतं च मया सह; (३) तेषां; स्वयं (for त्वया ),

(४) (२)एतावत्; ते भवान् (for एतावान् ); (३) अति (for अस्मि ); भृशं भीतास्मि दु,

(५) (२)तिष्ठति; दृष्टोसि; नैषधः न तिष्ठसि नरेश्वर,

(६) (३)आच्छाद्य (for आवार्य ),

(७) (१)तव (for बत ); (२) किं (for यन् ); (३) समा° लोक्य; गम्य; साद्य ( ° लिङ्ग्य ),

**न शोचाम्यहमात्मानं न चान्यदपि किञ्चन ।******

**कथं नु भवितास्येक इति त्वां नृप शोचिमि ॥ ११ ॥** [१]

वैं सत्यवागसि मा□ त्यक्त्वा गतसत्यः कथ□ भवान् ।[२]

कथ□ नु राज□स्तृषितः क्षुधितः श्रमकर्षितः ।******

सायाह्ने वृक्षमूलेषु मामपश्यन्भविष्यसि ॥ [३]

**बृहदश्वः**

**ततः सा तीव्रशोकार्ता प्रदीप्तेव च मन्युना ।******

**इतश्चेतश्च रुदती पर्यधावत दुःखिता ॥ १२ ॥** [४]

मा□ त्व□ सम्भाषय विभो अनाथा□ निर्जने वने ।

इतश्चेतश्च धावन्ती शोकव्याकुलचेतसा ।

सहसा मुह्यते बाला मुहू रोदिति शोचती ।[५]

**मुहुरुत्पतते बाला मुहुः पतति विह्वला ।******

**मुहुरालीयते भीता मुहुः क्रोशति रोदिति ॥ १३ ॥** [६]

**अतीव शोकसन्तप्ता मुहुर्निःश्वस्य विह्वला ।******

**उवाच भैमी निःश्वस्य रुदत्यथ पतिव्रता ॥ १४ ॥** [७]

---

(१) (२)तथा (for न चा ),

(२) (३)भविता सम्यक् (for स्येक ); (४) त्वा (for त्वां ); शोचये; रोदिमि (for शोचिमि ); इति त्वां शोचयाम्यहं; इति त्वामनुशोचिमि; इति मत्वा तु शोचिमि; इति शोचा° म्यहं नृप; इति शोचाम्यनुव्रत; इति मत्वा तु रोदिमि; इति मत्वानुशोचये,

(३) (२)श्रमकर्षितः; पीडितः(३) मूले त्वं; मूले तु; (४) निवत्स्यसि (for भवि ); मामपश्यसि दुःखितः ,

(४) (१)एवं (for ततः ); तत्रिदुःखार्ता; (अ)तीव दुःखार्ता; (अ)तीव शोका° र्ता (२)प्रदीप्तेन; सम्प्रदीप्तेव ( न) मन्तुना;° (४)° धावत्सुदुःखिता ,

(५) (पं१)सम्भाषय विभो मां त्वं; विजने (for निर्जने ); (पं २)लोचना (for चेतसा ); (पं ३)वामा (for वाला ),

(६) (२)दुःखिता (for विह्वला ); (३) चापि; बाला; तेन (for भीता ); (४) शोचति (for रोदिति ),

(७) (१)सातीव; अतीव (for सा तीव्र° ); (२) तिष्ठति (for निःश्वस्य ); दुःखिता (for विह्वला),(३) तथा

पतिव्रता सा रुदती भर्तृशोकसमाकुला ।[१]

**दमयन्ती**

**यस्याभिशापाद्दुःखार्तो दुःखं विन्दति नैषधः ।****
**तस्य भूतस्य नो दुःखाद्दुःखमप्यधिकं भवेत् ॥ १५ ॥**[२]

**अपापचेतसं पापो य एवं कृतवान्नलम् ।****
**तस्माद्दुःखतरं प्राप्य जीवत्वसुखजीविकाम् ॥ १६ ॥**[३]

**बृहदश्वः**

**एवं तु विलपन्ती सा राज्ञो भार्या महात्मनः ।****
**अन्वेषमाणा भर्तारं वने श्वापदसेविते ॥ १७ ॥**[४]

**उन्मत्तवद्भीमसुता विलपन्ती इतस्ततः ।****
**हा हा राजन्निति मुहुरितश्चेतश्च धावति ॥ १८ ॥**[५]

**तां क्रन्दमानामत्यर्थं कुररीमिव वाशतीम् ।****
**करुणं बहु शोचन्तीं विलपन्तीं मुहुर्मुहुः ॥ १९ ॥**[६]

**सहसाभ्यागतां भैमीमभ्याशपरिवर्तिनीम् ।****

---

च (for उवाच); तु निःश्वस्य; निष्कान्ता (for निष्क्रम्य° );(४) रुदती स्म; रुदत्यथ; ; रुदित्वा स्म; रुदती सा; ° रुदतीति; रुदत्यथ ( °तीत्थं); रुदन्ती सा (for रोदमाना ),

(१) भर्तृशोकपरायणा;

(२) (१)°शापदुःस्वार्तो; तापदुःखार्तो; (२) तिष्ठति (for विन्दति ); नैष नदति नैषधः नो (for तद्° ); दुःखाद् दुःखं; अपि (for अभि° ),

(३) (२)एनं (for एवं ); (३) अभ्यधिकं (for दुःखतरं ),

(४) (१)सं° ° ; हि (for तु ); (३) अन्वेषमाणा; ( ना ); अन्वेषयति (for वति स्म ); (४) जीविते; चेष्टिते (for ° सेविते),

(५) (२)दमयन्ती (for विलं ); इतम्; यतम् (for ततम् ); (३) महाराज (for राजसिति ); (४) भारत (for धावति ),

(६) (१)सं° ; सा (for तां ); क्रन्दमाना° (for शुष्यमाणा ); अत्यन्तं (for अत्यर्थं ); संशुष्क्त्वाणा भर्तारं; सम्ब()ष्यभाणा पत्यर्थं; (२) वासतीं; तां सतीं; (३) शोचन्ती; (४) विलपन्ती; पुनः पुनः; सुमध्यमां,

जग्राहाजगरो ग्राहो महाकायः क्षुधान्वितः ॥ २० ॥ [१]

सा ग्रस्यमाना ग्राहेण शोकेन च परिप्लुता ।**
नात्मानं शोचति तथा यथा शोचति नैषधम् ॥ २१ ॥ [२]

**दमयन्ती**

हा नाथ मामिह वने ग्रस्यमानामनाथवत् ।**
ग्राहेणानेन विजने किमर्थं नानुधावसि ॥ २२ ॥ [३]

कथं भविष्यसि पुनर्मामनुस्मृत्य नैषध
पापान्मुक्तः पुनर्लब्ध्वा बुद्धिं चेतो धनानि च ॥ २३ ॥ [४]
कथ□ भवाञ्गमाद्य मामुत्सृज्य वने प्रभो ।[५]

श्रान्तस्य ते क्षुधार्तस्य परिग्लानस्य नैषध ।**
कः श्रमं राजशार्दूल नाशयिष्यति तेऽनघ ॥ २४ ॥ [६]

**वृहदश्वः**

ततः कश्चिन्मृगव्याधो विचरन्गहने वने ।**
आक्रन्दमानां संश्रुत्य जवेनाभिससार ह ॥ २५ ॥[7]

तां तु दृष्ट्वा तथा ग्रस्तामुरगेणायतेक्षणाम् ।**

---

(१) (१)भीरम् (for भैमीम् ); सहसाजगरो भैमीं; छ सहसैवानवद्यांगीं; (२) मध्ये सम्परि; अभ्यासपरि° ; अभ्यासवश; (३) (अ)भिमुखो (for (अ)जगरो ); (४) दमयंती (for महा° ),
(२) (१)सङ्गृह्यमाणा (for सा ग्रस्य ); (२) परिप्लुता (for परां ),
(३) (२)अनागसं; अनागसीं (for अनाथवत् ); (३) विजने (for विपिने ); (४) नैष; नानु (for नाभि° ),
(४) (१)कथं भवसि च पुनः(२) इहो° त्सृज्य; अभिस्मृत्य,
(५) (३)शापान् (for पापान् ),
(६) (१)च(for ते); (२) परिश्रान्तस्य; गानस्य; (३) का (for कः ); नृप (for राज ); (४) मां विना; ते (चा); नघ (for मानद ),
(७) (१) ततः कश्चिन्; तां तु कश्चिन् (for ढामकस्याः ); (२) विजने (for गहने ); (३) आक्रन्दितम्; आरुधतीम्;अभि (for उप ); आक्रदमाना संश्रुत्य; (४) त्त्वैनाभि,

त्वरमाणो मृगव्याधः समभिक्रम्य वेगतः ।। २६ ।। (१)

समतिक्रम्य वेगेन सत्वरः स वनेचरः ।

मुखतः पाटयामास शस्त्रेण निशितेन च ।

निर्विचेष्टं भुजङ्गं तं विशस्य मृगजीवनः ।। २६ ।। (२)

मोक्षयित्वा स तां व्याधः प्रक्षाल्य सलिलेन ह ।**

समाश्वास्य कृताहारामथ पप्रच्छ भारत ।। २८ ।। (३)

कस्य त्वं मृगशावाक्षि कथं चाभ्यागता वनम् ।**

कथं चेदं महत्कृच्छ्रं प्राप्तवत्यसि भाविनि ।। २९ ।। (४)

दमयन्ती तथा तेन पृच्छ्यमाना विशाम्पते ।**

सर्वमेतद्यथावृत्तमाचचक्षेऽस्य भारत ।। ३० ।। (५)

तामर्धवस्त्रसंवीतां पीनश्रोणिपयोधराम् ।**

सुकुमारानवद्याङ्गीं पूर्णचन्द्रनिभाननाम् ।। ३१ ।। (६)

प्रफुल्लपद्मनयना□ तथा मधुरभाषिणीम् ।

अरालपक्ष्मनयनां तथा मधुरभाषिणीम् ।**

लक्षयित्वा मृगव्याधः कामस्य वशमीयिवान् ।। ३२ ।। (७)

---

(१) (१) तु दृष्ट्वा; दृष्ट्वा स; (४) समतिक्रम्य; समभिद्रुत्य; वेगत; सञ्चरनाहने वने,

(२) (१)मुखे तं (for मुखतः ); (२) घ॰ जीविकः, च (for ह ); (४) निशाम्य; विशाव्य; निशम्य; विहत्य (for विशस्य ) है जीवकः; जीविकं; जीविनः ,

(३) (१)मोचयित्वा; (अ)थ; स; तु (for च ); मृग॰ ; शुभां (for च तां ); (२) ह; हि; वै (for च ); (३) च तां भीरुम् (for कृताहाराम् ),

(४) (१)कासि (for कस्य ); हि विशालाक्षि (for मृग ); (२) चाभ्यागतं; चैवा॰ गता; चास्या; (३) कष्टं (for कृच्छ्रं ); (४)भाविनि,

(५) (२)मनस्विनी (for विशां पते ); (३) सर्वमेव (for यथातथ्यम् ); (४) (ऽ)थ (for ऽस्य ); भामिनी (for भारत ),

(६) (३)सुविभक्तानव,

(७) (१)पद्मनयनां; पद्मपत्राभं; मराल॰ पक्ष्म; (२) मृणालपत्र॰ ; स्वराल॰ पक्ष्म; योष्ठी तनुमध्यमा; (४)

तामेवं श्लक्ष्णया वाचा लुब्धको मृदुपूर्वया ।**
सान्त्वयामास कामार्तस्तदबुध्यत भाविनी ।। ३३ ।। (१)

दमयन्त्यपि तं दुष्टमुपलभ्य पतिव्रता ।**
तीव्ररोषसमाविष्टा प्रजज्वालेव मन्युना ।। ३४ ।। (२)

स तु पापमतिः क्षुद्रः प्रधर्षयितुमातुरः ।**
दुर्धर्षां तर्कयामास दीप्तामग्निशिखामिव ।। ३५ ।। (३)

दमयन्ती तु दुःखार्ता पतिराज्यविनाकृता ।**
अतीतवाक्पथे काले शशापैनं रुषान्विता ।। ३६ ।। (४)

**दमयन्ती**

यद्यहं नैषधादन्यं मनसापि न चिन्तये ।**
तथायं पततां क्षुद्रो परासुर्मृगजीवनः ।। ३७ ।। (५)

**बृहदश्वः**

उक्तमात्रे तु वचने तथा स मृगजीवनः ।**
व्यसुः पपात मेदिन्यामग्निदग्ध इव द्रुमः ।। ३८ ।। (६)

**अस्मिन् तीर्थयात्रापर्वणि ५१अध्याये ३८श्लोकाः सन्ति**

---

ईयिवान्,

(१) (१)तां तथा; तामेवं; अथ तां; तामधि; (२) सान्त्वपूर्वया; मृग; मृदुर्थाया; (४) तम° ; तदा; तत्त्व (for तद ); भाविनी; कामिनी,

(२) (१)दमयन्त्यपि; यन्तीति (for यन्तीतु ); दुःखम् (for दुष्टम् ); (२) उपलक्ष्य; (३) शोक; कोप (for रोष ),

(३) (१)हि (for तु ); क्रुद्धः (for क्षुद्रः ); (२) उद्यतः (for आतुरः ); (३) दुर्धर्षं; उद्धर्षात् (for दुर्धर्षां ) ,

(४) (१)दमयन्तीति; °यत्यपि; °यन्ती च; (२) पतिना च विना; पतिराज्यनिरा; (३) अतीव; अतीते; (४) रुषान्विता (for रुषा किल ),

(५) (१)यद्यहं; राज्ञो (for अन्यं ); (२) न कामये; विचिन्तये; (४) गतासुः; दग्धः सन्; मृगजीवकः; मृतजीवनः; गत° ,

(६) (२)तथा (for तया ); मृगजीवकः (३)स पपाताशु मे,

इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां संहितायां वनपर्वणि एकपञ्चाशोऽध्यायः ।।
५१ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

# 03- 04- 052

# ५२. द्विपञ्चाशोऽध्यायः

**नलमन्वेषयन्त्या दमयन्त्या वनमध्ये हस्त्यश्वरथसङ्कुलजनसार्थदर्शनम् ।। १ ।। तथा सार्थनाथेन सम्भाषणम् ।। २ ।। दमयन्त्या विलापप्रलापौ तापसकर्तृकं तस्याः सान्त्वनं महासार्थे प्रवेशश्च ।। ३।।**

**बृहदश्वः**

**सा निहत्य मृगव्याधं प्रतस्थे कमलेक्षणा ।****
**वनं प्रतिभयं शून्यं झिल्लिकागणनादितम् ।। १ ।।** (१)

**सिंहद्वीपिरुरुव्याघ्रमहिषर्क्षगणैर्युतम् ।****
**नानापक्षिगणाकीर्णं म्लेच्छतस्करसेवितम् ।। २ ।।** (२)

**शालवेणुधवाश्वत्थतिन्दुकेङ्गुदकिंशुकैः ।****
**अर्जुनारिष्टसञ्छन्नं स्यन्दनैश्च सशाल्मलैः ।। ३ ।।** (३)

**लक्षालङ्कारः- सालवेणुधर इत्यत्र धरानामकः कश्चिद्वृक्षः ।**

**जम्ब्वाम्रलोध्रखदिरसालवेत्रसमाकुलम् ।****
**पद्मकामलकप्लक्षकदम्बोदुम्बरावृतम् ।। ४ ।।** (४)

---

(१) (३)घोरं (for शून्यं ); (४) जिल्लीक; द्वील्लिल्लीक॰ ; षझिल्लीका॰ ; शृगाल; जिल्लीका; झल्लिका,

(२) मरु॰ (for ॰रुरु॰ ); सिंहद्वीपित्त्याघ्र ( सिंहव्याघ्ररुरुद्वीपि ); महिषर्क्षगणै ( ॰मृगै )र्युतं; (३) गणैः कीर्णः,

(३) (इं)गुदु (४)स्थन्दनैश्च; सशल्मलैः; सशाख्यक्यै,

(४) ॰रोध्रबदि ( द ) रैः सालं; लोध्रखदिरशाल॰ ; ॰रोध्रखदिरैः शाल; रोध्रखदिरशा ( सा ) ल; ॰लोध्र॰

बदरीबिल्वसञ्छन्नं न्यग्रोधैश्च समाकुलम् ।**

**प्रियालतालखर्जूरहरीतकबिभीतकैः ॥ ५ ॥** (१)

नानाधातुशतैर्नद्धान्विविधानपि चाचलान् ।

**निकुञ्जान्परिसङ्घुष्टान्दरीश्चाद्भुतदर्शनाः ॥ ६ ॥**

नदीः सरांसि वापीश्च विविधांश्च मृगद्विजान् ।(२)

**सा बहून्भीमरूपांश्च पिशाचोरगराक्षसान् ॥ ७ ॥**

पल्वलानि तडागानि गिरिकूटानि सर्वशः ।**

**सरितो निर्झराश्चैव ददर्शाद्भुतदर्शनान् ॥ ८ ॥** (३)

यूथशो ददृशे चात्र विदर्भाधिपनन्दिनी ।**

**महिषांश्च वराहांश्च ऋक्षांश्च वनपन्नगान् ॥ ९ ॥** (४)

तेजसा यशसा लक्ष्म्या स्थित्या च परया युता ।**

**वैदर्भी विचरत्येका नलमन्वेषती तदा ॥ १० ॥** (५)

**अतिभीमे वने तत्र भ्रष्टा मृगीं यथा तदा ।**

---

खदिरसाल; जम्बूलोध्राक्षखदिरशाल° ; कार्ष्मर्या° ; कास्मर्यसललली ( मलक ) प्लक्ष° ; पद्मकामलक° प्लक्षा; च्छदंवोडुबरावृतं; कदबोदुम्बरान्वितं,

(१) (२) परिष्कृतं (for समा ); पिद्धादुध्य सालखर्ष्द्वं° ; प्रियालतालखर्जूर° हरीतकि; प्रियालुसेलु( साल ) खर्जूर; पियाल° तालखसूहरीतकि ( क )वि; प्रियालशाल° ( द्रुम) खर्जूर; °विभीतकैः ,

(२) (१)°शतानीकान्; शतानद्दान् समानद्धान्; शरानद्धान्; °शतोन्नद्धान्; (३) परि (for पक्षि ); विकूजत्पक्षिसङ्घुष्टाः ( °ष्टान् ); नि°कुजपक्षिसङ्घुष्टाः; सिंहर्क्षव्याघ्रसङ्घुष्टान् ; नद्यः (for नदीन ); वाप्य (for वापी° ); वन्यानपि (for विवि ); मृगद्विपान्; विविधाश्चरतो द्विजान्,

(३) (१) सु° (for सा ); डाकाश्च; तडागाश्च; तटाकानि; स्तटाकांश्च; (४) °कुञ्जाश्च; कूटांश्च; सर्वतः निर्झरांश्चैव; सङ्गमां; जङ्गमा; विविधा; रांसि च तथा ( दा ); दर्शनाः ( ना ),

(४) (१)चाथ; तत्र (for चात्र ); (२) विदर्भाणां च नं; (३) महिषान्वलकरूँयून्; महिषांश्च वराहांश्च; (४) ऋक्षपन्नगवानरान् (°राक्षसान् ); ऋक्षाश्च वनपन्नगान्; गोमायूनृक्षपन्नगान् ( वानरान् ); क्षवानरपुङ्ग° वान्; क्षपुङ्गववानरान्,

(५) ष्लक्ष्म्या स्थित्या (for स्थित्या श्रिया ); परमया (for च परया ); शुभा (for युता ); (३) विचचारैका; (४)पतिम् (for नलम् ); सती; सदा (for तदा ),

नाबिभ्यत्सा नृपसुता भैमी तत्राथ कस्यचित् ।**
दारुणामटवीं प्राप्य भर्तृव्यसनपीडिता ।। ११ ।। [(१)]

विदर्भतनया राजन्विललाप सुदुःखिता ।**
भर्तृशोकपरीताङ्गी शिलातलमथाश्रिता ।। १२ ।। [(२)]

## दमयन्ती

व्यूढोरस्क महाबाहो नैषधानां जनाधिप ।**
क्व नु राजन्गतोऽस्यद्य विसृज्य विजने वने ।। १३ ।।

यथोक्त□ च त्वया कान्त मत्समक्ष□ च मत्प्रियम् ।
स्मर्तुमर्हसि कल्याण वचः पार्थिवनन्दन ।[(३)]

अश्वमेधादिभिर्वीर क्रतुभिर्भूरिदक्षिणैः ।**
कथमिष्ट्वा नरव्याघ्र मयि मिथ्या प्रवर्तसे ।। १४ ।। [(४)]

यत्त्वयोक्तं नरश्रेष्ठ तत्समक्षं महाद्युते ।**
स्मर्तुमर्हसि कल्याण वचनं पार्थिवर्षभ ।। १५ ।। [(५)]

यच्चोक्तं विहगैर्हंसैः समीपे तव भूमिप ।**
मत्समक्षं यदुक्तं च तदवेक्षितुमर्हसि ।। १६ ।। [(६)]

---

(१) (१)नातृप्यत्सा; निवृत्यात्मा; नाबिप्रत्सा; नाभ्यसूया (for नाबिभ्यत्सा ); (२) तत्रापि; कर्हिचित्; वा क्व° ; कुत्र (for कस्य ); (४) दुःखिता; पीडिता; कर्षिता,

(२) (४)मथा° श्रिता; समाश्रया; मुपा° श्रिता,

(३) (१)व्यूढोरस्कः सिंहस्कन्ध; (२) नैषधानां; नराधिप; पतेः प्रभो; निषधाधिपते प्रभो; (३) गतः सोसि; गतोस्यद्य; गजे मेसि; गतोसि त्वं; गतो यासि; गतोसीति; (४) विसृज्य (for त्यक्त्वा मां ); विजने (for निर्जने ),

(४) (२)वीरदक्षिणैः; भूरि; चाप्त; त्वाप्त; (३) किमिष्ट्वा त्वं नर,

(५) (१)नरश्रेष्ठ; महाराज; (२) मत्समीपे; वने त्वस्मिन्; महावने; (३) स्मर्तुम् (for कर्तुम् ); (४) वचनं; तत्सर्वं; तत्सत्यं; पार्थिवो° त्तम; पुरुषर्षभ,

(६) (१)यच्चोक्तं; यथोक्तैर्; भूप (for हंसैः ); यथोक्तं च विहङ्गैश्च; (२) ममापि (for समीपे ); पार्थिव; नैषध (for भूमिप ); (३) मत्समीपे; मत्समक्षं यदुक्तं च; (४) तत्समीक्षितु,

चत्वार एकतो वेदाः साङ्गोपाङ्गाः सविस्तराः ।**

**स्वधीता मनुजव्याघ्र सत्यमेकं किलैकतः ॥ १७ ॥** [(१)]

अश्वमेधसहस्र□ च सत्य□ च तुलया धृतम् ।

अश्वमेधसहस्रात्त सत्यमेवातिरिच्यते ।

तस्मादर्हसि शत्रुघ्न सत्यं कर्तुं नरेश्वर ।**

**उक्तवानसि यद्वीर मत्सकाशे पुरा वचः ॥ १८ ॥** [(२)]

हा वीर नल नामाहं नष्टा किल तवानघ ।**

**अस्यामटव्यां घोरायां किं मां न प्रतिभाषसे ॥ १९ ॥** [(३)]

कर्षयत्येष मां रौद्रो व्यात्तास्यो दारुणाकृतिः ।**

**अरण्यराट्क्षुधाविष्टः किं मां न त्रातुमर्हसि ॥ २० ॥** [(४)]

न मे त्वदन्या काचिद्धि प्रियास्तीत्यब्रवीः सदा ।**

**तामृतां कुरु कल्याण पुरोक्तां भारतीं नृप ॥ २१ ॥** [(५)]

उन्मत्तां विलपन्तीं मां भार्यामिष्टां नराधिप ।**

**ईप्सितामीप्सितोऽसित्वं किं मां न प्रतिभाषसे ॥ २२ ॥** [(६)]

कृशां दीनां विवर्णां च मलिनां वसुधाधिप ।**

---

(१) (१)ह्येकतो (for ए )! एकतश्चतु॰ ( त्वा)रो वेदाः (३)अधीता; स्वाधीताम्; स्वधीतं; मनुजव्याघ्र; पुरुषव्याघ्र; ते नरश्रेष्ठ,

(२) (१)राजेन्द्र (for शत्रुघ्न ),

(३) (१)नाथ (for वीर ); नल; तत्र (for ननु ); हा वीर नरना थाहं; हा वीर जीवितात्कामं; (२) नष्टा (for इष्टा ); किल तव; (४) कस्मान्न (for किं मांन ); मा (for मां ),

(४) (१)भक्षयति ; कर्ष (for भर्त्स॰ ); व्याधो (for रौद्रो ); भर्त्सयत्यतिरौद्रोयं; (४) प्रतिभाषसे (for त्रातुमर्हसि ),

(५) (१)काचिद्धि; सुभगा; काचिद्वै; (२) प्रियेत्यसकृदब्रवीः ( ब्रवीत् ); प्रियास्तीत्यब्रवीः सदा ( त्यस॰ कृद्वदन्; ॰त्यसकृद्धवग् ); प्रिया इत्यब्रवीत्सदा; (४) दारुणां नृप; नृप भारतीं; मम; इव; नल (for नृप ),

(६) (१)उन्मत्तवद्विलपन्तीं; (३) (ऽ)सि त्वं (for नाथ ); (४) मा (for मां ); प्रतिनदसे,

**वस्त्रार्धप्रावृतामेकां विलपन्तीमनाथवत्** ।। २३ ।। [१]

यूथभ्रष्टामिवैकां मां हरिणीं पृथुलोचन ।**

**न मानयसि मामार्य रुदन्तीमरिकर्शन** ।। २४ ।। [२]

महाराज महारण्ये अहमेकाकिनी सती । **

दमयन्त्यभिभाषे त्वां किं मां न प्रतिभाषसे ।[३]

**कुलशीलोपसम्पन्न चारुसर्वाङ्गशोभन** ।। २५ ।। [४]

नाद्य त्वां प्रतिपश्यामि गिरावस्मिन्नरोत्तम ।

वने चास्मिन्महाघोरे सिंहव्याघ्रनिषेविते ।। २६ ।।

अनुव्रता□ महाराज किं मा□ न प्रतिभाषसे ।[५]

शयानमुपविष्टं वा स्थितं वा निषधाधिप ।

**प्रस्थितं वा नरश्रेष्ठ मम शोकविवर्धन** ।। २७ ।। [६]

कं नु पृच्छामि दुःखार्ता त्वदर्थे शोककर्शिता ।**

**कच्चिद्दृष्टस्त्वयारण्ये सङ्गत्येह नलो नृपः** ।। २८ ।। [७]

को नु मे वाथ प्रष्टव्यो वनेऽस्मिन्प्रस्थितं नलम् ।**

---

(१) (१)मां (for च ); (३) संवृतामेकां,

(२) (२)हरिणेक्षण; हरिणेक्षणा; हरिणेक्षणः; पृथुलोचनां; (३) मामार्यः मे नाथ; मानार्हा; नाश्वासयसि कस्मात्त्वं; न मां नयसि कस्मात्त्वं; (४) रुदन्तीम्; कर्षण,

(३) (२)अहमै (for मामिहैं );एकाकिनी सती; ह्य ( अ )हमेका किनी सती; (३) दमयन्त्यभिभाषे त्वां ( त्वा ); स्वा ( स्वां; सत्वत् )पत्नीमभिभाषतीं; (४) मा (for मां ),

(४) (१)पसम्पन्न ( न्ना); °पपन्नश्च; °पसम्पन्ना; (२) दर्शन; शोभनः; शोभना; शोभनां,

(५) (३)कदा (for नाद्य ); त्वा (for त्वां ); प्रति° (for अनु° );(४) अद्य (for अस्मिन् ); वनेप्यस्मिन्,

(६) (१)च (for वा ); (२) मनुजाधिप; वसुधा; (३) उपस्थितं; प्रस्थि° तो वा; नरव्याघ्र; नृपश्रेष्ठ; (४) °विवर्धनं; विवर्धनः; निबर्हण ( दो °विनाशन ),

(७) (१)किं (for कं ); पश्यामि (for पृच्छामि ); शो°कार्ता; (२) त्वदर्थं; त्वत्कृते; °कर्षिताः; पीडिता; (४) (इ)ति (for (इ)ह) ,

**अभिरूपं महातात्मानं परव्यूहविनाशनम्** ।। २९ ।। (१)

यमन्वेषसि राजानं नलं पद्मनिभेक्षणम् ।**

**अयं स इति कस्याद्य श्रोष्यामि मधुरां गिरम्** ।। ३० ।। (२)

अरण्यराडयं श्रीमांश्चतुर्दंष्ट्रो महाहनुः ।**

**शार्दूलोऽभिमुखोऽभ्येति व्रजाम्येनमशङ्किता** ।। ३१ ।। (३)

इति भ्रमन्ती□ ददर्श शार्दूल□ च महाहनुम् ।

तमुवाच रुदन्ती तु त्वमेवात्र नराधिपः ।

भवान्मृगाणामधिपस्त्वमस्मिन्कानने प्रभुः ।**

**विदर्भराजतनयां दमयन्तीति विद्धि माम्** ।। ३२ ।। (४)

**निषधाधिपतेर्भार्यां नलस्यामित्रघातिनः**

**पतिमन्वेषतीमेकां कृपणां शोककर्शिताम्** ।। ३३ ।।

आश्वासय मृगेन्द्रेह यदि दृष्टस्त्वया नलः ।(५)

**सिंहस्कन्धो महाबाहुः पद्मपत्रनिभेक्षणः** ।। ३४ ।।

अथवा त्वं वनपते नलं यदि न शंससि ।**

**मां खादय मृगश्रेष्ठ दुखादस्माद्विमोचय** ।। ३५ ।। (६)

---

(१) (१)मां (for मे ); को नु मे कथयेः; को नु मेवाथ प्रष्टव्यः; को नु मे वक्ति कथयेत्; (२) प्रस्थितं; (for विष्ठितं ); बलं; नृप (for नलम् ); (३) महाकुलं; अनुरूपं (for अभि ); (४) परव्यसन नाशनं,

(२) (१)यमन्वेषि च; (२) बाला; महा° ; बाले (for नलं ); (३) इति च (for स इति ); (४) मधुरा गिरः,

(३) (२)पत्रश्रेष्ठो; चतुर्दन्तो; (३) ह्येति; अभ्येति; याति (for प्रैति ); शार्दूलो मामभिमुखं; (४) प्रेक्षाम्येनम्; प्रक्षा° ; व्रजा; प्रक्ष्या; प्रख्या; प्रेक्ष्या,

(४) (३)तनया; (४) दमयतीं तु (for यन्तीति ),

(५) (१)भार्या; (२) °कर्षितः; °कर्षिणः; °कर्षण; °कर्शिनः; (४) दुःख; °कर्षितां; मृगेद्र° सवं (for मृगेन्द्रेह ),

(६) (१)अथा रण्यस्य नृपते; अथ वा त्वं वनपते; (२) शंससे; दृष्टवान्; पश्यसि; (३) खादस्व; खादय; व्रदस्व; अदसवं; आदस्त्वं; अदम्ल; मृगेन्द्राद्य; नृपश्रेष्ठ; मां भक्षयित्वा शार्दूल; (४) दुःखादस्माद्विमोचय,

श्रुत्वारण्ये विलपितं न मामाश्वासयत्ययम् ।**
यात्येतां स्वादुसलिलामापगां सागरङ्गमाम् ॥ ३६ ॥ (१)

इमं शिलोच्चयं पुण्यं शृङ्गैर्बहुभिरुच्छ्रितैः ।**
विराजद्भिरिवानेकैर्नैकवर्णैर्मनोरमैः ॥ ३७ ॥ (२)

नानाधातुसमाकीर्णं विविधोपलभूषितम् ।**
अस्यारण्यस्य महतः केतुभूतमिवोत्थितम् ॥ ३८ ॥ (३)

सिंहशार्दूलमातङ्गवराहर्क्षमृगायुतम् ।**
पतत्रिभिर्बहुविधैः समन्तादनुनादितम् ॥ ३९ ॥ (४)

किंशुकाशोकबकुलपुन्नागैरुपशोभितम् ।
सरिद्भिः सविहङ्गाभिः शिखरैश्च समाकुलम् ॥ ४० ॥

गिरिराजमिमं तावत्पृच्छामि नृपतिं प्रति ॥ ४१ ॥ (५)

कर्णिकारधवप्लक्षैः सुपुष्पैरुपशोभितम् ।(६)

पृथिव्या रुचिराकार□ चूडामणिमिव स्थितम् ।(७)

---

(१) (१) (ऽ) पि तं त्वाद्य; विलपतीं (for विलपितं ); (२) ममैव; मामेकां; ममैषा; न मामाश्वासयत्यय° ; (३) यामीः (° मि )मां; याम्येता; यद्येतां; यात्येष; स्वादु (for मृष्ट° ); (४) अपेतां; अपारां (for आपगां ); सागरा गनां; सागरोपमाः,

(२) (१)पृच्छे (for पुण्यं ); (२) उच्छ्रितं; (३) विजयद्भिद्; विराजितं (for ); दिविस्पृग्भिद्; इवानेकैद्; नैकवर्णैः; मुनियुतैद् (for दिवं ); (४) एकवर्णैद्; शोभनैश्च; दिवस्पृग्भिर् (for नैक ); मनोहरैः नैकवर्णमनोपमं,

(३) (२) विविधद्रुमभूषितं; विविधोपलसे° वितं; शोभितं; (४) इवोत्थितं; इव स्थितं; अवस्थितं (for इवोच्छ्रितम् ),

(४) (२)मृगान्वितं; मृगैर्युतं; समाह्न (for मृगायुतम् ); सिंहमातङ्गशार्क्लवराहर्क्षगणायुतं ( मृगायुतं ); सिंहशार्दूलमातगवराहर्क्षमृगान्तकं; (३) (३)एभिर्मृगैर्बहु,

(५) (१)विशो काशोक; क्रिशुंकाशोकसरलैः (वनैः) पुंना° गैद्; ° बकुलैः पुंनागैर्; अभि (for उप ),

(६) (४)शिखिभिः (for शिस्वरैः); च उपशोभितैः; च समाकुलं; च विराजितं; चापि शोभितं; च विनादितं; चाभिशोभितं,

(७) अहं; अमुं; इदं (for इमं ); प्रेक्षा° मि; प्रा ( प्रे ) क्ष्यामि; वक्ष्यामि नलं; पतिं; प्रियं (for प्रति );

भगवन्नचलश्रेष्ठ दिव्यदर्शन विश्रुत ।**
**शरण्य बहुकल्याण नमस्तेऽस्तु महीधर ।। ४२ ।।** (१)

प्रणमाम्यभिगम्याहं राजपुत्रीं निबोध माम् ।**
**राज्ञः स्नुषां राजभार्यां दमयन्तीति विश्रुताम् ।। ४३ ।।** (२)

राजा विदर्भाधिपतिः पिता मम महारथः ।**
**भीमो नाम क्षितिपतिश्चातुर्वर्ण्यस्य रक्षिता ।। ४४ ।।** (३)

राजसूयाश्वमेधानां क्रतूनां दक्षिणावताम् ।**
**आहर्ता पार्थिवश्रेष्ठः पृथुचार्वञ्चितेक्षणः ।। ४५ ।।** (४)

ब्रह्मण्यः साधुवृत्तश्च सत्यवागनसूयकः ।**
**शीलवान्वीर्यसम्पन्नः पृथुश्रीर्धर्मविच्छुचिः ।। ४६ ।।** (५)

सम्यग्गोप्ता दिदर्भाणां निर्जितारिगणः प्रभुः ।**
**तस्य मां विद्धि तनयां भगवंस्त्वामुपस्थिताम् ।। ४७ ।।** (६)

निषधेषु महाराजः श्वशुरो मे नरोत्तमः ।**
**गृहीतनामा विख्यातो वीरसेन इति स्म ह ।। ४८ ।।** (७)

---

प्रवक्ष्यामि पतिं नलं,

(१) (२)दिग्विदिश (for दिव्यदर्शन ); विश्रुतः; (३) नमस्ते (for शरण्य ),

(२) (१)त्वभिगम्याहं; त्वाभि° गम्येह ( हं ); त्वामुपागम्य; त्वामहं भैमीं प्रणमेद्वाभिगम्याहं; (३) प्रणमाम्पीभगम्याहं; राजस्नुषां, राजभार्या राजवरं; (४) विश्रुता,

(३) (१)विदर्भराजाधिपतिः; (२) मही° धर (for महा ); (४) चातु र्वर्णस्य,

(४) (१)वाजपेया° ; (२) यज्ञानां (for क्रतू ); (३) श्रेष्ठ; (४) पृथुवक्षा; शुभेक्षणः,

(५) (१)ब्राह्मण्यः; ग्सुरूप; (३) वीर्यसम्पन्नः सुसदाचारः; दे सत्यवाच्छरः ,

(६) (२) क° घ° निहता,निहतारिगणः ( णं ); (४) भगवतभुपस्थितां; भवन्तं समुपस्थितां ( पागता ); भगवन्समुप,

(७) (१)महाराज; महासेनः; महाराजः; महीपालः; (२) मे नरोत्तमः; नृपसत्तमः; (३) ( सु° ) गृह्णीत° नामा ( म° ); गृहीतमानो; सुप्रसिद्धनामा; विप्रेन्द्र; विद्वद्भिद्; सुगृहीत न मे ख्याता; (४) श्रुतः; स्मृतः (for स्म ह ),

तस्य राज्ञः सुतो वीरः श्रीमान्सत्यपराक्रमः ।**
**क्रमप्राप्तं पितुः स्वं यो राज्यं समनुशास्ति ह ॥ ४९ ॥** [१]

नलो नामारिहा श्यामः पुण्यश्लोक इति श्रुतः ।**
**ब्रह्मण्यो वेदविद्वाग्मी पुण्यकृत्सोमपोऽग्निमान् ॥ ५० ॥** [२]

यष्टा दाता च योद्धा च सम्यक्चैव प्रशासिता ।**
**तस्य मामबलां श्रेष्ठां विद्धि भार्यामिहागताम् ॥ ५१ ॥** [३]

पुण्यश्लोक इति ख्यातो ब्रह्मण्यो वेदवित्तमः ।[४]

त्यक्तश्रियं भर्तृहीनामनाथां व्यसनान्विताम् ।**
**अन्वेषमाणां भर्तारं त्वं मां पर्वतसत्तम ॥ ५२ ॥** [५]

समुल्लिखद्भिरेतैर्हि त्वया शृङ्गशतैर्नृपः ।**
**कच्चिद्दृष्टोऽचलश्रेष्ठ वनेऽस्मिन्दारुणेनलः ॥ ५३ ॥** [६]

गजेन्द्रविक्रमो धीमान्दीर्घबाहुरमर्षणः ।
**विक्रान्तः सत्त्ववान्वीरो भर्ता मम महायशाः ।**
**निषधानामधिपतिः कच्चिद्दृष्टस्त्वया नलः ॥ ५४ ॥** [७]

---

(१) (१)महा° (for सुतो ); (३) इह ( इदं ); तु यो (for पितुः); स्वस्य; चायं; स्वतु; ग्रस्व वै; राज्यं (for स्वं यो ); (४) राज्यं स्व ( स )मनुशासति; राज्यमनुशास्ति ह (वै); राज्यं स्वमनु° शास्ति च; पितुः स्वमुपः ( समुप° ; समनु )° शासति,

(२) (१)नलो नामारिहा श्यामः ( श्री° मान् ); (२) प्रकाशितः (for इति श्रुतः); स्म ह; स्मृतः (for श्रुतः ); (३)पुपयश्लोक इति ख्यातः; (४) ब्रह्मण्यः (for पुण्यकृत् );()ग्निमान्; ()ग्निक्रत् ब्रह्मण्यो वेदवित्तमः ,

(३) (२)त्वेवं; एव (for चैव ),

(४) (३)अबलां श्रेष्ठां (for अचल ); (४) उपागतः (for इहागता ) ,

(५) (१) प्रियां; त्यक्तां श्रिया; इह प्राप्ताम् (for भर्तृ ); (२) र्दितां; प्लुतां (for °न्विताम् ); (४) वने; नलं (for तं वै ); त्वं मां पर्वतसत्तम,

(६) (१)खमुत्पतद्भिर्; समुल्लिखद्भिर्; समुत्पतद्भिर्; (२) गिरेः (for नृपः ) नगश्रेष्ठे; नरश्रेष्ठः; नृपश्रेष्ठः; (४)वनेज्ज्यिवा नलो नृपः,

(७) (१)महेन्द्र° ; चेन्द्र मृर्गेंद्र° ; (२) अरिन्दमः (for अमर्षण ); (३) विद्वांश्च (for विक्रान्तः ); सत्वावान्; सत्ववा; सत्यवान्; वीते; ° सौम; (४) भर्ता म; त्वयाचल; °नधः; °नघ,

यदि दृष्टः क्वचित्ते स नलो राजा मम प्रियः ।

महीधरसमो धैर्ये महीधर महीपतिः ।

**विलपतीं किमेकां मां पर्वतश्रेष्ठ विह्वलाम् ।****

**गिरानाश्वासयस्यद्य स्वां सुतामिव दुःखिताम्** ।। ५५ ।। (१)

**वीर विक्रान्त धर्मज्ञ सत्यसन्ध महीपते ।****

**यद्यस्यस्मिन्वने राजन्दर्शयात्मानमात्मना** ।। ५६ ।। (२)

**कदा सुस्निग्धगम्भीरां जीमूतस्वनसन्निभाम् ।****

**श्रोष्यामि नैषधस्याहं वाचंताममृतोपमाम्** ।। ५७ ।। (३)

**वैदर्भीत्येव विस्पष्टां शुभां राज्ञो महात्मनः ।****

**आम्नायसारिणीमृद्धां मम शोकविनाशिनीम्** ।। ५८ ।। (४)

भीतामाश्वासयत मा□ नृपते धर्मवत्सल ।(५)

**इति सा तं गिरिश्रेष्ठमुक्त्वा पार्थिवनन्दिनी ।****

**दमयन्ती ततो भूयो जगाम दिशमुत्तराम्** ।। ५९ ।। (६)

**सा गत्वा त्रीनहोरात्रान्ददर्श परमाङ्गना ।****

**तापसारण्यमतुलं दिव्यकाननशोभितम्** ।। ६० ।। (७)

---

(१) (१)विलपतीं किमेकां मां; (२) विह्वला (for दुःखिताम् ); (३) भीतामाश्वासयस्वा (४) स्व (for स्वां ); मानद (for दुःखिताम् ); सुतामिव सुदुः ,

(२) (२)°धर्म (for °सन्ध ); (३) अस्मिन्वोरे; यद्यप्यस्मिन्; यद्यस्त्वस्मिन्; गिरौ (for वने ); अस्मिन्वोरवटे राजन्; वने घोरे महाराजन्; यद्य° स्मिन्विपिने राजन्; यद्यप्यस्मिन्वनोद्देशे,

(३) (१)कदा सु° ; कदा° चित्; (२) °स्वनसम्भवा; °स्वननिस्वनाः घन° निःस्वनां,

(४) (१)वैदर्भ्येहीति (for र्भी° त्येव ); विस्पष्टां (for कथितां ° ); (२) श्रुतां; अस्य; तस्य (for शुभां ); राज्ञा महात्मना; (३) आत्माभि° धायिनी ( °याहिनी° ; °सारिणी )मृद्धां; (४) क° घ° निहर्हिणीम्,विनाशि ( श )नीं; °निव° ईणीं,

(५) (१/२)श्वासयत मा; वत्साः,

(६) (१)नृप° (for गिरि ),

(७) (४)°शोभितं; दर्शितं; °संनिभं,

**वसिष्ठभृग्वत्रिसमैस्तापसैरुपशोभितम् ।**
**नियतैः संयताहारैर्दमशौचसमन्वितैः ॥ ६१ ॥** (१)

**अब्भक्षैर्वायुभक्षैश्च पत्राहारैस्तथैव च ।**
**जितेन्द्रियैर्महाभागैः स्वर्गमार्गदिदृक्षुभिः ॥ ६२ ॥** (२)

**वल्कलाजिनसंवीतैर्मुनिभिः संयतेन्द्रियैः ।**
**तापसाध्युषितं रम्यं ददर्शाश्रममण्डलम् ॥ ६३ ॥** (३)

**नानामृगगणैर्जुष्टं शाखामृगगणायुतम् ।**
**तापसैः समुपेतं च सा दृष्ट्वैव समाश्वसत् ॥ ६४ ॥** (४)

नानामृगगणैर्जुष्ट□ शास्वामृगगणैर्युतम् ।
तापसैः समुपेत□ च सा दृष्ट्वैव समाश्वसत् ॥ (५)
प्रो सा दृष्ट्वैवाश्रमपददमयन्ती समाश्वसत् ।

**सुभ्रूः सुकेशी सुश्रोणी सुकुचा सुद्विजानना ।**
**वर्चस्विनी सुप्रतिष्ठा स्वसितायतलोचना ॥ ६५ ॥** (६)

**सा विवेशाश्रमपदं वीरसेनसुतप्रिया ।**
**योषिद्रत्नं महाभागा दमयन्ती तपस्विनी ॥ ६६ ॥** (७)

**आश्वासिता तदा भैमी तापसैःसह सङ्गता ॥ ६७ ॥**

---

(१) (१)वशिष्ठ° ; ° सङ्घैम्; °सदृशैस्; मुख्यैस्,
(२) (१)अम्बुभक्षैर्वायुभक्षैः; (२) पर्णाहारै; (३) महाबोधैः; राज (for भागैः ); (४) मार्ग,
(३) (२)सञ्जितेन्द्रियैः; (३) पुण्यं (for रम्यं ); (४) ददर्श मुनिमण्डलं,
(४) (१)सा च दृष्ट्वाअम; (२) मृगचारु° ; चारुमृग; (४) (उ)पशोभितं; समाश्वसत् (for समन्वितं ),
(५) (१)°मृगगणायुत; तैः संयुतं तच्च,
(६) (१)सुकेशीं चैव; सधूमकेशी (for सुभ्रूर् सुके° शी ); (२) शुचिः शुद्धद्विजां; सुकुमारा शुभा नना; ° सुकुचा सुभुजा; सुकुमारी द्विजा; (३) मनस्विनी; ° स्व ( अ )र्चिष्मती (for वर्च° ), (४) सु (श्री) सितायतलोचना; सितायतलोचनान; स्वश्चितोद्धत° गामिनी,
(७) (४)तप; यशं (for मन ),

साभिवाद्य तपोवृद्धान्विनयावनता स्थिता ।**
स्वागतं त इति प्रोक्ता तैः सर्वैस्तापसोत्तमैः ।
पूजां चक्रे यथान्यायमृषीणां सा मनस्विनी ।। ६८ ।। (१)

पूजां चास्या यथान्यायं कृत्वा तत्र तपोधनाः ।
ततस्ते पूजिता विप्राः प्रयतेन्द्रियमानसाः ।
आस्यतामित्यथोचुस्ते ब्रूहि किं करवामहे ।। ६९ ।। (२)

तानुवाच वरारोहा कच्चिद्भगवतामिह
तपःस्वग्निषु धर्मेषु मृगपक्षिषु चानघाः ।। ७० ।।(3)

अपि स्वाध्याययोगेषु धर्मदेहेषु वा पुनः ।
कुशलं वो महाभागाः स्वधर्माचरणेषु च ।। ७१ ।।

(1)महा० भागा (for वरा ); (३) तपःस्वग्निषु, धर्मे च (for धर्मेषु ) (४) सर्वेषु मृगपक्षिषु; तत्ययज्ञेषु चानघाः,

तैरुक्ता कुशलं भद्रे सर्वत्रेति यशस्विनि ।**
ब्रूहि सर्वानवद्याङ्गि का त्वं किं च चिकीर्षसि ।। ७२ ।। (४)

दृष्ट्वैव ते परं रूपं द्युतिं च परमामिह ।**
विस्मयो नः समुत्पन्नः समाश्वसिहि मा शुचः ।। ७३ ।। (५)

अस्यारण्यस्य देवी त्वमुताहोऽस्य महीभृतः ।**
अस्याश्च नद्याः कल्याणि वद सत्यमनिन्दिते ।। ७४ ।। (६)

---

(१) (१)अभिवाद्य ( सा ); ततो वृद्धान्; (२) चिन्तया वनसंस्थिता; (४) तथा; तदा; स्थिता (for च सा ); तैः सर्वैस्तापसोत्तमैः

(२) (३) अवोचस्ते; अवोचुस्ते (for अथो ); (४) करवाम ( °शी ) ते; म च (for महे ) ,

(३) योगेषु (for देहेषु ); चाप्युत (for वा पुनः ); प्रियतपाः(for महां ); स्वधर्मा,

(४) (१)°सुखं, तैश्चोक्तं सर्वं (for भद्रे ); (२) तपस्विभिः ° यशस्विनि,

(५) (१)सा विश्वसिहि (for समा ); शुच ,

(६) (१)देवी त्वं (for महती ); देवी त्वमुउ वास्य (for महती देवता वा );(२) उताहो ( त वा )°स्म;

साब्रवीत्तानृषीन्नाहमरण्यस्यास्य देवता ।**
न चाप्यस्य गिरेर्विप्रा नैव नद्याश्च देवता ।। ७५ ।। (१)

मानुषीं मां विजानीत यूयं सर्वे तपोधनाः ।**
विस्तरेणाभिधास्यामि तन्मे शृणुत सर्वशः ।। ७६ ।। (२)

विदर्भेषु महीपालो भीमो नाम महीपतिः ।**
तस्य मां तनयां सर्वे जानीत द्विजसत्तमाः ।। ७७ ।। (३)

निषधाधिपतिर्धीमान्नलो नाम महायशाः ।**
वीरः सङ्ग्रामजिद्विद्वान्मम भर्ता विशाम्पतिः ।। ७८ ।। (४)

देवताभ्यर्चनपरो द्विजातिजनवत्सलः ।**
गोप्ता निषधवंशस्य महातेजा महाबलः ।। ७९ ।। (५)

सत्यवान्धर्मवित्प्राज्ञः सत्यसन्धोऽरिमर्दनः ।**
ब्रह्मण्यो दैवतपरः श्रीमान्परपुरञ्जयः ।। ८० ।। (६)

नलो नाम नृपश्रेष्ठो देवराजसमद्युतिः ।**
मम भर्ता विशालाक्षः पूर्णेन्दुवदनोऽरिहा ।। ८१ ।। (७)

आहर्ता क्रतुमुख्यानां वेदवेदाङ्गपारगः ।**

---

सुता वास्य ( देवता वा ) गिरेः शुभे (for महीभृतः ); (३) नो;च हि (for नु ); (४) स्वार्ष्यम्; का त्वं; स्वार्थम् (for सत्यम् ); शुचि° स्मिते (for अनिन्दिते ),

(१) (२)अरण्यस्य अस्य; (३) चास्यापि; चास्थास्य; चैवास्य (for चाप्य° स्थ ); (४) (अ)स्मिः; हि (for (अ)पि ); नैवनद्याश्च ( स्तु ) देवता; नद्या नैवास्मि देवता,

(२) (१)विजा नीध्वं; (२) तपस्विनः (for तपो ); (४) तत्वतः; सर्वतः,

(३) (२)नाम्ना भीमो (for भीमो नाम ); महीपतिः (for महा ); भीमो भीमपराक्रमः ,

(४) (३)नैक° (for वीरः ); नित्यं (for विद्वान् ); (४) मम भर्ता,

(५) (१)देवानामर्चन° परः; गुरुपादार्चनरतः; (२) वल्लभः; (४) महातेजा महाबलः,

(६) (१)सत्यवान्; अस्त्र (for धर्म ),

(७) (१)नर (for नृप ); (३) स मे (for मम ),

सपत्नानां मृधे हन्ता रविसोमसमप्रभः ॥ ८२ ॥ [१]

स कैश्चिन्निकृतिप्रज्ञैरनार्यैरकृतात्मभिः ।

आहूय पृथिवीपालः सत्यधर्मपरायणः ॥ ८३ ॥ [२]

देवने कुशलैर्जिह्मैर्हृतं राज्यं वसूनि च ।

विवासितश्च नगराद्वनवासमुपेयिवान् ॥ ८४ ॥ [३]

तस्य मामवगच्छध्वं भार्यां राजर्षभस्य वै ।

दमयन्तीति विख्यातां भर्तुर्दर्शनलालसाम् ॥ ८५ ॥ [४]

सा वनानि गिरींश्चैव सरांसि सरितस्तथा ।**

पल्वलानि च सर्वाणि तथारण्यानि सर्वशः ॥ ८६ ॥ [५]

अन्वेषमाणा भर्तारं नलं रणविशारदम् ।**

महात्मानं कृतास्त्रं च विचरामीह दुःखिता ॥ ८७ ॥ [६]

कच्चिद्भगवतां रम्यं तपोवनमिदं नृपः ।**

भवेत्प्राप्तो नलो नाम निषधानां जनाधिपः ॥ ८८ ॥ [७]

यत्कृतेऽहमिदं ब्रह्मन्प्रपन्ना भृशदारुणम् ।**

वनं प्रतिभयं घोरं शार्दूलमृगसेवितम् ॥ ८९ ॥ [८]

---

(१) (३)रणे (for मृधे ); (४) सोमसमद्युतिः; °सोमानलद्युतिः ,

(२) (१)धूर्तैर् (for कैश्चिन् ); निकृत प्रज्ञैः; (२) नृपोत्तमः; नराधिपः; नराधिपैः; अनार्यैरकृतात्मभिः; वञ्चयित्वा महायशाः ( °मना );

(३) (२) हृतं; हृतो (for जितो ); धनानि (for वसूनि ),

(४) (२)च; ह (for वै ); (४) भर्तुर्दर्शनलालसां; भर्तृव्यसनकर्षिता,

(५) (३)पर्वतानां च; तपोवनानि (for पल्वलानि च ); च सर्वाणि; गिरींश्चैव; विचित्राणि; च पुण्यानि (for च रम्याणि ),

(६) (१)अन्वेषती तु ( स ); अन्वेषती तु; अन्वेषयन्ती (for माणा ); तं वीरं (for भर्तारं ); (२) वीरं (for रण° ); (३)वै (for च ); धमाज्ञानं कृतज्ञं च ( कृतप्रज्ञं ); (४) सु° (for (इ)ह ); चरामीढ सुदुःखिताः,

(७) (१)रभ्यं (for पुण्यं ); (२) महत् (for नृपः ); (३) भवेत् प्राप्तः; (४) नरा (for जना ),

(८) (१)तत्कृते; अहो (for इदं ); ब्रह्मन्; दुर्गं; दुःखं (for विप्राः ); (२) सं° प्राप्ता भृश; प्राप्तं नामृश° ;

**यदि कैश्चिदहोरात्रैर्न द्रक्ष्यामि नलं नृपम् ।******

**आत्मानं श्रेयसा योक्ष्ये देह ऊस्यास्य विमोचनात्   ।। ९० ।।** (१)

नारीणामधमा नारी या भर्तुः प्राणसङ्क्षये ।

पश्चाज्जीवति निस्तेजाः कलेव शशिनो दिवा ।

**को नु मे जीवितेनार्थस्तमृते पुरुषर्षभम् ।******

**कथं भविष्याम्यद्याहं भर्तृशोकाभिपीडिता   ।। ९१ ।।** (२)

**बृहदश्वः**

**तथा विलपतीमेकामरण्ये भीमनन्दिनीम् ।******

**दमयन्तीमथोचुस्ते तापसाः सत्यदर्शिनः   ।। ९२ ।।** (३)

**तापसाः**

**उदर्कस्तव कल्याणि कल्याणो भविताशुभे ।******

**वयं पश्याम तपसा क्षिप्रं द्रक्ष्यसि नैषधम्   ।। ९३ ।।** (४)

लक्षालङ्कारः- उदर्कः महोत्कर्षः ।

**निषधानामधिपतिं नलं रिपुनिपातिनम् ।******

**भैमि धर्मभृतां श्रेष्ठं द्रक्ष्यसे विगतज्वरम्   ।। ९४ ।।** (५)

**विमुक्तं सर्वपापेभ्यः सर्वरत्नसमन्वितम् ।******

**तदेव नगरं श्रेष्ठं प्रशासन्तमरिन्दमम्   ।। ९५ ।।** (६)

---

(३) रौद्रं (for घोरं ); (४) सिंहशार्दूलं; शार्दूलवृकं,

(१) (२)पश्यामि (for द्रक्ष्या ); (४) समापनात्; विमोक्षणात,

(२) (१)न° (for को ); हि (for नु ); (२) पुरुषोत्तमं,

(३) (१)तथा (for एवं ); (४) सत्यदर्शिनः,

(४) (४)पश्य (for द्रक्ष्य° ),

(५) (१)भर्तारं तु (ते) महाभागे; (२) °विघातिन; विनाशनं; °निपा°तिनं; (३) नृपं धर्मवतां; सर्वधर्मभृतां; (४) द्रष्टासि (for द्रक्ष्यसे ),

(६) (२)समावृतं; °विभू षितं; (३) तदेको; स्वमेव; तमेव; नगरं श्रेष्ठं; रं भूयः; च नरश्रेष्ठं; (४) द्रक्ष्यसे

द्विषतां भयकर्तारं सुहृदां शोकनाशनम् ।**
पतिं द्रक्ष्यसि कल्याणि कल्याणाभिजनं नृपम् ॥ ९६ ॥ [१]

**बृहदश्वः**

एवमुक्त्वा नलस्येष्टां महिषीं पार्थिवात्मजाम् ।**
तापसान्तर्हिताः सर्वे साग्निहोत्राश्रमास्तथा ॥ ९७ ॥ [२]

सा दृष्ट्वा महदाश्चर्यं विस्मिता ह्यभवत्तदा ।**
दमयन्त्यनवद्याङ्गी वीरसेननृपस्नुषा ॥ ९८ ॥ [३]

चिन्तयामास वैदर्भी किमेतद्दृष्टवत्यहम् ॥ ९९ ॥

किं नु स्वप्नो मया दृष्टः कोऽयं विधिरिहाभवत् ।**
क्व नु ते तापसाः सर्वे क्व तदाश्रममण्डलम् ॥ १०० ॥[४]

क्व सा पुण्यजला रम्या नदी द्विजनिषेविता ।**
क्व नु ते ह नगा हृद्याः फलपुष्पोपशोभिताः ॥ ९०१ ॥[५]

इत्येतन्नरशार्दूल विस्मिता कमलेक्षणा ।
ध्यात्वा चिरं भीमसुता दमयन्ती शुचिस्मिता ।**
भर्तृशोकपरा दीना विवर्णवदनाभवत् ॥ १०२ ॥ [६]

---

विगतज्वरं ° ; प्रविशतमरिन्दम,

(१) (३)एष्यसि (for द्रक्ष्यसि ); (४) कल्याण° जननं नृपं,

(२) (१)नरश्रेष्ठ; नलस्यैनां ( °स्येमां ); (३) स्तापसास्ते; तापसान्त--हिताः सर्वे; (४) ततः; तथा (for तदा ); (अन्तर्हितास्तापसास्ते) साग्निहोत्रसमाश्रमाः ,

(३) (१)प्रहृष्टा (for सा दृष्ट्वा ); (२) ह्यभवत्; त्वा चाभवत् (for अभवत् ); ततः (for तदा ); प्रहृष्टा विस्मयान्विता; (४) °सुतप्रिया; स्नुषा नृपः,

(४) (२)अथाभवत्; इहागतः,

(५) (२)नानापक्षि; नदीद्विज° ; नानाजन; (३) क्व नु (for नदी ); ते ह; च ते ; तेद्य °पुण्याः; दिव्याः (for हृद्याः ); नदीसुमहती ( हृद्या ); (४) सा ( शा )लवृक्षोपशोभिताः ( ता ),

(६) (२)सुविस्मिता (for शुचि ); (३) पराधीना; वशा दीना; कृशा दीना; (४) विवर्णा परुषाभवत् ( °र्णाभरणा तथा ),

सा गत्वाथापरां भूमिं बाष्पसन्दिग्धया गिरा ।**
विललापाश्रुपूर्णाक्षी दृष्ट्वाशोकतरुं ततः ।। १०३ ।।[१]

उपगम्य तरुश्रेष्ठमशोकं पुष्पितं वने ।**
पल्लवापीडितं हृद्यं विहङ्गैरनुनादितम् ।। १०४ ।।[२]

**दमयन्ती**

अहो बतायमगमः श्रीमानस्मिन्वनान्तरे ।**
आपीडैर्बहुभिर्भाति श्रीमान्पर्वतराडिव ।। १०५ ।।[३]

तमुवाच ततोऽशोक☐ विदर्भाधिपनन्दिनी ।[४]
कृताञ्जलिपुटा दीना भर्तृदर्शनलालसा
तमुवाच महावृक्ष☐ दमयन्ती तथागता ।

अशोक शोकापनुद शोकोपहतचेतसम् ।
त्वन्नामानं कुरु क्षिप्रं प्रियसन्दर्शनाद्धि माम् ।। १०६ ।। [५]

विशोकां कुरु मां क्षिप्रमशोक प्रियदर्शन ।**
वीतशोकभयाबाधं कच्चित्त्वं दृष्टवान्नृपम् ।। १०७ ।।[६]

नलं नामारिदमनं दमयन्त्याः प्रियं पतिम् ।**
निषधानामधिपतिं दृष्टवानसि मे प्रियम् ।। १०८ ।।[७]

---

(१) (१)च (for (अ)थ ); परां (for (क)परां ); (४) तदा (for ततः ),
(२) (१)तरुंसा च; तरुन्तं च; तरुं साथ (for तरुश्रेष्ठ ); (२) (अ)प्यशोकं (for अशोकं ); वने॰ ; ततः; वनं; तथा (for तदा ); (३) पीडनं; रम्यं (for हृद्यं ); (४) विहगैद् (for विहगैद् ); उप; अभि (for अनु ),
(३) (४)क॰ न् द्रमिडराडिव,प्रमिडराह; द्रसिण॰ राद्धः पर्वतराद; द्रबिड॰ राद्धः; स द्रुमराड्; श्रीमद्भिर्पादपैर्वृतः,
(४) समीपमुपसङ्गम्य विदर्भा -ख।
(५) कुरुष्वत्वं (for कुरु क्षिप्रं ); सन्दर्शनेन मां,
(६) (१)घ॰ अशोकां (for वि ); मे; मा (for मां ); (३) भयाबा; भयाबाध; भयक्रोधं; ॰ भया चापि; ॰ भयाबाधः; ॰ भया चैव; (४) क्वचित्त्वं; कदाचित्; कश्चित्तं; नलं; असि (for नृपम् ),
(७) (२)प्रभुं (for पतिम् ); (४) मत्प्रियं; मे पति,

एकवस्त्रार्धसंवीतं सुकुमारतनुत्वचम् ।**
**व्यसनेनार्दितं वीरमरण्यमिदमागतम्** ।। १०९ ।।(१)

यथा विशोका गच्छेयमशोकनग तत्कुरु ।**
**सत्यनामा भवाशोक अशोकः सोकनाशनः** ।। ११० ।।(२)

एवं साशोकवृक्षं तमार्ता वै परिगम्य ह ।**
**जगाम दारुणतरं देशं भैमी वराङ्गना** ।। १११ ।।(३)

सा ददर्श नगान्नैकान्नैकाश्च सरितस्तथा ।**
**नैकांश्च पर्वतान्रम्यान्नैकांश्च मृगपक्षिणः** ।। ११२ ।।(४)

कन्दरांश्च नितम्बांश्च नदीश्चाद्भुतदर्शनाः ।**
**ददर्श तान्भीमसुता पतिमन्वेषती तदा** ।। ११३ ।।(५)

गत्वा प्रकृष्टमध्वानं दमयन्ती शुचिस्मिता ।**
**ददर्शाथ महासार्थं हस्त्यश्वरथसङ्कुलम्** ।। ११४ ।।(६)

उत्तरन्तं नदीं रम्यां प्रसन्नसलिलां शुभाम् ।**
**शान्त(सुशीत)तोयां विस्तीर्णां ह्रदिनीं वेतसैर्वृताम्** ।। ११५ ।।(७)

---

(१) (३)दीनम्; भीमम् (for वीरम् ), (४) ण्यं सहसागतं ,

(२) (२)अशोक मम; अशोकवर; अशोक क्रमतः कुरु; अशोक कुरु मां तथा; (४) अशोकः शोकनाशनः; मम शोकविना° शन ( ° नः); मम शोकं विनाशय,

(३) (२)वै (for त्रिः ); उपगम्य; परिगृह्य (for परिगम्य ); च (for ह ); परिगम्य जगाम ह; आर्तान्ध्य ध्यं गतान्यतः(३) दारुणतम; दारुणं देशं; (४) देशं भैमी; वैदर्भी ( वैदेही ) कमलेक्षणा,

(४) (१)वनानि (for नगान् ); एकान्; एकं (for नैकान् ); (२) एकाश्च; अनेकाः; पर्वतान्; सरांसि (for नैकाश्च ); (३) श्च वन° खण्डांश्च; (४) अनेकान्; रम्यांश्च (for नैकाश्रच ),

(५) (१)गुहान्रम्यान् (for नितम्बांश्च ); (२) नदीं° ; ह्रदां; नगा (for नदा ;) च; नदीश्चाद्भुतदर्शना; (३) ता; तान्; (ए)का(for सा) (४) सती; शुभा; सदा (for तदा ),

(६) (१) सा गत्वा दूरमध्वानं; (२) सुविस्मिता (for शुचि ),

(७) (२)शिवां (for शुभाम् ); (४) क्रन्दि° नी; क्रदन्तीं ; ह्लादिनीं; ह्लादिनीं; ह्लादनैः (for ह्रदिनी );

प्रोद्घुष्टां क्रौञ्चकुररैश्चक्रवाकोपकूजिताम् ।**
कूर्मग्राहझषाकीर्णां विपुलद्वीपशोभिताम् ।। ११६ ।।(१)

सा दृष्ट्वैव महासार्थं नलपत्नी यशस्विनी ।**
उपसर्प्य वरारोहा जनमध्यं विवेश ह ।। ११७ ।।(२)

उन्मत्तरूपा शोकार्ता तथा वस्त्रार्धसंवृता ।**
कृशा विवर्णा मलिना पांसुध्वस्तशिरोरुहा ।। ११८ ।।(३)

तां दृष्ट्वा तत्र मनुजाः केचिद्भीताः प्रदुद्रुवुः ।**
केचिच्चिन्तापरा जग्मुः केचित्तत्र विचुक्रुशुः ।। ११९ ।।(४)

प्रहसन्ति स्म तां केचिदभ्यसूयन्ति चापरे ।**
अकुर्वत दयां केचित्पप्रच्छुश्चापि भारत ।। १२० ।।(५)

कासि कस्यासि कल्याणि किं वा मृगयसे वने ।**
त्वां दृष्ट्वा व्यथिताः स्मेह कच्चित्त्वमसि मानुषी ।। १२१ ।।(६)

वद सत्यं वनस्यास्य पर्वतस्याथवा दिशः ।**
देवता त्वं हि कल्याणि त्वां वयं शरणं गताः ।। १२२ ।।(७)

---

तापसैर्वृता; पादौ; वैतसै° ; पक्षिसङ्कुलां,

(१) (१)क्रौञ्चमिथुनैशू; कारंडैशू; (२) चक्रवाकोपा ( कैश्च) शोभितां; (३) समा (for झषा° ); (४) विपुल° द्वीप; पुळिनद्वीपराजितां,

(२) (१)सु° (for (ए)व ); (२) दमयन्ती (for नल ); तपस्विनी ( शुचिस्मिता ); (for यश ); (३) उपसृत्य; उपसर्प; उपासप उपसर्प उपससर्प; अन्या सलोप आर्षः ,

(३) (१)उन्मत्तवद्भीमसुता; (४) कृशांविवर्णांमलिनां; कृशा विवर्णमलिना ( वदना ),

(४) (२)विरूपां केपि दुद्रुवुः; (३) तापपरा; भीताः परा (for चिन्तापरा ); जग्मुः (for तस्थुः),

(५) केचित्तत्राभ्यसूयति केचिन्निन्दति चापरे; (३) चक्रुस्तस्या; अकु° ; चक्रुः केचिद्; कुर्वन्त्यस्यां (°ह्यन्ये ; त्य° य; °तोस्या ); तस्यां; तत्र (for केचित् ); (४) तां च; (for चापि ),

(६) (३)चेते; सर्वे;चैव(for स्मेह) (४)नराः सार्थनि ( स्वार्थवि ) वासिनः; वयं भीताश्च शोभने,

(७) (१)देवता त्वं (for वद सत्यं ); देवता सहि सुभगे; (२) त्वं वनस्य (for पर्वतस्य ); (अ)पि; (अ)स्य; च(for (अ)थ) (४)त्वां वयं; किं वा मृगयसे वने,

यक्षी वा राक्षसी वा त्वमुताहोऽसि वराङ्गना ।**

**सर्वथा कुरु नः स्वस्ति रक्ष वास्माननिन्दिते ।। १२३ ।।**[१]

यथायं सर्वथा सार्थः क्षेमी शीघ्रमितो व्रजेत् ।**

**तथा विधत्स्व कल्याणि यथा श्रेयो हि नो भवेत् ।। १२४ ।।**[२]

**बृहदश्वः**

**तथोक्ता तेन सार्थेन दमयन्ती नृपात्मजा ।**

**प्रत्युवाच ततः साध्वी भर्तृव्यसनपीडिता ।। १२५ ।।** [३]

**दमयन्ती**

**सार्थवाहं च सार्थं च जना ये चात्र केचन ।**

**युवस्थविरबालाश्च सार्थस्य च पुरोगमाः ।। १२६ ।।**[४]

मानुषीं मां विजानीत मनुजाधिपतेः सुताम् ।**

**नृपस्नुषां राजभार्यां भर्तृदर्शनलालसाम् ।। १२७ ।।**[५]

विदर्भराण्मम पिता भर्ता राजा च नैषधः ।**

**नलो नाम महाभागस्तं मृग्याम्यपराजितम् ।। १२८ ।।**[६]

---

(१) (१)पन्नगी (for राक्ष° सी ); वासि; वापि (for वा त्वम् ); (२) उताहो स्विद्; त्वमुताहो (for उताहोऽसि ); सुराङ्गना; (४) उताहो ( त वा ) स्यित्सुराङ्गना; रक्ष वा; रक्ष चा; रक्षया (for रक्षस्वा ); वराङ्गने (for अनिन्दिते ); त्वां वयं शरणं गताः,

(२) (१)सर्वशः; सर्वतः; सदृशः; स्वार्थ (for सार्थः); यथायं सर्वसार्थश्च; (२) क्षेमः; मं (for मी ); सर्व; क्षिप्रम् (for शीघ्रस् );क्शेमं गच्छेदशङ्कितः (३) त्रायस्व(विधत्स्व) (४)यथा श्रेयो हि नो भवेत् ( यथा श्रेयो भवेच्च नः ),

(३) (१)यथोक्ता; (२) शुभानना; शुचिस्मिता (for नृपा ); (३) सार्थं (for साध्वी ); (४) व्यसनपीडिता; °व्यसनकर्शि ( ) ता; शोकनि° पीडिता; °दर्शनलालसा;

(४) (१)वाहश्च सार्थश्च; जना वा; (२)ये चान्ये (for जना ये ); तत्र; येत्र; वात्र; चास्य (for चात्र ),

(५) (१)युवानः स्थविरबालाः; युवस्थविरबाला ( लां ) श्च; यूनः स्थविरबालांश्च; युवा स्थविरबालाश्च; (२) (ए)व; (अ)स्य (for च ); पुरोगमान्; (३) विजानीध्वं; राजस्नुषां; राजपत्नीं, ,

(६) (२)च मम (for राजा च ),

क नु मा□ कितवश्छित्वा वस्त्रार्धं प्रस्थितो मम ।
उत्सृज्य विपिने सुप्तामनुरक्ता प्रिया□ प्रिय ।
वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः ।
आत्मानमात्मना सत्योत्थितसर्गा न स□शयः ।
क नु सा क्षुत्पिपासार्ता भ्रान्ताराते तपस्विनी ।
स्मरन्ती तस्य मन्दस्य क वासायोपतिष्ठति ।। [१]

**यदि जानीत नृपतिं क्षिप्रं शंसत मे प्रियम् ।****
**नलं पुरुषशार्दूलममित्रगणसूदनम् ।। १२९ ।।**[२]

**बृहदश्वः**

**तामुवाचानवद्याङ्गीं सार्थस्य महतः प्रभुः ।****
**सार्थवाहः शुचिर्नाम शृणु कल्याणि मद्वचः ।। १३० ।।**[३]

**सार्थवाहः**

**अहं सार्थस्य नेता वै सार्थवाहः शुचिस्मिते ।****
**मनुष्यं नलनामानं न पश्यामि यशस्विनि ।। १३१ ।।**[४]
**पश्याम्यस्मिन्वने कृत्स्ने ह्यमनुष्यनिषेविते ।**
**तथा नो यक्षराडद्य मणिभद्रः प्रसीदतु ।। १३२ ।।**
**गोमायुकुञ्जरद्वीपिमहिषर्क्षमृगान् तथा ।**[५]
**ऋते त्वां मानुषीं मर्त्यं न पश्यामि महावने ।**

---

(१) (३)महाराज (for ॰भागस् ); (४) मृग्या; मृगा (for मार्गा ),
(२) (१)जानीथ (for त ); (२) शंसथ; मत॰ ; मां (for मे ); पतिं (for प्रियम् ); (३) नृपं (for नलं ); पुरुषं; (४)मर्दनं,
(३) (४)दमयन्तीं नराधिप,
(४) अहं (for अपि ); कृत्स्ने; घोरे; शून्ये (for कष्टे ); हि,
(५) कुञ्जरद्वीप॰ ; द्वीपमहिषा ( शा )र्दूल॰ ,कुञ्जरद्वीपिमहिषशार्दूलर्क्षमृगानपि -ख ।

यथा वयं तं पश्यामो नलं पार्थिवमत्र वै ।
ततो वै यक्षराजस्स मणिभद्रः प्रसादत् ।। १३३ ।।(१)

बृहदश्वः

साब्रवीद्वणिजः सर्वान्सार्थवाहं च तं ततः ।**
क्व नु यास्यति सार्थोऽयमेतदाख्यातुमर्हसि ।। १३४ ।।(२)
सार्थोऽयं चेदिराजस्य सुबाहोः सत्यदर्शिनः ।**
क्षिप्रं जनपदं गन्ता लाभाय मनुजात्मजे ।। १३५ ।।(३)

अस्मिन् तीर्थयात्रापर्वणि ५२अध्याये १३५ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि त्विपञ्चाशोऽध्यायः ।। ५२ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

## 03- 04- 053

# ५३. त्रिपञ्चाशोऽध्यायः

वन्यगजानामाक्रमणेन महासार्थविनाशो भयाद्विद्रुताया दमयन्त्याश्चेदिराजगृहे प्रवेशो निवासश्च ।। १ ।। वनमध्ये सरस्तीरशायिनि सार्थे निशीथे पानीयपानायागत-गजयूथनिहतभूयिष्टे दिष्ट्या दमयन्त्या अपि स्वीकारः ।। २ ।। हतावशिष्टेन जनेन सह चेदिराजपुरं गताया दमयन्त्या राजमात्रा स्वान्तःपुराधिवासनम् ।। ३ ।।

बृहदश्वः

---

(१) यथा नो; ततोस्य ( यं; तो ); माणिभद्रः,

(२) (१)व्रजतः (for वणिजः ); सार्थं (for सर्वान् ); (२) तद्वचः; तत्वतः (for तं ततः ); (४) अर्हसि (for अर्हथ ), सार्थवाहः,

(३) (२)सत्यदर्शिनः; प्रिय दर्शनः; (४) नृवरा; जनपा (for मनुजा ),

**सा तच्छ्रुत्वानवद्याङ्गी सार्थवाहवचस्तदा ।****
**जगाम सह तेनैव सार्थेन पतिलालसा ॥ १ ॥**(१)

**अथ काले बहुतिथे वने महति दारुणे ।****
**तडागं सर्वतोभद्रं पद्मसौगन्धिकं महत् ॥ २ ॥**(२)

**ददृशुर्वणिजो रम्यं प्रभूतयवसेन्धनम् ।****
**बहुपुष्पफलोपेतं नानापक्षिनिषेवितम् ॥ ३ ॥**(३)

**निर्मलस्वादुसलिलं मनोहारि सुशीतलम् ।****
**सुपरिश्रान्तवाहास्ते निवेशाय मनो दधुः ॥ ४ ॥**(४)
**सम्मते सार्थवाहस्य विविशुर्वनमुत्तमम् ॥ ४ ॥**(५)

**उवास सार्थः सुमहान्वेलामासाद्य पश्चिमाम् ॥ ५ ॥**(6)

**अर्धार्धरात्रसमये निःशब्दस्तिमिते तदा ।**
**सुप्ते सार्थे परिश्रान्ते हस्तियूथमुपागमत् ॥ ६ ॥**

**पानीयार्थं गिरिनदीं मदप्रस्रवणाविलाम् ।**(७)

अथापश्यत सार्थं त□ सार्थजान्सुबहून्गजान्

ते तान्ग्राम्यगजान्दृष्ट्वा सर्वे वनगजास्तदा ।

---

(१) (१)क॰ - अगच्छद्राजशार्दूल दुःखशोकसमन्विता ।,जगाम सह तेनैव; जगाम तेन ( मानेन ); सार्थेनः; अगच्छद्राजशार्दूल; अगच्छत्तेन राजेन्द्र॰ ; (४) सार्थेन पतिलालसा; दुःखशोक्यमन्त्यंता ( परायणा ),

(२) (३)तडाकं; तटाकं; (२) सौगन्धिकायुतं,

(३) (३)पुष्प (for मूल ); (४) पक्षिनिषेवितं; ॰मृगगणैर्वृतं,

(४) (१)निर्मलस्वादु; तं दृष्ट्वारण्य; (२) मनोहारि सुशीतलै; सुमनोहारि शीतलं; मनोरमसुखावह; मनोहरसुखावृतं,

(५) (२)ददृशुद् (for विविशुर्),

(६) (३) उवास स महासार्थः (४) गिरिम् (for वेलाम् ); शैलमासाद्य पश्चिमं; निशामासाद्य पद्मिनीं,

(७) (२)तथा; ऽनघ (for तदा ); निःशब्दे; (ब्द) तिमिरे तदा; (४) हस्तिश उपां; तटात् (for नदीं ); अथ सार्थं गिरिनिभा ( भं ); मदप्रस्रवणा ( ॰विणो ) गजाः; ॰प्रश्राविणाविलाः; ॰प्रस्रव ( वि )णाविल; ॰प्रस्र॰ वणोल्यणं ( द्बलं ),

समाद्रवन्त वेगेन जिघा□सन्तो मदोत्कटाः ।

तेषामापतता□ वेगः करिणा□ दुःसहोऽभवत् ।

नगाग्रादिव शीर्णाना□ शृङ्गाणा□ पतता□ क्षितौ ।

स्पन्दतामपि नागाना□ मार्गा नष्टा वनोद्भवाः ।

**मार्गं संरुध्य संसुप्तं पद्मिन्याः सार्थमुत्तमम् ।****

**ते तं ममर्दुः सहसा चेष्टमानं महीतले ।। ७ ।।** [१]

**हाहाकारं प्रमुञ्चन्तः सार्थिकाः शरणार्थिनः**

**वनगुल्मांश्च धावन्तो निद्रान्धा बहवोऽभवन् ।। ८ ।।**

**केचिद्दन्तैः करैः केचित्केचित्पद्भ्यां हता गजैः ।। ९ ।।** [२]

**निहतोष्ट्राश्वबहुलाः पदातिजनसङ्कुलाः ।****

**भयादाधावमानाश्च परस्परहतास्तदा ।। १० ।।** [३]

**घोरान्नादान्विमुञ्चन्तो निपेतुर्धरणीतले ।**

**वृक्षेष्वारुह्य संरब्धाः पतिता विषमेषु च ।**

**राजन्विनिहतं सर्वं समृद्धं सार्थमण्डलम् ।। ११ ।।** [४]

एव□ प्रकारैर्बहुभिर्दैवेनाक्रम्य हस्तिभिः ।

---

(१) (१)सार्थ (for मार्ग ); निरुध्य (for सं ); गुप्तं तं (for संसुप्तं ); (२) तरिमुत्तमं ( रे );तीर उत्तरे(for सार्थमुत्तमम्) (३) स तं; सुप्तान्; ममर्दुः; मम; तरसा; (४)वेष्ट (for चेष्ट ),

(२) (१)हाहा° रावं; हाहाकारं; दाहाहाराः; महारवं; विमुचतः; वियुञ्जन्तः; (२) बुध्यन्त; वणिजः; वध्यन्ते (for सार्थिकाः ); साक्षिकाः शरणैषिणः; (४) निद्रया (for निद्रान्धा ); बहवो (for महतो ); ()भवन् (for भयात् ); नखैः (for करैः ); गजैद् (for हता); गजैः; हताः (for नराः ); केचित्पद्भिर्नरा हताः ,

(३) (१)निहतोष्ट्राश्वबहुलाः; गोखरोष्ट्रांश्च बहुलान्; गोख° रोष्ट्राश्वबहुलाः; (२) जनवत्सलाः; जन° ( ध्वज )सङ्कुलाः; °नरसकुलं; (३) भयार्ता धावमानाश्च; भयादाधावमानाश्च ( स्ते ); भयार्तमाद्रवत्सार्थः (न्सर्वे ); °र्तमद्रवत्सर्वं; (४) हताम्; तथा (for तदा ),

(४) (१)कष्टां वाचं; कष्टा वाचो; घोरं नादं; प्र° (for वि° );(३) वृक्षेथासज्य सन्तुष्टाः; वृक्षमा ( वृक्षेष्वा ) रुह्य संरब्धाः; वृक्षेथारुह्य संविग्नाः,/*राजन् (for तथा ); विनि° हतं (for तन्नि ); समस्तं (for समृद्धं ); सार्थ° वाहं सबलं,

आरावः सुमहा□श्चासीत्त्रैलोक्यभयकारकः ।✻✻
एषोऽग्निरुत्थितः कष्टस्त्रायध्व□ धावताधुना ।।
रत्नराशिर्विशीर्णोऽय□ गृह्णीध्व□ किं प्रधावत ।✻✻
सामान्यमेतद्द्रविण□ न मिथ्यावचन□ मम ।।
एवमेवाभिभाषन्तो विद्रवन्ति भयात्तदा ।✻✻
पुनरेवाभिधास्यामि चिन्तयध्व□ सुकातराः ।।
तस्मि□स्तथा वर्तमाने दारुणे जनसङ्क्षये ।✻✻
दमयन्ती च बुबुधे भयसन्त्रस्तमानसा ।।
अपश्यद्वैशस□ तत्र सर्वलोकभयङ्करम् ।✻✻
अदृष्टपूर्वं तद्दृष्ट्वा बाला पद्मनिभेक्षणा ।।
स□सक्तवदनाश्वासा उत्तस्थौ भयविह्वला ।✻✻
ये तु तत्र विनिर्मुक्ताः सार्थात्केचिदविक्षताः ।।
तेऽब्रुवन्सहिताः सर्वे कस्येद□ कर्मणः फलम् ।✻✻
नून□ न पूजितोऽस्माभिर्मणिभद्रो महायशाः ।।
तथा यक्षाधिपः श्रीमान्न वै वैश्रवणः प्रभुः ।✻✻
न पूजा विघ्नकर्तणामथवा प्रथम□ कृता ।।
शकुनाना□ फल□ वाथ विपरीतमिद□ ध्रुवम् ।✻✻
ग्रहा न विपरीतास्तु किमन्यदिदमागतम् ।।
अपरे त्वब्रुवन्दीना ज्ञातिद्रव्यविनाकृताः ।✻✻
यासावद्य महासार्थे नारी ह्युन्मत्तदर्शना ।।
प्रविष्टा विकृताकारा कृत्वा रूपममानुषम् ।✻✻
तयेय□ विहिता पूर्वं माया परमदारुणा ।।

राक्षसी वा ध्रुव□ यक्षी पिशाची वा भयङ्करी ।✻✻
तस्याः सर्वमिद□ पाप□ नात्र कार्या विचारणा ।।
पश्यामो यदि ता□ पापा□ सार्थघ्नी□ नैकदुःखदाम् ।✻✻
लोष्टभिः पा□सुभिश्चैव तृणैः काष्ठैश्च मुष्टिभिः ।।
अवश्यमेव हन्यामः सार्थस्य किल कृत्यकाम् ।✻✻
दमयन्ती तु तच्छ्रुत्वा वाक्य□ तेषा□ सुदारुणम् ।।
ह्रीता भीता च स□विग्ना प्राद्रवद्यत्र काननम् ।✻✻
आशङ्कमाना तत्पापमात्मान□ पर्यदेवयत् ।।
अहो ममोपरि विधेः स□रम्भो दारुणो महान् ।✻✻
नानुबध्नाति कुशल□ कस्येद□ कर्मणः फलम् ।।
न स्मराम्यशुभ□ किञ्चित्कृत□ कस्यचिदण्वपि ।✻✻
कर्मणा मनसा वाचा कस्येद□ कर्मणः फलम् ।।
नून□ जन्मान्तरकृत□ पापमापतित□ महत् ।✻✻
अपश्चिमामिमा□ कष्टामापद□ प्राप्तवत्यहम् ।।
भर्तृराज्यापहरण□ स्वजनाच्च पराजयः ।✻✻
भर्त्रा सह वियोगश्च तनयाभ्या□ च विच्युतिः ।।
निर्नाथिता वने वासो बहुव्यालनिषेविते ।✻✻
अथापरेद्युः सम्प्राप्ते हतशिष्टा जनास्तदा ।।
हन्यमाने तथा सार्थे दमयन्ती शुचिस्मिता ।
ब्राह्मणैस्सहिता तत्र वने तु न विनाशिता ।।
एव□ प्रकारैर्बहुभिर्दै□वेनाक्रम्य हस्तिभिः ।

**देशात्तस्माद्विनिष्क्रम्य शोचन्ते वैशसं कृतम्** ।। १२ ।।

भ्रातरं पितरं पुत्रं सखायं च नराधिप ॥ १३ ॥[१]

हन्यमाने तथा सार्थे दमयन्ती शुचिस्मिता ।

**ब्राह्मणैः सहिता तत्र वने तु न विनाशिता ।**

**अशोचत्तत्र वैदर्भी किं नु मे दुष्कृतं कृतम् ॥ १४ ॥**

योऽपि मे निर्जनेऽरण्ये सम्प्राप्तोऽयं जनार्णवः ।**

**स हतो हस्तियूथेन मन्दभाग्यान्ममैव तत् ॥ १५ ॥**[२]

प्राप्तव्यं सुचिरं दुःखं नूनमद्यापि वै मया ॥ १६ ॥

नाप्राप्तकालो म्रियते श्रुतं वृद्धानुशासनम् ॥ १७ ॥[३]

या नाहमद्य मृदिता हस्तियूथेन दुःखिता ।**

**न ह्यदैवकृतं किञ्चिन्नराणामिह विद्यते ॥ १७ ॥**[४]

न च मे बालभावेऽपि किञ्चित्पापकृतं कृतम् ।**

**कर्मणा मनसा वाचा यदिदं दुःखमागतम् ॥ १८ ॥**[५]

मन्ये स्वयंवरकृते लोकपालाः समागताः ।

**प्रत्याख्याता मया तत्र नलस्यार्थाय देवताः ॥ १९ ॥**

नूनं तेषां प्रभावेण वियोगं प्राप्तवत्यहम् ॥ २० ॥[६]

### बृहदश्वः

---

(१) (१)तथा (for अथा ); (२) हतशिष्टो जन ( ॰ष्टजन॰ ; ॰ष्टा जन॰ ; ष्टजना ) स्तदा; (३) तस्माद्देशाद्; देशात्तस्माद्; वनदुर्गाद् (for वनगुल्माद् ); विनिःसृत्य; (४) शोचस्ते; ह्यशोचन्; शोचन्ते; शुशोच; प्रोचुस्ते (for शोचन्तो ); दयितं (for पितरं ); पितरं (for सखायं ); नरा (for जना ),

(२) (२)एतद् (for नु मे ); वैशसं (for दुष्कृतं ); (४) ()स्मि (for ऽयं ); स हतो (for हतोऽयं ); मन्दभाग्यं; तत्; च (for तु ),

(३) (२)नूनमद्यापि वै मया; (३) काले; कालं,

(४) (१)या (for यन् ); (३) नान्यद् (for न हि ); (अ)देवकृतं;दै(दै) वकृतात्; (४) दृश्यं (for विद्य ),

(५) (१)हि (for च ); (२) अप; पापं (for व्यप॰ ),

(६) (३)तेषां नूनं,

**एवमादीनि दुःखार्ता सा विलप्य वराङ्गना ।**

**हतशेषैः सह तदा ब्राह्मणैर्वेदपारगैः ।****

**अगच्छद्राजशार्दूल चन्द्रलेखेव शारदी ।। २१ ।।** (१)

प्रलापानि तदा तानि दमयन्ती पतिव्रता ।। (२)

**बृहदश्वः**

एव□ सा दुःखसन्तप्ता भर्तृव्यसनकर्शिता ।।

**गच्छन्ती सा चिरात् कालात् पुरमासादयन्महत् ।**

**सायह्ने चेदिराजस्य सुबाहोस्सत्यवादिनः ।। २२ ।।** (३)

**सा तु तच्चास्सर्वाङ्गी सुवाहोच्छङ्कगोपुरम**

**वस्त्रार्धकसुसंवीता प्रविवेश पुरोत्तमम् ।। २३ ।।** (४)

**अथ वस्त्रार्धसंवीता प्रविवेश पुरोत्तमम् ।**

**तां विह्वलां कृशां दीनां मुक्तकेशीममार्जिताम् ।****

**उन्मत्तामिव गच्छन्तीं ददृशुः पुरवासिनः ।। २४ ।।** (५)

**प्रविशन्तीं तु तां दृष्ट्वा चेदिराजपुरीं तदा ।****

**अनुजग्मुस्तत्र बाला ग्रामिपुत्राः कुतूहलात् ।। २५ ।।** (६)

**सा तैः परिवृतागच्छत्समीपं राजवेश्मनः ।****

---

(१) (१)दुःखार्ता; दुःखेन (for दुःखानि ); (२) विलप्य च (for सा विलप्य ); वरा॰ नना,

(२) (३)हतशेषैः; अगमद्;अगच्छद् चन्द्रले॰ ( विद्युल्ले )स्वेव शारदी; दुःखशोकसमन्विता,

(३) (१)गच्छती; (for सा ); बाला (for कालात् ); (२) बृहत् (for महत् ); (३) चेदिराष्ट्रस्य; (४) सत्यदर्शिनः,

(४) वस्त्रावर्त्त्व॰ ; अथ वसार्धं; एकवस्त्रार्ध॰ ; कृत्तवस्त्रार्धं; वस्त्वार्ङ्य॰ ; वस्त्रार्धेन च ( सु॰ ); संवीत

(५) (१)विह्वलां (for विवर्णां ); (२) मुक्तकेशाम्; अमार्जितां; वराङ्गनां; वराननां (for अमार्जनाम् ); मलिनां मुक्तमूर्धजा,

(६) (१)निर्विशतीं; तदा (for तु तां ); तां तु प्रविशतीं दृष्ट्वा; (२) पुरं; (३) तत्र (for ततो ); (४) राजपुत्र्यः; राजपुत्रा; राज॰ पुत्रीं; ग्रामपुत्राः; पौयत्राः; राजपुत्राः ग्राम्यपुत्राः,

**तां प्रासादगतापश्यद्राजमाता जनैर्वृताम्  ।। २६ ।।** (१)

धात्रीमुवाच गच्छैनामानयेह ममान्तिकम्

जनेन क्लिश्यते बाला दुःखिता शरणार्थिनी ।।(२)

तादृग्रूप□ च पश्यामि विद्योतयति मे गृहम् ।

उन्मत्तवेषा कल्याणी श्रीरिवायतलोचना ।(३)

**सा जनं वारयित्वा तं प्रासादतलमुत्तमम् ।****

**आरोप्य विस्मिता राजन्दमयन्तीमपृच्छत  ।। २७ ।।** (४)

**राजमाता**

**एवमप्यसुखाविष्टा बिभर्षि परमं वपुः ।****

**भासि विद्युदिवाभ्रेषु शंस मे कासि कन्यका(कस्य वा)।। २८ ।।**(५)

**न हि ते मानुषं रूपं भूषणैरपि वर्जितम् ।****

**असहाया नरेभ्यश्च नोद्विजस्यमरप्रभे  ।। २९ ।।** (६)

**बृहदश्वः**

**तच्छ्रुत्वा वचनं तस्या भैमी वचनमब्रवीत्  ।। ३० ।।** (७)

**मानुषीं मां विजानीहि भर्तारं समनुव्रताम् ।**(८)

**सैरन्ध्रीजातिसम्पन्नां भुजिष्यां कामवासिनीम्  ।। ३१ ।।**

---

(१) (४)जनैः वृतां,

(२) (१)चैवैनाम्; च इमाम्; गच्छेमाम् (for गच्छे ); (३)क्लेश्यते; क्लिष्यते; कृष्यते (for क्लिश्यते ); नाथा (for बाला ); जनैरा( ॰ना )क्लिश्यते नाथा;

(३) (१)तादृग्रूपं ( ॰पां ); उन्मत्तवेश; उन्मत्तवेषा कल्याणी श्रीरिवोत्पललोचना,

(४) (१) तं; तां(for सा) (अ)थ; तु; च; तत; तां (for तं ); (३) आरोह्य; आरुह्य (for आरोप्य ),

(५) (१)एवमप्यशुभे काले; (३) नभो॰ (for भासि ); (४) कस्य कस्य; कस्य कासि; भाविनि; कन्यके (for कस्य वा ),

(६) (१) च(for हि) (३) असह्यं यं नरेभ्यस्त्वं; (४) र्षभे(for प्रभे),

(७) (१)श्रुत्वा तस्याः,

(८) (३) मानु॰ ष्यहं विजा॰ ,

**फलमूलाशनामेकां यत्रसायम्प्रतिश्रयाम् ।**[१]

**असङ्ख्येयगुणो भर्ता मां च नित्यमनुव्रतः ।****

**भक्ताहमपि तं वीरं छायेवानपगा पथि ।। ३२ ।।** [२]

भर्तार□ पितर□ वीर□ छायेवानपगा सदा ।

**स केनचिदमेयात्मा कारणेन वरानने ।**

**दुःखितस्सर्वमुत्सृज्य प्रविवेश वनं महत् ।। ३३ ।।**

तस्य दैवात्प्रसङ्गोऽभूदतिमात्र□ सुदेवने ।******

द्यूते स निर्जितश्चैव वनमेक उपेयिवान् ।। [3]

तमेकवसन□ वीरमुन्मत्तमिव विह्वलम् ।

**लक्षालङ्कारः- तमेकवसनम् इत्यत्र द्वितीयाविभक्तेः अपहाय गच्छन्ती न भवतीत्यनपगेति पूर्वे पूर्वेण स्म्बन्धः ।**

अत्र कुम्बकोण पाठे आश्वासयन्ती इति अधिकः पाठस्य अन्तिम श्लोकेन सम्बन्धः दृश्यते । बोरिपाटे मध्ये अप्यनेकाः श्लोकाः निबद्धाः लक्षालङ्क ार रीत्या तमेक इति श्लोकोत्तरम् अश्वासयन्ती इति पादः पठ्यते ।

स केनचिदमेयात्मा कारणेन वराङ्गने ।

स कानचिदमेयात्मा कारणेनवराङ्गने ।

दुःखितस्सर्वमुत्सृज्य प्रवीवेश महावनम् ।। [४]

आश्वासयन्ती भर्तारमहमप्यगम□ वनम् ।

---

(१) (१)सैरन्ध्री॰ ; सैरिन्ध्रीं; व्रतसम्पन्नां; (२) यथार्हा; यथाहं; यथार्हं (for भुजि॰ ष्यां ); कामचारिणी; भुजिष्या ॰ वासिनी; (३)॰ शिनीम् (for शनाम् ); (४) प्रतिश्रयात्; तनाश्रयां,

(२) (३)भतार्हम्; तथाहम्; भक्ताहम् (for भर्तारम् ); अनु (for अपि ); अहं चानुगता वीरं; (४) सीतेव (for छायेव ); अनुगता (for अजेनपगा ); पथि (for सदा ); छायेव अनुगा सदा; छायेवानपगामिनी,

(३) (२)सु; हि (for स्म ); (३) वि॰ (for स ); (४) ॰ मेक उपेयिवान्,

(४) (१)छन्नम् (for वीरम् ); तमेकमवनीवीरं; (२) अति॰ (for इव ),

दुःखितः सर्वमुत्सृज्य प्रविवेश महावनम् ।**

**ततस्तं दुःखितं दृष्ट्वा प्रविशन्तं च काननम् ।। ३४ ।।** (१)

स कदाचिद्वने वीरः कस्मिंश्चित्कारणान्तरे ।**

**क्षुत्परीतस्तु विमनास्तदप्येकं व्यसर्जयत् ।। ३५ ।।** (२)

तमेकवसना नग्नमुन्मत्तवदचेतसम् ।**

**अनुव्रजन्ती बहुला न स्वपामि निशास्तदा ।। ३६ ।।** (३)

ततो बहुतिथे काले सुप्तामुत्सृज्य मां क्वचित् ।**

**वाससोऽर्धं परिच्छिद्य त्यक्तवान्मामनागसम् ।। ३७ ।।** (४)

तं मार्गमाणा भर्तारं दह्यमाना दिवानिशम् ।**

**न विन्दाम्यमरप्रख्यं प्रियं प्राणेश्वरं प्रभुम् ।। ३८ ।।** (५)

साह☐ कमलगर्भाभमपश्यन्ती हृदि प्रियम् ।(६)

**बृहदश्वः**

इत्युक्त्वा साऽनवद्याङ्गी राजमातरमप्युत ।

**स्थिताऽश्रुपरिपूर्णाक्षी वेपमाना सुदुःखिता ।। ३९ ।।**

तामश्रुपरिपूर्णाक्षीं विलपन्तीं तथा बहु ।**

**राजमाताब्रवीदार्ता भैमीमार्तस्वरां स्वयम् ।। ४० ।।** (७)

---

(१) (४)अप्यगमं; अप्यागता (for अन्व ); पतिं; प्रति; तदा (for वनम् ),

(२) (१)पुनद् (for वने ); महारण्ये (for वने वीरः ); (३) तु; स (for सु ); (४) तदाप्येकं; वस्त्रमेकं; तदा मां स; मामप्येक; वासश्चैकं; विसर्जयेत्; विसर्ज यत्; व्यसर्ज्जबत्; तदाख्येनो विनिर्गतः,

(३) (१)तमेकवसना; वीरम् (for नग्नम् ); (२) उन्मत्तवदचेतसं ( नं ); उन्मत्तं ग ° त्ता ह )तचेतनं; (४) अनुयामि; न स्वपिमि; ह्यनुयामि (for न स्वपामि ); निशां; तदा (for सदा ),

(४) (२)मा; स (for मां ); (४) अनागसीं,

(५) (२)गणयन्ती (for दह्य° ); दिनक्षयं; °क्षिपां; दिवानिशं; दिन° क्षप; °क्षिपं; क्षपां,

(६) (४)प्रियं प्राणेश्वरं प्रभुं,

(७) (३)आर्ता (for आर्ता ); (४) आर्तस्वरा; स्वरा; °तरां; भृशं (for स्वयम् ); भैमीमार्तत° रस्वनां; आर्ता भैमीं स्वयं तदा,

वसस्व मयि कल्याणि प्रीतिर्मे परमा त्वयि ।**
मृगयिष्यन्ति ते भद्रे भर्तारं पुरुषा मम ।। ४१ ।। (१)

अपि वा स्वयमागच्छेत्परिधावन्नितस्ततः ।**
इहैव वसती भद्रे भर्तारमुपलप्स्यसे ।। ४२ ।। (२)

**बृहदश्वः**

राजमातुर्वचः श्रुत्वा दमयन्ती वचोऽब्रवीत् ।। ४३ ।।

**दमयन्ती**

समयेनोत्सहे वस्तुं त्वयि वीरप्रजायिनि ।
उच्छिष्टं नैव भुञ्जीयां न कुर्यां पादधावनम् ।। ४४ ।। (३)

न चाहं पुरुषानन्यान्प्रभाषेयं कथञ्चन ।(४)
प्रार्थयेद्यदि मां कश्चिद्दण्ड्यस्ते स पुमान्भवेत् ।
भर्तुरन्वेषणार्थं तु पश्येयं ब्राह्मणानहम् ।। ४५ ।। (५)
वध्यश्च तेऽसकृन्मन्द इति मे व्रतमाहितम् ।

यद्येवमिह वत्स्यामि त्वत्सकाशे न संशयः ।**
अतोऽन्यथा न मे वासो वर्तते हृदये क्वचित् ।। ४६ ।। (६)

तां प्रहृष्टेन मनसा राजमातेदमब्रवीत् ।**

---

(१) (१)वस त्व मयि; वस त्वमिह; (२) परमा त्वयि; त्वयि वर्धते,
(२) (१)अपि (for अथ ); च (for वा ); सोयम् (for स्वयम् ); (२) अचेतनः; ततस्ततः (for इत° ); (३)इह वै वसितं भद्रे; (४) भर्तारमनु ( °मुप )लम्भ° सि; लब्ध्वा भर्तारमाच्छसि,
(३) (१) क° भर्तुरन्वेषणार्थं तु यत्रं कर्तुमिहार्हसि ।, उत्सृष्टं (for उच्छिष्टं ),
(४) (१) न च; न तु (for नैव ); (२) आभाष्येयं; आभाषेयं; प्रभाषेय; कदाचन,
(५) (१)प्रब्रवीद् (for प्रार्थयेद् ); (२) दूष्य° ; वध्य (for दण्ड्य ); पुनर् (for पुमान् ); क्वचित् (for भवेत् ), (३)र्थं च; र्थे च; र्थ हि; र्थाय (४)पृच्छेयं; पश्येह; यजेय; प्रेवये,
(६) (१)अद्यैवं (for यद्येवं ); वत्स्यामि; वस्तव्यं (for कर्तव्यं ); (२) वत्स्या (for वसा ); त्वत्सकाशे न संशयः (३)ततोन्यथा; ख अथोन्यथा; वासे; (४) रोच° (for वर्त ); हृदयं,

**राजमाता**

**सर्वमेतत्करिष्यामि दृष्ट्वा(दिष्ट्या) ते व्रतमीदृशम् ।। ४७ ।।** (१)

**बृहदश्वः**

**एवमुक्त्वा ततो भैमीं राजमाता विशाम्पते ।**

**उवाचेदं दुहितरं सुनन्दां नाम भारत ।। ४८ ।।**

**राजमाता**

**सैरन्ध्रीमभिजानीष्व सुनन्दे देवरूपिणीम् ।****

**एतया सह मोदस्व निरुद्विग्नमनाः सदा ।। ४९ ।।** (२)

सहसा न्यवसद्राजन् राजपुत्र्या सुनन्दया ।

**चिन्तयन्ती नलं वीरम् अनिशं वामलोचना ।। ५० ।।** (३)

वयसा तुल्यतां प्राप्ता सखी तव भवत्वियम् ।। ५१ ।। (४)

ततःपरमसंहृष्टा सुनन्दा गृहमागमत् ।

**दमयन्तीभुपादाय सखीभिः परिवारिता ।। ५२ ।।**

सा तत्र पूज्यमाना वै दमयन्ती व्यनन्दत ।

**सर्वकामैः सुविहितैर्निरुद्वेगावसत्तदा ।। ५३ ।।** (५)

ततः सुनन्दा राजेन्द्र सम्प्रहृष्ठमनाकृती ।

सैरम्भीसहिता गच्छत्स्वमेवावसथन्तदा ।

ततः सुनन्दया सार्ध दमयन्त्यवसस्तुखम् ।

---

(१) (१)इत्युक्ता दमयन्त्या तु,

(२) (१)सैरिध्रीम् अभि(नु)जानीहि; अवजानीषे,

(३) (४)चिन्तयन्ती नलं वीरमी॰

(४) (२)भविष्यति(for भवत्विम् ), सदा(for स्वयम्) ,

(५) निरुद्दिग्नमनामयं; द्वेग मनाः सदा; द्दिग्ना यथासुखं,

सर्वकामैः समुदिता पतिदर्शनलालसा ।

सह सान्यवसद्राजन्राजपुम्या सुनन्दया ।

**अस्मिन् तीर्थयात्रापर्वणि ५३अध्याये ५३श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि त्रिपञ्चाशोऽध्यायः ।। ५३ ।।**

तीर्थयात्रापर्वणि ...ऽध्यायः

# 03- 04- 054

# ५४.चतुःपञ्चाशोऽध्यायः

**दमयन्ती□ परित्यज्याटव्यामटन्तं नलं वनवह्निवेष्टितेन कर्कोटकेनात्मपरिरक्षण-प्रार्थना ।। १ ।। नलेन दावाग्नितो मोचितेन कर्कोटकेन नलगात्रे दंशनेन वैरूप्यापादनम् ।। २ ।। तथा निजरूपाविष्करणेच्छायां स्वस्मरणेन वासोवसनविघातपूर्वकं वस्त्रप्रदानम् ।। ३ ।।**

**बृहदश्वः**

नलस्य चरित□ राजञ्छ्रणु मे वदतोऽद्भुतम् ।

**उत्सृज्य दमयन्तीं तु नलो राजा विशाम्पते ।****

**ददर्श दावं दह्यन्तं महान्तं गहने वने ।। १ ।।** (१)

**तत्र शुश्राव शब्दं वै मध्ये भूतस्य कस्यचित् ।****

**अभिधाव नलेत्युच्चैः पुण्यश्लोकेति चासकृत् ।। २ ।।** (२)

---

(१) विसृज्य (for उत्सज्य ); उत्सृज्य तु नलो राजा दमरुत्ततीं विशाम्पते; (४) विजने गहने,
(२) (१)ततः; अथ (for तत्र ); शब्दं वै° ; मध्येग्नेः (for मध्त्रऽग्नौ ); (२) मध्ये; इदं (for शब्दं ); सत्वं (for भूत ); (३) अभिधावत अभ्यधावन्; अभिधाय (for अभिधाव ),

**मा भैरिति नलश्चोक्त्वा मध्यमग्नेः प्रविश्य तम् ।****
**ददर्श नागराजानं शयानं कुण्डलीकृतम् ।। ३ ।।** (१)

**स नागः प्राञ्जलिर्भूत्वा वेपमानो नलं तदा ।****
**उवाच मां विद्धि राजन्नागं कर्कोटकं नृप ।। ४ ।।** (२)

**मया प्रलब्धो ब्रह्मर्षिर्नारदः सुमहातपाः ।****
**तेन मन्युपरीतेन शप्तोऽस्मि मनुजाधिप ।। ५ ।।** (३)

तिष्ठ त्व□ स्थावर इव यावदेव नलः क्वचित् ।
इतो नेता हि तत्र त्व□ शापान्मोक्ष्यसि मत्कृतात् ।(४)

**तस्य शापान्न शक्तोऽस्मि पदाद्विचलितुं पदम् ।****
**उपदेक्ष्यामि ते श्रेयस्त्रातुमर्हति मां भवान् ।। ६ ।।** (५)

**सखा च ते भविष्यामि मत्समो नास्ति पन्नगः ।****
**लघुश्च ते भविष्यामि शीघ्रमादाय गच्छ माम् ।। ७ ।।**

**एवमुक्त्वा स नागेन्द्रो बभूवाङ्गुष्ठमात्रकः ।****
**तं गृहीत्वा नलः प्रायाद्देशं दावविवर्जितम् ।। ८ ।।** (६)

**आकाशदेशमासाद्य विमुक्तं कृष्णवर्त्मना ।****

---

(१) (१)नलेनोक्तः (for नलश्चोक्त्वा ); (२) प्रविश्य तत्; प्रविश्य तां; प्रजाधिप; प्रविश्य सः; प्रतिश्रुतं; मध्येग्नेः प्रविवेश ह ;° (३) नागराजं तु; राजं तं; (४) पर्वतोपमः; मण्डलीकृतं,

(२) (१)पन्नगः (for स नागः ); (३) विद्धि मां; नाम्ना (for राजन् ); (४) कार्को (for कर्को° ),

(३) (१)प्रदृष्टो; दग्धो; दष्टो; महर्षिः; विप्रर्षिः राजर्षिर् (for ब्रह्मर्षि ); (२) नीरागः; नारदः (for अनागाः); रनागा महातपाः मयाप्रलब्धोब्रह्मर्षिर्नारदइतिपाठान्तरम्, (३) तेनेमां प्रापितोवस्था,

(४) एति (for एव ); नरः (for नलः ),

(५) (१)वि° (for न ); शक्तोस्मि (for शक्नोमि ); (२) मन्दाद् (for पदाद् ); (३) उपदेक्ष्यामि; भूयस् (for श्रेयसः ); (४) अर्हसि° ; नो; तत्; मा (for मां ); प्रभो (for भवान् ),

(६) (४)देशं दावविवर्जितं,

उत्स्रष्टुकामं तं नागः पुनः कर्कोटकोऽब्रवीत् ।। ९ ।। [१]

**कर्कोटकः**

पदानि गणयन्गच्छ स्वानि नैषध कानिचित् ।**
तत्र तेऽहं महाबाहो श्रेयो धास्यामि यत्परम् ।। १० ।। [२]

**बृहदश्वः**

ततः सङ्ख्यातुमारब्धमदशद्दशमे पदे ।**
तस्य दष्टस्य तद्रूपं क्षिप्रमन्तरधीयत ।। ११ ।।
स दृष्ट्वा विस्मितस्तस्थावात्मानं विकृतं नलः ।**
स्वरूपधारिणं नागं ददर्श स महीपतिः ।
ततः कर्कोटको नागः सान्त्वयन्नलमब्रवीत् ।। १२ ।। [3]

**कर्कोटकः**

मया तेऽन्तर्हितं रूपं न त्वां विद्युर्जना इति ।
यत्कृते चासि निकृतो दुःखेन महता नल ।। १४ ।।[४]

कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तन□ कलिनाशनम् ।

विषेण स मदीयेन त्वयि दुःखं निवत्स्यति ।। १४ ।। [५]

---

(१) (१)आक्रोशादेशम्; आक्रोशद्देशम्; आकाशं देशम्; अन्यं देशं समासाद्य; (३) तं नागं; नृपतिं; (४) नागो वचनमब्रवीत्,
(२) (१)नागं (for गच्छ ); (३) महाबाहो; (४) भूयो; दास्यामि; तत्परं,
(३) (१)तस्माद् (for तस्थौ ); (४) ददर्श स; स ददर्श (for ददर्श च )(३)कार्को; (२) इदम् (for नलम् ),
(४) (२) त्वा (for त्वां ), (३)चापि (for चासि ); संसख्ये; संयुक्तो; निकृद्ध्ये; सन्तप्तो; यत्कृते दंशसंयुक्तो,
(५) (३) च; तन् (for स ); (४)दुःखं त्वयि निवत्सति,

विषेण संवृत्तैर्गात्रैर्यावत्त्वां न विमोक्ष्यति ।**
तावत्त्वयि महाराज दुःखं वै स निवत्स्यति ॥ १५ ॥ (1)

अनागा येन निकृतस्त्वमनर्हो जनाधिप ।**
क्रोधादसूययित्वा तं रक्षा मे भवतः कृता ॥ १६ ॥ (२)

न ते भयं नरव्याघ्र दंष्ट्रिभ्यः शत्रुतोऽपि वा ।**
ब्रह्मविद्भ्यश्च भविता मत्प्रसादान्नराधिप ॥ १७ ॥ (३)

राजन्विषनिमित्ता च न ते पीडा भविष्यति ।**
सङ्ग्रामेषु च राजेन्द्र शश्वज्जयमवाप्स्यसि ॥ १८ ॥

गच्छ राजन्नितः सूतो बाहुकः अहमिति ब्रुवन् ।
समीपमृतुपर्णस्य स हि चैवाक्षनैपुणः ॥ १९ ॥

अयोध्यां नगरीं रम्यामद्य वै निषधेश्व ।(४)
स तेऽक्षहृदयं दाता राजाश्वहृदयेन वै ॥ २० ॥

इक्ष्वाकुकुलजः श्रीमान्मित्रं चैव भविष्यति ।(५)
भविष्यसि यदाक्षज्ञः श्रेयसा योक्ष्यसे तदा ॥ २१ ॥

सममेष्यसि दारैस्त्वं मा स्म शोके मनः कृथाः ।**

---

(१) (१)संवृतं गात्रं; (२) त्वं (for त्वां ); विमोक्षस्रः क्ष्यसे; विमुञ्चति; विमोक्ष्यते; क्ष्यसि(३) तु त्वां; त्वां न; तु त्वा; कृत्वा (for त्वयि ); (४) क्लेशे स्मिन् (for दुःखं वै ); त्वयि (for वै स ); समन्त त्सति; संनिवत्सति; स निवन्त्यते; क्ष्यति; संनियोक्ष्यतेः संनियोक्ष्यति; स° नियोक्ष्यते,

(२) (१)निष्क्रान्तस्; विकृतम् (for निक्रतस् ); (२) अनेन; मया हि (for अनर्हो ); नराधिप; (३) त्वं; त्वां; क्रोधादव्यग्रचित्ता त्वं; क्रोधादसूयता राजन्; (४) वै; नु; ते (for मे ),

(३) (१)मा (for न ); महावीर (for नरं ); (२) सर्पतो (for शत्रुतो ); शत्रु° भ्यो दंष्ट्रिणोपि वा; (३) ब्रह्मर्षिभ्यश्च; °विद्भिश्च; °विच्चैव; °वित्त्वं च,

(४) (१)स्थानाद् (for सूतो ); (३) समीपे ऋतुं; (४) चैवाक्ष (for वेदाक्ष ); अद्य वै (for अद्यैव ); निषधेष्विव; निषधाधिप; वसुधाधिप,

(५) (४)स ते मित्रं भवि,

राज्येन तनयाभ्यां च सत्यमेतद्ब्रवीमि ते ।। २२ ।।[१]

स्वं रूपं च यदा द्रष्टुमिच्छेथास्त्वं नराधिप ।**

संस्मर्तव्यस्तदा तेऽहं वासश्चेदं निवासयेः ।[२]

अनेन वाससाच्छन्नः स्वं रूपं प्रतिपत्स्यसे ।। २३ ।।

**बृहदश्वः**

इत्युक्त्वा प्रददौ तस्मै दिव्यं वासोयुगं तदा ।। २४ ।।[३]

एवं नलं च सन्दिश्य वासो दत्त्वा च कौरव ।**

नागराजस्ततो राजंस्तत्रैवान्तरधीयत ।। २५ ।।[४]

**अस्मिन् तीर्थयात्रापर्वाणि ५४अध्याये २५श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि चतुःपञ्चाशोऽध्यायः ।। ५४ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

## 03- 04- 055

# ५५. पञ्चपञ्चाशोऽध्यायः

**कर्कोटकवचनान्नलेनायोध्यायां बाहुक इति स्वनाममनिर्देशपूर्वकमृतुपणनृप-समीपोपसर्पणम् ।। १ ।। नलस्यर्तुपर्णगृहेऽश्वाध्यक्षपदे नियुक्तिस्तस्य दमयन्तीमुद्दिश्य चिन्ता जीवलेन सहालापश्च ।।**

**बृहदश्वः**

---

(१) (३)सममेष्यसि (for समेष्य° सि च ); स; हि (for च ); संयोक्ष्यसे सदारैश्च; (४) च (for स्म ),

(२) (१)स्वं रूपं च; स्वस्वरूपं; (३) स्मर्तव्यश्च; स्मर्तव्यस्तु (for संस्मर्तव्यस् ); त्वया चाहं (for तदा तेऽहं ); (४)इदं वासो (for वासश्चेदं ); विवासय; निवासय; निवासकृत्,

(३) (२)स्वं रूपं; प्रतिलब्दयसि; (३) तस्मै; चास्मै (for अस्मै ),

(४) (१)च सन्दिश्य; समुद्दिश्य (for समा ); (३) कर्कोटकस्तदा राजन्,

तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः ।**
ऋतुपर्णस्य नगरं प्राविशद्दशमेऽहनि ॥ १ ॥

स राजानमुपातिष्ठद्बाहुकोऽहमिति ब्रुवन् ।**
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः ॥ २ ॥ (१)

अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणेषु च ।**
अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः ॥ ३ ॥

यानि शिल्पानि लोकेऽस्मिन्यच्चैवान्यत्सुदुष्करम् ।**
सर्वं यतिष्ये तत्कर्तुमृतुपर्ण भरस्व माम् ॥ ४ ॥ (२)

इत्युक्तस्स नलेनाथ ऋतुपर्णो नराधिपः ।
उवाच सुप्रीतमना नलं प्रेक्ष्य महीपते ॥ ५ ॥ (३)

**ऋतुपर्णः**

वस बाहुक भद्रं ते सर्वमेतत्करिष्यसि ।**
शीघ्रयाने सदा बुद्धिर्ध्रियते मे विशेषतः ॥ ६ ॥ (४)

स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम ।**
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः ॥ ७ ॥ (५)

त्वामुपस्थास्यतश्चैव नित्यं वार्ष्णेयजीवलौ ।**
एताभ्यां रंस्यसे सार्धं वस वै मयि बाहुक ॥ ८ ॥ (६)

---

(१) (४)मे (for मत् ),
(२) (२)यच्चाप्यन्यस्य दुष्करं; यच्चैवान्य° त्सुदु; यद्यच्चान्यत्सु ; यच्चान्यच्च सु ( न्यत्सर्वं ); यच्चाप्यन्यैः सुदु;
(३) सर्वं यदि यतिष्ये तत्; (४) भज (for भर ),
(३) (४)नलं प्रेक्ष्य (for तं प्रेक्ष्य च ),
(४) ऋतं (for ऋतु ); (२) भविष्यति (for करिष्यसि ); (४) म्रियते; धार्यते (ति); दयितां; नीयतां (for धीयते ),
(५) (१)योगत्वं; संयोगं; योगं त्वं; शोघ्रं त्वं (for योगं तं ); (२) शीघ्रहया; (४) शतं (for शताः ),
(६) (१)चैव (for चेमौ ); (२) जीविनः; °जीवनैः; जीवनी; (३) ताभ्यां च (for एताभ्यां ); (४) त्वं

**बृहदश्वः**

**एवमुक्तो नलस्तेन न्यवसत्तत्र पूजितः ।****
**ऋतुपर्णस्य नगरे सहवार्ष्णेयजीवलः ।। ९ ।।** (१)

**स वै तत्रावसद्राजा वैदर्भीमनुचिन्तयन् ।****
**सायं सायं सदा चेमं श्लोकमेकं जगाद ह ।। १० ।।** (२)

**नलः**

**क्व नु सा क्षुत्पिपासार्ता श्रान्ता शेते तपस्विनी ।****
**स्मरन्ती तस्य मन्दस्य कं वा साद्योपतिष्ठति ।। ११ ।।** (३)

**बृहदश्वः**

**एवं ब्रुवन्तं राजानं निशायां जीवलोऽब्रवीत् ।। ११ ।।** (४)

**जीवलः**

**कामेनां शोचसे नित्यं श्रोतुमिच्छामि बाहुक ।। १२ ।।** (5)
आयुष्मन्कस्य वा नारी यामेवमनुशोचसि ।(६)

**तमुवाच नलो राजा मन्दप्रज्ञस्य कस्यचित् ।****
**आसीद्बहुमता नारी तस्यादृढतरं वचः ।। १३ ।।** (७)

---

(for वै ),
(१) (१)तत्र (for तेन ); (२) नित्य॰ (for तत्र ); वसंस्तेनसुपूजितः; न्यवसत्तेन वै सदा; (४) ॰जीवनौ; जीवनः,
(२) (१)न्यवसद् (for निवसन् ); मा स्म तत्राभवद्राजा; स स्म ( स वै; स तु; शश्वत्; समं ) तत्रावसद्राजा; (२)अन्वचिन्त॰ यत्; (३) साये साये; तदा; यदा; तथा (for सदा ); महाराज (for सदा चेमं ); राजा; चैतं; स्मैवं ( नं ); (for चेमं ); (४) च (for ह ),
(३) (४)तिष्ठते,
(४) (२)निशम्य; निर्जने (for निशायां ); जीवनो,
(५) (३) एतां; इमां; एका; एवं (for एनां ),
(६) सा (for वा ); वै त्वम् (for एवम् ),
(७) (१)अवोचत् (for उवाच ); ततो (for नलो ); (४) तस्यां; दृढतरः वचः (for च सः); तस्यादृढतरं (

स वै केनचिदर्थेन तया मन्दो व्ययुज्यत ।**
**विप्रयुक्तः स मन्दात्मा भ्रमत्यसुखपीडितः ॥ १४ ॥** (१)

दह्यमानः स शोकेन दिवारात्रमतन्द्रितः ।**
**निशाकाले स्मरंस्तस्याः श्लोकमेकं स्म गायति ॥ १५ ॥** (२)

स विभ्रमन्महीं सर्वां क्वचिदासाद्य किञ्चन ।**
**वसत्यनर्हस्तद्दुःखं भूय एवानुसंस्मरन् ॥ १६ ॥** (३)

सा तु तं पुरुषं नारी कृच्छ्रेऽप्यनुगता वने ।**
**त्यक्ता तेनाल्पपुण्येन दुष्करं यदि जीवति ॥ १७ ॥** (४)

एका बालानभिज्ञा च मार्गाणामतथोचिता ।**
**क्षुत्पिपासापरीताङ्गी दुष्करं यदि जीवति ॥ १८ ॥** (५)

श्वापदाचरिते नित्यं वने महति दारुणे ।**
**त्यक्ता तेनाल्पभाग्येन मन्दप्रज्ञेन मारिष ॥ १९ ॥**(६)

इत्येवं नैषधो राजा दमयन्तीमनुस्मरन् ।**
**अज्ञातवासं न्यवसद्राज्ञस्तस्य निवेशने ॥ २० ॥**(७)

**अस्मिन् तीर्थयात्रापर्वणि ५५अध्याये २०श्लोकाः सन्ति**

---

तत्त्व+अदृढं ); अदृडतरं दमयन्त्यां मिथ्याप्रतिज्ञातं स्वस्यानुसन्धायेयमुण्डि,

(१) (१)स वै केनापि दोषेण; (३) विप्रयुक्तः स; °स्तु; स्य; (४) वस (for भ्रमं ),

(२) (३)अस्याः (for तस्याः ); (४) एनं; एवं (for ल्कं ); स (for स्म ),

(३) (१)वि° (for वै° ); कृत्स्नां (for सर्वा ); (२) नासाद्य (for आसाद्य ); वेतनं (for किञ्चन ); (३) दुःखं तु (for तद्दुःखं ); (४) अभि° (for अनु ); भूय एवेत्यनुस्मरन्,

(४) (१)च (for तु ); (२) कृच्छ्रेष्वनु; (३) भाग्येन; (४) सुदुःखं (for दुष्करं),

(५) (१)एकात्मा न लभेत्तां च; (२) दुःस्वाणाम् (for मार्गाणाम् ); अयथोचिता; एव शोचते; मार्गमाणा तथोचितां; (३)°परीताङ्गी; परीतां च; (४) स तु (for यदि ),

(६) (३)भाग्येन; (४) मन्दभाग्येन; मन्दपुण्येन; तां तु शोचामि,

(७) (१)एष (for एवं ); (३) न्यवसत् (for अवसत् ); (४) राज्ञः तस्य,

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पञ्चपञ्चशोऽध्यायः ॥ ५५ ॥

तीर्थयात्रापर्वणि ...ऽध्यायः

## 03- 04- 056

# ५६. षट्पञ्चाशोऽध्यायः

**नलदमयन्त्यन्वेषणाय नानादेशेषु विदर्भराजभीमराजकर्तृकमितस्ततो ब्राह्मणाना□ प्रेषणम् ॥ १॥ तेष्वन्यतमस्य सुदेवस्य चेदिराजगृहे दमयन्त्याः साक्षात्कारः सुदेवनाम्ना विप्रेण चेदिराजगृहे दमयन्तीदर्शनम् ॥ २ ॥ विप्रेण सह सबाष्पं भाषमाणां दमयन्ती□ दृष्ट्वा राजमात्रा विप्रं प्रति दमयन्तीकुलशीलादिप्रश्नः ॥ ३ ॥ सुदेवेन दमयन्तीतत्त्वं निवेदितया राजमात्रा पिप्लुरूपलाञ्छनेन तत्त्वनिर्धारणपूर्वकं तस्याः स्वपितृपुरं प्रति प्रापणम् ॥ ४ ॥ दमयन्तीप्रेषितैस्तत्र तत्र नलान्वेणम् ॥ ५ ॥**

**बृहदश्वः**

**हृतराज्ये नले भीमः सभार्ये प्रेष्यतां(च वनं) गते ।****
**द्विजान्प्रस्थापयामास नलदर्शनकाङ्क्षया ।[१]**
**सन्दिदेश च तान्भीमो वसु दत्त्वा च पुष्कलम् ॥ १ ॥ [२]**
**मृगयध्वं नलं चैव दमयन्तीं च मे सुताम् ॥ २ ॥ [3]**
**अस्मिन्कर्मणि सम्पन्ने विज्ञाते निषधाधिपे ।**
**गवां सहस्रं दास्यामि यो वस्तावानयिष्यति ॥ ३ ॥ [४]**
**अग्रहारांश्च दास्यामि ग्रामं नगरसम्मितम् ।[५]**

---

(१) (२)च वनं; ()दर्शनं ( प्रष्यतां ) (३) सम्प्रेष(for प्रस्थाप ); (४) लालसः,
(२) (१)स (for च ); (२) सु; हा तु; ति° (for च ); दत्वा चवसु पु,
(३) (३) यूयं (for चैव ),
(४) (१)तस्मिन्;सम्पन्ने (for निष्पन्ने ); (२) वसुधाधिपे,
(५) (३) हसहस्रावसुदास्यामि; (४) यः वः वा (for वसू ); यो वस्ता चानयिष्यति; अग्रहारांश्च;

**हिरण्यं च सुवर्णं च दासीदासं तथैव च ॥ ४ ॥**

**न चेच्छक्याविहानेतुं दमयन्ती नलोऽपि वा ।****

**ज्ञातमात्रेऽपि दास्यामि गवां दशशतं धनम् ॥ ५ ॥ (१)**

**बृहदश्वः**

**इत्युक्तास्ते ययुर्हृष्टा ब्राह्मणाः सर्वतो दिशम् ।****

**पुरराष्ट्राणि चिन्वन्तो नैषधं सह भार्यया ॥ ६ ॥ (२)**

**नैव क्वापि प्रपश्यन्ति नलं वा भीमपुत्रिकाम् ॥ ७ ॥**

कृशा□ विवर्णां मलिना□ भर्तृशोकपरायणाम् ।

**ततश्चेदिपुरीं रम्यां सुदेवो नाम वै द्विजः ।****

**विचिन्वानोऽथ वैदर्भीमपश्यद्राजवेश्मनि ॥ ८ ॥**

पुण्याहवाचने राज्ञः सुनन्दासहिता□ स्थिताम् ।

**मन्दं प्रख्यायमानेन रूपेणाप्रतिमेन ताम् ।****

**निबद्धां धूमजालेन प्रभामिव विभावसोः ॥ ९ ॥ (३)**

**तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् ।****

**तर्कयामास भैमीति कारणैरुपपादयन् ॥ १० ॥ (४)**

**सुदेवः**

**यथेयं मे पुरा दृष्टा तथारूपेयमङ्गना ।****

---

ग्रामंनगरसंनिभं; ग्रामान्नगरसंमितान्,

(१) (१)शक्यमिह (for शक्याविह ); (आ)गन्तुं (for (आ)नेतुं ); (२) दमयन्ती; च मे सुतां; नलं च वा; नलं तथा (for नलोऽपि वा ); (३) प्र (for ऽपि ); गवां सहस्रं दास्यामि; ज्ञातेपि च प्रदास्यामि; ४() चैव शतं; शतशतं; शतदशं (for दशशतं) गवां दशगुणं शतं,

(२) (३)राष्ट्रेषु; (४) सह भार्यया,

(३) (१)मदं (for मन्द° );(३) निबद्धां; विबद्धां (for पिनद्धा ),

(४) (३)वैदर्भीं (for भैमीति ); (४) कारणैरुपपादिभिः,

कृतार्थोऽस्म्यद्य दृष्ट्वेमां लोककान्तामिव श्रियम् ।। ११ ।। (१)

पूर्णचन्द्रनिभां श्यामां चारुवृत्तपयोधराम् ।**
कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ।। १२ ।। (२)

चारुपद्मविशालाक्षीं मन्मथस्य रतीमिव ।**
इष्टां समस्तलोकस्य पूर्णचन्द्रप्रभामिव ।। १३ ।। (३)

विदर्भसरसस्तस्माद्दैवदोषादिवोद्धताम् ।**
मलपङ्कानुलिप्ताङ्गीं मृणालीमिव चोद्धृताम् ।। १४ ।। (४)

पौर्णमासीमिव निशां राहुग्रस्तनिशाकराम् ।**
पतिशोकाकुलां दीनां शुष्कस्रोतां नदीमिव ।। १५ ।। (५)

विध्वस्तपर्णकमलां वित्रासितविहङ्गमाम् ।**
हस्तिहस्तपरामृष्टां व्याकुलामिव पद्मिनीम् ।। १६ ।। (६)

सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् ।**
दह्यमानामिवार्केण मृणालीमिव चोद्धृताम् ।। १७ ।। (७)

रूपौदार्यगुणोपेतां मण्डनार्हाममण्डिताम् ।**

---

(१) द्विजः (for सुदेव); (१) वै (for मे ); (२) दिव्यं (for तथा ); (३) (ए)वं; (ए)नां(for (इ) मां) (४)नलं (for लोक ),

(२) (१)पूर्ण° चद्रनिभां; (३) कुर्वती; कुर्वतीं; कुर्वती; देवी; तत्र,

(३) (१)°विशालाक्षी; (२) रतिं यथा;(इ)व तां रतिं (for रतीमिव ); इष्टा समस्तलोकस्य,

(४) (२)दैवयोगाद्; देवदोषाद्; देवयो° गाद् (for दैवदोषाद् ); मृणालीमिव चोद्धृताः(३) मलपङ्काभि; (४) व्याकुलां; तादृशीं; चोद्धृता (for तां भृशम् ); व्याकुलामिव पद्मिनीं; मृणालीचवचोद्धता; मृणालीमचिरोद्धृता; नो प्रम्लानां नलिनीमिव,

(५) (१)पूर्ण (for पौर्ण ); कलां (for निशां ); (२) दिवाकरं; (३) बालां (for दीनां ); शोकेन पङ्किलां दीनां; (४) शुष्कतोयां; शुष्कस्रोतो° कृशस्रोतां; कृतस्रोतां,

(६) (१)विध्वस्तपत्र; पर्णविहगां; (२) वित्रस्तविहगाकुलां; (३) परामृष्टां ( परिक्षिप्ता ); (४) आकुलाम्; आकुलां पद्मिनीमिव,

(७) (१)सुकुमारां; विशालाक्षीं (for सुजा° ); (२) गृहोषितां; °गृहोपमां; (३) (अ)र्केण (for (उ)ष्णेन ); (४) नलिनीम् (for मृणालीम् ); इव चोद्धृतां (for अचिरो° ),

चन्द्रलेखामिव नवां व्योम्नि नीलाभ्रसंवृताम् ।। १८ ।।

कामभोगैः प्रियैर्हीनां हीनां बन्धुजनेन च ।**
देहं धारयन्तीं दीनं(सन्धारयन्तीं हि)भर्तृदर्शनकाङ्क्षया।। १९ ।। (१)

भर्ता नाम परं नार्या भूषणं भूषणैर्विना ।**
एषा हि रहिता तेन शोभमाना न शोभते ।। २० ।। (२)

दुष्करं कुरुतेऽत्यन्तं हीनो यदनया नलः ।**
धारयत्यात्मनो देहं न शोकेनापि सीदति ।। २१ ।। (३)

इमामसितकेशान्तां शतपत्रायतेक्षणाम् ।**
सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथते मनः ।। २२ ।। (४)

कदा नु खलु दुःखस्य पारं यास्यति वै शुभा ।**
भर्तुःसमागमात्साध्वी रोहिणी शशिनो यथा ।। २३ ।। (५)

अस्या नूनं पुनर्लाभान्नैषधः प्रीतिमेष्यति ।**
राजा राज्यपरिभ्रष्टः पुनर्लब्धेव मेदिनीम् ।। २४ ।। (६)

लक्षालङ्कारः- पुनर्लब्धेव इत्यत्र मेदिनी□ पुनर्लब्धा पुरुष एव

तुल्यशीलवयोयुक्तां तुल्याभिजनसंवृताम् ।**

---

(१) (३)भीमं; दीनं (for दीनां ); देहं सन्धारयन्ती हि; (४) काङ्क्षिणी,

(२) (१)हि भूषणं; हि परमं (for नाम परं ); भार्या (for नार्या ); भर्तारं परमं नार्या; (२) परमं (for भूषणं ); (३) हि (for वि ) एषा हि तेन रहिता; (४) शोभमाना; शोभनार्हा; भूषणार्हा (for शोभना° पि ); वि° (for न ),

(३) (१) ()त्यन्तं(for त्यर्थं) दुष्करं कर्म कुरुते; (२) हीनो अयानया; निलः; प्रभुः (for नलः ); (४) अपि (for अव° ),

(४) (१)ह्यसित(for असित) (२)शतपत्रनिभक्षणां; (४) व्यथितं (for व्यथते ),

(५) (२)गच्छति (for यास्य ); भामिनी (for वै शुभा ); (४) शशिना (for शशिनो ),

(६) (१)भैम्या (for लाभान् ); (२) सुखम्; प्रियम् (for प्रीतिम् ); (३) राज्यात् (for राज्य° ); (४) लब्ध्वा च; प्राप्येव (for लब्ध्वेव -घ),

**नैषधोऽर्हति वैदर्भी तं चेयमसितेक्षणा ॥ २५ ॥** [(१)]

युक्तं तस्याप्रमेयस्य वीर्यसत्त्ववतो मया ।**

**समाश्वासयितुं भार्यां पतिदर्शनलालसाम् ॥ २६ ॥** [(२)]

अहमाश्वासयाम्येनां पूर्णचन्द्रनिभाननाम् ।**

**अदृष्टपूर्वां दुःखस्य दुःखार्तां ध्यानतत्पराम् ॥ २७ ॥** [(३)]

**बृहदश्वः**

**एवं विमृश्य विविधैः कारणैर्लक्षणैश्च ताम् ।****

**उपागम्य ततो भैमीं सुदेवो ब्राह्मणोऽब्रवीत् ॥ २८ ॥** [(४)]

**सुदेवः**

**अहं सुदेवो वैदर्भि भ्रातुस्ते दयितः सखा ।****

**भीमस्य वचनाद्राज्ञस्त्वामन्वेष्टुमिहागतः ॥ २९ ॥**[(५)]

कुशली ते पिता राज्ञि जननी भ्रातरश्च ते ।

**आयुष्मन्तौ कुशलिनौ तत्रस्थौ दारकौ च तौ ।****

**त्वत्कृते बन्धुवर्गाश्च गतसत्त्वा इवासते ॥ ३० ॥** [(६)]

अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति शतशो महीम् ।

किं तु राजा दृढ☐ भीमो जनित्री भ्रातरश्च ते ।[(७)]

अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति शतशो महीम् ।

**बृहदश्वः**

---

(१) (१)वृत्तां; (२) संवृतां; लक्षणाः,

(२) (१)युक्तं चास्या; युक्त्यस्या° ; वियुक्तस्या; (२) तस्य सत्वं; वीर्यसत्य; (४) भर्तृ,

(३) (१) अहम्; स्वयम् (for अयम् ); (ए)तां((ए)नां) अदृष्टदुःखां; दुःखार्तां ध्यानरोदनतत्परं,

(४) (२)धृतां; ° शुभां (for च ताम् ); (३) उपागम्य; देवीं (for भैमीं ); (४) वाक्यम् (for ब्राह्मणो ),

(५) (२) मातुस्ते (for भ्रा ); विदितः (for दयितः ),

(६) (१) राजा (for राज्ञि ); (२) जननी (for जनित्री ); जनितृभ्रातृभिश्च ते; (४) तौ,

(७) बन्धुवर्गः; ते (for च ); सत्वहीना (for गत ),

अभिज्ञाय सुदेवं तं दमयन्ती युधिष्ठिर ।
**पर्यपृच्छत तान्सर्वान्क्रमेण सुहृदः स्वकान् ॥ ३१ ॥** (१)

रुरोद च भृशं राजन्वैदर्भी शोककर्शिता ।**
**दृष्ट्वा सुदेवं सहसा भ्रातुरिष्टं द्विजोत्तमम् ॥ ३२ ॥** (२)

रुदतीं तामथो दृष्ट्वा सुनन्दा शोककर्शिता ।**
**सुदेवेन सहैकान्ते कथयन्तीं च भारत ॥ ३३ ॥** (३)

जनित्र्यै कथयामास सैरन्ध्री रोदितीति च ।**
**ब्राह्मणेन सहागम्य तां वेद यदि मन्यसे ॥ ३४ ॥** (४)

अथ चेदिपतेर्माता राज्ञश्चान्तःपुरात्तदा ।**
**जगाम यत्र सा बाला ब्राह्मणेन सहाभवत् ॥ ३५ ॥** (५)

ततः सुदेवमानाय्य राजमाता विशाम्पते ।**
**पप्रच्छ भार्या कस्येयं सुता वा कस्य भाविनी ॥ ३६ ॥** (६)

कथं च नष्टा ज्ञातिभ्यो भर्तुर्वा वामलोचना ।**
**त्वया च विदिता विप्र कथमेवङ्गता सती ॥ ३७ ॥** (७)

एतदिच्छाम्यहं श्रोतुं त्वत्तः सर्वमशेषतः ।**

---

(१) (१) त(for तु) (२)विशां पते (for युधि ); (३) तदा (for ततः); पर्यपृच्छत तान्सर्वान्,
(२) (१)बाला (for राजन् ); (२) कर्षिता; (४) मित्रं (for इष्टं ),
(३) (१)रुदं(द) तीं तामथो दृष्ट्वा; रुदन्तीं तां ( तां रुदतीं ) तथा दृष्ट्वा; (२) कर्षिता कर्शिता; (३) तथै (for सहै° ),
(४) (१)जनित्र्या; जनन्यैः;जनन्यै कथयामास; (२) सैरिध्री; सैरन्ध्रीं; रुदती ( )भृशं; रोदितीति वै; रुदतीति वै; रुदि (द) तीति च; रोदतेति च; रोदितीति च; रोदते भृशं; (३) सहा (for समा ); (४) वेत्थ; विद्धि (for वेद ),
(५) (२)चेदिपुरात्; चान्तःषुरे; चान्तःपुरं तुतः ततः; तथा (for तदा ); (४) समं गता (for सहाभवत् ),
(६) (४)भाविनी (for भा मिनी ),
(७) (२)भर्तुश्चासितलोचना,

**तत्त्वेन हि ममाचक्ष्व पृच्छन्त्या देवरूपिणीम्** ॥ ३८ ॥ (१)

**एवमुक्तस्तया राजन्सुदेवो द्विजसत्तमः ।****

**सुखोपविष्ट आचष्ट दमयन्त्या यथातथम्** ॥ ३९ ॥(२)

**सुदेवः**

**विदर्भराजो धर्मात्मा भीमो नाम महाद्युतिः ।****

**सुतेयं तस्य कल्याणी दमयन्तीति विश्रुता** ॥ ४० ॥ (३)

**राजा तु नैषधो नाम वीरसेनसुतो नलः ।****(४)

**वीरसेनसुतस्सको..तपि यदि ते श्रेत्रमागतः** ॥ ४१ ॥ (५)

**भार्येयं तस्य कल्याणी पुण्यश्लोकस्य धीमतः** ॥ ४२ ॥ (६)

**स द्यूतेन जितो भ्रात्रा हृतराज्यो महीपतिः ।****

**दमयन्त्या गतः सार्धं न प्राज्ञायत कस्यचित्** ॥ ४३ ॥ (७)

**ते वयं दमयन्त्यर्थे चरामः पृथिवीमिमाम् ।****

**सेयमासादिता बाला तव पुत्रनिवेशने** ॥ ४४ ॥ (८)

**अस्या रूपेण सदृशी मानुषी न हि विद्यते ।**

---

(१) तत्वं; श्रोतुं; ज्ञातु (for ); त्वत्तः (for ज्ञातुं ); (३) सत्येन (for तत्त्वे ); च (for हि ); सभां (for भमा° ); (४)पृच्छे त्वां (for पृच्छ° न्त्या ); त्वं द्विजोत्तम; दिव्यरूपिणीं; देव° वर्णिनीं,

(२) (१)ततो (for तया ); (२) सुदेवो हि द्विजोत्तमः; (३) आचष्टे; चाचष्ट; (४) दमयतीं,

(३) (१)र° घृतिमान् श्रीमान् सकत्यपरीक्रमः,धृतिमान् (for धर्मात्मा ); (२) भीमो नाम महाद्युतिः; श्रीमान्यत्यपराक्रमः ।

(४) क- नैषधो धीमान् वीरसेनसुतो नलः,

(५) (१)क° नास्तीदमर्घम्,वीरो; धीमान् (for नाम ),

(६) (३) नलस्य राज्ञो दयिता; (४) विश्रुता; संमता (for धीमतः ),

(७) (१)यूतेन; वैयूत° (for वै पूते ); राजा (for भ्रात्रा ); स चूते निर्जितो भ्रात्रा; (२) महामनाः (for मही ); (३)दमयन्त्यास्तु यो भर्ता; दिमयत्या च सहितः; (४)क° स्तु यो भर्ता नलो न ज्ञायते नृपम्, प्राज्ञायत; प्रज्ञायेत; कुत्रचित्; कस्यचित्; कश्चन; किश्चन; न ज्ञायते नृपः,

(८) (१)दमयत्यर्थं; (३) (अ)स्माभिमस् (for बाला ); (४) पुत्रि; देवि (for पुत्र° ); स्वपुरेत्र निवे,

अस्या ह्येष भ्रवोर्मध्ये सहजा विप्लुडुत्तमा ।। ४५ ।। (१)

लक्षालङ्कारः- सहजा विप्लुडुत्तमा इत्यत्र विप्लुट् बिन्द्वाकारेण वर्तुला रक्ततिलकोपमा रेखा

श्यामायाः पद्मसङ्काशो लक्षितोऽन्तर्हितो मया ।(2)

स दृष्टो बहुशो नाद्य लक्षितोऽन्तर्हितो मया ।(३)

मलेन संवृत्तो ह्यस्याश्छन्नोऽभ्रेणेव चन्द्रमाः ।। ४६ ।। (४)

चिह्नभूतो विभूत्यर्थमयं धात्रा विनिर्मितः ।(५)

प्रतिपत्कलुषस्येन्दोर्लेखा नातिविराजते ।। ४७ ।। (६)

न चास्या नश्यते रूपं वपुर्मलसमाचितम् ।**

असंस्कृतमभिव्यक्तं भाति काञ्चनसन्निभम् ।। ४८ ।। (७)

अनेन वपुषा बाला पिप्लुनानेन सूचिता ।**

लक्षितेयं मया देवी निभृतोऽग्निरिवोष्मणा ।। ४९ ।। (८)

बृहदश्वः

तच्छुत्वा वचनं तस्य सुदेवस्य विशाम्पते ।**

सुनन्दा शोधयामास पिप्लुप्रच्छादनं मलम् ।। ५० ।। (९)

---

(१) (२)मानुषे; न हि; नात्र; नैव (for नेह ); मानुषी नोपपद्यते;(३) घ° सरजो विप्लुडुत्तमः,

(२) (३) ह्येष ( एष ) (for चैव ); (४) विशुद्धा ( रु )त्तमः,

(३) स नाद्य दृष्टो बहुश

(४) (१)तस्याः; ()प्यस्याः (for ह्यस्याः ); (२) छन्नोभ्रेण; महाभ्रेण; स्तोका° भ्रेण,

(५) (३) चिह्नरूपो; ऋद्धिभूनो; स चा ( सदा )त्यर्थं (for विभू ),

(६) (१)च (for व ); त्कलुषर्स्येंदोर; षेनेदोद्; त्कलुषोवेदो; (२) लेखेव न विरा; लेखा नातीव राजते,

(७) (१) क्व चास्था; नैतस्या; न त्तस्याः अस्यास्तु (for न चास्या ); दृश्यते; गम्य; विद्य (for नश्य ); दिव्यं (for रूपं ); (२) रूपं; मल° समन्वितं; अभि° (for अपि ); भवत्यस्य स्वभावतः,

(८) (२) घ° विप्लु,विभुना; विप्रुषां; तेन (for अनेन ); चैव हि; सूचिता (for चैव ह ); पिप्लुनानेस्तरन्तिता; तिलकेन च चैव ह; (३) चैव (for दैवी ); (४) निन्हुतो° ; निहुतो; निभृतो; निहितो° ; निहतो

(९) (१)तस्य तद्वचनं श्रुत्वा; (४) विप्रुद्; विप्लुत्(for पिप्लु),

स मलेनापकृष्टेन पिप्लुस्तस्या व्यरोचत ।**
दमयन्त्या यथा व्यभ्रे नभसीव निशाकरः ।। ५१ ।। (१)

लक्षालङ्कारः- व्यभ्रे मेघरहिताकाशे

पिप्लुं दृष्ट्वा सुनन्दा च राजमाता च भारत ।
रुदत्यौ तां परिष्वज्य मुहूर्तमिव तस्थतुः ।
उत्सृज्य बाष्पं शनकै राजमातेदमब्रवीत् ।। ५२ ।। (२)

राजमाता

भगिन्या दुहिता मेऽसि पिप्लुनानेन सूचिता ।। ५३ ।।
अहं च तव माता च राज्ञस्तस्य महात्मनः ।**
सुते दशार्णाधिपतेः सुदाम्नः चारुदर्शने ।। ५४ ।। (३)
भीमस्य राज्ञः सा दत्ता वीरबाहो अहं पुनः ।**
त्वं तु जाता मया दृष्टा दशार्णेषु पितुर्गृहे ।। ५५ ।। (४)
यथैव ते पितुर्गेहं तथैव मम भामिनि ।**
यथैव च ममैश्वर्यं दमयन्ति तथा तव ।। ५६ ।। (५)

बृहदश्वः

तां प्रहृष्टेन मनसा दमयन्ती विशाम्पते ।**

---

(१) (१)मृष्टेन (for कृष्टेन ); (२) विश्य; विप्रुट्; विप्रुद् (for पिमुस्; ); तस्यां; अस्या (for तस्या ); तस्यावरोचत; सद्यो विरोचतः; तस्या अरो° ; अस्यावरो° ; (३) तथा; यथा (for तदा ); (४) नभस्येव; दिवाकरः,

(२) (१)विप्लुं; विप्रुद्ध (for °पिप्लुं); (२) विशां पते; (अ)थ भारत (for च भारत ),

(३) (१)विप्लुतानेन; विप्रुषा; विप्लुना° ; (४) राज्ञस्तस्य म; चारुलोचने,

(४) (३)च (for तु ) (४); दशा° स्यः गः °ण तु; गृहे पितुः,

(५) (२)तवे° (for तथे ); (ए)व (for (इ)दमू ); मम; इति (for अपि ); भाविनि; (३) यथेदं; च; (इ) दं (for हि ); (४) (ए)व ते (for तव ) तथैव तव भामिनि,

**प्रणम्य मातुर्भगिनीमिदं वचनमब्रवीत्                    ।। ५७ ।।** [१]

**दमयन्ती**

**अज्ञायमानापि सती सुखमस्म्युषिता त्वयि ।****

**सर्वकामैः सुविहिता रक्ष्यमाणा सदा त्वया                    ।। ५८ ।।** [२]

सुखात्सुखतरो वासो भविष्यति न संशयः ।**

**चिरविप्रोषितां मातर्मामनुज्ञातुमर्हसि                    ।। ५९ ।।** [३]

दारकौ च हि मे नीतौ वसतस्तत्र बालकौ ।**

**पित्रा विहीनौ शोकार्तौ मया चैव कथं नु तौ                    ।। ६० ।।** [४]

यदि चापि प्रियं किञ्चिन्मयि कर्तुमिहेच्छसि ।**

**विदर्भान्यातुमिच्छामि शीघ्रं मे यानमादिश                    ।। ६१ ।।** [५]

**बृहदश्वः**

**बाढमित्येव तामुक्त्वा हृष्टा मातृष्वसा नृप ।****

**गुप्तां बलेन महता पुत्रस्यानुमते ततः                    ।। ६२ ।।** [६]

प्राहिणोद्दमयन्ती□ ता□ तदा विप्रपुरस्कृताम् ।

**प्रास्थापयद्राजमाता श्रीमतीं नरवाहिना ।****

**यानेन भरतश्रेष्ठ स्वन्नपानपरिच्छदाम्                    ।। ६३ ।।** [७]

---

(१) (१)सा प्र; सम्प्र; ततो हृष्टेन; (३) प्रणम्य (for अभिवाद्य ),

(२) (२)सुखमध्युषिता; त्वयि; (इ)ति वै (for (इ)ह वै ); (४) सदा त्वया,

(३) (१)सुखतरं; लाभो (for वासो ); (३) चिरविप्रोषिता; चिरं विप्रो विता ; चिरं पर्युषिता,

(४) (१)अपि; चैव (for च हि ); दीनौ (for नीतौ ); (४) चापि (for चैव ),

(५) वापि; चैव; वा मे (for चापि ); कर्तुं (for किञ्चिन् ); मम (for मयि ); किञ्चिद् (for कर्तुम् ); (३)विदर्भा (for र्भान्); गन्तुम् (for यातुम् ); (४) शीघ्रं यानं,

(६) (१)प्राह (for उक्त्या ); बाढ° मित्येवमुक्त्वा तां; (२) तदा (for नृप ); (४) स्थिता; तथा (for तत° ); पुत्रस्यानुमतेन तां,

(७) (१)प्रा (for प्र ); (२) श्रीमती; शीघ्रवाहिना; (४) सान्नपानपरिच्छदां (°द); ह्यन्नपानपरिच्छदां (दं); स्वन्नपानपरिच्छदं; शुभान्नेन ( स्वर्णजाल° ; स्वनमान° ) परिच्छदाः,

ततः सा न चिरादेव विदर्भानगमत्पुनः ।**
तां तु बन्धुजनः सर्वः प्रहृष्टः समपूजयत् ।। ६४ ।।(१)
सर्वान्कुशलिनो दृष्ट्वा बान्धवान्दारकौ च तौ ।**
मातरं पितरं चोभौ सर्वं चैव सखीजनम् ।। ६५ ।।(२)
देवताः पूजयामास ब्राह्मणांश्च यशस्विनी ।**
परेण विधिना देवी दमयन्ती विशाम्पते ।। ६६ ।।(३)
अतर्पयत्सुदेवं च गोसहस्रेण पार्थिवः ।**
प्रीतो दृष्ट्वैव तनयां ग्रामेण द्रविणेन च ।। ६७ ।।(४)
सा व्युष्टा रजनीं तत्र पितुर्वेश्मनि भाविनी ।**
विश्रान्ता मातरं राजन्निदं वचनमब्रवीत् ।। ६८ ।।(५)

**दमयन्ती**

मां चेदिच्छसि जीवन्तीं मातः सत्यं ब्रवीमि ते ।**
नलस्य नरवीरस्य यतस्वानयने पुनः ।। ६९ ।।(६)

**बृहदश्वः**

दमयन्त्या तथोक्ता तु सा देवी भृशदुःखिता ।**

---

(१) (१)ततः सा (२)विदर्भाम्; पुनः; शुभां; (४) वैदर्भी (for प्रहृष्टः ); सम (for प्रत्य ),

(२) (३)चोभौ (for चैव ),

(३) (२)तप (for यश ); (३) परेण विधिना देवी ( दृष्टा; तात); विधिना तेन ( नापर° ; ना° पार; नानेन ) त्त्वाणी,

(४) (३)स्व° तनयां; सुतनया; (ए)व कल्याणी; (अ)थ तनयां (for (ए)व तनयां ); (४) ग्रामाणि नगराणि च,

(५) (१)व्युषिता; व्युषित्वा; सा व्युष्ट्वा; साध्युक्ष्य; साप्यु° व्यः; सा व्युष्य (for सा व्युष्टा ); रजनी; तां तु (for तत्र ); (२) भाविनी; (४) भैमी (for इदं ); आरण्य; नलोपाख्यान; दमयन्तीविदर्भ° गमनं,

(६) (२)वदामि (for ब्रवीमि ); चैतस्य (for वै तस्य ); नलस्यान्वेषणे यत्नः क्रियतामि( कर्तव्यइ)ति साम्प्रतं; ° नलस्य रवीरस्य यतस्वानयने पुनः ( ततः),

**बाष्पेणापिहिता राज्ञी नोत्तरं किञ्चिदब्रवीत्** ।। ७० ।।[१]

**तदवस्थां तु तां दृष्ट्वा सर्वमन्तःपुरं तदा ।****

**हाहाभूतमतीवासीद्भृशं च प्ररुरोद ह** ।। ७१ ।।[२]

**ततो भीमं महाराजं भार्या वचनमब्रवीत् ।**

दमयन्ती तव सुता भर्तारमनुशोचति ।। ७२ ।।[३]

**अपकृष्य च लज्जां सा स्वयमुक्तवती नृप ।**

**भार्या**

प्रयतन्तां तव प्रेष्याः पुण्यश्लोकस्य मार्गणे ।। ७३ ।।[4]

**बृहदश्वः**

**तया प्रदेशितो राजा ब्राह्मणान्वशवर्तिनः ।****

**प्रास्थापयद्दिशः सर्वा यतध्वं नलमार्गणे** ।। ७४ ।। [५]

ततो विदर्भाधिपतेर्नियोगाद्ब्राह्मणास्तदा ।**

**दमयन्तीमथो सृत्वा प्रस्थिताःस्मेत्यथाब्रुवन्** ।। ७५ ।। [६]

अथ तानब्रवीद्भैमी सर्वराष्ट्रेष्विदं वचः ।**

---

(१) (१)सा (for तु ); दमयन्तीं तथेत्युक्त्वा; (२) देवी सुसृश; (३) बाष्पेन विहिता; °नापिहिता; राज्ञी; देवी,

(२) (१)ततो (for तुतां ); प्राप्तां (for दृष्ट्वा ); (२) सहसान्तः; (३) अभूत्तत्र (for अतीवासीद् ); (४) चैव (for च प्र° ),

(३) (१)महाभागा; राजं; बाहुं (for राज ); (३) नृप भृशं ( °सुता ) (for तव सुता ),

(४) (३) प्रय° तन्तां; प्रयातु च; प्रगच्छन्तु; प्रेष्यतां च, (for प्रयतन्तु ); ब्राह्मणाः; सर्वतः प्रेष्याः(२)मा; सा (for मां ); (३) विभो (for नृप ), (४) मार्गणे (for दर्शने ),

(५) (१) तथा (for तया ); प्रदेशितो; नोदितो; बोधितो; (३) प्रस्थाप; प्रस्थापयन्नुवाचेदं; (४) मार्गणे,

(६) (२)ब्राह्मणास्तदा; णास्तु ते; द्विजपुङ्गव (for ब्राह्मणर्षभाः ); (३) अथो पृष्ट्वा; अथोत्सृष्ट्वा; अथो सृत्वा; ततो दृष्ट्वा; तथासाद्य; अथापृच्छ्य; तदापृच्छ्य; समापृच्छ्य (for अथो दृष्ट्वा ); (४) ते तथा; स्म तथा (for स्मेत्यथा° ),

ब्रुवध्वं जनसंसत्सु तत्र तत्र पुनः पुनः ।। ७६ ।। [१]

क्व नु त्वं कितवच्छित्त्वा वस्त्रार्धं प्रस्थितो मम ।**

उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय ।। ७७ ।। [२]

सा वै यथा त्वया दृष्टा तथाऽऽस्ते त्वत्प्रतीक्षिणी ।**

दह्यमाना भृशं बाला वस्त्रार्धेनाभिसंवृता ।। ७८ ।। [३]

तस्या रुदत्याः सततं तेन शोकेन पार्थिव ।**

प्रसादं कुरु वै वीर प्रतिवाक्यं ददस्व च ।। ७९ ।। [४]

एवमन्यच्च वक्तव्यं कृपां कुर्याद्यथा मयि ।**

वायुना धूयमानो हि वनं दहति पावकः ।। ८० ।। [५]

तथा दहति शोकाग्निर्हृदय मम नित्यशः

भर्तव्या रक्षणीया च पत्नी पतिना(त्या)हि सर्वदा ।**

तन्नष्टमुभयं कस्माद्धर्मज्ञस्य सतस्तव ।। ८१ ।। [६]

ख्यातः प्राज्ञः कुलीनश्च सानुक्रोशो भवान्सदा ।**

संवृत्तो निरनुक्रोशः शङ्के मद्भाग्यसङ्क्षयात् ।। ८२ ।। [७]

---

(१) (२)सर्वदेशेष्विदं ( ष्वय ) पृथक्; (३) ब्रूयान्त्य; ब्रूयास्तु ( स्तं); ब्रूयुः स्व॰ ; बूयास्त्वं; ब्रूयाच्च; ब्रूत वै; ( बुवध्वं ); ब्रुव॰ ध्वमिति पाठे त्वार्षस्तङ् ।; राजसंसत्सु; ऽ जन॰सङ्घं तु ( ॰धेषु ); ब्रूयात्स (ल्प); राजसंसत्यु; कथयध्वं स संसत्सु,

(२) (१)कुत्र (for क्व नु ); किं(for त्वं ); छिद्य (for छित्त्वा ); (२) वासोर्धं; तदा (for मम ); (३) विजने (for विपिने ),

(३) (१)सा वै त्वया; सा तथैव; त्वया इष्टा; त्वयादिष्टा; यथा॰ दिष्टा; समादिश्य; (२) तथास्ते; तथा ते (वै); तत्; त्वं (for त्वत्॰ ); प्रतीक्षणे; क्षते; प्रतीक्षणी; (३) (अ)निशं (for भृशं ); (४) नापि; न च; ॰नासि; नैव (for नाभि॰ ),

(४) (३)मे (for वै ); देव (for वीर ); (४) वदस्व; प्रयच्छ (for ददस्व ); मे (for च ) ,

(५) (१)एवम् (for एतद् ); चान्यच्च (for अन्यच्च ); वक्तव्यः; (२) मम (for मयि ); (३) ध्माय (for धूय ); ऽपि (for हि ); (४) दह्यति (for दहति ),

(६) (१)स्मर्तव्या; कर्तव्या; रक्षितव्या च; (२) पत्नी पत्या ( पत्न्या ) हि (च) नित्यदा ( सर्वदा; नित्यतः),

(७) (१)ज्ञातप्रज्ञः (for ख्यातः प्राज्ञः ); ॰नस्त्वं (for नश्च ); (२) च वै; भवान्; च सन् (for च त्वं );

तत्कुरुष्व नरव्याघ्र दयां मयि नरर्षभ ।**
**आनृशंस्यं परो धर्मस्त्वत्त एव हि मे श्रुतः ॥ ८३ ॥ (१)**

एवं ब्रुवाणान्यदि वः प्रतिब्रूयात्कथञ्चन ।**
**स नरः सर्वथा ज्ञेयः कश्चासौ क्व नु वर्तते ॥ ८४ ॥ (२)**

यश्चैवं वचनं श्रुत्वा ब्रूयात्प्रतिवचो नरः ।**
**तदादाय वचस्तस्य ममावेद्यं द्विजोत्तमाः ॥ ८५ ॥ (३)**

यथा च वो न जानीयाद्ब्रुवतो मम शासनात् ।**
**पुनरागमनं चैव तथा कार्यमतन्द्रितैः ॥ ८६ ॥ (४)**

यदि वासौ समृद्धः स्याद्यदि वाप्यधनो भवेत् ।**
**यदि वाप्यसमर्थः स्याज्ज्ञेयमस्य चिकीर्षितम् ॥ ८७ ॥ (५)**

**बृहदश्वः**

एवमुक्तास्त्वगच्छंस्ते ब्राह्मणाः सर्वतो दिशम् ।**
**नलं मृगयितुं राजंस्तदा व्यसनिनं तथा ॥ ८८ ॥ (६)**

---

सर्वदा (for त्वं सदा ); सानुक्रोशमतिः सदा त्वं; सदृण्तो (for संवृत्तो ) ,
(१) (१)तत् (for स ); कुरु त्वं (for कुरु॰ ); महीष्वास; नरव्याघ्र; (२) कृपां मयि; नरेश्वर; नराधिप; (४) श्रुतं; मया; श्रुतो (for हि मे ); श्रुतः; मया (for श्रुतम् ),
(२) (१)सततं (for यदि वः); (२) कथञ्चन (for हि कश्चन ); (३) नलः (for नरः ); (४) क्व (for कशः ); नु; स (for च ),
(३) (१)यश्च वो; यश्चैवं; यश्चेदं; यदि वो; यथेदं; यथैव (for यच्च वो ); ब्रूयात् (for श्रुत्वा ); (२) श्रुत्वा प्रति॰ ; प्रतिब्रूयाद्; त्वया प्रतिवचो मम; (३) तस्य (for क्षिप्रं ),
(४) (१)अथ (for यथा ); वचः ( च नः); यूयं; वाचः (for च वः ); वि (for न ); यथा वो न नु जानीयाः; (२) त्वरितं; चरितं; ब्रुवतो; चरद्भिः मम शासनात्; भीमचोद॰ ; (३) सद्भिः चेह (for चैव ); (४) यथा; इह (for तथा ),
(५) (१)चासौ (for बा॰ ); (२) वापिधनो; चाप्यधनो; ()पि वा (for भवेन् ); (३) अथ(for यदी); वासौ विरूपः; वाष्यसमर्थः (for वाप्यङ्गुकाम् ); (४) तस्य (for अस्य ); विवक्षितं (for चिकी॰ ),
(६) (१) त्वगच्छत; तु गच्छते; त्वगच्छन्वै; (२) दीशः; (४) नथा तदा; तदा (for तथा ); तथा; नृपं; भवेत् (for तदा ),

ते पुराणि सराष्ट्राणि ग्रामान्घोषांस्तथाऽऽश्रमान् ।**
अन्वेषन्तो नलं राजन्नाधिजग्मुर्द्विजातयः ।। ८९ ।। (१)

तच्च वाक्यं तथा सर्वे तत्र तत्र विशाम्पते ।**
श्रावयाञ्चक्रिरे विप्रा दमयन्त्या यथेरितम् ।। ९० ।। (२)

अस्मिन् तीर्थयात्रापर्वणि ५६अध्याये ९०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि षट्पञ्चाशोऽध्यायः ।। ५६ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

**03- 04- 057**

# ५७. सप्तपञ्चाशोऽध्यायः

नलान्वेषिणा पर्णादनाम्ना विप्रेण ऋतुपर्णनृपगृहके बाहुकनामनिगूढे नले श्रृण्वति दमयन्तीवर्जनानुवादः ।। १ ।। बाहुकेन विजने पर्णादं प्रति गमयन्तीवचनस्योत्तर-दानम् ।। २ ।। पर्णादकर्तृक□ दमयन्त्यै बाहुकवेषस्य नलस्य वृत्तान्तनिवेदन□ दमयन्त्याः स्वीयस्वय□वरसन्देश□ दत्त्वा सुदेवस्यर्तुपर्णगृहे प्रेषण□ च । पर्णादेन विदर्भान् पुरमभ्येत्य दमयन्त्या बाहुकवचननिवेदनम् ।। ३ ।। बाहुके नलशङ्किन्या दमयन्त्या प्रेषितेन सुदेवेन अयोध्यां गत्वा ऋतुपर्णे ॑ श्वोभूते गमयन्त्या पुनः स्वयम्वरो भवितेति कीर्तनम् ।। ४ ।। ऋतुपर्णेन दमयन्तीस्वयंवराय बाहुकं सारथ्ये नियोज्य वार्ष्णेयेन सह विदर्भान् प्रति प्रस्थानम् ।। ५ ।। वार्ष्णेयेन बाहुके सारथ्यकौशलेन नलत्वसम्भावना ।। ६ ।।

**बृहदश्वः**

---

(१) (१)च; सु॰ (for स॰ ); (२) तदा (for तथा ); (३) अन्विषन्ते; अन्विच्छन्तो; (४) विजग्मुस्ते (for नाधिजग्मुर्); द्विजातमाः;

(२) (१)तस्या (for तच्च ); ततः; तदा (for तथा ); सर्वं (for सर्वे ); (३) वीर; सर्वे (for विप्रा ); (४) तथेरित; यथेप्सितं; ॰ यथोदितं ,

अथ दीर्घस्य कालस्य पर्णादो नाम वै द्विजः ।**
प्रत्येत्य नगरं भैमीमिदं वचनमब्रवीत् ॥ १ ॥ (१)

**पर्णादः**

नैषधं मृगयानेन दमयन्ति मया नलम् ।**
अयोध्यां नगरीं गत्वा भाङ्गासुरिमुपस्थितः ॥ २ ॥(२)

श्रावितश्च मया वाक्यं त्वदीयं स महाजने ।**
ऋतुपर्णो महाभागो यथोक्तं वरवर्णिनि ॥ ३ ॥ (३)

तच्छ्रुत्वा नाब्रवीत्किंश्चिदृतुपर्णो नराधिपः ।**
न च पारिषदः कश्चिद्भाष्यमाणो मयासकृत् ॥ ४ ॥ (४)

अनुज्ञातं तु मां राज्ञा विजने कश्चिदब्रवीत् ।**
ऋतुपर्णस्य पुरुषो बाहुको नाम नामतः ॥ ५ ॥

सूतस्तस्य नरेन्द्रस्य विरूपो ह्रस्वबाहुकः ।**
शीघ्रयानेषु कुशलो मृष्टकर्ता च भोजने ॥ ६ ॥ (५)

स विनिःश्वस्य बहुशो रुदित्वा च पुनः पुनः ।**

---

(१) (३)अभ्येत्य; प्राविशन् (for प्रत्येत्य ); नगरीं; मध्यम् (for भैमीम् ),

(२) (२)मयानिशं; मयाचित; मया दीवा (for नलं;); (३) अयोध्या (for अयोध्यां ); अयोध्यानगरीमस्य; अयोध्यानगरीशश्च; (४)ऋतुपर्णम्; भार्गस्वरिर् (रिम्); भागस्वरिम्; भागासुरिम्; भागासुरिर्; ऋतु॰ पर्ण; भागस्वरिम्; मार्गं चाभिमुस्य स्थितः:; भार्ग्रवस्वरितः स्थितः:; भास्वरीं समुपेयुषा,

(३) (१)श्रावितं च; श्रावितस्य; त्वदीय मे (for मया वाक्यं ); (२) सहावाक्यं (for त्वदीयं स ); मे; च; ॰सु॰ (for स ); त्वदीयं च सभासने; त्वदीयं जनसंसदि; (३) ऋतपर्णो; महाभागे; (४) यथावद् (for यथोक्तं ),

(४) (२)महामनाः:; महीपतिः:; महानृपः (for नरा ); (३) न चास्य ( तत्रासौ ) पार्षदः:; कश्चिद्; (४) भाष्यमाणे; ऽसकृन्मयाः,

(५) (१)ततम् (for सूतस् ); न च तत्र नृपेद्रस्य; (३) दीर्घयाने; शीघ्रयानः च (for सु॰ ); शीघ्रयानेषु कुशलो; (४) मिष्टं (for म्रष्ट),

कुशलं चैव मां पृष्ट्वा पश्चादिदमभाषत ।। ७ ।। [१]

**बाहुकः**

वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः ।
आत्मानमात्मना सत्यो जितः स्वर्गो न संशयः ।। ८ ।। [२]

रहिता भर्तृभिश्चैव न कुप्यन्ति कदाचन ।[३]
प्राणांश्चारित्रकवचान्धारयन्ति वरस्त्रियः ।। ९ ।। [४]

विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।**
यत्सा तेन परित्यक्ता तत्र न क्रोद्धुमर्हति ।। १० ।। [५]

प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः ।**
आधिभिर्दह्यमानस्य श्यामा न क्रोद्धुमर्हति ।। ११ ।।

सत्कृतासत्कृता वापि पतिं दृष्ट्वा तथागतम् ।**
भ्रष्टराज्यं श्रिया हीनं श्यामा न क्रोद्धुमर्हति ।। १२ ।।[६]

लक्षालङ्कारः- श्यामा न क्रोद्धुमर्हति इत्यत्र श्यामा यौवनमध्यस्था

**पर्णादः**

तस्य तद्वचनं श्रुत्वा त्वरितोऽहमिहागतः ।**
श्रुत्वा प्रमाणं भवती राज्ञश्चैव निवेदय ।। १३ ।। [७]

**बृहदश्वः**

---

(१) (२)पुनः पुनः (for मुहुर्मुहुः ); (३) व्याकुलं (for कुशलं ); स च (for चैव ),
(२) (४) जितः (त) स्वर्गो; साध्व्यो (सत्या),
(३) (२)गोपयन्ति; (३) सद्यो (for सत्यो ); चापि (for चैव ); कुर्म्मतिः कथञ्चन,
(४) °कवचम्; प्राणं चा (°णाश्चा)° रित्रकं चैव; कुलं (for वर° ); धारयन्तीह (ति हि); सत्सियः ,
(५) (३)पत्या (for यत्सा ); स्; (अ)नेन; वने; (अ)न्येन (for तेन ); (४) ततो (for तत्र ),
(६) (४)क्षुधितं व्यसनाप्लुतं ( नान्वितं); नप्लुतं,
(७) (१)एतच्छुत्वा शुभं वाक्यं; (४) राज्ञे (for राज्ञश् ); चैवं (for चैव ),

एतच्छ्रुत्वाश्रुपूर्णाक्षी पर्णादस्य विशाम्पते ।**
दमयन्ती रहोऽभ्येत्य मातरं प्रत्यभाषत ।। १४ ।। (१)

अयमर्थो मृषा न स्याद्ब्राह्मणस्य कथञ्चन ।।

**दमयन्ती**

अयमर्थो न संवेद्यो भीमे मातः कदाचन ।**
त्वत्सन्निधौ नियोक्ष्येऽहं सुदेवं द्विजसत्तमम् ।। १५ ।। (२)

यथा न नृपतिर्भीमः प्रतिपद्येत मे मतम् ।**
तथा त्वया प्रकर्तव्यं मम चेत्प्रियमिच्छसि ।। १६ ।। (३)

यथा चाहं समानीता सुदेवेनाशु बान्धवान् ।
तेनैव मङ्गलेनाशु सुदेवो यातु मा चिरम् ।। १७ ।। (४)

समानेतुं नलं मातरयोध्यां नगरीमितः ।
ऋतुपर्णस्य भवने निवसन्तमरिन्दमम् ।। १८ ।।(5)

**बृहदश्वः**

विश्रान्तं तु ततः पश्चात्पर्णादं द्विजसत्तमम् ।**
अर्चयामास वैदर्भी धनेनातीव भाविनी ।। १९ ।। (६)
उवाच चैनं महता सम्पूज्य द्रविणेन वै ।। १९ ।।

---

(१) (१) एवं (for स्त्र्यत् ); विशालाक्षी (for (अ)श्रुपूर्णाक्षी ); (३) ततोभ्येत्य; वचोभ्येत्य; महाराज (for रहो ); (४)सर्वं मात्रे न्यवेदयत् ,

(२) (२)भीमो (for भीमे ); कदा (for कथं ); (३) नियो क्ष्येहं ( क्ष्येने ); समाः ( मया ) योक्ष्ये; (४) सुदेवं ब्राह्मणं यथा (तथा),

(३) (१)च; स; तु (for न ); (२) नैव तत्; मे मतिं; धर्मतः (for मे मतम् ); (३) प्रकर्तव्यं; °पत्तव्यं; ; °मतव्यं; °वक्तव्यं; (४) यदि मत् (for मम चेत् ); प्रियं इच्छसि ,

(४) (१)यथैवाहं समा; यथा त्वाहं समा; यथाहं सुसमा( समुपा )नीताः; (२)क° घ° बान्धवान्, (इ)ह (for (आ)शु ); बधुवत् (for बान्ध ),

(५) (१) श्वः (for (आ)शु ° ); समायातुं; समानीते; तमा° नेतुं;(२) अयोध्यानगरीमितः (रीं प्रति) ,

(६) (१)तु (for च ); (३) अतर्पयत ( च); तर्पयामास; (४) भारत; भाविनी,

**दमयन्ती**

**नले चेहागते तत्र भूयो दास्यामि ते वसु**
**त्वया हि मे बहु कृतं यदन्यो न करिष्यति ॥ २० ॥**
**यद्भर्त्राहं समेष्यामि शीघ्रमेव द्विजोत्तम ॥ २१ ॥**[१]
**स एवमुक्तोऽथाश्वास्य आशीर्वादैः सुमङ्गलैः ।****
**गृहानुपययौ चापि कृतार्थः सुमहामनाः ॥ २२ ॥**[२]
**ततः सुदेवमाभाष्य दमयन्ती युधिष्ठिर ।**
**अब्रवीत्सन्निधौ मातुर्दुःखशोकसमन्विता ॥ २३ ॥**[३]
गत्वा सुदेवनगरीमयोध्यावासिन□ नृपम् ।

**दमयन्ती**

**ऋतुपर्णं वचो ब्रूहि सम्पतन्निव कामगः ॥ २४ ॥**
**आस्थास्यति पुनर्भैमी दमयन्ती स्वयंवरम् ।**[४]
**तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ॥ २५ ॥**
**तथा च गणितः कालः श्वोभूते स भविष्यति ।**[५]
**यदि सम्भावनीयं ते गच्छ शीघ्रमरिन्दम ॥ २६ ॥**
**सूर्योदये द्वितीयं सा भर्तारं वरयिष्यति ।****

---

(१) (१)चैवा (for चेहा ); ब्रह्मन्; तत्र (for विप्र ); (४) यदन्यो न (for यथा नान्यः ); यच्छच्च ह समे ,
(२) उत्त्वा° (for उक्तो ); साशीर्वादैः (for तामाशी° ); स एवमुक्तोथा( त्त्वा चा )श्वास्य; समं° गलैः; तथाविधं (for सुम ); (३) उपाययौ; अनुः (अथ)ययौ; (४) स्म महामनाः; ° सुमहा; सुः (तु)° महातपाः; स ( सु° ) महायशाः ,
(३) (१)भूयश्रू (for ततश्रू ); ततः सुदेवमाभाष्य - आनाय्य; चानीय (for चानाय्य ); (नामानं) ,
(४) (२) अयोध्यां तत्र तं नृपं; (४) चिकीर्षति ( वरिष्यति ) (for चिकीर्षती ); सा° मात्यं सपुरोहितं; सम्पन्नमिव कामगः; (३) करिष्यति (for आस्था ),
(५) (१)तत्रागच्छन्ति; (३) तथा च; याथावद् (for यथा च ); यथा च गणिते काले; यथावगणितः कालः; (४) सं° ; च (for स ),

**न हि स ज्ञायते वीरो नलो जीवति वा न वा ।। २७ ।।**(१)

**बृहदश्वः**

**एवं तया यथोक्तो वै गत्वा राजानमब्रवीत् ।****

**ऋतुपर्णं महाराज सुदेवो ब्राह्मणस्तदा ।। २८ ।।**(२)

**बृहदश्वः**

**श्रुत्वा वचः सुदेवस्य ऋतुपर्णो नराधिपः ।****

**सान्त्वयञ्श्लक्ष्णया वाचा बाहुकं प्रत्यभाषत ।। २९ ।।**(३)

सारथीन्ते समानीय वार्ष्णेयप्रभृतीन्नृपः ।(४)

कथयामास यद्वृत्त□ ब्राह्मणेन श्रुत□ तथा ।

बाहुक□ च समाहूय दमयन्त्याः स्वय□वरम् ।

**ऋतुपर्णः**

**विदर्भान्यातुमिच्छामि दमयन्त्याः स्वयंवरम् ।****

**एकाह्ना हयतत्त्वज्ञ मन्यसे यदि बाहुक ।। ३० ।।**(५)

**बृहदश्वः**

**एवमुक्तस्य कौन्तेय तेन राज्ञा नलस्य ह ।****

**व्यदीर्यत मनो दुःखात्प्रदध्यौ च महामनाः ।। ३१ ।।**(६)

**नलः**

---

(१) (१)यदि सम्भाव ( वि )नीयस्ते ( या ते ); (४) वरं वै (for भर्तारं ) वर॰ भेष्यति (for वरयि ); न स सं॰ ; वि॰ (for स ) नलो वति वा न वा; नलो जीवेन्द॰ येत वा ,

(२) (१)तथोक्तं; यथोक्तो; नियुक्तो,

(३) (१)वाचः; (२) ऋतपर्णो; जनाधिपः ,

(४) सारथीन् त , न्नपः इति च ख ।

(५) (१)विदर्भा ( वैदर्भी ); गन्तुमिच्छामि; (३) एकाह्ने; एकाह्नात्; (४) वक्ष्य (for मन्थः ),

(६) (१)एवमुक्ते तु; क्तस्तु; (३) च (for ह ); (३) व्यदीर्यतेव हृदयं; (४) प्रहृष्टश्च; सं॰ ( स )प्रदध्यौ (for प्रदध्यौ च ); महामतिः; महीपतिः;महादधुतिः; महायशाः,

दमयन्ती वदेदेतत्कुर्याद्दुःखेन मोहिता ।**
अस्मदर्थे भवेद्वायमुपायश्चिन्तितो महान् ।। ३२ ।। (१)

नृशंसं बत वैदर्भी भर्तृकामा तपस्विनी ।**
मया क्षुद्रेण निकृता कृपणा पापबुद्धिना ।(२)
स्त्रीस्वभावश्चलो लोके मम दोषश्च दारुणः ।। ३३ ।।

स्यादेवमपि कुर्यात्सा विवासाद्गतसौहृदा ।**
मम शोकेन संविग्ना नैराश्यात्तनुमध्यमा ।। ३४ ।। (३)
नैवं सा कर्हिचित्कुर्यात्सापत्या च विशेषतः ।। ३५ ।। (४)

यदत्र सत्यं वासत्यं गत्वा वेत्स्यामि निश्चयम् ।**
ऋतुपर्णस्य वै काममात्मार्थं च करोम्यहम् ।। ३६ ।। (५)

**बृहदश्वः**

इति निश्चित्य मनसा बाहुको दीनमानसः ।**
कृताञ्जलिरुवाचेदमृतुपर्णं जनाधिपम् ।। ३७ ।। (६)

**बाहुकः**

---

(१) (१)वदेदेतत्; न चैवेदं; ॰ कथं चैतत्; भवेदेवं ( वचो नैतत् ) (for भवेदेतत् ); (२) किं नु (for कुर्याद् ); (३) अस्मदर्थं (४) उपायःपरिचिततिः ,

(२) (१)तव॰ ; कर्म; सा तु (for बत ); (२) भर्तृकामा मनस्विनी; यश; (३) निहिता; निहता (for निकृता ); (४)कृपणा पापबुद्धिना,

(३) (१)स्त्रीस्वभावश्च चपलः; स्वभावाच्च (च)पलाः स्त्रीभावश्चपलो लोके; (३) एतद् (for एवम् ); स्यादेवं नैव सा कुर्यात्; (४) विवासाद्; प्रे ममापि; विवास्य (for विवशा ); काममोहिता (for गतं ); दोषेण (for शोकेन ); सन्तप्ता; विवशा (for संविग्ना ); एकाह्नात् (for नैराश्यात् ),

(४) (१)न मैवं; नैवं सा; न सैवं ( नस्त्वैनं ) (for न चैवं );

(५) (१) तथ्यं पथ्यं; य(त)दत्र सत्यं वासत्यं; यदत्रातथ्यं (॰थ्या) तथ्यं ( पथ्यं) च; सत्यं यदत्रासत्यं वा; सत्यं वा यदि वासत्यं; (२) निश्चितं; (३)कार्यंयद् (for वैकामम् ); आत्मनश्च; आत्मार्थे च; ममार्थं च; मदर्थं च,

(६) (१)स वि॰ (for इति ); (४) जनाधिपं; नरेश्वरं (for नरा ),

**प्रतिजानामि ते वाक्यं गमिष्यामि नराधिप ।****

**एकाह्ना पुरुषव्याघ्र विदर्भनगरीं नृप ।। ३८ ।।** [१]

एवमुक्तोब्रवीद्राजा बाहुक□ प्रहस□स्तदा ।

यद्येव□ भविता श्वो वै किं ते काम□ करोम्यहम् ।

**बृहदश्वः**

**ततः परीक्षामश्वानां चक्रे राजन्स बाहुकः ।****

**अश्वशालामुपागम्य भार्गस्वरिरुपस्थितः ।। ३९ ।।** [२]

**लक्षालङ्कारः- भार्गस्वरिरुपस्थित इत्यत्र भृगुस्वरस्यापत्यं पुमान् भार्गस्वरिः ऋतुपर्ण इत्यर्थः ।**

**स त्वर्यमाणो बहुश ऋतुपर्णेन बाहुकः ।****

**अध्यगच्छत्कृशानश्वान्समर्थानध्वनि क्षमान् ।। ४० ।।** [३]

अश्वाञ्जिज्ञासमानो वै विचार्य च पुनः पुनः ।[४]

**तेजोबलसमायुक्तान् कुलशीलसमन्वितान् ।**

**वर्जितांल्लक्षणैर्हीनैः पृथुप्रोथान् महाहनून् ।। ४१ ।।**

**लक्षालङ्कारः-पृथुप्रोथान् महाहनून् इत्यत्र स्त्रियां स्फिजौ कटिः प्रोध उपस्थो वक्ष्यमाणयोः इत्यभिधानात् पृथुः पुष्टः प्रोथः कटिप्रदेशः**

**शुद्धान्दशभिरावर्तैः सिन्धुजान्वातरंहसः ।**[५]

---

(१) (१)अभि॰ (for प्रति ); वाक्यं (for सत्यं ); (२) गमिष्यामि; (३) एका॰ हात्; एकाहात्; (४) विदर्भानगरीमितः ( रीं नृप ); विदर्भनगरं नृप; विदर्भां नगराधिपः; विदर्भानगरीं त्वतः; विदर्भनगरं भुवं,

(२) (२)राजंश्चक्रे; चक्रे राज्ञः; (३) उपागत्य; (४) भृङ्गासुरि॰ ,

(३) (१)स वार्यमाणो; स त्वार्य; सन्त्वर्य॰ ; (२)बहुधा; च भृशम् (for बहुश ),

(४) (३)अभ्य; अथा (for अध्य॰ ); (४) सुवेगान् (for समर्था ),

(५) (२)समायुतान्; जवान्वितान्; (४) पृथुनासान्; ॰घोणान्; श्रेष्ठान्; महाल्क; महाबलान्; देशान्; शुभान् (for शुद्धान् ),

दृश्यमानाच्छशानत्तर्यैवेनाप्रतिमान्पथि ।(१)

**दृष्ट्वा तानब्रवीद्राजा किञ्चित्कोपसमन्वितः ।। ४२ ।।**

**ऋतुपर्णः**

**किमिदं प्रार्थितं कर्तुं प्रलब्धव्या न ते वयम् ।। ४३ ।। (२)**

**कथमल्पबलप्राणा वक्ष्यन्तीमे हयोत्तमाः ।****

**महानध्वा सचैकाह्ना गन्तव्यः कथमीदृशैः ।। ४४ ।। (३)**

**लक्षालङ्कारः-वक्ष्यन्तीमे हयोत्तमाः इत्यत्र वक्ष्यन्ति वहिष्यन्ति ।**

एको ललाटे द्वौ मूर्ध्नि द्वौ द्वौ पार्श्र्वोपपार्श्र्वयोः ।

द्वौ द्वौ वक्षसि विज्ञेयौ प्रयाणे चैक एव तु ।(४)

एको ललाटे इति श्लोकः क्वचिन्न दृश्यते;

**बाहुकः**

**एते हया गमिष्यन्ति विदर्भान्नात्र संशयः ।****

**यानन्यान्मन्यसे राजन्ब्रूहि तान्योजयामि ते ।। ४५ ।।**

**ऋतुपर्णः**

**त्वमेव हयतत्त्वज्ञः कुशलो ह्यसि बाहुक ।।**

**यान्मन्यसे समर्थांस्त्वं क्षिप्रं तानेव योजय ।। ४६ ।। (५)**

**बृहदश्वः**

---

(१) कृशैर ( कृशान्); भुवि (for पथि ),

(२) तान्दृष्ट्वग दुर्बलान्राजा (॰ लानश्वान्); प्राह कोप; (३) कर्म (for कर्तुं ); (४) न (for हि ) ,

(३) (२) क॰ मम;, वहिष्यन्ति; वहन्तीमे; वास्यन्तीमे; रथं (for मम ); (३) महदध्वानमपि च; महा॰ नध्वायमपि च; महान्तमपि चाध्वानं; महानध्वा स चैकाह्ना; (४) गन्तव्यं; गताहं ,

(४) (१) वै तान् (for हया ); (२) विदर्भा नात्र; (३) यान् (for अथ ); अथान्यच्छिह राजेन्द्र; (४) कान्; हयान् (for ब्रूहि ); तान्; अन्यान् (for कान् ); योजया॰ म्यहं; योजये हयान,

(५) राजा (for ऋतु उ ); (२) कुशलो ह्यसि; (३) समर्थाश्वान् (for समर्थांस्त्वं ); (४) तान्विनि॰ (for तानेव ),

ततः सदश्वांश्चतुरः कुलशीलसमन्वितान् ।**
योजयामास कुशलो जवयुक्तान्रथे नलः ।। ४७ ।। (१)

ततो युक्तं रथं राजा समारोहत्त्वरान्वितः ।**
अथ पर्यपतन्भूमौ जानुभिस्ते हयोत्तमाः ।। ४८ ।। (२)

ततो नरवरः श्रीमान्नलो राजा विशाम्पते ।**
सान्त्वयामास तानश्वांस्तेजोबलसमन्वितान् ।। ४९ ।। (३)

रश्मिभिश्च समुद्यम्य नलो यातुमियेष सः ।**
सूतमारोप्य वार्ष्णेयं जवमास्थाय वै परम् ।। ५० ।। (४)

ते चोद्यमाना विधिवद्बाहुकेन हयोत्तमाः ।**
समुत्पेतुरथाकाशं रथिनं मोहयन्निव ।। ५१ ।। (५)

तथा तु दृष्ट्वा तानश्वान्वहतो वातरंहसः ।**
अयोध्याधिपतिः श्रीमान्विस्मयं परमं ययौ ।। ५२ ।। (६)

रथघोषं तु तं श्रुत्वा हयसङ्ग्रहणं च तत् ।**
वार्ष्णेयश्चिन्तयामास बाहुकस्य हयज्ञताम् ।। ५३ ।। (७)

**वार्ष्णेयः**

किं नु स्यान्मातलिरयं देवराजस्य सारथिः ।**

---

(१) (२)° जवान्वितान्; (३) स नलो (for कुशला ); (४) रथे ततः; नलो रथे; तथा नलः; रथोत्तमे; रथेन तु,
(२) (१)सन्नद्धस्तु; तथा युक्तं (for ततो युक्तं),
(३) (१)प्रीतो (for श्रीमान् ),
(४) (१)तस्मिन्दथे; रश्मिभिस्तु; (२) गन्तुम् (for यातुम् ); नलो याति सुवेगतः; नलो गन्तुं प्रचक्रमे; (४) नैषधं; नैषधः (for वै परम् ),
(५) (१)ते नोद्यमाना; विधिवद्; बहुधा; (३) अथा° (for इवा ); (४) बाहुकं (for रथिनं ); मोहयन्ति च,
(६) (१)दृष्ट्वातु; च दृष्ट्वा; इष्ट्वा तथा तु ता; (२) बहवो; वहन्तो; व्रजतो (for वहतो ); मनोमारुतरंहसः; (३) श्रीमान् (for धीमान् ); (४) गतः (for ययौ ),
(७) (१)च (for तु ); तत् (for तं ); दृष्ट्वा (for श्रुत्वा ); (२) हयानां ग्रहणं; च तं; च यत,

तथा तल्लक्षणं वीरे बाहुके दृश्यते महत् ।। ५४ ।। (१)

शालिहोत्रोऽथ किं नु स्याद्धयानां कुलतत्त्ववित् ।**

मानुषं समनुप्राप्तो वपुः परमशोभनम् ।। ५५ ।। (२)

उताहोस्विद्भवेद्राजा नलः परपुरञ्जयः ।**

सोऽयं नृपतिरायात इत्येवं समचिन्तयत् ।। ५६ ।। (३)

अथ चेह नलो विद्यां वेत्ति तामेव बाहुकः ।**

तुल्यं हि लक्षये ज्ञानं बाहुकस्य नलस्य च ।। ५७ ।। (४)

अपि चेदं वयस्तुल्यं बाहुकस्य नलस्य च ।**

नायं नलो महावीर्यस्तद्विद्यश्च भविष्यति ।। ५८ ।। (५)

प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम् ।**

दैवेन विधिना युक्ताः शास्त्रोक्तैश्च निरूपणैः ।। ५९ ।। (६)

भवेन्न मतिभेदो मे गात्रवैरूप्यतां प्रति ।**

प्रमाणात्परिहीनस्तु भवेदिति मतिर्मम ।। ६० ।। (७)

वयःप्रमाणं तत्तुल्यं रूपेण तु विपर्ययः ।

---

(१) (१)ह्येष (for अयं ° ); (३) तल् (for हि ) ,

(२) (१)नु; (ऽ)पि; हि (for ऽथ ); (३) मानुष्यं; अनुसम्प्रश्यो; परमं प्राप्तो (for समनु ) (४) परमगर्हितं दुःखितः(for परमशोभनम्=परम्+अशोभनम्। परम+शोभ नम्!),

(३) रथे; नलो (for भवेद् );° भवेत् (for नलः ); (३) अयं (for सोऽयं ); (४) अनु (for सम° ),

(४) (१)अथ वायं; अथ चेह (for अथ वा यां ); विद्यां (for वेद ); अथ वा नलत ल्योयं; अथ वायं नलाआप्तः ( द्वेद ); (२) वेत्ति; विद्याः विद्यात् (for विद्यां ); तामेष; वेत्ति च (for ता° मेव ); विद्यामेव स बा,

(५) (१)चेयं; चापि; चाद्य (for चेदं ); (२) बाहुकस्य; अद्य ( स्त्रि )मन्ये (for अस्य मन्ये ); (३) यथा (for नावं ); स्वतोनेन नलं ( °लो) मन्ये; (४) च (for तु ) ,

(६) (२)वमुधातले; वसुधामिमां (for पृथिवीं); (४) संयुक्तश्च; विभूषणैः; निरूपणैः; निरूपिताः; विरूपितः विरुपकैः° प्रच्छन्नाश्चापि रुपतः,

(७) (१)तं वेत्तं (for भवेत्तु ); न; स्व° (for तु ); (२) गात्रवैषम्यतां; चि (गा)त्रवैरूप्यकं; (३) प्रमा° णतस्तअमाणः; °° प्रमाणपरिहीन(ण)स्तु; (४) न भवेत्तु(for भवेदिति ); मतिर्मम (for हि मे मतिः ),

**नलं सर्वगुणैर्युक्तं मन्ये बाहुकमन्ततः ।। ६१ ।।**

**बृहदश्वः**

**एवं विचार्य बहुशो वार्ष्णेयः पर्यचिन्तयत् ।****

**हृदयेन महाराज पुण्यश्लोकस्य सारथिः ।। ६२ ।।** (१)

ऋतुपर्णश्च राजेन्द्रो बाहुकस्य हयज्ञताम् ।**

**चिन्तयन्मुमुदे राजा सहवार्ष्णेयसारथिः ।। ६३ ।।** (२)

ऐकाग्र्यं च तथोत्साहं हयसङ्ग्रहणं च तत् ।**

**परं यत्नं च सम्प्रेक्ष्य परां मुदमवाप ह ।। ६४ ।।**(३)

**अस्मिन् तीर्थयात्रापर्वणि ५७अध्याये ६४श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि सप्तपञ्चाशोऽध्यायः ।। ५७ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

## 03- 04- 058

# ५८. अष्टपञ्चाशोऽध्यायः

**बाहुकस्य सारथ्यसामर्थ्ये विस्मितेन ऋतुपर्णेन प्रति पुञ्जीभूतवस्तुपरीसङ्ख्याने स्वीयसामर्थ्यनिवेदनम् ।। १ ।। ऋतुपर्णस्य सङ्ख्यानशक्तेर्नलकर्तृक□ परीक्षणम् । वृक्षशाखास्थपर्णेषु तत्परीक्षया विस्मितेन नलेनाश्वहृदयविद्यादानप्रतिज्ञानेन तदीयाक्षहृदयादिविद्यास्वीकारप्रश्नः ।। २ ।। ततो**

---

(१) (१)बहुधा (for शो ); इत्येवं बहुशो धीमान्; (२) परिचितयत्; पर्य( रि; प थि)चिन्तयन्; प्रत्यचिन्तयत्; सम; त्वभ्य ॰ (४) धीमतः (for सारथिः ) ,

(२) (१)ऋतुपर्णस्य; राजेन्द्रो; राजर्षिद्; दृष्ट्वैव; (३) वीरः (for राजा ) ,

(३) (१)ऐकाग्र्यं च; बलं शौर्यं यथोत्साहं; अथो; (२) सङ्ग्रहणे; च यत्; तथा; (३) परं प्रयत्नं सं; कौशलं चापि सं; (४) च; सः (for ह ) ,

द्यूतविद्यारहस्यग्रहणम् ।। ततो नलदेहाद्बहिर्निःसृतेन कलिना नलशापभयात् तस्मै वरदानपूर्वकं विभीतकवृक्षप्रवाणः ।। ३ ।। नलशरीरात्कलेर्निष्क्रमण□ च ।।

**बृहदश्वः**

स नदीः पर्वतांश्चैव वनानि च सरांसि च ।**
अचिरेणातिचक्राम खेचरः खे चरन्निव ।। १ ।।[१]

तथा प्रयाते तु रथे तदा भाङ्गासुरिर्नृपः ।**
उत्तरीयमधोऽपश्यद्भ्रष्टं परपुरञ्जयः ।। २ ।।[२]

ततः स त्वरमाणस्तु पटे निपतिते तदा ।**
ग्रहीष्यामीति तं राजा नलमाह महामनाः ।। ३ ।।[३]

निगृह्णीष्व महाबुद्धे हयानेतान्महाजवान् ।**
वार्ष्णेयो यावदेनं मे पटमानयतामिह ।। ४ ।।[४]

नलस्तं प्रत्युवाचाथ दूरे भ्रष्टः पटस्तव ।**
योजनं समतिक्रान्तो नाहर्तुं शक्यते पुनः ।। ५ ।।[५]

एवमुक्तो नलेनाथ तदा भाङ्गासुरिर्नृपः ।**
आससाद वने राजन्फलवन्तं विभीतकम् ।[६]

---

(१) (२)वनान्युपवनानि च; (३) अभि° (for अति ); (४) खचरः; विचरन्; स्यन्दनः,
(२) (१)नृपे (for रथे ); (२) तथा (for तदा ); भार्गश्वरिरतो नृपः; भगस्वरिरथो नृपः; सुरथेन महाजनाः;
(३) अथो; अधो; तथा; तदा (for अथा ),
(३) (२)नृपः; तथा (for तदा ); (३) च (for (इ)ति ); (४) प्राह (for आह ),
(४) (१)महाबाहो (for बुद्धे ); (२) मनो (for महा ); (३) एनं; एतन् (for एतं ); वै° (for मे )° ; वार्ष्णेयं त्वब्रवीद्राजा; (४)आ (चा); नीयताम् (for आनयताम् ); इह (for इति ); पटमानयतीति मे; ° यतेति ह,
(५) (१)तु (for तं ); नलस्तं च प्रत्युवाच; (२) दूर° (for दूरे ); (४) च (for स ); त्वया पुनः; नाहर्तुं (नेतुं) शक्यते पुनः; न शक्यः स पुनस्त्वया,
(६) (१)उक्तो (for उक्ते ); (आ)सीत् (for (अ)थ ); (२) तथा (for तदा ); भार्गश्वरि; भगस्वरि° ; भाङ्गासुरि; भार्ग्रस्वरि; भागसुरि° ; भोगासुरै° ; भार्गस्वरि; भागस्वरि; भाग° स्करि; नातिप्रीतमना नृपः; (३)

तं दृष्ट्वा बाहुकं राजा त्वरमाणोऽभ्यभाषत ।। ६ ।।

लक्षालङ्कारः- फलवन्तं विभीतकम् इत्यत्र विभीतकं तारावृक्षम् । तारावृक्षदर्शनमात्रेण वृक्षस्थानां पतितानां च पत्रफलानां सङ्ख्यां ऋतुपर्णः सकृदेवोक्तवानिति ऋतुपर्णस्य सङ्ख्याकौशलमत्र वर्ण्यते । तत्रायं विवेकः -सकलशाखोपेतवृक्षस्य पतितपत्रफलाभ्यां सह एकपत्राधिता पत्राणां कोटिः , एकफलाधिका फलानां कोटिः शाखाद्वये स्थितपत्राणां फलानां च गणने क्रियमाणे पञ्चशतोत्तरे द्वे सहस्रे इति ।

**ऋतुपर्णः**

ममापि सूत पश्य त्वं सङ्ख्याने परमं बलम् ।। ७ ।। (१)

सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन ।**

नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् ।। ८ ।। (२)

वृक्षेऽस्मिन्यानि पर्णानि फलान्यपि च बाहुक ।

पतितान्यपि यान्यत्र तत्रैकमधिकं शतम् ।। ९ ।।

एकपत्राधिकं चात्र फलमेकं च बाहुक ।(३)

सङ्ख्यातानि मयैतानि सर्वाण्यस्य वनस्पतेः ।

प्रविलुप्तस्य शाखे द्वे पश्चान्या या प्रशास्विका ।। १० ।। (४)

अयुतं चैव पत्राणामनयोरपि शाखयोः ।। १० ।।

लक्ष्य□ ह्यशीतिसाहस्र□ पत्रेषु च फलेषु च ।

पञ्चकोट्योऽथ पत्राणा□ द्वयोरपि च शाखयोः ।(५)

---

राजा (for राजन् ); (४) फलितं तु (for फल ); विभी (for बिभी ),

(१) (२) (ऽ)भ्युवाच तं (for ऽभ्यभाषत ),

(२) (१)सर्वं सर्वं; सर्व सर्वो; सवं सर्वे; न जानीते; (४) न ज्ञानः पुरुषः क्वचित्,

(३) (१)पत्राणि (for पर्णानि ),

(४) (३)(अ)पि (for च ); (४) कृतं; स्मृतं (for शतम्); तत्रैक्षे नाधिकं शतं; एकमत्राधिकं; एक॰ विशा; एवं पत्रा; एकमात्रा; एकं पत्रा; चात्र (for पत्रं ),

(५) (१) ()पि (for ऽथ ); अयुतं चापि ( चास्ति; ऽ चैव) पत्राणां; अयुतं चैव पर्णानां; फलकोट्यथ पत्राणि; फल॰ कोट्यपि ( थ) पत्राणां; फलकोटिसहस्राणि; ,

**प्रचिनुह्यस्य शाखे द्वे याश्चाप्यन्याः प्रशाखिकाः ।****

**आभ्यां फलसहस्रे द्वे पञ्चोनं शतमेव च ।**

**बृहदश्वः**

**ततो रथमवस्थाप्य राजानं बाहुकोऽब्रवीत् ॥ ११ ॥ (१)**

**बाहुकः**

**परोक्षमिव मे राजन्कत्थसे शत्रुकर्शन ।(२)**

प्रत्यक्षमेतत्कर्तास्मि शातयित्वा बिभीतकम् ।

**अथात्र गणिते राजन्विद्यते न परोक्षता ॥ १२ ॥**

**प्रत्यक्षं ते महाराज शातयिष्ये बिभीतकम् ।(३)**

**अहं हि नाभिजानामि भवेदेवं न वेति वा ॥ १३ ॥**

**सङ्ख्यास्यामि फलान्यस्य पश्यतस्ते जनाधिप ।****

**मुहूर्तमपि वार्ष्णेयोरश्मीन्यच्छतु वाजिनाम् ॥ १४ ॥ (४)**

**बृहदश्वः**

**तमब्रवीन्नृपः सूतं नायं कालो विलम्बितुम् ।****

**बाहुकस्त्वब्रवीदेनं परं यत्नं समास्थितः ॥ १५ ॥ (५)**

**बाहुकः**

**प्रतीक्षस्व मुहूर्तं त्वमथवा त्वरते भवान् ।****

---

(१) (२) अनयोरपि शा; (३) पखिह्यस्य; प्रथिते ह्यस्य; ऽ प्रतिमुह्यन्ति; प्रचिनुशेन, प्रभिन्नान्यस्य; (४) याश्चान्याः प्रतिशाखिकाः; ये चाप्यन्ये प्रशास्विके; आसां (for आभ्यां ); एकोन; पञ्चानां (for पञ्चोनं),

(२) (१)रथमवस्थाप्य; (४) शंससे; शत्रुकर्षण,

(३) (१)अथास्य; अथात्र; अथानु; यथात्र; अथ के; (२) विजानाम्यपरोक्षतां; (४) शातयिष्ये; विभीतकं,

(४) (२)इह; एतद् (for एवं ) चेदिह; चेति च (for वेति च ); ह; वा; वै॰ (for च ); (४) पश्य त्वं च (for पश्यतस्ते ); नराधिप; एव; अपि; एकं; इह (for इव ),

(५) (१)ततोब्र; ततोब्रवीन्नवपसुतः; (४) उप॰ ; उपा (for समा ); परमं यत्नमास्थितः ,

एष याति शिवः पन्था याहि वार्ष्णेयसारथिः ।। १६ ।। [१]

बृहदश्वः

अब्रवीदृतुपर्णस्तु सान्त्वयन्कुरुनन्दन ।। १७ ।।

ऋतुपर्णः

त्वमेव यन्ता नान्योऽस्ति पृथिव्यामपि बाहक ।[२]

त्वत्कृते यातुमिच्छामि विदर्भान्हयकोविद् ।। १९ ।।

शरणं त्वां प्रपन्नोऽस्मि न विघ्नं कर्तुमर्हसि ।। १८ ।।[३]

कामं च ते करिष्यामि यन्मां वक्ष्यसि बाहुक ।**

विदर्भान्यदि यात्वाद्य सूर्यं दर्शयितासि मे ।। १९ ।।[४][५]

बृहदश्वः

अथाब्रवीद्बाहुकस्तं सङ्ख्याय च बिभीतकम् ।**

ततो विदर्भान्यास्यामि कुरुष्वैवं वचो मम ।। २० ।।[६]

अकाम इव तं राजा गणयस्वेत्युवाच ह ।। २१ ।।

सोऽवतीर्य रथात्तूर्णं शातयामास तं द्रुमम् ।।[७]

---

(१) (१)घ॰ याहि,प्रातीक्ष वै (for प्रतीक्षस्व ); तु (for त्वं ); (२) त्वरितो; त्वरसे; भव (for भवान् ); (३) एवं (for एष ),

(२) (१)तु (for तं); अथाब्र॰ वीदृतुपर्णः; (३) शास्ता (for यन्ता ); (४) चैव (for अपि ),

(३) (१)त्वत्कृपा (for त्वत्कृते ); (२) विदर्भा ( वैदर्भी); वैदर्भान्; जयकोविद; नय; अश्वं; राज्यं सर्वविनिश्चितं; (३) त्वा (च) (for त्वां ); (४) निर्विघ्नं (for न विघ्नं ) ,

(४) (१)च ते; (२) मा (for मां ); विदर्भा हयकोविद; (३) विदर्भा विदर्भं; वायात्वा; गत्वाद्य; चासाद्य (for यात्वाद्य ),

(५) विद॰ भार्याततो (४) गत्वा; भैमीं (for सूर्यं ); च (for असि ),

(६) (१)ततः (for अथ ); (२) सङ्ख्याय च; येदं; चैनं; योयं; सङ्ख्या एतं; विभो तरुं; विभी॰ (for विभी॰ ); (३) विदर्भा; विदर्भं; (४) कुरुष्पैवं; न ते विघ्नो (धं) भविष्यति ,

(७) (१)एव (for इव ); (२) गणयंस्ये तु बाहुक ( बिभीतकं ); गणस्व प्रत्युवाच ह, (४)तं (वै) द्रुतं (for तन्द्रुमम् ); शातयित्वा स वै द्रुमं; गणयामास शाखिके ( वै द्रुमं ) ,

एकदेश□ च शाखायाः समादिष्ट□ मयानघ ।
ततस्त□ बाहुको राजञ्छाखैकोद्देशमप्युत ।।
गणयस्वाश्वतत्त्वज्ञ ततस्त्व□ प्रीतिमावह ।
फलानि परिसङ्ख्यातु□ त्वरमाणोपचक्रमे ।

**ततः स विस्मयाविष्टो राजानमिदमब्रवीत् । ।२२ ।।** (१)

**बाहुकः**

**गणयित्वा यथोक्तानि तावन्त्येव फलानि तु ।**(२)
**अत्यद्भुतमिदं राजन्दृष्टवानस्मि ते बलम् ।**
**श्रोतुमिच्छामि तां विद्यां ययैतज्ज्ञायते नृप ।। २३ ।।** (३)

**तमुवाच ततो राजा त्वरितो गमने नृप ।**
**विद्ध्यक्षहृदयज्ञं मां सङ्ख्याने च विशारदम् ।। २४ ।।** (४)

**बाहुकस्तमुवाचाथ देहि विद्यामिमां मम ।****
**मत्तोऽपि चाश्वहृदयं गृहाण पुरुषर्षभ ।। २५ ।।** (५)

**ऋतुपर्णस्ततो राजा बाहुकं कार्यगौरवात् ।****
**हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः ।। २६ ।।** (६)

**ऋतुपर्णः**

**यथोक्तं त्वं गृहाणेदमक्षाणां हृदयं परम् ।**
**निक्षेपो मेऽश्वहृदयं त्वयि तिष्ठतु बाहुक ।। २७ ।।**

---

(१) (१)तु (for स ); (२) बाहुको (for राजानम् ); वाक्यम् (for इदम् ); राजा वचनमब्रवीत्;
(२) (३) यथोक्तं वै (for यथोक्तानि ) (४) तान्येव च; यावं॰ त्येवः; तु; वै (for च ) ,
(३) (१)अथाद्भुत; (३) ते विद्यां; का विद्या; (४) ययै; येनै (for यथै ); ब्रूयते (for ज्ञा),
(४) (२)गमनोत्सुकः नृप; तथा (for तदा ),
(५) (१)बाहुकस्तद्वचः श्रुत्वा; (२) नृप (for मम ); देहि विद्याद्वयं च मे; (४) त्वं नराधिप (for पुरुष॰ ) ,
(६) (४)तं तथेत्यब्रवीद्वचः; तथैवेत्य॰ ब्रवीच्च तं,

**बृहदश्वः**

**एवमुक्त्वा ददौ विद्यामृतुपर्णो नलाय वै ।। २८ ।।** (१)

ददावेकमना भूत्वा शुचिः पुरुषसत्तमः ।

**तस्याक्षहृदयज्ञस्य शरीरान्निःसृतः कलिः ।****

**कर्कोटकविषं तीक्ष्णं मुखात्सततमुद्वमन् ।। २९ ।।** (२)

**कलेस्तस्य तदार्तस्य शापाग्निः स विनिःसृतः ।****

**स तेन कर्शितो राजा दीर्घकालमनात्मवान् ।। ३० ।।** (३)

**तं भ्रान्तरूपं निःशोभं सङ्क्लिष्टमकरोत्कलिः ।**

**ततो विषविमुक्तात्मा स्वं रूपमकरोत्कलिः ।****

**तं शप्तुमैच्छत्कुपितो निषधाधिपतिर्नलः ।**(४)

**तमुवाच कलिर्भीतो वेपमानः कृताञ्जलिः ।। ३१ ।।** (५)

**कलिः**

**कोपं संयच्छ नृपते कीर्तिं दास्यामि ते पराम् ।। ३२ ।।** (६)

**इन्द्रसेनस्य जननी कुपिता माशपत्पुरा ।****

**यदा त्वया परित्यक्ता ततोऽहं भृशपीडितः ।। ३३ ।।** (७)

**अवसं त्वयि राजेन्द्र सुदुःखमपराजित ।****

---

(१) (१)तथोक्तं त्वं; यथोक्तं त्वं; अथेष्टं त्वं; यथास्वेष्टं; तद्; वै (for त्वं ); गृहाण त्वम्; (२) परमं (for हृदयं ); मम (for परम् ); (३) चाश्व॰ ; ह्यश्व (for मेऽश्व॰ ); (४) तिष्ठति; नलस्य (for नलाय ),

(२) (३)कार्कोटक(कं )विषं; तीव्रं; (४) उद्वहन्; उद्गिरन् (for उद्वमन् ); मुखात्स तु समुद्वमः,

(३) (१)ततम् (for तस्य ); तथा; सदा (for तदा ); कलिस्तुपुरुषव्याघ्र; (२) इव; च वि॰ (for स वि॰ ); (३) यष्टितो (for कन्ते॰ तो ); राजन् (for राजा ); (४) अवाप्त॰॰ वान् (for अनात्म ),

(४) (१) विषाद् (for विष॰ ); मुक्तोभूत्; (२) स्वं (for स्व॰ ); (३) इच्छन् (for ऐच्छत् ); शसुमैन्ध्यकु॰ पितो; (४) बली; कलिं (for नलः ) ,

(५) (१)ततो (for कलिर् ),

(६) (३) नियच्छ (४) प्रीतिं (for कीर्तिं ); धास्यामि; यास्यसि (for दास्यामि ); वै (for ते ) ,

(७) (२)मां शपत्; साशपत्; साभवत्; कुपितामं॰ शपः ( वद )त्षुरा; (४) तेनाहं (for ततो ) ,

विषेण नागराजस्य दह्यमानो दिवानिशम् ।। ३४ ।। (१)

शरण□ त्वा□ प्रपन्नोऽस्मि शृणु चेद□ वचो मम ।

ये च त्वां मनुजा लोके कीर्तयिष्यन्त्यतन्द्रिताः ।**

मत्प्रसूतं भयं तेषां न कदाचिद्भविष्यति ।। ३५ ।। (२)

न तेषां मानसं किञ्चिच्छारीरं वाचिकं तथा

भविष्यति नृणां राजच्छीर्तयिष्यन्ति ये नलम् ।(३)

भयार्तं शरणं यातं यदि मां त्वं न शप्स्यसे ।। ३६ ।। (४)

बृहदश्वः

एवमुक्तो नलो राजा न्ययच्छत्कोपमात्मनः

ततो भीतः कलिः क्षिप्रं प्रविवेश बिभीतकम् ।। ३७ ।। (५)

कलिस्त्वन्यैस्तदादृश्यः कथयन्नैषधेन वै ।। ३८ ।। (6)

कलिस□सर्गदोषेण अपवित्रो बिभीतकः ।

ततो गतज्वरो राजा नैषधः परवीरहा ।**

सम्प्रणष्टे कलौ राजा सङ्ख्यायास्य फलान्युत ।। ३९ ।। (७)

मुदा परमया युक्तस्तेजसाथ परेण वै ।

---

(१) (१)अवसस्त्वयि; (२) अपराजिताः; अपराजितः; सुस्वदुःस्वपराजितः,

(२) (१)त्वा (for त्वां ); (२) कथ (for कीर्ती ); अनिदिताः; (for °तन्द्रि ); (३) मत्प्रभूत; मत्प्रसूतं; (४) मत्प्रसादाद् (for न कदाचिद् ),

(३) मानसं तदा (for वाचिकं तथा ); महाराज (for नृणां राजन् ),

(४) जातं; यातं; राजन् (for यातं ); शप्स्यसि,

(५) (१)राजन् (for राजा ); राजा स; (२) प्रायच्छत्; संयच्छत्; (४) प्रविशत्तं; विवेश च; आविवेश; विभीतकं,

(६) नो दृष्टः (for नादृश्यत् ); कलिं त्वन्ये तु (च) नापश्यन्; कलिरूवन्यैस्त° दादृश्यः; °न्यैर्न चादृश्यत्; °न्यैरनादृश्यः; ततस्तेनैव नादृश्यत्; ह (for वै ),

(७) (३)सम्प्रणष्टे; सम्प्रविष्टे; राजा (for राजन् ); (४) सङ्ख्यायास्यः नाथं; य च; यत; य तु; फलान्यथ; विभीतकं (for फलानि च )र,

**रथमारुह्य तेजस्वी प्रययौ जवनैर्हयैः ।****
**बिभीतकश्चाप्रशस्तः संवृत्तः कलिसंश्रयात् ।। ४० ।।** [१]

ततः प्रभृति राजेन्द्र लोकेऽस्मिन्पाण्डुनन्दन ।

**हयोत्तमानुत्पततो द्विजानिव पुनः पुनः ।****
**नलः सञ्चोदयामास प्रहृष्टेनान्तरात्मना ।। ४१ ।।** [२]

**विदर्भाभिमुखो राजा प्रययौ स महायशाः ।****
**नले तु समतिक्रान्ते कलिरप्यगमद्गृहम् ।। ४२ ।।** [३]

**ततो गतज्वरो राजा नलोऽभूत्पृथिवीपतिः ।****
**विमुक्तः कलिना राजन्रूपमात्रवियोजितः ।। ४३ ।।**

**अस्मिन् तीर्थयात्रापर्वणि ५८अध्याये ४३श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अष्टपञ्चाशोऽध्यायः ।। ५८ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

# 03- 04- 059

# ५९.एकोनषष्टितमोऽध्यायः,

**ऋतुपर्णे कुणिडिनपुरं प्रविष्टे तद्रथवेगश्रवणेन दमयन्त्या तत्सारथौ नलसम्भावना ।।१।। दमयन्त्या वितर्कः । भीमकर्तृकं ऋतुपर्णस्य समादरश्च । ततस्तत्त्वजिज्ञासया नलं प्रति दूत्याः प्रस्थापनम् ।।२।।**

**बृहदश्वः**

---

(१) (२) (अ)थ (for च ); बलेन (for परेण ); च (for ह ); तेजसा परमेण ह; (३) वेगेन (for तेजस्वी ); विभीतकोग्रशस्तः संवृत्तः स कलिं ,

(२) (३)संनोदयामास; सबोधर,

(३) (२)यशाः (for मनाः ); (४) अप्यागमद्; अभ्यगमद्; अप्यपतद्; गृहं; द्रुमात्; स्वयंर ,

ततो विदर्भान्सम्प्राप्तं सायाह्ने सत्यविक्रमम्।**
ऋतुपर्णं जना राज्ञे भीमाय प्रत्यवेदयन् ।। १ ।।[(१)]

स भीमवचनाद्राजा कुण्डिनं प्राविशत्पुरम्।**
नादयन्रथघोषेण सर्वाः स विदिशो दिशः ।। २ ।।[(२)]

ततस्तं रथनिर्घोषं नलाश्वास्तत्र शुश्रुवुः ।**
श्रुत्वा तु समहृष्यन्त पुरेव नलसन्निधौ ।। ३ ।।[(३)]

दमयन्ती तु शुश्राव रथघोषं नलस्य तम्।**
यथा मेघस्य नदतो गम्भीरं जलदागमे ।। ४ ।।[(४)]

परं विस्मयमापन्ना श्रुत्वा नादं महास्वनम्।
नलेन सङ्गृहीतेषु पुरेव नलवाजिषु।**
सदृशं रथनिर्घोषं मेने भैमी तथा हयाः ।। ५ ।।

प्रासादस्थाश्च शिखिनः शालास्थाश्चैव वारणाः ।**
हयाश्च शुश्रुवुस्तस्य रथघोषं महीपतेः ।। ६ ।।[(५)]

तच्छ्रुत्वा रथनिर्घोषं वारणाः शिखिनस्तथा।**
प्रणेदुरुन्मुखा राजन्मेघनाद इवोत्सुकाः ।। ७ ।।[(६)]

---

(१) (१)विदर्भा; विदर्भायां तु सम्प्राप्तं; (३) तदा (for जना ); महा० राजं (for जना राज्ञे ); राजन् (for राज्ञे ); (४)प्रत्यपादयत; च निवेदयन्न,

(२) (१)ज्ञप्तः; राजन् (for राजा ); (४) स विदिशो; सायं; सश०; स चोप; सा (च) प्र; चाथ दिशो; ताः, प्र; अपि दिशो; स्म वि (for ० सोप० ); दिशः (for दश ); सर्वतः सदिशो दश; (सोपदिशो, सोपदिशो दिशो),

(३) (२)चुक्रुशुः (for शुक्षुवुः ); नलाश्वास्ते विशुश्रुबुः; (३) नलास्तत्र प्रशुद्ध्य; श्रुत्वा तु; श्रुत्वाथ तत्राहृष्यन्त; सङ्गहर,

(४) (१)तु (for ०च ); (२) तत्; तु; वै (for तम् ); (३) निनदं; निनदो (for नदतो ); (४) गम्भीरो,

(५) (१)शैल (for शालां ); चापि (for चैव ); कुजराः (for वारणाः ); प्रासादशिखिनः शाला स्थाणुश्चैव च वारणाः (३) तस्य (for तत्र ); (४) मनोहरं; महीपतेर,

(६) (१)तच्छुत्वा; श्रुत्वा तु; श्रुत्वाथ (for ते श्रुत्वा ); (४) मेघनादः; मेघनाद (for मेघोदयम् ); इवोन्मुखाः; अवेक्ष्य वा ( ह ); इवेच्छया; मेघोदयवशाद्यथा; मेघनाद इ(दमि )वोत्सुकाः; व जलदोदयं,

**दमयन्ती**

**यथासौ रथनिर्घोषः पूरयन्निव मेदिनीम्।****
**ममाह्लादयते चेतो नल एष महीपतिः ।। ८ ।।[(१)]**

**अद्य चन्द्राभवक्त्रं तं न पश्यामि नलं यदि।****
**असङ्ख्येयगुणं वीरं विनङ्क्ष्यामि न संशयः ।। ९ ।।[(२)]**

**यदि वै तस्य वीरस्य बाह्वोर्नाद्याहमन्तरम्।****
**प्रविशामि सुखस्पर्शं न भविष्याम्यसंशयम् ।। १० ।।[(३)]**

**यदि मां मेघनिर्घोषो नोपगच्छति नैषधः ।****
**अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनम् ।। ११ ।।[(४)]**

**यदि मां सिंहविक्रान्तो मत्तवारणविक्रमः ।****
**नाभिगच्छति राजेन्द्रो विनङ्क्ष्यामि न संशयः ।। १२ ।।[(५)]**

**न स्मराम्यनृतं किञ्चिन्न स्मराम्यपकारताम्।****
**न च पर्युषितं वाक्यं स्वैरेष्वपि कदाचन ।। १३ ।।[(६)]**

**प्रभुः क्षमावान्वीरश्च दाता चाप्यधिको नृपैः ।****
**रहोऽनीचानुवर्ती च क्लीबवन्मम नैषधः ।। १४ ।।[(७)]**

---

(१) (१)श्रुत्वा तु; यथायं; यथैव (for यथासौ ); (२) रोदसी (for मेदिनीम् ); पूरयन्निव मेदिनीं; (३) ममाहाद; (४)नान्य (for नल ); महीपतेःतथा नृपः,

(२) (१)अथ; च्छकवक्यं; (४) विनक्ष्य० (नक्ष्या नक्ष्या)मि न संशयः,

(३) (३)प्रवेक्ष्यामि; (४) न भविष्यामि (for विनशि ); असंराय,

(४) (१)मेधराम्भीरं; हसनिर्घोषो; (३) प्रख्य; (४) प्ठश्येत्सम हुत्त्यनं; विक्ष्या ०नक्ष्ण) मि न संशयः,

(५) (२)वित्र्तमः (४) विनङ्क्ष्या ( नक्ष्याः नश्या )मि न संशयः,

(६) (१)वाक्यं (for किञ्चिन् ); (२) (अ)नपाकृतं; (अ)पकारतां; च पापकृत्; (अ)नुपानकं ((अ) नुतं कृतं); न च (च),स्मराम्यपाकृतं; (३) वचः(for न च); वापि; चापि (for वाक्यं); (४) सुरेष्वपि; स्वेच्छववि; कदाचन,

(७) (१)वाग्मी च; वीरोपि; (२) दाता चाप्यधिको नृपै; धाता चाभ्यधिकं नृपैः; दाता चाभ्यधिको नृपः ( गुणैः; नृपैः ); (३) अहो (for रहो ); ऽतीवानु० (for ऽनीचानु ); (४) बलवान् (for क्लीब० वन् ) ;

गुणांस्तस्य स्मरन्त्या मे तत्पराया दिवानिशम्।**
हृदयं दीर्यत इदं शोकात्प्रियविनाकृतम् ।। १५ ।।(१)

बृहदश्वः

एवं विलपमाना सा नष्टसञ्ज्ञेव भारत।**
आरुरोह महद्वेश्म पुण्यश्लोकदिदृक्षया ।। १६ ।।(२)

ततो मध्यमकक्षायां ददर्श रथमास्थितम्।**
ऋतुपर्णं महीपालं सहवार्ष्णेयबाहुकम् ।। १७ ।।(३)

ततोऽवतीर्य वार्ष्णेयो बाहुकश्च रथोत्तमात्।**
हयांस्तानवमुच्याथ स्थापयामास वै रथम् ।। १८ ।।(४)

सोऽवतीर्य रथोपस्थादृतुपर्णो नराधिपः ।**
उपतस्थे महाराजं भीमं भीमपराक्रमम् ।। १९ ।।(५)

तं भीमः प्रतिजग्राह पूजया परया ततः ।**
स तेन पूजितो राज्ञा ऋतुपर्णो नराधिपः ।। २० ।।(६)

(३३६) अधिकपाठः

स तत्र कुण्डिने रम्ये वसमानो महीपतिः ।
न च किञ्चित्तदापश्यन्प्रेक्षमाणो मुहुर्मुहुः ।

---

क्लिश्यन्मन्मथनैषधः,

(१) (३)चेदं; इव (for इदं ),

(२) (१)विलप्य; प्रलप्य; (२) भामिनी (for भारत ); (३) महावेस्म।,

(३) (१)नृपम् (for रथम् ); आलोक्य (०रोह)यन्ती ददृशे भैमीं राजन्मनस्विनी; महाराजं ( सवार्ष्णेयं ) (for मही० ); (४)सवार्ष्णेय सबाहुकं; महीपालं सबाहुकं,

(४) (२)महारथात् (for रथो ); (३) (अ)शु(for (अ)थ) (४) मास वै रथं; मास तं रथं; मास भूरथं; मास कूवरं,

(५) (१)रथात्तस्माद् (for रथोप ); (२) महारथः; महीपतिः; (for नरा ); (३) महाराजं; (४) परा० क्रमः,

(६) (२)युतः; ० मुदा; तदा (for ततः ); पूजयामास भारतर,

स तु राज्ञा समागम्य विदर्भपतिना तदा।
अकस्मात्सहसा प्राप्त□ स्त्रीमन्त्र□ न स्म विन्दति।[१]

किं कार्यं स्वागतं तेऽस्तु राज्ञा पृष्टः स भारत।**
नाभिजज्ञे स नृपतिर्दुहित्रर्थे समागतम् ।। २१ ।।[२]

ऋतुपर्णोऽपि राजा स धीमान्सत्यपराक्रमः
राजानं राजपुत्रं वा न स्म पश्यति कश्चन ।।२२।।

नैव स्वयंवरकथां न च विप्रसमागमम्।[३]
न चान्य□ किञ्चिदारम्भ□ स्वय□वरविधिं प्रति ।

ततो व्यगणयद्राजा मनसा कोसलाधिपः ।।२३।।

आगतोऽस्मीत्युवाचैनं भवन्तमभिवादकः ।। २४ ।।[४]

राजापि च स्मयन्भीमो मनसा समचिन्तयन्।**
अधिकं योजनशतं तस्यागमनकारणम्।[५]
राज्ञश्चान्यानतिक्रम्य ग्रात्पोऽयमभिवादकः ।

ग्रामान्बहूनतिक्रम्य नाध्यगच्छद्यथातथम् ।।२५।।

अल्पकार्यं विनिर्दिष्टं तस्यागमनकारणम् ।। २६ ।।[६]

---

(१) (४)श्रीमन्तं (for स्त्रीमन्त्रं ); न स विन्दति; स न विन्दति; त्या न ह्यविन्दत ( नाभ्यविन्दत ); न स्म विदतेः,

(२) (२)स (for च ); (४) दुहित्रर्थं; तमा (०था)गतं,

(३) (१)वै राजन्; वै राजा; (अ)सौ राजा; राजन्स; राजासौ (for राजा स ); स(२) धीमान्सत्यविक्रमः (० सङ्गरं ); (४) स (for स्म ); किश्चन; कश्चन; न पश्यति कदाचन; कथा (for कथां ),

(४) (१)विगणय व्यगण० यद्; () प्यगणयद्; (२) कोशला,

(५) (१)स (for च ); स्वयं (for स्मयन् ); (२) मनसाभि ( सा स )विचिन्तयन्; सा समचिन्तयत्; सापि (भि०) व्यचितयन्; सा समचितयन्; सापि (सा हि) व्यचिन्तयत्र,

(६) (१)ग्रामानतिक्रम्य बहुन्; पुर० ग्रामानति; (२) अध्यगच्छद्; नाधिगच्छद्; यथागतं; यथासुखं; (३) अपि कायं; स्वल्पकार्यं; अल्पं कायं; अनि० दिंष्टं; इदं चैतत् (for विनिर्दिष्टं ); अनल्पकार्यं निर्दिष्टं; ज्ज्वल्यकार्यनिविष्टं तं,

(३३९) अधिकपाठः

पश्चादुदर्के ज्ञास्यामि कारण□ यद्भविष्यति।

नैतदेवं स नृपतिस्तं सत्कृत्य व्यसर्जयत् ।। २६ ।।

विश्राम्यतामित्युवाच क्लान्तोऽसीति पुनः पुनः ।(१)

स सत्कृतः प्रहृष्टात्मा प्रीतः प्रीतेन पार्थिवः ।। २७ ।। (२)

राजप्रेष्यैरनुगतो दिष्टं वेश्म समाविशत् ।। २८ ।।(3)

ऋतुपर्णे गते राजन्वार्ष्णेयसहिते नृपे।**

बाहुको रथमादाय रथशालामुपागमत् ।। २९ ।।(४)

स मोचयित्वा तानश्वानुपचर्य च शास्त्रतः ।**

स्वयं चैतान्समाश्वास्य रथोपस्थ उपाविशत् ।। ३० ।।(५)

दमयन्त्यपि शोकार्ता दृष्ट्वा भाङ्गासुरिं नृपम्।**

सुतपुत्रं च वार्ष्णेयं बाहुकं च तथाविधम् ।। ३१ ।।(६)

चिन्तयामास वैदर्भी कस्यैष रथनिःस्वनः ।**

नलस्येव महानासीन्न च पश्यामि नैषधम् ।। ३२ ।।(७)

वार्ष्णेयेन भवेन्नूनं विद्या सैवोपशिक्षिता।**

---

(१) (२)विसर्जयत्; समर्चयत्; (३) विश्रम्यताम्; इत्युवाच; इति तदा; इत्यवदत्; (४) श्रान्तोसीति; वदन्मुहुः (for पुनः पुनः ),

(२) (१)स सत्कृतः,

(३) (१) समो सदः; तदाविशत्; समादिशत्; गमत्र,

(४) (३)रथमादाय; (४) अश्वशालाम्; उपाविशत्र,

(५) (१)मोक्ष (for मोच ); (२) परिचर्य; उपचर्य; परिवार्य; (३) अथ; समं (for स्वय ); चैनान्; (४) रथोपस्थमुपा,

(६) (१) (अ)पि; च (for तु ); (२) मर्गिश्वरिग्; भङ्गस्वरि; भोगा० सुरिं; भाग्रंस्वरिं; भार्ग; भाग; भागस्करिं; भार्गसुरिं; (४) बाहुकं रथमागत,

(७) (२)०निःस्वनः; (३) नलस्य च; स्नेहः; स्यैव; (४) च पश्यामि,

तेनाद्य रथनिर्घोषो नलस्येव महानभूत् ।। ३३ ।।[१]

आहोस्विदृतुपर्णोऽपि यथा राजा नलस्तथा।**

यथायं रथनिर्घोषो नैषधस्येव लक्ष्यते ।। ३४ ।।[२]

एवं सा तर्कयित्वा तु दमयन्ती विशाम्पते।**

दूतीं प्रस्थापयामास नैषधान्वेषणे शुभा।। ३५ ।।[३]

अस्मिन् तीर्थयात्रापर्वणि ५९अध्याये ३५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि एकोनषष्टितमोऽध्यायः।। ५९ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

## 03- 04- 060

# ६०. षष्टितमोऽध्यायः

दमयन्तीप्रेषितया केशिन्या बाहुकेन सम्भाष्य दमयन्त्यै सम्भाणणकालिक-बाहुकविकारादिनिवेदनम् ।।१।। केशिन्या बाहुकस्य जलाग्न्युत्पादनाद्यद्भुतकर्मनि-वेदितया दमयन्त्या पुनः परीक्षणाय तं प्रति कन्यापुत्रयोः प्रेषणम् ।।२।। बाहुकेन सबाष्पं पुत्रयोः परिरम्भणं केशिनी□ प्रति स्वकर्मणः कारणान्तरकथनेनापह्नवश्च ।।३।। बाहुककेशिनीस□वादः ।। ४ ।।

दमयन्ती

गच्छ केशिनि जानीहि क एष रथवाहकः ।**

---

(१) (२)०लक्षिता (for ०शिक्षिता ); (३) तेनाश्व; (४) महा०त्मनः (for महानभूत् ); नैषधस्येव दृश्यते,

(२)(१)अहो; सङ्को (for आहो ); ऽसौ (for ऽपि ); (२) नलः तथा; (३) तथायं; यथायं (for ततोऽयं ); (४)नलस्येवेह लक्ष्यते ( ०क्षये ),

(३)(१)सा; प्र०; च (for वि०); एवं वितर्कयन्ती सा; (४) सुभा (for नृप ); नैषधान्वेषणेन तु; केशिनीं नाम सुभ्रूयां ( नामतः),

उपविष्टो रथोपस्थे विकृतो ह्रस्वबाहुकः ।। १ ।।[१]

अभ्येत्य कुशलं भद्रे मृदुपूर्वं समाहिता।**

पृच्छेथाः पुरुषं ह्येनं यथातत्त्वमनिन्दिते ।। २ ।।[२]

अत्र मे महती शङ्का भवेदेष नलो नृपः ।**

यथा च मनसस्तुष्टिर्हृदयस्य च निर्वृतिः ।। ३ ।।[३]

ब्रूयाश्चैनं कथान्ते त्वं पर्णादवचनं यथा।**

प्रतिवाक्यं च सुश्रोणि बुद्ध्येथास्त्वमनिन्दिते ।। ४ ।।[४]

### बृहदश्वः

ततः समाहिता गत्वा दूती बाहुकमब्रवीत् ।।४।।[५]

दमयन्त्यपि कल्याणी प्रासादस्था ह्युपैक्षत ।। ५ ।।[६]

### केशिनी

स्वागतं ते मनुष्येन्द्र कुशलं ते ब्रवीम्यहम्।**

दमयन्त्या वचः साधु निबोध पुरुषर्षभ ।। ६ ।।[७]

कदा वै प्रस्थिता यूयं किमर्थमिह चागताः ।**

तत्त्वं ब्रूहि यथान्यायं वैदर्भी श्रोतुमिच्छति ।। ७ ।।[८]

### बाहुकः

---

(१) (२)रथवाहनः; सारथिः; (३) स निविष्टो (for उप ); (४) ह्रस्वो विकृतबाहुकृ,

(२) (३)ह्येतं; त्वेनं; (४) यथा वक्ष्यत्यनिन्दिते; याथातथ्यमनिन्दिते,

(३) (२)आवेदय (for भवेदेष ); (३) यथा (for तथा ); हि (for च ); मनसस् (for मे मनस्य),

(४) (१)चैवं; त्वेनं (for चैनं ); (२) तथा (for यथा ); (४) पृच्छे (for बुध्ये ),

(५) (१)ततः (for एवं ); त्त्वा (for गत्वा ); (२) दूती वाक्यमथाब्रवीत्,

(६) (४) ह्युपैक्षत; (अ)प्युपैक्षतः (अ)भ्युवीक्षते; ह्यवेक्ष्यते; (व)भ्युदैक्षतः; ह्युदैक्षत; ०प्युदक्षत; व्यवै (वे) क्षतः; सर्वं; (अर)भ्यवै,

(७) (१)कश्युवाच; (३) सौम्य (for साधु ); (४) मनुजर्षभ,

(८) (१)कदा हि; कदापि; (२) मिहमागताः; (३) सत्यं (for तत्त्वं ),

श्रुतः स्वयंवरो राज्ञा कोसलेन महात्मना।**
द्वितीयो दमयन्त्या वै भविता श्व इति द्विजात् ।। ८ ।।(१)

श्रुत्वैतत्प्रस्थितो राजा शतयोजनयायिभिः ।**
हयैर्वातजवैर्मुख्यैरहमस्य च सारथिः ।। ९ ।।(२)

**केशिनी**

अथ योऽसौ तृतीयो वः स कुतः कस्य वा पुनः ।**
त्वं च कस्य कथं चेदं त्वयि कर्म समाहितम् ।। १० ।।

**बाहुकः**

पुण्यश्लोकस्य वै सूतो वार्ष्णेय इति विश्रुतः ।**
स नले विद्रुते भद्रे भाङ्गासुरिमुपस्थितः ।। ११ ।।(३)

अहमप्यश्वकुशलः सूतत्वे च प्रतिष्ठितः ।**
ऋतुपर्णेन सारथ्ये भोजने च वृतः स्वयम् ।। १२ ।।(४)

**केशिनी**

अथ जानाति वार्ष्णेयः क्व नु राजा नलो गतः ।**
कथं च त्वयि वा तेन कथितं स्यात्तु बाहुक ।। १३ ।।(५)

---

(१) (२)कोश० ( स )लेन; कौशल्येन; कौसलेन; कौशलेन; महात्मना; (४) इव (for इति ); भाविनि; भामिनी; भविता श्व इति द्विजात्,

(२) (१)श्रुतम्; तत्; तत्; व (for तं ); तत्र स्थितो; चाभ्यागतो; त्वभ्यागतो; तं ह्यागतो (for तं प्रस्थितो ); (३)वातसमैर् (४) अप्यस्य; अश्वस्य (for अस्य च ),

(३) (१)वै सूतो; (३) प्र (for वि ); (४) भाङ्गासुरिम्; भार्ग्रस्वरिम्; भार्गी; भाग; भागस्करिम्; भार्गस्व० रिम्; भार्ङ्ग० उपाश्रितः,

(४) (१)अन्नं (for अश्व ); (२) सूतस्वे; सूदने (for सूदत्वे ); सूत सूद; प्रतिष्ठितः; सुनिश्चितः; विनिश्चितः; विनिष्ठितः; सितत्त्वे०पि च निष्ठितः; सूदकर्मसु निष्ठितः (३) ऋतपर्णस्य; (४) वै; (5)पि (for च ); धृतः (for वृत),

(५) (१)केस्युवाच; (२) कुतो (for क्व नु ); गतो नलः; नलो नृपः; (३) कथं च (for कथं०चित् ); चैतन; वा तेन; एतेन(for वैतेन) (४) नु; च (for तु ),

**बाहुकः**

**इहैव पुत्रौ निक्षिप्य नलस्य शुभकर्मणः ।******
**गतस्ततो यथाकामं नैष जानाति नैषधम् ।। १४ ।।**[१]

**न चान्यः पुरुषः कश्चिन्नलं वेत्ति यशस्विनि।******
**गूढश्चरति लोकेऽस्मिन्नष्टरूपे महीपतिः ।। १५ ।।**[२]

**आत्मैव तु नलं वेद या चास्य तदनन्तरा।******
**न हि वै स्वानि लिङ्गानि नलः शंसति कर्हिचित् ।। १६ ।।**[३]

**केशिनी**

**योऽसावयोध्यां प्रथमं गतोऽसौ ब्राह्मणस्तदा।******
**इमानि नारीवाक्यानि कथयानः पुनः पुनः ।। १७ ।।**[४]

**क्व नु त्वं कितवच्छित्त्वा वस्त्रार्धं प्रस्थितो मम।******
**उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय ।। १८ ।।**

**सा वै यथा समादिष्टा तथाऽऽस्ते त्वत्प्रतीक्षिणी।******
**दह्यमाना दिवा रात्रौ वस्त्रार्धेनाभिसंवृता ।। १९ ।।**[५]

**तस्या रुदन्त्याः सततं तेन दुःखेन पार्थिव ।******
**प्रसादं कुरु मे वीर प्रतिवाक्यं वदस्व च ।। २० ।।**[६]

---

(१) (२)शुभकर्मणः; शुभलक्षणः; प्रियदर्शनौ (for (अ)शुभ ); तस्यैव शुभं (३) सूतो (for ततो ),

(२) (१)चास्य (for चान्यः ); (२) न तु; न च (for नलं ); नलं जानाति वै नृपं; (३) लोकेषु (for लोकेस्मिन् ),

(३) (१)आत्मानं (for आत्मैव ); तु (for हि ); वेद (for वेत्ति ); (२)घ०चास्या, यो वास्य; या वास्य; यश्चास्य (for या चास्य ) तदनन्तरं; न चैवान्योपि कश्चन; दमयन्ती स्यादनन्तरा; दमयन्तीं पतिं प्रभुं; (३) वै० स्वानि; चैतानि (for वै तानि ); (४) नरः; नलः शंसति; कस्यचित्,

(४) (१(केश्युवाच; (२) गतोसौ ब्राह्मणस्तदा; ब्राह्मणो गतवांस्तदा; (३) तानि (for नारी०);(४) पठत्युक्ततु (for कथ ),

(५) (१)तथा (for यथा ); (२) तथात्वे तत् (for त्वत् ); ०प्रतीक्षणी; (३) दिवा रात्रौ,

(६) (३)मे वीर; वीर स्वं (for वै वीर ); (४) ददस्व च; वदस्व च; प्रयच्छतः प्रयच्छ हि,

तस्यास्तत्प्रियमाख्यानं प्रवदस्व महामते।**
तदेव वाक्यं वैदर्भी श्रोतुमिच्छत्यनिन्दिता ।। २१ ।।(१)

एतच्छ्रुत्वा प्रतिवचस्तस्य दत्तं त्वया किल।**
यत्पुरा तत्पुनस्त्वत्तो वैदर्भी श्रोतुमिच्छति ।। २२ ।।

**बृहदश्वः**

एवमुक्तस्य केशिन्या नलस्य कुरुनन्दन।**
हृदयं व्यथितं चासीदश्रुपूर्णे च लोचने ।। २३ ।।(२)

स निगृह्यात्मनो दुःखं दह्यमानो महीपतिः ।**
बाष्पसन्दिग्धया वाचा पुनरेवेदमब्रवीत् ।। २४ ।।(३)

**बाहुकः**

वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः ।**
आत्मानमात्मना सत्यो जितः स्वर्गो न संशयः ।। २५ ।।(४)

रहिता भर्तृभिश्चापि न क्रुध्यन्ति कदाचन।**
प्राणांश्चारित्रकवचान्धारयन्ति वरस्त्रियः ।। २६ ।।(५)

विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।**
यत्सा तेन परित्यक्ता तत्र न क्रोद्धुमर्हति ।। २७ ।।

---

(१) (१)ततम् (for तस्याम् ); आख्यातुं; आख्यास्ने (for आख्यानं ); (२) प्रवदस्व; तद्ब्रवीहि; प्रब्रवीमि; ०वीषि; यथामति,

(२) (१)एवमुक्ते तु; ०क्तस्तु; (३) हृदयं व्यथितं; (४) वि (for च ),

(३) (१)स न गृह्या०; स निग्राह्मा; संनिग्राह्या०; सङ्गृह्य चात्मनो; संनिगृह्य मनो; वेगं (for दुःखं ); (४) बाहुकश्चे (for पुनरेवे ),

(४) (१)बाहुक उ (बाहुकः ); मात्मना; स्वरि; जित्वा (for सत्यो ); (४) जितः स्वर्गो; जितस्वर्गो; स्वर्ग गच्छन्त्यसंशयं,

(५) (१)चापि; सर्वा; साध्व्यो (for चैव ); (२) न कुप्यन्ति; कथञ्चन; (३) कवचान् (कं चैव); कवचं; (४) (इ)ति मत्प्रियः; वरस्त्रियः; कुलस्त्रियः सत्सियः,

प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः ।**
आधिभिर्दह्यमानस्य श्यामा न क्रोद्धुमर्हति ।। २८ ।।

सत्कृतासत्कृता वापि पतिं दृष्ट्वा तथाविधम् ।**
राज्यभ्रष्टं श्रिया हीनं क्षुधितं व्यसनाप्लुतम् ।। २९ ।।(१)

**बृहदश्वः**

एवं ब्रुवाणस्तद्वाक्यं नलः परमदुर्मनाः ।**
न वाष्पमशकत्सोढुं प्ररुरोद च भारत ।। ३० ।।(२)

ततः सा केशिनी गत्वा दमयन्त्यै न्यवेदयत् ।**
तत्सर्वं कथितं चैव विकारं तस्य चैव तम् ।। ३१ ।।(३)

**बृहदश्वः**

दमयन्ती तु तच्छ्रुत्वा भृशं शोकपरायणा ।**
शङ्कमाना नलं तं वै केशिनीमिदमब्रवीत् ।। ३२ ।।(४)

**दमयन्ती**

गच्छ केशिनि भूयस्त्वं परीक्षां कुरु बाहुके ।**
अब्रुवाणा समीपस्था चरितान्यस्य लक्षय ।। ३३ ।।(५)

यदा च किञ्चित्कुर्यात्स कारणं तत्र भामिनि ।**

---

(१)(२)ज्ञात्वा (for दृष्ट्वा ); तथाविधं; यथागतं; (३) राज्यभ्रष्टं (for भ्रष्टराज्यं ); (४) दुःखितं; व्यसनप्लुतं,
(२)(२)परमदुर्मनाः; (३) रोद्धुं (for सोहुं ); (४) (अ)थ (for च ),
(३) (१)तत्र (for ततः );(२) दमयन्तीं, (३) यत्तेन (for तत्सर्वं ); (४) चैव तस्य; तत्; ह; वै (for तम् ); विकारश्चैव भामिनी,
(४) ति (for तु ); केशिन्यास्तद्वचः; श्रुत्वा दमयन्ती विशां पते; (३) चैव (for तं वै ),
(५)(१)गच्छ भूयः गच्छ (for भूयस् ); (२) बाहु० कस्य समीपतः; (४) उप० (for अस्य ); चरितं तस्य लक्षय,

**तत्र सश्चेष्टमानस्य संलक्ष्यं ते हि चेष्टितम् ।। ३४ ।।[१]**

लक्षालङ्कारः- सम्लक्ष्यं ते हि चेष्टितम् इत्यत्र ते त्वया चेष्टितं नलचरित्रं सम्लक्ष्यं सम्यग्लक्षयितुं योग्यं हि ।

**न चास्य प्रतिबन्धेन देयोऽग्निरपि केशिनि।****

**याचते न जलं देयं सर्वथा त्वरमाणया ।। ३५।।[२]**

**एतत्सर्वं समीक्ष्य त्वं चरितं मे निवेदय।****

**यच्चान्यदपि पश्येथास्तच्चाख्येयं त्वया मम ।। ३६ ।।[३]**

**निमित्तं यत्त्वया दृष्टं बाहुके दैवमानुषम्।[४]**

**बृहदश्वः**

**दमयन्त्यैवमुक्ता सा जगामाथ च केशिनी।****

**निशम्याथ हयज्ञस्य लिङ्गानि पुनरागमत् ।।३७ ।।[५]**

**सा तत्सर्वं यथावृत्तं दमयन्त्यै न्यवेदयत्।****

**निमित्तं यत्तया दृष्टं बाहुके दैवमानुषम् ।। ३८ ।।[६]**

**केशिनी**

**दृढं शुच्युपचारोऽसौ न मया मानुषः क्वचित्।****

---

(१) (१)किञ्चित् कुर्यात्; वै कुर्यात् (for कुर्यात्स ); च (for स ); यदा च कुर्याद्यत्किञ्चित्; कुर्याद्यत्किं च चरितं; (२)कौशलं (for कारणं ); भाविनि (०नी); भावितं; चाधिकं; स तस्यास्ति परीक्षणं; (४) लक्षयती; संलक्षन्ती; सलक्षते; सवक्ष्यन्ते०; संलक्ष्ये( ० क्षे )थाः; लक्षयेथाः; संलक्ष्यं ते,

(२) (१)न चास्याप्रति; न चास्मै प्रति; (२) केशिनि; भाविनि; (४) त्वरया त्वरमाणया; त्वया सत्वर; सर्वथा त्वर; सकृदत्वर; ० सक्तमस्वर; सत मत्वरं; सकृत्सश्वर; सकृच्च त्वर; किञ्चिदस्व; असकृच्चर,

(३) (१)समाचक्ष्य (for समीक्ष्य त्वं ); (२) त्वरितं (for चरितं ); चरितानि च वेदय,

(४) (३)अथा (for यच्चा ); यच्चाप्यन्यदपश्येथाः; (४) तदाख्येयं; तत्रा० त्वयानघे,

(५) (२)च; सु० (for (अ)शु); (३) निशम्य; थ; तु (for च ); यथान्यायं; तथा तस्य (for हय ); निशम्य चाह राज्ञश्च; निशम्य तानि चान्यानि; (४) आगता (for अगमत्),

(६) (१)यथादृष्टं; न्यायं; तत्त्वं; (२) निवेदयत्; (३) क०यन्निमित्त्तदा द्दष्टं; घ०निमित्तं यत्तदा पृष्टं, तया; त्वया; यथा; मया (for तदा ); निमित्तं च यथावृत्तं; (४)देव; दैव (for दिव्य ); बाहुकेनैव मानुषं,

दृष्टपूर्वः श्रुतो वापि दमयन्ति तथाविधः ।।३९ ।।[१]

ह्रस्वमासाद्य सञ्चारं नासौ विनमते क्वचित् ।
तं तु दृष्ट्वा यथासङ्गमुत्सर्पति यथासुखम्।
सङ्कटेऽप्यस्य सुमहान्विवरो जायतेऽधिकः ।। ४० ।।[२]

ऋतुपर्णस्य चार्थाय भोजनीयमनेकशः ।**
प्रेषितं तत्र राज्ञा तु मांसं चैव प्रभूतवत् ।। ४१ ।।[३]

तस्य प्रक्षालनार्थाय कुम्भास्तत्रोपकल्पिताः ।**
ते तेनावेक्षिताः कुम्भाः पूर्णा एवाभवंस्ततः ।। ४२ ।।[४]

ततः प्रक्षालनं कृत्वा समधिश्रित्य बाहुकः ।**
तृणमुष्टिं समादाय सवितुस्तं समादधत् ।। ४३ ।।[५]

अथ प्रज्वलितस्तत्र सहसा हव्यवाहनः ।। ४४ ।।

एतान्यद्भुतरूपाणि दृष्ट्वा..हं भृशविस्मिता च।
चोष्टितानिविशालाक्षि बाहुकस्य विशेषतः ।।[६]

---

(१) (१)तस्योप० चारो; शुद्धोप; गुह्योप; शुच्यपदानो०; शुभापदानो; दिव्यापदानो; दिव्योपचारो; दृढं शुच्यपचारेण; (३) दृष्टपूर्वा; दृष्टपूर्व०; दृष्टः पूर्व; (४) यथाविधः,

(२) (१)स्वयम् (for ह्रस्वम् ); तु द्वारं (for सञ्चारं ); (३) तत्र; तं च (for तं तु ); तु दृष्ट्वा; तथासङ्गम्; (४) न सर्पति; स सर्पति; अर्पयन्ति (for उत्सर्क ); तस्य (for ऽप्यस्य ); सुमहान् (for सुमङ्कद् ); भवते (for जायते ); विवरो जायतेधिकः (कं); विचारो जायतेधिकः,

(३) (२)त्वनेकशः (for अने ); (३) तु (for च ); (४) बहु च; च बहु; बाहुक (for सुबहु ); पायसं; पेशलं; पाशुकं; पाचकं (for त्पाश० वम् ); मांसं चैव (बहु) प्रभूतवत्,

(४) (१)प्रक्षालनार्थं च; चैव जलार्थाय; (२) (अ)थः (अ)पि; (अ)भि० (for प० ); कुभास्तत्रोपकल्पिताः; (३) वीक्षितः वेक्षितः (for अवेक्षितः ); ते (स०) तेनाये; क्षिताः कुम्भाः (४) ततः (for तदा ); पूर्वमाणाभवंस्तत,

(५) (२)संविसृज्य च; समधिसृत्य; ०श्रुत्य; (३) उपादाय (अवेक्ष्याथ); समास्थाय; समाधाय; (४) समृद्धेग्नौ; समिद्धेग्नौ; समिध्यन्तं; समिद्धे तं; ष सोपध्मातुं; सवितुः समिधे तं; समृद्ध्यर्थं; ह्याविध्यैनं; समा० सृजत्; समादधे; अवासृजत्,

(६) (१) क०ध०समीपतः,

तदद्भुततमं दृष्ट्वा विस्मिताहमिहागता ।। ४५ ।।(१)

अन्यच्च तस्मिन्सुमहदाश्चर्यं लक्षितं मया।**

यदग्निमपि संस्पृश्य नैवासौ दह्यते शुभे ।। ४६ ।।(२)

छन्देन चोदकं तस्य वहत्यावर्जितं द्रुतम्।**

अतीव चान्यत्सुमहदाश्चर्यं दृष्टवत्यहम् ।। ४७ ।।(३)

लक्षालङ्कारः- छन्देन चोदकं तस्य इत्यत्र आवर्जितम् ईषदप्युदकेव वर्जितं पात्रं उदकम् उदकवत् ।

यत्स पुष्पाण्युपादाय हस्ताभ्यां ममृदे शनैः ।**

मृद्यमानानि पाणिभ्यां तेन पुष्पाणि नान्यथा ।। ४८ ।।(४)

भूय एव सुगन्धीनि हृषितानि भवन्ति हि ।।४९।।(५)

एतान्यद्भुतलिङ्गानि दृष्ट्वाहं द्रुतमागता।

चेष्टितानि विशालाक्षि बाहुकस्य समीपतः ।।

**बृहदश्वः**

दमयन्ती तु तच्छ्रुत्वा पुण्यश्लोकस्य चेष्टितम्।**

अमन्यत नलं प्राप्तं कर्मचेष्टाभिसूचितम् ।। ५० ।।(६)

---

(१) (३)तम् (for द्रतद् ); तदद्भुतमिदं दृष्ट्वा; तस्यैतच्चरितं दृष्ट्वा,

(२) (१)तस्मिन् सुमहत्; (३) उप० (for अपि ); (४) न च (for नैव ); असौ दह्यते; दह्येदसौ (for दह्यत्यसौ ),

(३) (१)शयेन (for छन्देन ); (ए)व (for च ); (२) भवत्या (for वहत्या ); बहु; ध्रुवं; घटं (for द्रुतम् ); भवत्यावर्जि० ताद्धटात्; (३) अवतीर्य (for अतीव ); तस्य (for चान्यत् ); (४) र्य पश्यती ह्यहं,

(४) (१)यानि; यतः; यस्य (for यत्स ); (२) पाणिभ्यां (for हस्ता ); ममृशे; अमृशत् (for ममृदे ); (३) मृश्यमानानि पुष्पाणि; बाहुभ्यां; (४) चान्यथा; नान्यथा; तान्यपि (for तान्यथ ),

(५) (१)भूयश्चा० पि; स्थस्तानि; भूत्वा भूयः सुगन्धानि; (२) (अ)पि; हि; वै; (उ)त (for च ); हृषितानि तथैव च; (३)लिङ्गानि; रूपाणि (for कल्पानि ); (४) पुनरागता; भृशविस्मिता (मा० गता),

(६) (१)दृष्ट्वा (for श्रुत्वा ); (४) कर्म० चेष्टित,

सा शङ्कमाना भर्तारं बाहुकं पुनरिङ्गितैः ।**
केशिनीं श्लक्ष्णया वाचा रुदती पुनरब्रवीत् ।। ५१ ।।[(१)]

**दमयन्ती**

पुनर्गच्छ प्रमत्तस्य बाहुकस्योपसंस्कृतम्।**
महानसाद्धृतं मांसमानयस्वेह भाविनि ।। ५२ ।।[(२)]

सा गत्वा बाहुकस्याग्रे तन्मांसमपकृष्य च ।
अत्युष्णमेव त्वरिता तत्क्षणात्प्रियकारिणी।**
दमयन्त्यै ततः प्रादात्केशिनी कुरुनन्दन ।। ५३ ।।[(३)]

सो चिता नलसिद्धस्य मांसस्य बहुशः पुरा।**
प्राश्य मत्वा नलं सूतं प्राक्रोशद्भृशदुःखिता ।। ५४ ।।[(४)]

वैक्लव्यं परमं गत्वा प्रक्षाल्य च मुखं ततः ।**
मिथुनं प्रेषयामास केशिन्या सह भारत ।। ५५ ।।[(५)]

इन्द्रसेनां सह भ्रात्रा समभिज्ञाय बाहुकः ।**
अभिद्रुत्य ततो राजा परिष्वज्याङ्कमानयत् ।। ५६ ।।[(६)]

बाहुकस्तु समासाद्य सुतौ सुरसुतोपमौ।**

---

(१) (१)आशङ्क० (for सा शङ्क ); (२) बाहुकं पुनरिं० गितैः; (३) केशिनी; (४) रुदन्ती,

(२) (२) (ए)व संवृतं; सुसंस्कृतं ((ए)व साम्प्रतं ) (for (उ)पसंस्कृतम् ); (३) श्रितं; च तं; द्रुतं; धृतं (for शृतं ); महानसाश्रि (शृ) तं मांसं;० समादायेह; ०य हि; आनयस्वेह; (४) समादायैव; आदाजे (०यैमे; ० यैहै )०हि; भाविनी; भाविनि ( केशिनी),

(३) (१)बाहुकृस्याग्रे (for के व्यग्रे ); (२) उप (for अप ); ह (for च ); (४) तत्क्षणात्; तदा (for ततः ); कुरुसत्तम; पुङ्गव,

(४) (१)सूचिता; साशिता (for सोचिता ); प्राशिता नलसिध्यथं; (३) सूतं (for सूदं ),

(५) (१)वैकल्यं; क्लैब्यं च; क्लैयं च; परमं; च पुनद्; तु परं; (२) वदनं (for च मुखं ); (४) मानिनी; भामिनी (for भारत ),

(६) (२)तद०(दा) भिज्ञाय; तां विज्ञाय च नैषधः; तदा विज्ञायनैषधः; (३) सोभिकृत्य (for अभि० ); नलो; तदा (for ततो ); (४) परिपूज्याङ्क,

भृशं दुःखपरीतात्मा सुस्वरं प्ररुरोद ह ॥ ५७ ॥[(१)]

नैषधो दर्शयित्वा तु विकारमसकृत्तदा।**
उत्सृज्य सहसा पुत्रौ केशिनीमिदमब्रवीत् ॥ ५८ ॥[(२)]

**बाहुकः**

इदं च सदृशं भद्रे मिथुनं मम पुत्रयोः ।**
अतो दृष्ट्वैव सहसा बाष्पमुत्सृष्टवानहम् ॥ ५९ ॥[(३)]

बहुशः सम्पतन्तीं त्वां जनः सङ्केतदोषतः ।**
वयं च देशातिथयो गच्छ भद्रे यथासुखम् ॥ ६० ॥[(४)]

**अस्मिन् तीर्थयात्रापर्वणि ६०अध्याये ६०श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥

तीर्थयात्रापर्वणि ...ऽध्यायः

## 03- 04- 061

# ६१.एकषट्ततिमोऽध्यायः

**दमयन्त्या बाहुकस्य केशिन्या स्वगृहानयनम् ॥१॥ बाहुकदमयन्त्योः संवादः ॥२॥ बाहुकेन स्वस्य नलत्वोत्कीर्तनपूर्वकं कर्कोटकानुस्मरणेन तद्दत्तवस्त्रद्वयपरिधाने तस्य निजरूपप्रादुर्भावः ॥३॥ ततो नलं प्रत्यभिजानन्त्या दमयन्त्या तत्परिम्भणम् ॥४॥ दमयन्तीबाहुकयोर्वार्तालापः नलस्य प्राकट्य□ दमयन्तीनलयोर्मेलन□ च ॥ ५ ॥**

**बृहदश्वः**

---

(१) (३)भृश० (for भृशं ); (४) स स्वयं; सस्वनं; सुस्वरं,

(२) (१) (अ)थ; तौ (for तु ); (२) असृजत् (for असकृत् ); तथा,

(३) (१)च; तु; स्व० (for सु०);(३) अतो (for ततो ); निमित्तं (for दृष्ट्वैव ),

(४) (१)संवदन्तीं (for सम्प ); (२) दोषवत् (for ०तः ); (४) गच्छ भद्रे; यथासुखं (for नमोऽस्तु ते) आरण्यः ०नलोपा० ख्यान,

सर्वं विकारं दृष्ट्वा तु पुण्यश्लोकस्य धीमतः ।**
आगत्य केशिनी सर्वं दमयन्त्यौ न्यवेदयत् ॥ १ ॥(१)

दमयन्ती ततो भूयः प्रेषयामास केशिनीम्।**
मातुः सकाशं दुःखार्ता नलदर्शनकाङ्क्षया ॥ २ ॥(२)

**दमयन्ती**

परीक्षितो मे बहुशो बाहुको नलशङ्कया।**
रूपे मे संशयस्त्वेकः स्वयमिच्छामि वेदितुम् ॥ ३ ॥(३)

स वा प्रवेश्यतां मातर्मां वानुज्ञातुमर्हसि।**
विदितं वाथवा ज्ञातं पितुर्मे संविधीयताम् ॥ ४ ॥(४)

**बृहदश्वः**

एवमुक्ता तु वैदर्भ्या सा देवी भीममब्रवीत्।**
दुहितुस्तमभिप्रायमन्वजानात्स पार्थिवः ॥ ५ ॥(५)

सा वै पित्राभ्यनुज्ञाता मात्रा च भरतर्षभ।**
नलं प्रवेशयामास यत्र तस्याः प्रतिश्रयः ॥ ६ ॥(६)

---

(१) (१)एवं (for सर्वं ); तत् (for तु ); (३) आगम्य; सर्वं; शीघ्रं (for क्षिप्रं ),

(२) (१) तदा,(४)नलशङ्कासमन्विता; ०दर्शनकाङ्क्षया (for ऽक्षिणी ),

(३) (१) (ऽ)पि; (ऽ)थ (for मे ); (३) रूपं मे; रूपेण,

(४) (१)स च; तं च (for स वा ); (२) मा (for मां ); वा; चैवाज्ञातुम्; वाचाज्ञातुम्; चानुज्ञातुम्; वोनुज्ञातुम्; (३) चाथ क्य वाथ ); वा ज्ञातुं; विज्ञातं (for वाज्ञातं ); विदितं वा यथाज्ञातं; विदितं मे यथाज्ञातं ( ०था ज्ञात्वा ),

(५) (२)जननी (for सा दैवी ); (३) स्वम् (for तम् ); (४) अभिजानात्; अनुजानात्; अन्वज्ञानन्; स (for च ); अनुजा० नीष्व पार्थिव,

(६) (२)व पुनः पुनः; कुरुनन्दन (for भरत )

(३४२) अधिकपाठः

तां स्म दृष्ट्वैव सहसा दमयन्तीं नलो नृपः ।
आविष्टः शोकदुःखाभ्यां बभूवाश्रुपरिप्लुतः ।
तां स; तस्मिन्; तां तु (for तां स्म ); तदा (for नलो ); तदा (for नृपः); दुःखशोकाभ्यां (for शोकं );

तं तु दृष्ट्वा तथायुक्तं दमयन्ती नलं तदा।**
तीव्रशोकसमाविष्टा बभूव वरवर्णिनी ।। ७ ।।(१)

**दमयन्ती**

ततः काषायवसना जटिला मलपङ्किनी।**
दमयन्ती महाराज बाहुकं वाक्यमब्रवीत् ।। ८ ।।

**दमयन्ती**

पूर्वं दृष्टस्त्वया कश्चिद्धर्मज्ञो नाम बाहुक।**
सुप्तामुत्सृज्य विपिने गतो यः पुरुषः स्त्रियम् ।। ९ ।।(२)
अनागसं प्रियां भार्यां विजने श्रममोहिताम्।**
अपहाय तु को गच्छेत्पुण्यश्लोकमृते नलम् ।। १० ।।(३)
किमु तस्य मया बाल्यादपराद्धं महीपतेः ।**
यो मामुत्सृज्य विपिने गतवान्निद्रयार्दिताम् ।। ११ ।।(४)
साक्षाद्देवानपाहाय वृतो यः स पुरा मया।**
अनुव्रतां साभिकामां पुत्रिणीं त्यक्तवान्कथम् ।। १२ ।।(५)
अग्नौ पाणिं गृहीत्वा तु देवानामग्रतस्तथा।**
भविष्यामीति सत्यं तु प्रतिश्रुत्य क्व तद्गतम् ।। १३ ।।(६)

---

मन्युना,
(१) (१)च (for तु ); (२) तथा (for तदा०)(३) समायुक्ता,
(२) (१)पूर्वं दृष्टम् (for दृष्टपूर्वस् ); (३) गहने; विजने (for विपिने ); (४)घ०पुरतः, गतः यः,
(३) (१)अनागसां; ०सीं; (२) विपिने; श्रमकर्शितां; शोक० मोहितां; (४) श्लोकादृते नलात्,
(४) (१)किमु (for कि नु ); बाल्यात्; चीर्णं (for कार्यं ); (२) अपकारं; (३) गतवान्; विजने (for विपिने ); (४) विपिने (for गतवान् ); (अ)र्दितां (०न्वितां) (for हृताम् ),
(५) (१)अपास्यायं; विहायेह (for अपाहाय ); (२) क०घ०पुरा,मया पुरा (३) अनुजातां; अभिमतां; अभीकामां,
(६) (१)अग्नि पाणौ गृहीत्वा तु; अग्नौ पाणिं गृहीत्वा तु (च); (२) देवानां (for हंसा ); अग्रतः; वचनं; नात् (for ०ने ); पुरा; यथा; तथा; तदा (for स्थिताम् ); (३) भविष्या संश्रुत्य (for सत्यं च ); तत्; तु;

**बृहदश्वः**

**दमयन्त्या ब्रुवन्त्यास्तु सर्वमेतदरिन्दम।******
**शोकजं वारि नेत्राभ्यामसुखं प्रास्रवद्बहु ।। १४ ।।**(१)

**अतीव कृष्णसाराभ्यां रक्तान्ताभ्यां जलं तु तत्।******
**परिस्रवन्नलो दृष्ट्वा शोकार्तामिदमब्रवीत् ।। १५ ।।**(२)

**बाहुकः**

**मम राज्यं प्रणष्टं यन्नाहं तत्कृतवान्स्वयम्।******
**कलिना तत्कृतं भीरु यच्च त्वामहमत्यजम् ।। १६ ।।**(३)

**यत्त्वया धर्मकृच्छ्रे तु शापेनाभिहतः पुरा।******
**वनस्थया दुःखितया शोचन्त्या मां दिवानिशम् ।। १७ ।।**(४)

**स मच्छरीरे त्वच्छापाद्दह्यमानोऽवसत्कलिः ।******
**त्वच्छापदग्धः सततं सोऽग्नावग्निरिवाहितः ।। १८ ।।**(५)

**मम च व्यवसायेन तपसा चैव निर्जितः ।******

---

यत् (for च ); (४)कृतव्रता; तु सोगमत् (for क तद्गतम् ),

(१) (१) दमयन्त्यां ब्रुवत्यां तु; दमयत्यबुवन्त्यास्ते; (३) श्रुत्वा तु शोकजं वारि; (४) आपतद्; प्रापतद्; प्राद्रवद्; जलं (for बहु ) उदकं प्राक्षुवन्त्युहुः; नेत्राभ्यामसृजद्बहु,

(२) (१)कृष्णसाराभ्यां; (२) घ०असकृत्, हि तत्; तु यत् (for तु तत् ); नेत्राभ्यां च जलं तदा; स्क्ताभ्यां सलिलं तु तत्; (३) राजा (for दृष्ट्वा ); पतितं सहसा दृष्ट्वा; (४) शोकार्तामू; शोकार्ता (for शोकार्त ); शो० कार्ता तामुवाच ह,

(३) (१)प्रणष्टं; (२) नाहं तत्; (३) च; तु (for तत् ),

(४) (१)यत्त्वया धर्मकृच्छ्रे तु; त्वया तु पाप० कृच्छ्रेण; त्वया तु धर्मकृच्छ्रेषु (तु); त्वया धर्मभृतां श्रेष्ठे; यस्त्वया पापकृच्छ्रेणः त्वया च धर्मविच्छ्रेष्ठे; त्वया तु धर्मरतया; (२) हि (for (अ)भि ० ); (३) त्वया दुःखात् ०(for दुःत्सइं ); (४) दिवानिशं; सवाससं,

(५) (१)भच्छरीरेपि त्वं; मच्छरीरे तथा (त्वया) शापात्
कर्कोटकविषाद्दग्धो मम सत्येन शोभने ।
/*(३)स (for त्वत्० ); सन्दग्धः; सन्तप्तः (for सततं );० (४) योग्ना; अग्ना (for सोऽग्ना ); सोमावग्नि० रिवाहितः,

दुःखस्यान्तेन चानेन भवितव्यं हि नौ शुभे ।। १९ ।।(१)

विमुच्य मां गतः पापस्ततोऽहमिह चागतः ।**

त्वदर्थं विपुलश्रोणि न हि मेऽन्यत्प्रयोजनम् ।। २० ।।(२)

आविष्टः शोकदुःस्वाभ्यां बाष्पधारापरिमुतः ।

कथं नु नारी भर्तारमनुरक्तमनुव्रतम्।**

उत्सृज्य वरयेदन्यं यथा त्वं भीरु कर्हिचित् ।। २१ ।।

दूताश्चरन्ति पृथिवीं कृत्स्नां नृपतिशासनात्।**

भैमी किल स्म भर्तारं द्वितीयं वरयिष्यति।(३)

स्वैरवृत्ता यथाकाममनुरूपमिवात्मनः ।। २२।।

श्रुत्वैव चैवं त्वरितो भाङ्गासुरिरुपस्थितः ।। २३ ।।(४)

कथमुत्सज्य भर्तारं निभृतैव वधूश्चरेत् ।

**बृहदश्वः**

दमयन्ती तु तच्छ्रुत्वा नलस्य परिदेवितम्।**

प्राञ्जलिर्वेपमाना च भीता वचनमब्रवीत् ।। २४ ।।(५)

**दमयन्ती**

न मामर्हसि कल्याण दोषेण परिशङ्कितुम्।**

मया हि देवानुत्सृज्य वृतस्त्वं निषधाधिप ।। २५ ।।(६)

---

(१) (२)च वि०(for चैव ); (३) वा तेन; चान्येन; चैतेन (for चानेन ); (४) नः सुखं; नः शुभे; शोभने (for नौ शुभे ),

(२) (२)उपा (for इहा० ); ततो हमिह चागतः,

(३) (१) घ०किलक सुभर्तारं,

(४) (१)स्वैरवृत्त्या; (३) चैतत्; चैव; (४) भाङ्गासुरि०; भार्गस्वरि; भागस्वरि; भागस्करि; भार्क्रवरि,

(५) (१)च; (३)ति (for तु ); (२) परिदेवनं; (४) भैमी; नलं (for भीता )
आरण्यः नलोपाख्यान,

(६) (२)दोषेण (for पापेन ); (३) तु (for हि ); मया देवान् समुत्स (वरित्य)ज्य,

तवाभिगमनार्थं तु सर्वतो ब्राह्मणा गताः ।**
**वाक्यानि मम गाथाभिर्गायमाना दिशो दश ।। २६ ।।**[(१)]

ततस्त्वां ब्राह्मणो विद्वान्पर्णादो नाम पार्थिव ।**
**अभ्यगच्छत्कोसलायामृतुपर्णनिवेशने ।। २७ ।।**[(२)]

तेन वाक्ये कृते सम्यक्प्रतिवाक्ये तथाऽऽहृते।**
**उपायोऽयं मया दृष्टो नैषधानयने तव ।। २८ ।।**[(३)]

त्वामृते न हि लोकेऽन्य एकाह्ना पृथिवीपते।**
**समर्थो योजनशतं गन्तुमश्वैर्नराधिप ।। २९ ।।**[(४)]

स्पृशेयं तेन सत्येन पादावेतौ महीपते।**
**यथा नासत्कृतं किञ्चिन्मनसापि चराम्यहम् ।। ३० ।।**[(५)]

अयं चरति लोकेऽस्मिन्भूतसाक्षी सदागतिः ।**
**एष मे मुञ्चतु प्राणान्यदि पापं चराम्यहम् ।। ३१ ।।**[(६)]

यथा चरति तिग्मांशुः परेण भुवनं सदा।**
**स मुञ्चतु मम प्राणान्यदि पापं चराम्यहम् ।। ३२ ।।**[(७)]

---

(१) (१)तवाधि०; विवाहा (for तवाभि ); (२) सर्वतः ब्राह्मणाः,

(२) (१)त्वा; तु (for त्वां ); (२) वै द्विजः (for पार्थिव ० ); (३) अध्यगच्छत्; अभ्या; अध्या; कोशलायां; सं (स्वां) दृष्टवान्दोसलेपु,

(३) (१)वाक्ये कृते; वात्त्येरिते; न ते; न वै (for वाक्ये हृते ); तस्मिन् (for सम्यक् ); तेन वाक्येन सम्यक्ते; (२)अभिज्ञाने (for प्रति तथागते;)); तथा कृते; हृते त्वया; त्वया कृते; कृते त्वया; समाहृते; (४) नैषधागमने,

(४) (१) त्वद् (यद्) (for त्वाम् ); (२) एकाह; एकाह्नात्; एकाह्नौ; पृथिवीतले,

(५) (१)च मां (मा); (अ)पि मां; (अ)पीमौ; चाह (for चेमौ ); भजेतां; शपेहं; भजेयं (for भजेऽहं ); स्पृशेयं तेन सत्येन पादावेतौ महीपते; (३) नापकृतं; ना (नौ; न) संमतं; न विकृतं (for नासत्कृतं ); (४) मनसाभिचरा; सापि स्मरा०; सा विस्मरा; वे सा विचरा,

(६) (१)अन्तशू (for अयं ); (३) स वि० (for एष ); मुञ्चतु मे,

(७) (१)यथा (for तथा ); (२) प्रायेण; परितो ( करेण ) (for परेण ); तथा; त्विषा (for सदा ); (३) स मुचतु मम प्राणान्,

चन्द्रमाः सर्वभूतानामन्तश्चरति साक्षिवत्।**

**स मुञ्चतु मम प्राणान्यदि पापं चराम्यहम्** ।। ३३ ।।(१)

एते देवास्त्रयः कृत्स्नं त्रैलोक्यं धारयन्ति वै।**

**विब्रुवन्तु यथा सत्यमेतद्देवास्त्यजन्तु माम्।**(२)

**बृहदश्वः**

**एवमुक्तस्तथा वायुरन्तरिक्षादभाषत** ।। ३४ ।।

**नैषा कृतवती पापं नल सत्यं ब्रवीमि ते** ।। ३७ ।।(३)

राजञ्छीलनिधिः स्फीतो दमयन्त्या सुरक्षितः ।।३५।।

साक्षिणो रक्षिणश्चास्या वयं त्रीन्परिवत्सरान् ।। ३६ ।।

उपायो विहितश्चायं त्वदर्थमतुलोऽनया।**

**न ह्येकाह्ना शतं गन्ता त्वामृतेऽन्यः पुमानिह** ।। ३७ ।।(४)

उपपन्ना त्वया भैमी त्वं च भैम्या महीपते।**

**नात्र शङ्का त्वया कार्या सङ्गच्छ सह भार्यया** ।। ३८ ।।(५)

**बृहदश्वः**

**तथा ब्रुवति वायौ तु पुष्पवृष्टिः पपात ह ।****

---

(१) (३)स मुञ्चतु मम प्राणान्,

(२) (१)जगत् ( क्यक् त्रय); (३) तै र्ब्रुवन्तु; विवदन्तु; यथातथ्यम्; (४) एतद् (for एते ); देवास्; चान्यत्; चाद्य; त्वद्य; सद्यस्; वाक्यं (for वाद्य),

(३) (१)उक्तम् (for उक्ते ); तया; तदा; तथा (for ततो ); (२) रिक्षेभ्यभाषतः,

(४) (२)तु नल (for अतुलो ); नघः मया; महान् (for ऽनया ); (३) न ह्यस्या हृदयं गन्ता; न ह्येकाहाच्छतं गता; न ह्येकाह्नाच तं गन्ता; नैकाह्ना दूरतो गन्ता; (४) त्वामृते; इति (for इह ); त्वदन्यः कः पुमा निह; ऋतेन्यः पुण्यवानिति,

(५) (२)त्वं चास्या हि; उभाभ्यां च (for त्वं च भैम्या ); विशां पते (for मही ); (३) न तु (for नात्र ); (४) सह भार्यया,

**देवदुन्दुभयो नेदुर्ववौ च पवनः शिवः ।। ३९ ।।**[(१)]

तदद्भुतमयं दृष्ट्वा नलो राजाथ भारत।**

**दमयन्त्यां विशङ्कां तामुपाकर्षदरिन्दमः ।। ४० ।।**[(२)]

ततस्तद्वस्त्रमजरं प्रावृणोद्वसुधाधिपः ।**

**संस्मृत्य नागराजं तं ततो लेभे स्वकं वपुः ।। ४१ ।।**[(३)]

स्वरूपिणं तु भर्तारं दृष्ट्वा भीमसुता तदा।**

**प्राक्रोशदुच्चैरालिङ्ग्य पुण्यश्लोकमनिन्दिता ।। ४२ ।।**[(४)]

भैमीमपि नलो राजा भ्राजमानो यथा पुरा।**

**सस्वजे स्वसुतौ चापि यथावत्प्रत्यनन्दत ।। ४३ ।।**[(५)]

ततः स्वोरसि विन्यस्य वक्त्रं तस्य शुभानना।**

**परीता तेन दुःखेन निशश्वासायतेक्षणा ।। ४४ ।।**[(६)]

तथैव मलदिग्धाङ्गीं परिष्वज्य शुचिस्मिताम्।**

**सुचिरं पुरुषव्याघ्रस्तस्थौ शोकपरिप्लुतः ।। ४५ ।।**[(७)]

ततः सर्वं यथावृत्तं दमयन्त्या नलस्य च ।**

**भीमायाकथयत्प्रीत्या वैदर्भ्या जननी नृप ।। ४६ ।।**

---

(१) (१)एवं; ततो (for तथा ०)(४) शुचिः; शुभं; मुस्तं; शुभः (for शिवः ); ववुश्च मरुतः शिवाः,

(२) (१)तदद्भुतमयं; तमङ्क० ततमं; (२) विशां पते (for (अ)थ भारत ); (३) दमयन्त्या; ०यन्तीं; विशङ्कायां; विशङ्कतीं; मनःकातां (४) व्यपकर्षद्; उपा०; अपा; त्वपा; अरिन्दम,

(३) (१)अजरं; अरजं; (३) नागराजं त; राजं तु (for ०राजानं ); (४) नलो (for ततो ); वपुः स्वकं,

(४) (१)स्वरूपेण,

(५) (२)भजमानां; भ्राजमानां; यथामरः; पुरं,

(६) (१)सोरसि; शिरसि; चोरसि; विन्यस्ता; (२) महात्मनः (for शुभां ); (३) परिश्रातेव दुःखेन; परिश्रान्ता सुदुः स्वेन (४)विशश्वास; निःश०; निःश्वसच्छ,

(७) (१)दिग्धांगीं; (२) शुचिस्मितां; (अ)यतेक्षांणां; शुभानना; (३) ०व्याघ्रस्; (४) घ० सा.. श्रुपरिप्लुता,शोकपरिप्लुतः; चाश्चुपरिप्लुता,

ततोऽब्रवीन्महाराजः कृतशौचमहं नलम्।**

**दमयन्त्या सहोपेतं कल्ये द्रष्टा सुखोषितम् ।। ४७ ।।**(१)

ततस्तौ सहितौ रात्रिं कथयन्तौ पुरातनम्।**

**वने विचरितं सर्वमूषतुर्मुदितौ नृप ।। ४८ ।।**(२)

**गृहे भीमस्य नृपतेः परस्परसुखैषिणौ।**

**वसेता□ हृष्टसङ्कल्पौ वैदर्भी च नलश्च ह ।**

स चतुर्थे ततो वर्षे सङ्गम्य सह भार्यया।**

**सर्वकामैः सुसिद्धार्थो लब्धवान्परमां मुदम् ।। ४९ ।।**(३)

दमयन्त्यपि भर्तारमासाद्याप्यायिता भृशम्।**

**अर्धसञ्जातसस्येव तोयं प्राप्य वसुन्धरा ।। ५० ।।**(४)

सैवं समेत्य व्यपनीय तन्द्रां शान्तज्वरा हर्षविवृद्धसत्त्वा।**

**रराज भैमी समवाप्तकामा शीतांशुना रात्रिरिवोदितेन ।। ५१ ।।**(५)

**अस्मिन् तीर्थयात्रापर्वणि ६१अध्याये ५१श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि एकषष्टितमोऽध्यायः ।। ६१ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

---

(१) (१)महाराज (२) मलं; नलं; मुदा (for अहं); क्तं (for नलम् ); कृतार्थं तमहं नलं; (३) सुखो (for सहो ); (४) अ०क०ख०घ०द्दष्ट्वा,कले; काले; कल्यं (तल्पे); नलं (for काल्यं ); द्रक्ष्ये; दृष्ट्वा; प्रष्टा (for द्रष्टा ); सुखोचितं; सहोचितं; सहोषितं,

(२) (१)रात्रौ (for रात्रि ); (२) परस्परं (for पुरा ); (३) सद्भिर् (for वने ); (४) ऊचतुर्,

(३) (१)चतुर्थे तु (for स चतुर्थे ); नलो (for ततो ); (२) स नलः सह; सङ्गत्य स्वह; सह सङ्गम्य; (३) समृद्धार्थो (for सुसि ); सर्वकामस० मृद्धात्मा,

(४) (२)आसाद्य (for अवाप्या ); वाचाप्यायपयिता शुभं (भृशं); (३) अवशीजात; (४) जलं (for तोयं ),

(५) (१)सोयं; सा वै; सा तं (for सैवं ); व्यपीतः; समेता (for समेत्य ); व्यपनीय तन्द्रा ( ०द्रा; ०ज्ञ ); ०नीततन्द्रा; सैवं समेत्याद्य नलेन राजन्; (२) विबुद्ध; विशुद्ध (for विवृद्ध ),

# 03 - 04 - 062

# ६२. द्विषष्टितमोऽध्यायः

परेद्युः प्रभाते भीमराजेन स्नातालङ्कृतयोर्नलदमयन्त्योदर्शनम् ।। १ ।। नलप्रादुर्भावमुपलक्ष्य विदर्भनगरे महानुत्सवसमारम्भः ऋतुपर्णेन सह नलस्यालापः । ऋतुपर्णेन नलं क्षमापयित्वा नलादश्वविद्यापरिग्रहणपूर्वकं स्वपुरं प्रति गमनम् ।। २ ।।

**बृहदश्वः**

अथ तां व्युषितो रात्रिं नलो राजा स्वलङ्कृतः ।**
वैदर्भ्या सहितः काल्यं ददर्श वसुधाधिपम् ।। १ ।।[१]

लक्षालङ्कारः- काल्यम् उषःकालः ।

ततोऽभिवादयामास प्रयतः श्वशुरं नलः ।**
ततोऽनु दमयन्ती च ववन्दे पितरं शुभा ।। २ ।।[२]
तं भीमः प्रतिजग्राह पुत्रवत्परया मुदा।
यथार्हं पूजयित्वा च समाश्वासयत प्रभुः ।।३।।
नलेन सहितां तत्र दमयन्तीं पतिव्रताम्।[३]
अनुजग्राह महता सत्कारेण क्षितीश्वरः ।। ४ ।।
तामर्हणां नलो राजा प्रतिगृह्य यथाविधि।**

---

(१) (१)व्युषितां; उषितो; (२) विशां पते (for स्वलं ); (३) काले; कल्यं; कल्ये; कल्यो (for काल्यं ); वैदर्भीसहितः कार्यं; (४) धिपः,

(२) (१)ततो भीमं महाराजं; (२) प्रयतः श्वशुरं; प्रणतः; प्रयतं; (३) ततोनु; तथा च (for तस्यानु ); (४) तदा (for शुभा ); ववन्दे चरणौ पितुः,

(३) (१)परि (for प्रति ); (३)घ०तं पूजयित्वा तु नलं, सुभृशं; तदा तं; तथा सं० (for यथार्हं ); वधं (for पूज ); (अ)थ; च; स (for तु ); (४) स समासाद्य तं प्रभुः; दृष्ट्वा (for तत्र ); शुचिस्मितां; मुदान्वितः (for पति ),

परिचर्यां स्वकां तस्मै यथावत्प्रत्यवेदयत् ॥ ५ ॥[१]

ततो बभूव नगरे सुमहान्हर्षजः स्वनः ।
जनस्य सम्प्रहृष्टस्य नलं दृष्ट्वा तथाऽऽगतम् ॥ ६ ॥[2]

अशोभयच्च नगरं पताकाध्वजमालिनम् ।**
सिक्ताः सुमृष्टपुष्पाढ्या राजमार्गाः स्वलङ्कृताः ॥ ७ ॥[३]

द्वारि द्वारि च पौराणां पुष्पभङ्गः प्रकल्पितः ।**
अर्चितानि च सर्वाणि देवतायतनानि च ॥ ८ ॥[४]

ऋतुपर्णोऽपि शुश्राव बाहुकच्छद्मिनं नलम्।**
दमयन्त्या समायुक्तं जहृषे च नराधिपः ॥ ९ ॥[५]

तमानाय्य नलं राजा क्षमयामास पार्थिवम्।**
स च तं क्षमयामास हेतुभिर्बुद्धिसम्मितः ॥ १० ॥[६]

स सत्कृतो महीपालो नैषधं विस्मिताननः ।**
दिष्ट्या समेतो दारैः स्वैर्भवानित्यभ्यनन्दत ॥ ११ ॥[७]

---

(१) (१)वैदर्म्या सहितो राजा,

(२) (२)हर्षजः स्वनः; तथाविधं (for गतम् ); जनाश्च सर्वे संहृष्टा राजा क्षोत्सवमाचरन्,

(३) (१)अशोभयन्त; ०यत्तं; नगरीं; (२) पताकध्वजमालिनीं ( नं); (३) सिक्तसं(मा)मृणष्पाढ्यं; सिक्ताः सु(स)मृत्स्वष्पाढ्याः; सिक्तसंमृष्ट० पुष्पाद्यैः; सिक्तं संमृद्धपुष्पाढ्यं; (४) तदा कृताः; कृतास्तथा; स्थलं० कृताः; ततस्तदा; तथागताः,

(४) (१)द्वारे द्वारे; स (for च ); सर्वेषां; सूत्राणां (for द्रन्तुपौराणां ); (२) पुष्पभागेपि (भङ्गोप) कल्पिताः; ०भारोपकल्पिताः तः); ०भङ्ग्याः प्रकल्पिताः; भागः प्रकल्पितः (३) (अ)पि तु (for च ); वेश्मानि; पुष्पैश्च (for सर्वाणि ); (४) (अ)पि (for च ) दैवतायतनान्यपि; दैवतानि च भारत,

(५) (२)छद्मना; छद्मिकं; छद्मकं; (३) समासक्तं; सहोपेतं; (४) जहर्ष; स (for च ); परन्तप; नराधिप; परन्तपः; जनाधिपः जहृषेवसुधाधिपः,

(६) (१)ताम् (for तम् ); नलं; (२) क्षामया; पार्थिव; पार्थिवः; (३) क्षामया; (४) ०संमतैः; ०सम्भितैः; संमितः; सत्तमः; ०वित्तमः; संमतं,

(७) (१)सत्कृत्य (for ०तो ); (२) विस्मिताननः (नं); विस्मितो नलं(४) अ०ख०घ०इत्युकत्वा वचनं नलम्,

उवाच वाक्यं तत्त्वज्ञो नैषधं वदतां वरः ।(१)

किञ्चित्तु नापराधं ते कृतवानस्मि नैषध।**

अज्ञातवासे वसतो मद्गृहे वसुधाधिप ।। १२ ।।(२)

यदिवाबुद्धिपूर्वाणि यदि बुद्ध्यापि कानिचित्।**

मया कृतान्यकार्याणि तानि त्वं क्षन्तुमर्हसि ।। १३ ।।(३)

**नलः**

न मेऽपराधं कृतवांस्त्वं स्वल्पमपि पार्थिव ।**

कृतेऽपि च न मे कोपः क्षन्तव्यं हि मया तव ।। १४ ।।(४)

पूर्वं ह्यपि सखा मेऽसि सम्बन्धी च जनाधिप।**

अत ऊर्ध्वं तु भूयस्त्वं प्रीतिमाहर्तुमर्हसि ।। १५ ।।(५)

अत ऊर्ध्वं तु ३मस्त्वं प्रीतिमान्क्षन्तुमर्हसि ।

सर्वकामैः सुविहितैः सुखमस्म्युषितस्त्वयि।**

न तथा स्वगृहे राजन्यथा तव गृहे सदा ।। १६ ।।(६)

इदं चैव हयज्ञानं त्वदीयं मयि तिष्ठति।**

तदुपाकर्तुमिच्छामि मन्यसे यदि पार्थिव ।। १७ ।।(७)

---

(१) (३)त्वं (for स्वैद् ); (४) भवानित्यभिनन्दितः; इत्युक्त्वा च नलं नृपं,

(२) (१)किञ्चित्त; क्वचित्त; कच्चिच्च; ( कश्चि)ष्द्वापराधं ते; (३) वासे; उषितो (for वसतो ); (४) मे गृहे; वसुधाधिप,

(३) (१)ते (for वा ); (२) यद्यमुद्धयापि; यद्यनुक्तानि; कर्हिचित् (३) कार्या (for कृता ); कर्याणि (for (अ)का ); (४) त्वं (for मे ),

(४) (२)अल्पम् (for त्त्यम् ),

(५) (१)अपि; ह्यपि (for ह्यसि ); यथा (for सखा ); मेपि; मेति; चासि; चापि (for मेसि ); (२) जनार्दन; जनाधिप (for नरा ); (३) अत० ष्ट्येत्तं; च (for तु ); महाभाग; महाराज; अपि विभो (for तु भूयस्त्वं ); (४) प्रीतिमान्क्षतुमर्हसि,

(६) (१)सुविहितैः; च सहितः (२) अध्यु० (for अस्मृ० ); (३) स्वे (for स्थ),

(७) (१)हि यज् (for हय० ); (३) उपा० हर्तुम्; अपाकर्तुम्; (४) यदि मन्यसि पा ,

**बृहदश्वः**

**एवमुक्त्वा ददौ विद्यामृतुपर्णाय नैषधः ।****
**स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा ।। १८ ।।**(१)

**गृहीत्वा चाश्वहृदयं राजन्भाङ्गासुरिर्नृपः ।****
**सूतमन्यमुपादाय ययौ स्वपुरमेव ह ।। १९ ।।**(२)

**निषधाधिपतेश्चापि दत्त्वाक्षहृदयं नृपः ।**(३)

**ऋतुपर्णे गते राजन्नलो राजा विशाम्पते।****
**नगरे कुण्डिने कालं नातिदीर्घमिवावसत् ।। २० ।।**(४)

**अस्मिन् तीर्थयात्रापर्वणि ६२अध्याये २०श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्विषष्टितमोऽध्यायः ।। ६२ ।।

तीर्थयात्रापर्वणि ...ऽध्यायः

## 03- 04- 063

# ६३. त्रिषष्टितमोऽध्यायः

**नलेन पुनः स्वपुरं प्रत्यागमनम् ।।१।। तथा पुनर्द्यूतेन पुष्करं पराजित्य कस्य तत्पुरं प्रति यापनम् ।। २ ।। पुष्करं निष्कासितवता नलेन कुण्डिनपुरात् सपुत्राया दमयन्त्या आनयनपूर्वकं प्रजापालनेन सुखवासः ।।३।।बृहदश्वेन युधिष्ठिरायाक्ष-हृदयविद्योपदेशं कृत्वा पाण्डवान् सर्वानामानत्र्य गमनम् ।।४।।**

**बृहदश्वः**

---

(१) (४)शास्त्र (for विधिं ),

(२) (१)न कर्मणा गहीत्वा च; गृह्णीत्वा चाश्वहृदयं; (२) तथा; नृपो; राजन्; ततो; प्रीतो; ददौ (for तदा ); भाँश्वरि०; भङ्गिस्वरि; भागंसुरि०; भाङ्गषुरि; भागासुरि; भागस्वरि; भागस्करि; भार्ङ्गस्वरि,

(३) (४)ह; तत्; तु (for हि ); प्रययौ स्वपुरीं ( स्वां पुरीं; स्वपुरं) प्रति,

(४) (१)गते राजन् (for प्रति ); (४) दीर्घ (for दीर्घम् ); उवास सः (for इवावसत् ),

स मासमुष्य कौन्तेय भीममामन्त्र्य नैषधः ।**
पुरादल्पपरीवारो जगाम निषधान्प्रति ।। १ ।।(१)

रथेनैकेन शुभ्रेण दन्तिभिः परिषोडशैः ।**
पञ्चाशद्भिर्हयैश्चैव षट्शतैश्च पदातिभिः ।। २ ।।(२)

स कम्पयन्निव महीं त्वरमाणो महीपतिः ।**
प्रविवेशाथ संरब्धस्तरसैव महामनाः ।। ३ ।।(३)

ततः पुष्करमासाद्य वीरसेनसुतो नलः ।**
उवाच दीव्याव पुनर्बहुवित्तं मयार्जितम् ।। ४ ।।(४)

दमयन्ती च यच्चान्यन्मम किञ्चन विद्यते।**
एष वै मम सन्न्यासस्तव राज्यं तु पुष्कर ।। ५ ।।(५)

पुनः प्रवर्ततां द्यूतमिति मे निश्चिता मतिः ।**
एकपाणेन भद्रं ते प्राणयोश्च पणावहे ।। ६ ।।(६)

जित्वा परस्वमाहृत्य राज्यं वा यदि वा वसु।**
प्रतिपाणः प्रदातव्यः परमो धर्म उच्यते ।। ७ ।।(७)

न चेद्वाञ्छसि त्वं द्यूतं युद्धद्यूतं प्रवर्तताम्।**

---

(१) (३)जगामाल्प; पुरात्स्वल्प; (४) ययौ स; कुण्डिनान् (for जगाम ),

(२) (२)चापि (for परि); (३) चापि (for चैव ),

(३) (२)महापुरीं (for मही ); (३) (अ)थ; सु०; (अ)भि (for (अ)ति ); (४) महामतिः; महीपतिः (for महा ); महामतिः; सह सैन्येन भूपतिः,

(४) (२)बलः; बली (for नलः),

(५) (१) दमयत्या; किं; तथा (for च यश्च ); दमयन्त्या रहितं चान्यत्; (२) समार्जितं; मम ( न मे ) किञ्चन विद्यते; मया वित्त ( धन ); मुपार्जितं; जय त्वं सुसभार्जितं; (३) एष मे वै पणः सर्वं,

(६) (१)ततः (for पुनः ); (३) पणेनैकेन (for एक० पाणेन ); (४)घ०पाणयोश्व, पणयोश्च; पणामहे,

(७) (१)आसाद्य; आकृष्य (for आहृत्य ); (३)घ०प्रतिपाणं हि दातव्यं, प्रतिपाणं; तु दातव्यः; प्रदात० यं; (४) प्राणो (for परं ); पणम् (for धनम् ); परं धर्ममिति स्मृतं; परो धर्म इति स्मृतिः; परमो धर्म उच्यते; परो हि धर्मक्षयते,

**द्वैरथेनास्तु वै शान्तिस्तव वा मम वा नृप ।। ८ ।।(१)**

**वंशभोज्यमिदं राज्यमर्थितव्यं यथा तथा।****

**येन केनाप्युपायेन वृद्धानामिति शासनम् ।। ९ ।।(२)**

**द्वयोरेकतरे बुद्धिः क्रियतामद्य पुष्कर।**

**कैतवेनाक्षवत्यां तु युद्धे वा नाम्यतां धनुः ।। १० ।।(३)**

**नैषधेनैवमुक्तस्तु पुष्करः प्रहसन्निव ।****

**ध्रुवमात्मजयं मत्वा प्रत्याह पृथिवीपतिम् ।। ११ ।।(४)**

**पुष्करः**

**दिष्ट्या त्वयार्जितं वित्तं प्रतिपाणाय नैषध।**

**दिष्ट्या च दुष्कृतं कर्म दमयन्त्याः क्षयं गतम् ।।१२।।**

**दिष्ट्या च ध्रियसे राजन्सदारोऽद्य महाभुज ।(५)**

**पुनर्द्यूते च ते बुद्धिर्दिष्ट्या पुरुषसत्तम ।।१३।।**

**धनेनानेन वै भैमी जितेन समलङ्कृता।****

**मामुपस्थास्यति व्यक्तं दिवि शक्रमिवाप्सराः ।। १४ ।।(६)**

---

(१) (१)व्यवसितं; इच्छसि पुनद् (for वाच्छसि तद् ); चूतं त्वं; त्वङ्कृतं (for तद्यूतं); (२) प्राणद्यूतं; युद्धपूर्वं; भवान्युद्धं; (३) द्वैरथेनास्ति; नापि; नाप यदा (for स्तु वै ); वा; सा (for वै ); द्विरथेनास्तु शान्तिर्वा; (४) पुष्कर (for वा नृप ),

(२) (१)वश्य भोग्यम्; वीरभोज्यम्; परहस्तगतं राज्यं; (२) अर्थितव्यं; आद्रितव्यं; आर्जितव्यं; यथातथं; (३)तेनान्युपायेन; केनाभ्यु; तेनास्तु०; केनाश्च; (४) अनु० (for इति ),

(३) (१)तयोर् (for द्वयोरू ); तरा; तमे (for तरे ); (२) इति (for अद्य ); (३) तु (for वा ); (४) बध्यतां; नाम्यतां; नह्यतां; मनः (for धनुः ); नाम्यतां धनुरुत्तम; युद्धे चानम्य तद्धनुः; युद्धेनान० म्यतां धनुः,

(४) (२)प्रहसन्निव पुष्करः; पुष्करो राज्यगर्वितः; (४) निषधाधिपं; पृथिवीपतिः,

(५) (१)दुव्यं(for वित्तं) (३) वै (for च )दुष्करं;सुकृतं (अ)सि वै(for च) ध्रियते; प्रीयसे; दृश्यसे; प्यायसेः; ध्रीयसे; सदारोद्य (रि) महाभुज; रिनिबर्हणः; सदा वा विनि० वर्तनं; लाभाय मम नैषधः,

(६) (१)पाणेनानेन; जितेना; वे भैमी (for वैदर्भी ); (२) वित्तेन; धनेन (for जितेन ); (३) क्षिप्रं (for व्यक्तं ); (४)इवामराः; शची यथा,

नित्यशो हि स्मरामि त्वां प्रतीक्षेऽपि च नैषध।**
देवनेन मम प्रीतिर्न भवत्यसुहृद्गणैः ।। १५ ।।[१]

जित्वा त्वद्य वरारोहां दमयन्तीमनिन्दिताम्।**
कृतकृत्यो भविष्यामि सा हि मे नित्यशो हृदि ।। १६ ।।[२]

**बृहदश्वः**

श्रुत्वा तु तस्य ता वाचो बह्वबद्धप्रलापिनः ।**
इयेष स शिरश्छेत्तुं खड्गेन कुपितो नलः ।[३]
स्मयंस्तु रोषताम्राक्षस्तमुवाच नलो नृपः ।। १७ ।।

**नलः**

पणावः किं व्याहरसे जितो न व्याहरिष्यसि ।। १८ ।।[४]

ततः प्रावर्तत द्यूतं पुष्करस्य नलस्य च
एकपाणेन वीरेण नलेन स पराजितः ।
स रत्नकोशनिचयैः प्राणेन पणितोऽपि च ।। १९ ।।[५]
जित्वा च पुष्करं राजा प्रहसन्निदमब्रवीत् ।।२०।।
मम सर्वमिदं राज्यमव्यग्रं हतकण्टकम्।[६]

---

(१) (१) (ऽ)पि (for हि ); त्वा (for त्वां ); (२) सम्प्रक्ष्यामि; प्रतीक्षेपि; प्रतीक्षे च; व (for च ); परन्तप (for च नैषध ); (३) देवनेन ( ने न ) (for ने च ); (४) भवत्येव (for न भवति ); सुहृद्गणैः (for (अ)सुहृद्गणैः) अभवन्न सुहृद्गणैः,

(२) (१)(अ)धैव; (अ)द्याहं (for त्वद्य ); (४) या (for सा ),

(३) (१)तां वाचं; तद्वाचो (for ता व्राचो ); श्रुत्वा नस्याशुभां वाचं; (२) बह्वबद्धः प्रलापिनः; वद्ध्यद्धप्रणादि (० शि)नः; बुध्वाबह प्रलापिनी; ह्मसम्बद्धप्रलापिनः; प्येश्ङ्क्यसम्प्रलाम्निं; (३) तत्०(for स ),

(४) (१)सु०; स; च (for तु ); (२) नलो (for ततो ); नलः (for नृपः); (३) पणाव०; पणाय; वैधेयः; वधाय; वैधेयं (for पणाव ); व्याहरसि; (४) जितो न; ततो न; जितो वै; कैतव्ये; जिते वै,

(५) (१)पुनः (for ततः ); प्रवर्तितं; प्रवर्ततां; (३) घ०पाणेन, वीरेण (for भद्रं ते ); ०निचयैः; पाणेन; पणेन (for प्राणेन ); पणतो; पाणितो ); गणितो (for यत् च ),

(६) (१)जित्वा तु; स जिस्वा; प्रहसन् (for पुष्करं ); (२) पुष्करं चेदमब्रवीत्; (३) न च; जितं (for

वैदर्भी न त्वया शक्या राजापसद वीक्षितुम्।**
तस्यास्त्वं सपरीवारो मूढ दासत्वमागतः ।। २१ ।।(१)

न त्वया तत्कृतं कर्म येनाहं विजितः पुरा।
कलिना तत्कृतं कर्म त्वं च मूढ न बुध्यसे ।।२२।।

नाहं परकृतं दोषं त्वय्याधास्ये कथञ्चन ।(२)
यथासुखं वै जीव त्वं प्राणानवसृजामि ते ।।२३।।

तथैव च मम प्रीतिस्त्वयि वीर न संशयः ।(३)
तथैव सर्वसम्भार□ स्वम□श□ वितरामि ते।(४)
सौहार्दं चापि मे त्वत्तो न कदाचित्प्रहास्यति ।। २४ ।।

पुष्करं त्वं हि मे भ्राता सञ्जीव शरदः शतम् ।। २५ ।।(५)

बृहदश्वः

एवं नलः सान्त्वयित्वा भ्रातरं सत्यविक्रमः ।**
स्वपुरं प्रेषयामास परिष्वज्य पुनः पुनः ।। २६ ।।(६)

सान्त्वितो नैषधेनैवं पुष्करः प्रत्युवाच तम्।**

---

मम ) सर्वं राज्यं; (४) प्राप्तं निहतकण्टकं,

(१) (२) राजापशद; (३) यस्यासवं,

(२) (१)त्वया तत्; च त्वया; (२) विजितः (for निर्जितः ); तदा; त्वया (for पुरा ); (३) तु; च (for तत् ); सवं (for कर्म ); (४) च (for तु ); रूप; नीच (for मूढ ); त्वं स्थ न च बुध्यसे; पापं (for दोषं ),

(३) (१)च (for त्वं ); जीव त्वं; सञ्जवि; त्वं जीव (for जीवस्व ); (२) अवसृजामि; अप्युत्सृजामि; वै (for ते ),

(४) (३)यथैव; च त्वयि; मम च; मम चैव; (४) मम वीर; त्वयि चैव (for त्वयि वीर ),

(५) (१)सौहादं (for सौभ्रात्रं ); चापि; हि च (for ञ्श्चैव ); ते (for मे ); नित्यं (for त्वत्तो ); (२) प्रयास्यति; (३) च (for हि ); (४) जीवस्व; स ( सं०) जीव त्वं (for सञ्जीवस्व ); स (स)जीव शरदा शतं; सां (त्वं)जीव शरदः शतं,

(६) (१)शान्तयित्वा; (३) पुष्करं क्षमयामास; वचनैस्तोव; (४) सान्त्वयित्वा (for परि ),

पुण्यश्लोकं तदा राजन्नभिवाद्य कृताञ्जलिः ।। २६ ।।[१]

कीर्तिरस्तु तवाक्षय्या जीव वर्षशतं सुखी।**

यो मे वितरसि प्राणानधिष्ठानं च पार्थिव ।। २७ ।।[२]

**पुष्करः**

स तथा सत्कृतो राज्ञा मासमुष्य तदा नृप।**

प्रययौ पुष्करो हृष्टः स्वपुरं स्वजनावृतः ।। २८ ।।[३]

महत्या सेनया सार्धं विनीतैः परिचारकैः ।**

भ्राजमान इवादित्यो वपुषा पुरुषर्षभ ।। ३० ।।[४]

प्रस्थाप्य पुष्करं राजा वित्तवन्तमनामयम्।

प्रविवेश पुरं श्रीमानत्यर्थमुपशोभिताम् ।।३१।।

प्रविश्य सान्त्वयामास पौरांश्च निषधाधिपः ।। ३१ ।।[५]

पौरा जानपदाश्चापि सम्प्रहृष्टतनूरुहाः ।

ऊचुः प्राञ्जलयः सर्वे सामात्यप्रमुखा जनाः ।

अद्य स्म निर्वृता राजन्पुरे जनपदेऽपि च ।

उपासितुं पुनः प्राप्ता देवा इव शतक्रतुम् ।

आश्वासयत्तदामात्यान् सर्वाञ्जानपदान् तथा।

---

(१) (१)अथ; एव (for एवं ); नलेन सात्वतो तेन; (२) ह (for तम् ); प्रत्युवाच स तं नलं; (३) यदा राजन्; महाराजं,

(२) (२)वर्षशतं; सुखं; समी (for सुखी ); (३) वितरति; ; ०से,

(३) (१)सत्कथा (for स तथा ); स तथा सान्त्वितो राजा ( ज्ञा) (२) समाज्ञाय; समाश्लिष्य (for मासं ); ततो नृपः; तदा नृप; नराधिप; स्वपुरं पुष्करः; स्वजनान्वितः; स्वजनैर्वृतः,

(४) (१)सार्ध (for राजन् ); (२) नादितैः; विजितैः (for विनीतैः ); (४) वपुष्मान्; पुरुषर्षभः; भरतर्षभ; कुरुनन्दन; ययौ वीरश्रिया ज्वलन्।,

(५) (३)पुरीं; स्वकं (for पुरं ); श्रीमद्; धीमान्; राजा; रम्यां; रम्यं (for क्षीमान् ); (४) चात्यर्थम्; अत्यन्तम् (for अत्यर्थम् ); उपशोभितां; उपभोगितं; पौरान्त्य; स पौरान् (for पौरांश्च ),

हितेषु चैषां सतं पितेवावहितोऽभवत् ।। ३२ ।।

**बृहदश्वः**

प्रशान्ते तु पुरे हृष्टे सम्प्रवृत्ते महोत्सवे।**
महत्या सेनया राजा दमयन्तीमुपानयत् ।। ३३ ।।(१)

पुण्यश्लोकं तु राज्यस्थं श्रुत्वा भीमो महीपतिः ।
मुदा परमया युक्तो बभूव भरतर्षभ ।। ३४ ।।

अथ हृष्टमना राजा महत्या सेनया सह ।
सुतां प्रस्थापयामास पुण्यश्लोकाय धीमते ।। ३५ ।।

दमयन्तीमपि पिता सत्कृत्य परवीरहा।**
प्रास्थापयदमेयात्मा भीमो भीमपराक्रमः ।। ३६ ।।(२)

आगतायां तु वैदर्भ्यां सपुत्रायां नलो नृपः ।**
वर्तयामास मुदितो देवराडिव नन्दने ।। ३७ ।।(३)

तथा प्रकाशतां यातो जम्बुद्वीपे स राजसु।**
पुनः शशास तद्राज्यं प्रत्याहृत्य महायशाः ।। ३८ ।।(४)

ईजे च विविधैर्यज्ञैर्विधिवच्चाप्तदक्षिणैः ।**
तथा त्वमपि राजेन्द्र ससुहृद्यक्ष्यसेऽचिरात् ।। ३९ ।।(५)

---

(१) (१)प्रविष्टे; प्रशास्ते; नगरे (for तु पुरे ); प्रयाते पुष्करे हृष्टे; सम्प्रशाते प्रहृष्टे च; (२) वृत्ते तीर्थ; सम्प्रहृष्ट०; सम्प्रवृत्तः; सुप्रवृत्ते; सुप्रवृत्त; (३) राजन् (for राजा ); (४) अथा; तन्न सु समा (for उपा० ),

(२) (१)तथा (for पिता ); (३) प्रास्थापयद्; अदीनात्मा (for अमेया ),

(३) (३)अतीव मुदितो वीरो,

(४) (१)ततः (for तथा ); (२) च; स (for थ ); जम्बूद्वीपे रराज सः; पे चराचरे; द्वीपादिराजसु; (३) चैवा; स चा; चैत्या० (for स्वे चा ); राज्यं; राजा (for राज्ये ); पुनः शशास तद्रा (वै रा)ज्यं; पुनः स्वे न्य० वसद्राज्ये; (४)प्रत्यावृत्य; गत्य महामनाः,

(५) (२)विविधैः; विधिना (for विधिवत् ); भूरि दक्षिणैः; चाप्त; प्राप्त; वाप्त०; आप्त; समाप्तवरदक्षिणैः (४) सुहृदो; स्वपुरं; स्वराज्यं; स्वं राज्यं (for ससुहृद् ); द्रक्ष्यसे; प्राच्छसे; प्रेक्षसे; प्रवसन्; यक्ष्यसे; रक्ष्यसे; रक्षसे; ()चिरं,

दुःखमेतादृशं प्राप्तो नलः परपुरञ्जयः ।**
देवनेन नरश्रेष्ठ सभार्यो भरतर्षभ ।। ४०।।[१]

एकाकिनैव सुमहन्नलेन पृथिवीपते।**
दुःखमासादितं घोरं प्राप्तश्चाभ्युदयः पुनः ।। ४१ ।।[२]

त्वं पुनर्भ्रातृसहितः कृष्णया चैव पाण्डव ।**
रमसेऽस्मिन्महारण्ये धर्ममेवानुचिन्तयन् ।। ४२ ।।[३]

ब्राह्मणैश्च महाभागैर्वेदवेदाङ्गपारगैः ।**
नित्यमन्वास्यसे राजंस्तत्र का परिदेवना।
इतिहासमिमं चापि कलिनाशनमच्युते ।। ४३ ।।[४]

अक्षाणां हृदये प्राप्ते ऋतुपर्णस्य संनिधौ ।
नलेन याचितं राज्ञा कलिना च प्रतिश्रुतम् ।
कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम्।

शक्यमाश्वसितुं श्रुत्वा त्वद्विधेन विशाम्पते।
अस्थिरत्वं च सञ्चिन्त्य पुरुषार्थस्य नित्यदा ।। ४४ ।।[५]

य एवं पठते नित्यं य इदं श्रुणुयान्नरः ।

---

(१) (१)तत्तादृशं (for एतादृशं ); एवं च व्यसनं प्राप्तो; (३) नरश्रेष्ठः; नृपश्रेष्ठ,

(२) वै; पि (for व ); एकाकिना नलेनैव सुमहत्कर्म यत्कृतं; (३) एतादृशं (for आसादितं ); (४) प्राप्तं; चाभ्युदयं; तथा (for पुनः ),

(३) (२)सह (for चैव ); भारत; (for पार्थिव;) भार्यया (for पाण्डव ); (३) रमया; रमस्वा; वससे; समये (for रमसे ) ० कथाश्चापि समाकर्ण्य,

(४) (४)परिवेदना,

(५) (१) अ०ख०माश्वसितं घ०माश्वसिताः,सुस्थिर० त्वं; च सम्प्रेक्ष्य; (२) पुरुषो० ( षे )र्थस्य; सिद्धये; निश्चयं; सर्वदा (for नित्यदा )(१)राजन्; तात; चैव; चेह (for चापि); इति हासं पुरं चासि; (२) कलेर् (for कलि० ); उत्तमं; अच्युत; अप्युत (० क्य उच्यते),

न तस्य विद्यते राजन्भयं वै कलिकारकम्।
धर्मनित्यस्य युक्तस्य सदार्जवरतस्य च ।
दान्तस्य च वदान्यस्य कलिः पुंसः करोति किम् ।।(१)
इदमेवख्यदत्रैव व्यासेन परिकीर्तितम् ।
कलिना च नृपे दत्तं राद्ध्यवरमनुत्तमम् ।
अक्षाणां हृदये प्राप्ते ऋतुपर्णस्य संनिधौ ।

नलेन पठितः श्लोकः कलिनाशाय भारत ।
तस्योदये व्यये चापि न चिन्तयितुमर्हसि ।। ४५ ।।[२]
व्यसने त्वं महाराज न विपीदितुमर्हसि ।
विषमावस्थिते दैवे पौरुषेऽफलतां गते ।
वित्रादमुश्च नात्मानंसत्त्वापाश्रयिणो बुधाः ।[३]

श्रुत्वेतिहासं नृपते समाश्वसिहि मा शुचः ।**
व्यसने त्वं महाराज न विषीदितुमर्हसि ।।
विषमावस्थिते दैवे पौरुषेऽफलतां गते ।**
विषादयन्ति नात्मानं सत्त्वोपाश्रयिणो नराः ।।

ये चेदं कथयिष्यन्ति नलस्य चरितं महत्।
श्रोष्यन्ति चाप्यभीक्ष्णं वै नालक्ष्मीस्तान्भजिष्यति।**
अर्थास्तस्योपपत्स्यन्ते धन्यतां च गमिष्यति ।। ४६ ।।[४]

---

(१) (३)आश्वसितुं; अध्यासितुं,

(२) (३) दये ((अ)पि च); (अ)प्याये (for (आ)वि च ); चापि (for चैव ) व्यसने चोदये चैव; तस्याप्यावस्य वै चैव,(४) नावसीदितुम् (त्ती न चिन्त० ); (४) शुच; न विषीदितुमर्हसि; तदाश्वासितु० मर्हसि (सुस्थिरो भव मा शुचः), न चिन्तयितुमर्हसि । श्रुत्वेतिहासं नृपते -ख

(३) (२)विफलं (for फलतां ); पौरुषेफलवति ते; सत्वोपा; सिद्धापा; नराः; जनाः (for बुधाः ),

(४) (१)य इदं; ये चैतत् (for ये चेदं ); कर्ति (for कथं ); (३) ये; हि (for वै ); सल्फे ष्यन्ति

इतिहासमिमं श्रुत्वा पुराणं शश्वदुत्तमम्

पुत्रान्पौत्रान्पशूंश्चापि लभते नृषु चाग्र्यताम् ।। ४७ ।।

आरोग्यप्रीतिमांश्चैव भविष्यति न संशयः ।। ४८ ।।(१)

भयात्त्रस्यसि यच्च त्वमाह्वयिष्यति मां पुनः ।**

अक्षज्ञ इति तत्तेऽहं नाशयिष्यामि पार्थिव ।। ४९ ।।(२)

वेदाक्षहृदयं कृत्स्नमहं सत्यपराक्रम।**

उपपद्यस्व कौन्तेय प्रसन्नोऽहं ब्रवीमि ते ।। ५० ।।(३)

उपपद्यति मत्तश्च भविष्यति न संशयः ।(४)

**वैशम्पायनः**

ततो हृष्टमना राजा बृहदश्वमुवाच ह ।। ५० ।।

**युधिष्ठिरः**

भगवन्नक्षहृदयं ज्ञातुमिच्छामि तत्त्वतः ।। ५१ ।।(५)

कौन्तेयेनैवमुक्तस्तु बृहदश्वो महामुनिः ।

**वैशम्पायनः**

ततोऽक्षहृदयं प्रादात्पाण्डवाय महात्मने।**

---

चाभीक्ष्णं वै; संश्रोष्यन्तीव चा (०ति च मे)भीक्ष्णं; (४) नाश्रीस्तेषां; लक्ष्मल्लैशं; भविष्यति; तेभ्यो; चास्य (for तस्य ); व्यवस्यति; वपसङ्गाते उपपद्येते; धन्यता च भवि० अति; तां चागमिष्यति,

(१) (१)पुण्यं (for श्रुत्वा ); (३) पुत्रपौत्रान्; श्रियः; सखीन्; श्रियं (for पशून् ); चापि (for चैव ); (४) लभते; वेष्ट्यन्ते; लप्स्यते; वास्नते; लष्कन्ते; लन्त्यसे; आसेग्यां; नीरोगः; आरोस्थः; आरोग्यप्रीतिमाश्चैव; अरोगाः प्रीतिमन्तश्च भविष्यन्ति,

(२) (१)रूपं (for भयं ); भयास्त्रस्यसि (for भयं पश्यसि ); यत्र (for यच्च ); (२) आह्वयिष्यन्ति; आकर्षयसिः आश्रयिष्यसि; मा (for मां ); (३) अक्षजा०;(४) भारत (for पार्थिव ),

(३) (१)सर्वम् (for कृत्स्नम् ),

(४) (४)प्रपन्नाय; सत्यमेतद्; प्रसन्नोस्मि,

(५) (१)राजन् ( राजा) ०)(४) श्रोतुम् (द्वञ्ज्ञातुम्) (अ)धीष्व भो; वै प्रभो ( तत्त्वतः ),

**दत्त्वा चाश्वशिरोऽगच्छदुपस्प्रष्टुं महातपाः ।। ५२ ।।**[(१)]

**लब्ध्वा च पाण्डवो राजा विशोकः समपद्यत ।**

**कथामेवं तथा कृत्वा नलस्य चरिताश्रयाम्।****

**आमन्त्र्य पाण्डवान्सर्वान्बृहदश्वो जगाम ह ।। ५३ ।।**

गतश्चाशु सरो राजन्; उत्त्वा चाशु शिरोगच्छद्; तपस्तप्तुं (for उप० स्प्रष्ट्व ); दत्त्वा चास्य महातेजा तत्रैवतिरधीयत

**बृहदश्वे गते पार्थमश्रौषीत्सव्यसाचिनम्।****

**वर्तमानं तपस्युग्रे वायुभक्षं मनीषिणम् ।। ५४ ।।**[(२)]

**ब्राह्मणेभ्यस्तपस्विभ्यः सम्पतद्भ्यस्ततस्ततः ।****

**तीर्थशैलवनेभ्यश्च समेतेभ्यो दृढव्रतः ।। ५५ ।।**[(३)]

**इति पार्थो महाबाहुर्दुरापं तप आस्थितः ।****

**न तथा दृष्टपूर्वोऽन्यः कश्चिदुग्रतपा इति ।। ५६ ।।**[(४)]

**यथा धनञ्जयः पार्थस्तपस्वी नियतव्रतः ।****

**मुनिरेकचरः श्रीमान्धर्मो विग्रहवानिव ।। ५७ ।।**[(५)]

**तं श्रुत्वा पाण्डवो राजंस्तप्यमानं महावने।****

**अन्वशोचत कौन्तेयः प्रियं वै भ्रातरं जयम् ।। ५८ ।।**[(६)]

---

(१) (२)पार्थिवाय (for पाण्ड० ); विशां पते (for महां ),

(२) (१) पार्थ० स्त्वश्रौषीत्; (४) तपस्विनं; युधिष्ठिरः; जितेंद्रियं (for मनी ),

(३) (१) तीर्थ; (२) इतस्ततः; समन्ततः; (३) शैलचरेभ्यश्च ०शीलच(व० ; प) रेभ्यश्च; ०शैलवनेभ्यश्च; (४) दृढव्रतं; तथैव च,

(४) (२)दुष्कृतं; दुष्करं; उदारं (for दुरापं ); (३) न तथा; स (for न ); दृष्टपूर्वं; वा; वै; नः (for ऽन्यः ); (४)कचिद्; श्रुत इव (for इति ),

(५) (१)तथा; स वै (for प्यथा ); (२) नियतेंद्रियः; (३) नरः; ०वरः (for चरः ); मुनिवेषधरः श्रीमान्; मुनिरेकश्चर न्धीमान्,

(६) (१)पाण्डवा; पाडवं; राजा; वीरं (for राजन् ); (२) तपमानं; (३) कैतेयं; चैकान्ते; अन्वशोचन्त कौतेयाः; (४) प्रियं जयं; तं प्रियं (for प्रियं वै ); भ्रातरं च धनञ्जयं,

दह्यमानेन तु हृदा शरणार्थी महावने।**

**ब्राह्मणान्विविधज्ञानान्पर्यपृच्छद्युधिष्ठिरः ।। ५९ ।।**[१]

प्रतिगृह्याक्षहृदयं कुन्तीपुत्रो युधिष्ठिरः ।**

**आसीद्धृष्टमना राजन्भीमसेनादिभिर्युतः ।। ६० ।।**

स्वभ्रातन्सहितान्पश्यन्कुन्तीपुत्रो युधिष्ठिरः ।

**अपश्यन्नर्जुनं तत्र बभूवाश्रुपरिप्लुतः ।**

**सन्तप्यमानः कौन्तेयो भीमसेनमुवाच ह ।। ६१ ।।**

**युधिष्ठिरः**

**कदा द्रक्ष्यामि वै भीम पार्थमत्र तवानुजम्।**

**मत्कृते हि कुरुश्रेष्ठस्तप्यते दुश्चरं तपः ।। ६२ ।।**[२]

तस्याक्षहृदयज्ञानमाख्यास्यामि कदा न्वहम्।।६३।।

स हि श्रुत्वाक्षहृदयं समुपात्तं मया विभो।

**प्रहृष्टः पुरुषव्याघ्रो भविष्यति न संशयः ।। ६४ ।।**[३]

**अस्मिन् तीर्थयात्रापर्वणि ६३अध्याये ६४श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि त्रिषष्टितमोऽध्यायः ।। ६३ ।।

## ।। वनपर्वणि तीर्थयात्रापर्वणि नलोपाख्यानपर्व समाप्तम् ।।

---

(१) (१)च; सु (for तु ); (२) प्रवृत्त्यर्थं; तप्यमानो (for शर ),

(२) (१) क०कुन्तीपुत्रं धनञ्जयम्,

(३) (१) राजा (for राजन् ); स (for स्व०); कुतीपुत्र धनञ्जयं; यत्कृते; परमं (for दुश्चरं ); अप्यहं (for न्वहं ); उपादत्तं (for समु ); विभुः,

# तीर्थयात्रापर्वणि तीर्थयात्रापर्व

## 03- 04 - 064

## ६४.चतुष्षष्ठितमोऽध्यायः

अर्जुनमुद्दिश्य द्रौपदीसहितानां पाण्डवानां चिन्ता । अर्जुनविनाभावेन काम्यकवने निवासमरोचमानैः पाण्डवैस्तस्मान्निर्गमननिर्धारणम् ।। १ ।। युधिष्ठिरेण काम्यक-वनमुपागतं नारदं प्रति भूप्रदक्षिणेन तीर्थयात्राफलप्रश्नः ।। २।।

**जनमेजयः**

**भगवन्काम्यकात्पार्थे गते मे प्रपितामहे ।**
**किमकुर्वत पार्थास्ते तमृते सव्यसाचिनम् ।। १ ।।**(०१)

**स हि तेषां महेष्वासो गतिरासीदनीकजित् ।****
**आदित्यानां यथा विष्णुस्तथैव प्रतिभाति मे ।। २ ।।**(०२)

* (त्रिदशानां महेन्द्रश्च रुद्राणां चैव शङ्करः ।)

**तेनेन्द्रसमवीर्येण सङ्ग्रामेष्वनिवर्तिना ।****
**विनाभूता कथं पार्थाः कथमासन् पितामहाः ।। ३ ।।**(०३)

---

(०१)(३) अकुर्वंस्ते (for अकुर्वन्त ); किमकुर्व ( र्वं) त पार्थास्ते; (४) विना (for ऋते ),
(०२) (२)सपत्नजिद् (for गतिरासीद् ); अमित्रजित्; अनन्त; अनेकं, (४)मा (for मे ),
(०३)(१)देवेद्रसम०; (२) समरे (for सङ्गामे ); (३) विना तेन; विना तात; विनाकृता; महा०; च ते (for वने ); तेन; पार्थाः पार्थ (for वीराः ), ग-अधिकपाठः

**वैशम्पायनः**

तत्तेऽहं कथयिष्यामि शृणु धर्मभृतां वर ।
तीर्थानां चैव माहात्म्यं पुलस्त्येनाभिभाषितान् ।।
कदाचित्तीर्थयात्रायां नारदो भगवानृषिः ।
तीर्थानि पर्यटंस्तत्र युधिष्ठिरमुपागमत् ।।

**वैशम्पायनः**

**गते तु पाण्डवे तात काम्यकासव्यसाचिनि ।****
**बभूवुः कौरवेयास्ते दुःखशोकपरायणाः ॥ ४ ॥**(०१)

**आक्षिप्तसूत्रा मणयश्छिन्नपक्षा इव इवाण्डजाः ।****
**अप्रीतमनसः सर्वे बभूवुरथ पाण्डवाः ॥ ५ ॥**(०२)

**वनं तु तदभूत्तेन हीनमक्लिष्टकर्मणा ।****
**कुबेरेण यथा हीनं वनं चैत्ररथं तथा ॥ ६ ॥**(०३)

**तमृते ते नरव्याघ्राः पाण्डवा जनमेजय ।****
**मुदमप्राप्नुवन्तो वै काम्यके न्यवसंस्तदा ॥ ७ ॥**(०४)

**ब्राह्मणार्थे पराक्रान्ताः शुद्धैर्बाणैर्महारथाः ।****
**निघ्नन्तो भरतश्रेष्ठ मेध्यान्बहुविधान्मृगान् ॥ ८ ॥**(०५)

**नित्यं हि पुरुषव्याघ्रा वन्याहारमरिन्दमाः ।****
**प्रविसकृत्यक समाहृत्य ब्राह्मणेभ्यो न्यवेदयन् ॥ ९ ॥**(०६)

---

विनयावनतो भूत्वा पर्यपृच्छद्युधिष्ठिरः ।
तीर्थाभिधानं पुण्यं च नारदाय महात्मने ॥

नारदः

(०१) (१) काम्यकात् पाण्डवे; राजन्; पार्थे (for तात० ); सत्यविक्रमे (for सव्य ); (३) पाण्डवेयास्ते; जाता विमनसः सर्वे (४)भ्रातृ,

(०२) (१)०सूत्रमणयः; विचित्रसूत्रामणयः; (२) भिध० (for छिन्न० ); द्विजा इव; इवाण्डजाः; इह; तत्र (for अथ ),

(०३) (१)तु (for च),

(०४) (१)तं विना (for तमृते); पुरुषब्याघ्राः; ते नरव्याघ्राः; ऋते तेन नरव्याघ्रा; सुखम् (for मुदम् ); अप्राप्तवन्तः; अवाप्तवन्तः ते(for वै ); -घ अधिकपाठः

(काम्यके भीमनकुला निवसन्तीह दुःखिताः,)

(०५) (१)परिक्रान्ताः (२)तीक्ष्णबाणैर् शुद्धबाणैर् महामृगान्; (३) भरतव्याघ्राः; श्रेष्ठाः; भरतशादूल; (४) तथा (for मृगान्),

(०६) (१)व्याघ्र; (२) पाण्डवा जनमेजय; वन्याहारा अरिन्दमाः; वन्याहारा दो ( ०राण्य ) ०रिन्दमाः;

**एवं ते सन्न्यवसंस्तत्र सोत्कण्ठाः पुरुषर्षभाः ।****
**विषण्णावदनास्तत्र गते राजन्धनञ्जये ॥ १० ॥**[०१]

**अथ विप्रोषितं राजन् पीश्चाली मध्यमं पतिम्।**
**स्मरन्ती पाण्डवश्रेष्ठमिदं वचनमब्रवीत् ॥ ११ ॥**[०२]

**द्रौपदी**

**योऽर्जुनेनार्जुनस्तुल्यो द्विबाहुर्बहुबाहुना ।**
**तमृते पाण्डवश्रेष्ठं वनं लकाभीति मामकम् ॥ १२ ॥**[०३]

**शून्यामिव प्रपश्यामि तत्र तत्र महीमिमाम् ।**
* (विना तेन महीनाथ शक्रप्रतिमतेजसा )
**बह्वाश्चर्यमिदं चापि वनं कुसुमितद्रुमम् ॥ १३ ॥**

**न तथा रमणीयं वै तमृते सव्यसाचिनम् ।**[०४]
**नीलाम्बुदसमप्रख्यं मत्तमातङ्गविक्रमम्।**
**तमृते पुण्डरीकाक्षं काम्यकं नातिभाति मे ॥ १४ ॥**[०५]

**यस्य वा धनुषो घोषः श्रूयते चाशनिस्वनः ।**
**न लभे शर्म नं राजन्स्मरन्ती सव्यसाचिनम् ॥ १५ ॥**[०६]

---

(३)क०ध०प्रविहृत्य विप्रहृत्य; उपाकृत्य; विनिःसृत्य; विप्रकृत्य; उपकृत्य; प्रवि०ः परिसृत्य; प्रविहृत्य (for विप्र ),

(०१) (१)सर्वे सं० (for एवं ते ); (२) शोकार्ताः (for सोत्कण्ठाः); (३) प्रहृष्टमनसः विषण्णवदनाः (मनसः,

(०२)(१)अथैनं; अथ तं (for अथ वि०); राजन् (for वीरं ); विशेष० तस्तु ०(श्च) पाश्चलि; (२) स्मरन्ती (for पाश्चाली ) पाश्चाली आयुधं प्रति; (३) उद्विग्नं; ०उद्विग्ना; आत्मानं (for स्मरन्ती ); पाण्डवं ज्येष्ठम्; पाण्डवज्येष्ठम्,

(०३)(३)तं विनाfor तमृते; श्रेष्ठ; ०ज्येष्ठ; (४) वनं न विराजते; वनं नाभाति मामिदं; एव for इव ,

(०४)(३)वै; ते (for मे ); (४) तं विना (for तमृते ),

(०५)(१)नीलाञ्जनसमप्रख्यं; नीलाम्बुदचयप्रख्यं; (२) गामिनं; (३)तं विना (for तमृते ); (४) वनं न (for काम्यकं ); प्रतिभाति; नाद्य भाति; नाभ्यभाति; मा (for मे),

(०६)(१)वा (for स्म ); (२) श्रूयते चाशुनिस्वनः; (३) श्रूयते स्यास्य निस्वनः; ते; वै (for तं ); तस्याहं

वैशम्पायनः

तथा लालप्यमानां तां निशम्य परवीरहा ।**
भीमसेनो महाराज द्रौपदीमिदमब्रवीत् ॥ १६ ॥(०१)

भीमः

ममप्रीतिकरं भद्रे यद्ब्रवीषि सुमध्यमे ।**
तन्मे प्रीणाति हृदयममृतप्राशनोपमम् ॥ १७ ॥ (०२)
यस्य दीर्घौ समौ पीनौ भुजौ परिघसन्निभौ ।**
मौर्वीकृतकिणौ वृत्तौ खड्गायुधधनुर्धरौ ॥ १८ ॥(०३)
निष्काङ्गदकृतापीडौ पञ्चशीर्षाविवोरगौ ।**
तमृते पुरुषव्याघ्रं नष्टसूर्यनिभं वनम् ॥ १९ ॥(०४)
यमाश्रित्य महाबाहुं पाञ्चालाः कुरवस्तथा ।**
सुराणामपि मत्तानां पृतनासु न बिभ्यति ॥ २० ॥(०५)
यस्य बाहू समाश्रित्य वयं सर्वे महात्मनः ।**
मन्यामहे जितानाजौ परान्प्राप्तां च मेदिनीम् ॥ २१ ॥(०६)
तमृते फाल्गुनं वीरं न लभे काम्यके धृतिम् ।**

---

(for तं राजन् ); लभे शर्म न ते राजन्; (४) सव्यसाचिनः; तं स्मरन्ती किरीटिनं,
(०१) (२)निशाम्य; निवास्य for निशम्य-ख ; (३) महाबाहुर् for महाराज -ग); (४) वाक्यम् for इदम् ),
(०२) (१) मम (for मनः० ),
(०३)(१) समौ भुजौ; (३) मौर्वीकिणकृतौ वृत्तौ; (४) खड्गायुधधरौ समौ-ग; खड्गागायुद्धधरौ उभौ; खड्गायुध(खड्गयुद्ध) धनुर्धरौ; चारुरूपौ (उग्रायुधः) गदाधरौ-ख; खड्गयुद्धविशारदौ; खड्गायुधगदायुधौ,
(०४) (१) अ०ध०अर्धचतुष्टयं नास्ति ।-घ अधिकः-

सुवर्णकठकावेव कृतावापीजडाययौ ।

(३) तं० विना (for तमृते ); (४) नष्टसूर्यसमं; निभं; जगत् (for वनम् ) नष्टसूर्यमिवाम्बरं,
(०५) (२)पञ्चालाः (४) विव्यथुः (for बिभ्यति ),
(०६) (१) ख०अर्धचतुष्टयं बाहुं; (३) निहत्याजौ; हतानाजौ (for जिता ),

**शुन्यामिव कच पश्यामि तत्र तत्र महीमिमाम् ।। २२ ।।**

* पश्यामि च दिशः सर्वास्तिमिरेणावृता इव ।(०१)

शून्यमेव जगत्सर्वमखिलम्प्रतिभाति मे ।।

* पश्यामि च दिशः सर्वाखिमिरेणावृता इव ।

ततोऽब्रवीत्साश्रुकण्ठो नकुलः पाण्डुनन्दनः ।(०२)

* यस्मिन्दिव्यानि कर्माणि कथयन्ति रणाजिरे।

देवा अपि युधां श्रेष्ठं तमृते का रतिर्वने।।

**नकुलः**

**उदीचीं यो दिशं गत्वा जित्वा युधि महाबलान् ।****

**गन्धर्वमुख्याञ्छतशो हयाँल्लेभे सवासविः ।। २३ ।।**(०३)

* यस्मिन्दिव्यानि कर्माणि कथयन्ति रणाजिरे ।

देवा अपि युधां श्रेष्ठं तमृते का रतिर्वने ।(०४)

**राजंस् तित्तिरिकल्माषाञ्छ्रीमतोऽनिलरंहसः ।****

**प्रादाद्भ्रात्रे प्रियः प्रेम्णा राजसूये महाक्रतौ ।। २४ ।।**(०५)

**तमृते भीमधन्वानं भीमादवरजं वने ।****

**कामये काम्यके वासं नेदानीममरोपमम् ।। २५ ।।**(०६)

**सहदेवः**

---

(०१)(१)विना (for तमृते ); फाल्गुनं (२) रतिं (for धृतिम् ); धृतिं न लभते वने; अपि (for इव ),

(०२) (१) अमु (for साश्चु०),

(०३) (१) यः उदीचीं; (२) जित्वा युधि; शतशो; (४) महाद्यु(म)तिः (for स वासविः),

(०४) (१) यस्य; यदि (for यस्मिन् ); दिव्यानि कर्माणि; विद्याश्च; कर्माणि (for दिव्यानि ); दृष्टानि (for कर्माणि ); युधां श्रेष्ठे; सुराः श्रेष्ठात् (for युधां श्रेष्ठं ); गतिर् (for रतिर् );,

(०५) (१)तदा; राज्ञे; हयान् (for राजन् ); तित्तिरं; (२) श्रीमतोनिल,

(०६) (१)विना (for तमृते ); भीमकर्माणं; (२) अनवरं (for अवरजं ); सर्व० शास्त्रभृतांवरं; (३) भूचिरये काम्यके; काम्यके कामये; (४) अम रोपम,

**यो धनानि च कन्याश्च युधि जित्वा महारथान् ।****
**आजहार पुरा राज्ञे राजसूये महाक्रतौ** ॥ २६ ॥(०१)

**यः समेतान्मृधे जित्वा यादवानमितद्युतिः ।****
**एकस्सुभद्रामारेध्र वासुदेवस्य सम्मते** ॥ २७ ॥(०२)

**येनार्धराज्यमाच्छिद्य द्रुपदस्य महात्मनः ।**
**आचार्यदक्षिणा दत्ता रणे द्रोणस्य भारत** ॥२८॥(०३)

**तस्य जिष्णोर्बृसीं दृष्ट्वा शून्यामुप निवेशने ।****
**हृदयं मे महाराज न शाम्यति कदाचन** ॥ २९ ॥(०४)

लक्षालङ्कारः- तस्य जिष्णोर्बृसीम् इत्यत्र 'व्रतिनामासनं बृसी' इत्यभिधानात् दर्भमयासनं बृसि इत्युच्यते ।

**वनादस्माद्विवासं तु रोचयेऽहमरिन्दम ।****
**न हि नस्तमृते वीरं रमणीयमिदं वनम्** ॥ ३० ॥(०५)

**वैशम्पायनः**

**धनञ्जयोत्सुकानां तु वने तस्मिन् महीरथाः****
**व्यवसन्त महान्नागा द्रौपद्या सह कृष्णया** ॥ ३१ ॥(०६)
*

---

(०१)(१)कन्यां च; (२) महा० रथः; ०बलः; ०बलान्; महा; परान्; पुनह् (for पुरा ); राज्ञः; जज्ञे (for राज्ञे ); - घ अधिकः - शतशो घातयित्वाऽरीन् पृतनामध्यगस्तदा,

(०२) (१)युधि; पुरा (for मृधे ); (३) एवं सुभद्रामारोप्य; एक एवाहरद्; (४) सन्त्रत्वे (for संमते ),

(०३) (१) तेन सख्यं समाचक्ष्व

(०४)(१) इव; मम; अपि, ख-घ- गुरोर्द्रो० (for उप० ),

(०५) (२) ()यम् (for ऽहम् ); अनिं० दिते (for अरिन्दम ); (३) तं विना (for तमृते ),

(०६)(४) कृष्णया (for पाण्डवाः ), घ अधिकः -

धनञ्जयोत्सुकानां तु भ्रातॄणां कृष्णया सह ।
श्रुत्वा वाक्यानि विमना धर्मराजोऽप्यजायत ॥

(१) एवं शोद्ध्यतांस्तांस्तु; सह भार्यया (for कृष्णया सह ); महायशाः (for प्यजायत ),

**अथापश्यन्महात्मानं देवर्षिं तत्र नारदम् ।****
**दीप्यमानं श्रिया ब्राह्म्या  दीप्ताग्निसमतेजसम्  ॥ ३२ ॥**[०१]

*  तमागतमभिप्रेक्ष्य भ्रातृभिः सह धर्मराट् ।
*  प्रत्युत्थाय यथान्यायं पूजां चक्रे महात्मने।।

**स तैः परिवृतः श्रीमान्भ्रातृभिः कुरुसत्तमः ।****
**विबभावतिदीप्तौजा दैवैरिव शतक्रतुः  ॥ ३३ ॥**[०२]

**यथा च वेदान्सावित्री याज्ञसेनी तथा सती ।****
**न जहौ धर्मतः पार्थान्मेरुमर्कप्रभा यथा  ॥ ३४ ॥**[०३]

**अर्घ्यं पाद्यमथानीय त्वभ्यवादयदच्युतः ।****
**नारदस्तु महातेजास्स्वस्त्यस्त्वित्यभ्यभाषत  ॥ ३५ ॥**

*  ततो युधिष्ठिरो राजा दृष्ट्वा देवर्षिसत्तमम् ।
*  यथार्हं पूजयामास विधिवत्कुरुनन्दनः ।।

**प्रतिगृह्य च तां पूजां नारदो भगवानृषिः ।****
**आश्वासयद्धर्मसुतं युक्तरूपमिवानघ  ॥ ३६ ॥**[०४]

**उवाच च महाप्राज्ञंधर्मराजं युधिष्ठिरम् ।****
**ब्रूहि धर्मभृतां श्रेष्ठ केनार्थः किं ददामि(ददानि) ते  ॥ ३७॥**[०५]

**वैशम्पायनः**

---

(०१)  (४)सूर्याग्नि;  हुतार्चिष; मिवानलं,
(०२) (२)कुरुनन्दन; (३) विभाति स्म सुदीप्तौजा; विबभौ हि सु; प्रभा; (४) पितामहः (for शत ),
(०३)(१)यथेव (for यथा च ); वेदानि; वेदान्हि; च वेदैः; च देवान् (for च वेदान् -ख); (२) तथा सती; पतीन्; पती (for सती ),
(०४) (१)च तां; ततः; शुभां; स तां (for तु तां ); (३) आश्वासयन्; (४) इहा (for इवा ); उवाच वदतां वरः,
(०५) (१)महाप्राज्ञं; (२) पुत्रं (for राजं ); (४) केनार्थी; ददानि,

**अथ धर्मसुतो राजा प्रणम्य भ्रातृभिः सह ।****
**उवाच प्राञ्जलिर्वाक्यं नारदं देवसम्मितम् ॥ ३८ ॥**(०१)

**युधिष्ठिरः**

**त्वयि तुष्टे महाभाग सर्वलोकाभिपूजिते ।****
**कृतमित्येव मन्येऽहं प्रसादात्तव सुव्रत ॥ ३९ ॥**(०२)

**यदि त्वहमनुग्राह्यो भ्रातृभिः सहितोऽनघ ।****
**सन्देहं मे मुनिश्रेष्ठ हृद्दिस्थंछेत्तुमर्हसि ॥ ४० ॥**(०३)

**प्रदक्षिणां यः प्रतस्ये पृथिवीं तीर्थतत्परः ।****
**किं फलं तस्य कार्त्स्न्येन त्वंब्रहन्वक्तुमर्हति ॥ ४१ ॥**(०४)

अस्मिन् तीर्थयात्रापर्वणि ६४ अध्याये ४१ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि चतुषष्टितमोऽध्यायः ॥ ६४ ॥**

( तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 065

# ६५. पञ्चषष्टितमोध्यायः

नारदेन तत्कथनाय पुलस्त्यभीष्मसंवादानुवादः ॥१॥ पुलस्त्येन भीष्मं प्रति पुष्करादितीर्थमहिमानुवर्णनम् ॥२॥

---

(०१)(२)प्रत्यभाषत सत्तम; (३) भूत्वा (for वाक्यं ); (४) देवसंमतं; सत्तम,
(०२)(१)तुष्टे त्वयि; त्वयि दृष्टे; महाभागे; (३) सन्देहं; मन्यामि; मन्यामः (for मन्येऽहं ),
(०३) (१)तेहम् (for त्वहम् ); (४) तत्त्व० तशू; तत्वविचू (for हृदिस्थं ); अर्हति; हृदि सञ्छे( ०वे)त्तुमर्हसि,
(०४) प्रदक्षिणां; प्रतीक्षणं; कुरुते पृथिवीं; पृथिवीं (for कुरुते ); कुर्याद्वै (for पृथिवीं ); (४) ध०-मर्हसि ब्रह्मन् तद्; त्वं ब्रह्मन्; भवान्; फलं (for ब्रह्मन् ),

**नारदः**

**शृणु राजन्नवहितो यथा भीष्मेण भारत ।****
**पुलस्त्यस्य सकाशाद्वै सर्वमेतदुपश्रुतम् ॥ १ ॥**(०१)
**पुरा भागीरथीतीरे भीष्मो धर्मभृतां वरः ।****
**पित्र्यं व्रतं समास्थाय न्यवसन्मुनि वत् तदा ॥ २ ॥**(०२)
**शुभे देशे महा राजन्पुण्ये देवर्षिसेविते ।****
**गङ्गाद्वारे महाभाग देवगन्धर्वसेविते ॥ ३ ॥**(०३)
**स पितंस्तर्पयामास देवांश्च परमद्युतिः ।****
**ऋषींश्च तोषयामास विधिदृष्टेन कर्मणा ॥ ४ ॥**(०४)
**कस्यचित्त्वथ कालस्य जपन्नेव महातपाः ।****
**ददर्शाद्भुतसङ्क ाशं पुलस्त्यमृषिसत्तमम् ॥ ५ ॥**(०५)
**स तं दृष्ट्वोग्रतपसं दीप्यमानमिव श्रिया ।****
**प्रहर्षमतुलं लेभे विस्मयं परमं ययौ ॥ ६ ॥**(०६)
**उपस्थितं महाभागं पूजयामास भारत ।****
**भीष्मो धर्मभृतां श्रेष्ठो विधिदृष्टेन कर्मणा ॥ ७ ॥**(०७)
**शिरसा चार्घ्यमादाय शुचिः प्रयतमानसः ।****

---

(०१)(२)धीमता (for भारत ); (३) हि (for वै ),
(०२) (३)पैत्र्यं; पित्र्यर्थव्रतमास्थाय; (४) मुनिभिः सह (for वत्तदा ),
(०३) (१) ख०इदमर्धं नास्ति । तथा (०दा) राजन् (for महा० ); (२) देवर्षिवर्जिते; पूजिते; (३) भाग; देशे (for तेजा),
(०४)(२)परमर्षिभिः; (३) तर्प (for तोषं ),
(०५) (२)यशाः; मनाः ०रथः (for तपा ); (३) ददर्शादित्यसङ्काशं; द्भुतत्त्वर्णां,
(०६) (४)परमं (for च परं),
(०७) (१)भाग; भागं (for राज ),

**नाम सङ्कीर्तयामास तस्मिन्ब्रह्मर्षिसत्तमे ॥ ८ ॥**(०१)

**भीष्मः**

**भीष्मोऽहमस्मि भद्रं ते दासोऽस्मि तव सुव्रत ।****

**तव सन्दर्शनादेव मुक्तोऽहं सर्वकिल्बिषैः ॥ ९ ॥**(०२)

**नारदः**

**एवमुक्त्वा महाराज भीष्मो धर्मभृतां वरः ।****

**वाग्यतः प्राञ्जलिर्भूत्वा तूष्णीमासीद्युधिष्ठिर ॥ १० ॥**(०३)

**तं दृष्ट्वा नियमेनाथ स्वाध्यायाम्नायकर्शितम् ।****

**भीष्मं कुरुकुलश्रेष्ठं मुनिः प्रीतमनाऽभवत् ॥ ११ ॥**

**सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते**(०४)

* ततः स मधुरेणाथ स्वरेण सुमहातपाः ।

उवाच वाक्यं धर्मज्ञः पुलस्त्यः प्रीतमानसः ॥

**पुलस्त्यः**

**अनेन तव धर्मज्ञ प्रश्रयेण दमेन च ।****

**सत्येन च महाभाग परितुष्टोऽस्मि सर्वशः ॥ १२ ॥**(०५)

**यस्येदृशस्ते धर्मोऽयं पितृवाक्याश्रितोऽनघ ।****

---

(०१) (१) ख०इदमर्धं नास्ति चार्घम् (for चार्य्यम् ); शिरसा चार्चयामास; (४) ब्राह्मणसत्तमे; ब्रह्मर्षिसेविते,

(०२) (१)इति (for अस्मि ); धर्मात्मन्; धर्मज्ञ (for भद्रं ते ); (२) तव दासोस्यि सुं; (४) ०संशयैः; किल्बिषाद,

(०३) (१)बहुर् (for राज ); (३) प्रयतो; प्रणतो (for प्राञ्जलि),

(०४) (२)स्वाध्यायाम्नायकर्षितं; मुत्तमं; स्वाध्यायेन च कर्षितं; स्वाध्यायाच्च विकर्षितं; स्वाध्यायेनाथ कर्षितं,(३)कुरुः श्रीमान्ः; कुरुवरश्रेष्ठ; (४) प्रीतमना अभूत्; प्रीतोभवत्तदा; प्रीतमनाब्रवीत्;

(०५) (२)प्रणयेन (for प्रश्र ); (४) (ऽ)हं (for ऽस्मि ); नित्यशः; सुव्रत (for सर्वशः ); तुष्टोस्मि भरतर्षभ; परितुष्टोस्मि सर्वशः,

**तेन पश्यसि मां पुत्र प्रीतिर्घ्रस्ति मम त्वयि ॥ १३ ॥[०१]**

**अमोघदर्शी भीष्माहं ब्रूहि किं करवाणि ते ।****

**यद्वक्ष्यसि कुरुश्रेष्ठ तस्य दातास्मि तेऽनघ ॥ १४ ॥[०२]**

**भीष्मः**

**प्रीते त्वयि महाभाग सर्वलोकाभिपूजिते ।****

**कृतमित्येव मन्येऽहं यदहं दृष्टवान्प्रभुम् ॥ १५ ॥[०३]**

**यदि त्वहमनुग्राह्यस्तव धर्मभृतां वर ।****

**वक्ष्यामि हृत्स्यं सन्देहं तन्मे त्वं वक्तुमर्हसि ॥ १६ ॥[०४]**

**अस्ति मे भगवन् कश्चित्तीर्थानि प्रतिसंशयः ।****

**तमहं श्रोतुमिच्छामि पृथक् सङ्कीर्तितं त्वया ॥ १७ ॥[०५]**

**प्रदक्षिणां यः पृथिवीं करोत्यमितविक्रमः ।****

**किं फलं तस्य विप्रर्षे तन्मे ब्रूहि तपोधन ॥ १८ ॥[०६]**

**पुलस्त्यः**

**हन्त तेऽहं प्रवक्ष्यामि यद्दषीणां परायणम् ।****

---

(०१)(२)ख०अर्धचतुष्टयं ०भक्त्या श्रु (श्रि)तेन च; भक्त्या ततोनघ; ०वाक्याश्रितोनघ; (४) अस्ति; ह्यस्ति; चास्ति (for चापि ); प्रीतिश्च परमा त्वयि,

(०२) (१)भीष्मोऽहं,

(०३)(१)त्वयि तुष्टे (for प्रीते त्वयि ); महाब्रह्मन्; (३) भागे; मन्यामि; पश्यामि (for मन्येऽहं ); कृतमेतावता मन्ये; मन्येहं कृतमित्येव; (४) यदिष्टं दिष्टवान्प्रभुं; यत्त स्वां दिष्टवानहं; (सि) यत्प्रभुं,

(०४)(३)सन्देहं ते ( ०हात्ते; हं तु ) प्रवक्ष्यामि; प्रक्ष्यामि कृत्सं सन्देहं; (४) छेत्तुम्; वेत्तुम् (for वक्तुम् ),

(०५)(१) ख०-अर्धत्रयं नास्ति हृदये (for भगवन् ); (२) धर्मसश्श्रयं; सङ्ग्रहः , तीर्थानि प्रति (सुमहान्हृदि) संशयः; (३) यदहं (for तमहं ); (४)तद्भवान्वक्तुमर्हति; (सि); त्वत्तो वै मुनिसत्तम,

(०६)(१)प्रदक्षिणां; कुरुते (for पृथिवीं ० ); (२) करोत्यमितविक्रमः; करोत्यमरसंनिभ (भं); पृथिवीं (कुरुते)०तर्थि०, तत्परः (३) यत् (for किं ); ब्रह्मर्षे; देव (for विप्र ); (४) यथातथं; सुनिश्चितं; विनिश्चितं (for तपो ),

**तदेकाग्रमनाः तात शृणु तीर्थेषु यत्फलम् ॥ १९ ॥**(०१)

**यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।****

**विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ २० ॥**

**प्रतिग्रहादपावृत्तः सन्तुष्टो येन केनचित् ।****

**अहङ्कारनिवृत्तश्च स तीर्थफलमश्नुते ॥ २१ ॥**(०२)

**अकल्कको निरारम्भो लघ्वाहारो जितेन्द्रियः ।****

**विमुक्तः सर्वपापेभ्यः स तीर्थफलमश्नुते ॥ २२ ॥**(०३)

लक्षालङ्कारः- अकल्कको निरारम्भ इत्यत्र अकल्ककः कल्को नाम पादश्रमक्षुत्पिपासादिश्रम परिहाराय कृतौषधविशेषः, तद्रहित इतयर्थः ।

**अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः ।****

**आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥ २३ ॥**

**ऋषिभिः क्रतवः प्रोक्ता वेदेष्विह यथाक्रमम् ।****

**फलं चैव यथातत्त्वं प्रेत्य चेह च सर्वशः ॥ २४ ॥**(०४)

**न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं महीपते ।****

**बहूपकरणा यज्ञा नानासम्भारविस्तराः ॥ २५॥**

**प्राप्यन्ते पार्थिवैरेनैः समृद्धैर्वा नरैः क्वचित् ।****

**नार्थन्यूनैर्नावगणैरेकात्मभिरसंहतैः: ॥२६॥**(०५)

---

(०१) (१)हन्त (अहं) ते सम्प्रवक्ष्यामि; हन्त तै कथयिष्यामि; कथयिष्यामि तदहं (तत्सर्वं); अहं तत्ते प्रवक्ष्यामि; (२) यत् ऋषीणां; पुरातनं (for परं ); तीर्थयात्रां परायणां; (३) पुत्र (for तात ); तदेकाग्रेण मनसा; (४) या गतिः (for यत्फलम् ),

(०२) (१)क अ०घ०अधचतुष्टयं नास्ति । अपावृत्तः (for उपा० ); (२) दृष्टो येन केनचित्,

(०३)(१)लम्भो; लम्बो (for रम्भो ); (३) सर्वदोषेभ्यः; पापेभ्यः; दोषैस्तु; ०दोषैश्च; विद्या तपश्च कीर्तिश्च

(०४) (१)क्रतुभिः (for क्रतवः ); (२) देवेषु; देवेभ्यः ( वेदेभ्यः) (for ); च; (३) यथातथ्यं; ०वृत्तं,

(०५) (१) एतैः; चैव; वेत्ति; एव (for एते ); (२) सह ; (for क्वचित् ); (३) नार्थहीनैरवगणैः; ०न्यूनैर्नावगणैः; ०न्यैरव(प)शुपैः घृणैरपि गणैः; रविगुणैः; तीर्थाभूतैरवगणैः; ०क्रार्थन्यूनोपकरणैः; (४) परात्मभिद्; तुल्या;

**यो दरिद्रैरपि विधिः शक्यः प्राप्तुं नरेश्वर ।****
**तुल्यो यज्ञफलैः पुण्यैस्तं निबोध युधां व ॥ २७ ॥**(०१)
**ऋषीणां परमं गुह्यमिदं भरतसत्तम ।****
**तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते ॥ २८ ॥**
**अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्यच ।****
**अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते ॥ २९ ॥**(०२)

लक्षालङ्कारः- अनुपोष्य त्रिरात्राणि इत्यत्र एकैकस्य मारस्य आदौ अन्ते मध्ये च ओकादश्या रात्रित्रयं अनुपोष्येत्यर्थः।

**अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ।****
**न तत्कलं समश्नाति तीर्थाभिगमनेन यत् ॥ ३० ॥**(०३)
**त्रिलोके देवदेवस्य तीर्थं त्रैलोक्यविश्रुतम् ।****
**पुष्करं नाम विख्यातं महाभागः समाविशेत् ॥ ३१ ॥**(०४)
**दशकोटिसहस्राणि तीर्थानां वै महामते ।****
**सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन ॥ ३२ ॥**(०५)
**आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ।****

---

असंहितं; असाधनैः (असंवृतं); असंयतैः; अहिंस०,
(०१) (२)जने (for नरे० ); (४) तन् (for तं ); महीपते (for युधां वर),
(०२)(१)त्रिरात्रं तु (for त्राणि ); (२) (अ)नुपसेन्यः; (अ)नवगाह्य (for (अ)नभिगम्य ); (३) गां (for गाः ),
(०३) (३)समश्नाति; समांशेन (for अवाप्नोति ),
(०४) (१)त्रिलोके; त्रिलोक;० त्रिलो० क्या (for नृलोके ); सर्वतीर्थेषु राजेन्द्र; (३) पुष्करं तीर्थमासाद्य; (४) राज (for भागः ); देवदेवसमो भवेत्; नरो देवसमो भवेत्,
(०५) (१) क०ख०शत शत० (for दश ); (२) महामते; महाद्युते (for मही ); (३) यान्ति; त्त्यो; तीर्थे; ह्येषां (for येषां ); (४)भरतर्षभः पुरुषर्षभ क्य कुरु ),

**गन्धर्वाप्सरसश्चैव नित्यं सन्निहिता विभो ॥ ३३ ॥(०१)**

**यत्र देवास्तपस्तप्त्वा दैत्या ब्रह्मर्षयस्तथा ।****

**दिव्ययोगा महाराज पुण्येन महतान्विताः ॥ ३४ ॥(०२)**

* तपोविशेषैर्बहुभिः स्त्वनान्यापुर्मशैक्यः ।(०३)

**मनसाप्यभिकामस्य पुष्कराणि मनस्विनः ।****

**पूयन्ते सर्वपापानि नाकपृष्ठे च पूज्यते ॥ ३५ ॥(०४)**

**तस्मिंस्तीर्थे महाभाग नित्यमेव पितामहः ।****

**उवास परमप्रीतो देवदानवसम्मतः ॥ ३६ ॥(०५)**

**पुष्करेषु महाभाग देवाः सर्षिगणाः पुरा ।****

**सिद्धिं सुमहतीं प्राप्ताः पुण्येन महतान्विताः ॥ ३७ ॥(०६)**

**तत्राभिषेकं यः कुर्यात्पितृदेवार्चने रतः ।****

**अश्वमेधा मवाप्नोति ब्रहलोके च पुज्यते । ॥ ३८ ॥(०७)**

**अप्येकं भोजयेद्विप्रं पुष्करारण्यमाश्रितः ।****

**तेनासौ कर्मणा भीष्म प्रेत्य चेह च मोदते ॥ ३९॥(०८)**

---

(०१) (१)चैव (for रुद्राः); (२) रुद्राः साध्या मस्कणैः (४) तत्र (for नित्यं ); प्रभो (for विभो ),

(०२) (२)साध्याश्च मस्तस्तथा,

(०३) (३)दिव्ययोगान्,

(०४)(१)हि (for (अ)पि ); (२) महा त्मनः (for मनं ); (३) पुनन्ति; ( क्यपूयन्ते ); (४) मोद० (for पूज्य ),

(०५) (१)अस्मिंस्तीर्थे; महाराज; महाभागः; (४) संमितः; भगवान्कमलासनः; देवदानवसत्तमः; सेवितः,

(०६) (१)पुष्करेण; महाराज; ०भागाः; तपस्तप्त्वा; (२)क०ख०घ०सर्षिपुरोगमाः सर्षिगणास्तथा; सर्षिगणाः पुरा; ऋषिपुरोगमाः; (३) च समभिप्राप्ताः; परमिकां प्रा; हि समनुप्रा०; समनुसम्प्रा०,

(०७) (१)यः कुर्यात्; (२) पितृदेवांश्च तर्पयेत्; अश्वमेधाद् (for ०मेधं ); फलं प्राहुर्मनीषिण;

**ख- सोऽश्वमेधमवाप्नोति (सर्वपापविनिर्मुक्तः) ब्रह्मलोके च पूज्यते,**

(०८) (२)पुष्करं तीर्थमाश्रितः; (३) तेना० प्रोत्यजिताँल्लोकान्; (४) नन्दति (for मोदते ); ब्रह्मणः सदने स्थितान्,

**शाकैर्मूलैः फलैर्वापि येन वर्तयते स्वयम् ।****

**(तद्वै दद्याद्ब्राह्मणाय श्रद्धावाननसूयकः) ॥ ४० ॥**(०१)

* अपि चाप्युदपात्रेण ब्राह्मणान्स्वस्ति वाचयेत् ।(०२)

**तेनैव प्राप्नुयात्प्राज्ञो हयमेधफलं नरः ।****

**ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा राजसत्तम ॥ ४१ ॥**

**न वियोनिं वर्जयन्त्येते स्नातास्तीर्थेषु भारत ।**(०३)

**कार्तिक्यां तु विशेषेण योऽभिगच्छति पुष्करम् ।****

**फलं तत्राक्षयं तस्य लभते भरतर्षभ ॥ ४२ ॥**(०४)

**प्राप्नुयाध्च नरो लोकान्ब्रह्मणः सदनेऽक्षयान्।**

**सायं प्रातः स्मरेद्यस्तु पुष्कराणि कृताञ्जलिः ।**

**उपस्पृष्टं भवेत्तेन सर्वतीर्थेषु भारत ।****

**प्राप्नुयाच्च नरो लोकान्ब्रह्मणस्सदनेऽक्षयान् ॥ ४३ ॥**(०५)

**जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषस्य वा ।****

**पुष्करे स्नातमात्रस्य सर्वमेव प्रणश्यति ॥ ४४ ॥**(०६)

**यथा सुराणां सर्वेषामादिस्तु मधुसूदनः ।****

---

(०१) (१)शाकैर् (for शाक० ); शाकै० मूलैः फलैर्वापि; (२) वा वर्तते (for वर्तयते ); (४) श्रद्धयाननुसूयवे; हत्वा वाननसूयवान्; श्रद्धावाननसूयवे; चरुं (for प्राप्नु० ); सर्वं (for प्राज्ञो),

(०२) तेनापि प्रेत्यानन्त्याय कल्पते -ख

(०३) ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा राजं; (३) वै (for वि०); न वै योनौ प्रजायन्ते; (४) स्नात्वा (for स्नातास् ); स्नात्वा तीर्थेषु भारत,

(०४) (१)कार्तिकीं (की); के (for क्यां ); च (for तु ); (२) योभिगच्छति; (३) तु चा (for तत्रा ); राजन्; तेन (for तस्य ); (४) भविता; लभते; भवते (for वर्धते ); भवतीत्य (हा )नुशुश्रुमः,

(०५) (३) अ०कघ०अर्धत्वयं नास्ति आप्नुयात् (for प्राप्न० ); स (for च ),

(०६) (२)स्त्रिया वा; स्त्रियं वा; पुरुषोपि वा; षेण वा; षेण वा; (४) सर्वमेतत; तदशेषं (for सर्वमेव ); विनश्यति तत्सर्वं सम्प्रणश्यति,

**तथैव पुष्करं राजंस्तीर्थानामादिरुच्यते ॥ ४५ ॥**(०१)

**उष्य द्वादश वर्षाणि पुष्करे नियतः शुचिः ।****

**क्रतून्सर्वानवाप्नोति ब्रह्मलोकं स गच्छति ॥ ४६ ॥**(०२)

**यस्तु वर्षशतं पूर्णमग्निहोत्रमुपासते ।****

**कार्तिकीं वा वसेदेकां पुष्करे सममेव तत् ॥ ४७ ॥**(०३)

* त्रीणि शृङ्गाणि शुभ्राणि त्रीणि प्रस्रवणानि च ।

* पुष्कराण्यादिसिद्धानि न विद्मस्तत्र कारणम् ।। ख- अधिकपाठः

(अत्र पुष्करस्तुतिप्रस्तावे विषमश्लोकव्याख्यायां त्रीणि शृङ्गाणि इति श्लोकः पठितो व्याख्यातश्च । इदानीं मन्दबुद्धिभिर्दुर्व्याख्येयतया परित्यक्त हति न पुस्तकान्तरेषु दृश्यते । अत्र प्राचां व्याख्या । श्रयतेः शृणातेर्वा शृङ्गाणि मुमुक्षुभिराश्रयणीयानि पापहिसकानि वा इति ।।- बोरिपुस्तके )

**दुष्करं पुष्करे गन्तुं दुष्करं पुष्करे तपः ।****

**दुष्करं पुष्करे दानं वस्तुं चैव सुदुष्करम् ॥ ४८ ॥**(०४)

**उष्य द्वादशरात्रं तु नियतो नियताशनः ।****

**प्रदक्षिणमुपावृत्तो जम्बूमार्गं समाविशेत् ॥ ४९ ॥**(०५)

**जम्बूमार्गं समाविश्य देवर्षिपितृसेवितम् ।****

---

(०१) (३)पुष्करो (for रं ),

(०२) (१)प्रोष्य; प्रोक्ष्य; उष्ट्वा (व्युष्य) (for उष्य ); रात्राणि ख -for वर्षाणि ); उषित्वा दश वर्षाणि वसते दश रात्राणि; (३) ऋतून्; (४) स (for च ),

(०३) (२)उपाचरेत्; उपाश्नुते (for उपासते ),

(०४) (१)पुष्करं (for दुष्करं ); पुष्करे (for पुष्करं ); (२) दुष्करं पुष्करे; पुष्करं for दुष्करं ); पुष्करं (for पुष्करे),

(०५) (१)तत्र; यद्वा; उष्ट्वा (व्युष्य) तस्माद् (for उष्य ); वर्षाणि; रात्रि तु; रात्राणि (for रात्रं तु ); (२) नियतात्मनः; ०स्मकः (३) उपावृत्तं; उपावृत्त्य; (४) जम्बुमार्गं; जबूमार्गात्; उपाविशेत्; उपाश्नुते,

**अश्वमेधमवाप्नोति स्वर्गलोके च पूज्यते ॥ ५० ॥**(०१)

**तत्रोष्य रजनीः पञ्च षष्ठकालक्षमी नरः ।****

**न दुर्गातिमवाप्नोति सिद्धिं प्राप्नोति चोत्तमाम् ॥ ५१ ॥**(०२)

**जम्बूमार्गादुपावृत्य गच्छेत्तन्दुलिकाश्रमम् ।****

**न दुर्गतिमवाप्नोति ब्रह्मलोकेच पूज्यते ॥ ५२ ॥**(०३)

**आगस्त्यं सर आसाद्य पितृदेवार्चने रतः ।****

**त्रिरात्रोपोषितो राजन्नग्निष्टोमफलं लभेत् ॥ ५३ ॥**(०४)

**शाकवृत्तिः फलैर्वापि कौमारं विन्दते पदम् ।****

**कण्वाश्रमं ततो गच्छेच्छ्रीजुष्टं लोकविश्रुतम् ॥ ५४ ॥**(०५)

**धर्मारण्यं हि तत्पुण्यमाद्यं च भरतर्षभ ।****

**यत्र प्रविष्टमात्रोऽसौ पापेभ्यो विप्रमुच्यते ॥ ५५ ॥**(०६)

**अर्चयित्वा पितृन्देवान्नियतो नियताशनः ।****

**सर्वकामसमृद्धः स्यात् यज्ञस्य फलमश्नुते ॥ ५६ ॥**(०७)

**प्रदक्षिणं ततः कृत्वा ययातिपतनं व्रजेत् ।****

---

(०१) (१)जम्बुमार्गं; जहि; समा० क्षित्य; उपाविश्य; समासाद्य; (२) पितृदेवर्षिपूजितं; (४) क०ख०-विष्णुलोकं स; घ०विष्णुलोके पूज्यते गच्छति स (for च ) सर्वकामसमन्वितः ( ०तं),

(०२) (२)पूतात्मा भवते नरः; पू (भू); ०तात्मा जायते नरः; पूतात्मा मा(म)नवो भवेत्; (४) आप्नोति; चाप्नोति (for प्राप्नोतिः),

(०३) (१)जम्बुमार्गाद्; उपापृत्य; (२) नन्दुलिकां; तुण्डलिकां; स्थण्डिलिकां; यो गच्छेत्तिन्दुकाश्रमं; (३) तत्रास्य; क्षीयते पापं; (४) ब्रह्म (स्वर्ग)लोकेषु पूज्यते; ब्रह्मलोकं च गच्छति; ब्रह्मलोके च पूज्यते; विष्णुलोकं च गच्छति,

(०४) (१)आगस्त्यं सर; आगस्त्यसर; अ(आ)गस्त्यतीर्थम्,

(०५) (२)फलं; यदि (for पदम् ); (३) ततो गच्छेत्; समाश्रित्य (for साध ); (४) लोकविश्रुतं,

(०६) (२)हि (for च ); अघं भारतसत्तम; आसाघ पुरुष (भरत) र्षभ; (३) ()सौ; ()पि (for वै ); (४) सर्वपापै; प्रमुच्यते,

(०७) (३) समृद्धिः स्याद्,

**हयमेधस्य यज्ञस्य फलं प्राप्नोति तत्र वै ॥ ५७ ॥**

**महाकालं ततो गच्छेन्नियतो नियताशनः ।****

**कोटितीर्थम् उपस्पृश्य हयमेधफलं लभेत् ॥ ५८ ॥**

**ततो गच्छेत धर्मज्ञः स्थाणोस्तीर्थम् उमापतेः ।****

**नाम्ना रु(भ)द्रवटं नाम त्रिषु लोकेषु विश्रुतम् ॥ ५९ ॥**(०१)

**तत्राभिगम्य चेशानं गोसहस्रफलं लभेत् ।****

**महादेवप्रसादाच्च गाणापत्यंमनवाप्नुयात् ॥ ६० ॥**(०२)

**समृद्धमसपत्नं च श्रिया युक्तं नरोत्तमः ।**(०३)

**राज्ञां चैवाधिपत्यं हि तत्र गत्वा समाप्नुयात् ॥ ६१ ॥**

**नर्मदामथ चासाद्य नदीं त्रैलोक्यविश्रुताम् ।****

**तर्पयित्वा पितृन्देवानग्निष्टोमफलं लभेत् ॥ ६२ ॥**(०४)

**दक्षिणं सिन्धुमासाद्य ब्रह्मचारी जितेन्द्रियः ।**

**अग्निष्टोममवाप्नोति विमानं चाधिरोहति ॥ ६३ ॥**(०५)

**चर्मिलामथ सम्प्राप्य नियतो नियताशनः ।****

**रन्तिदेव अभ्यनुज्ञातमग्निष्टोमफलं लभेत् ॥ ६४ ॥**(०६)

**ततो गच्छेत धर्मज्ञं हिमवत्सुतमर्बुदम् ।****

---

(०१) (१)धर्मल्लः (for ०ज्ञ )०; (२) स्थाणुतीर्थमू; स्थाणोस्तीर्थम्; ख्यातं तीर्थम्; ख्याततीर्थम्; स्थानं तीर्थम्; पुष्यं स्थानम्; स्थाणोः ; (३) रुद्र० (for मद्र०,

(०२) (१)तु (for च ); (३) प्रसादेन; (४) स (च) विन्दति (for अवाप्नुयात् ),

(०३) (१) समृद्धः सर्वकाली च; श्रिया युक्तो; नरोत्तमं; नरोत्तमः; नराधिप,

(०४) (१)सम्प्राप्य (for चासाद्य ); नर्म० दामथमासाद्य; नर्मदां तु (स) समा; नर्मदापथमा,

(०५) क०ख०-अर्धचतुष्टयं नास्ति

(०६) (१)चर्मिला (चर्मस्था)मथ सम्प्राप्य; (२) नदीं त्रैलो क्यविश्रुतां; (३) ज्ञातं; ज्ञाता; ज्ञानात्; (४) त्वग्नि; न्नग्नि (for अग्नि० ),

**पृथिव्यां यत्र वै छिद्रं पूर्वमासीद्युधिष्ठि ॥ ६५ ॥**[०१]

**तत्राश्रमो वसिष्ठस्य त्रिषु लोकेषु विश्रुतः ।****

**तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ ६६ ॥**[०२]

**पिङ्गतीर्थम् उपस्पृश्य ब्रह्मचारी समाहितः ।****

**कपिलानां नरश्रेष्ठ शतस्य फलमश्नुते ॥ ६७ ॥**[०३]

**ततो गच्छेत तद्धत्तं तीर्थं देवनिषेवितम् ।**

**स्नात्वा तत्र नरो भाति विमलश्चन्द्रमा यथा ।**

**ततो गच्छेत राजेन्द्र प्रभासं लोकविश्रुतम् ॥६८॥**

**तत्र सन्निहितो नित्यं स्वयमेव हुताशनः ।****

**देवतानां मुखं वीर ज्वलनोऽनिलसारथिः ॥ ६९ ॥**[०४]

* तीर्थं देवगणैः पूज्यमृषिभिश्च निषेवितम्।[०५]

**तस्मिंस्तीर्थवरे स्नात्वा शुचिः प्रयतमानसः ।****

**अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति मानवः ॥ ७० ॥**[०६]

**ततो गत्वा सरस्वत्याः सागरस्य च सङ्गमे**

**गोसहस्रफलं प्राप्य स्वर्गलोके महीयते ॥७१॥**

**प्रभया दीप्यते नित्यमग्निवद्धरतर्षभ ॥ ७२ ॥**[०७]

---

(०१) (१)धर्मज्ञौ; राजेन्द्र (for धर्मज्ञ ); (३) पृथिव्याः (for व्यां ),

(०२) (१)आश्रमं; आश्रमे; वशिष्ठस्य; (४) विश्रुतं,

(०३) (१)गङ्गातीरम्; गङ्गातीर्थम्; पिङ्ग०; पिङ्गतीर्थ; पिडतीर्थम्; कपि; (२) नरा० धिप(पः); समाहितः(for जितेन्द्रियः ); (३) श्रेष्ठे (for व्याघ्र),

(०४) (१)राजेन्द्र; धर्मज्ञः (for ज्ञ ); (२) तीर्थमुत्तमं (for लोक ),

(०५) (३)तत्र; अत्र (for यत्र ); चैव; राजन् (for वीर ); ज्वलनो; ज्वलने (for अनलो ),

(०६) (१)तीर्थे नरः (for तीर्थवरे ),

(०७) (२)सङ्गमः; मं (for मे ); (३) तस्य; लब्ध्वा; चैव (for ०प्राप्य ); (४) स्वगर्लोकं; स गच्छति; च गच्छति; च विन्दति (for मही ); प्रभया दीप्यते नित्यमग्निवद्धरतर्षभ,

**(तीर्थे सलिलराजस्य स्नात्वा प्रयतमानसः)**

**तत्र स्नात्वाऽपि राजेन्द्रविमलार्गसमयुतिः।**(०१)

**त्रिरात्रमुषितः तत्रतर्पयेत्पितृदेवताः ।****

**प्रभासते यथा सोमः वाजिमेधं च विन्दति ॥ ७३ ॥**(०२)

**विष्णोर्दुर्वाससा यत्र वरो दत्तो युधिष्ठिर।****

**वरदाने नरः स्नात्वा गोसहस्रफलं लभेत् ॥ ७४ ॥**

**ततो द्वारवतीं गच्छेन्नियतो नियताशनः ।****

**पिण्डारके नरः स्नात्वा लभेद्बहु सुवर्णकम् ॥ ७५ ॥**

**तस्मिंस्तीर्थे महाभाग पद्मलक्षणलक्षिताः ।****

**अद्यापि मुद्रा दृश्यन्ते तदद्भुतमरिन्दम ॥ ७६ ॥**(०३)

**त्रिशूलाङ्कानि पद्मानि दृश्यन्ते कुरुनन्दन।****

**महादेवस्य सान्निध्यं तत्रैव भरतर्षभ ॥ ७७ ॥**(०४)

**सागरस्य च सिन्धोश्च सङ्गमं प्राप्य भारत।****

**तीर्थे सलिलराजस्य स्नात्वा प्रयतमानसः ॥ ७८ ॥**(०५)

**तर्पयित्वा पितन्देवानृषींश्च भरतर्षभ।****

**प्राप्नोति वारुणं लोकं दीप्यमानं स्वतेजसा ॥ ७९ ॥**(०६)

**शङ्कुकर्णेश्वरं देवमर्चयित्वा युधिष्ठिर।**

---

(०१) विराजेत (for च राजेन्द्र ),

(०२) (१)स्नातम्; स्नात्वा (for तत्र ); (२) तर्पयन्; प्रभासति; (३) विराजति; (४) सोश्वमेधं; हयमेधं; वाजि० प्रेत० सोश्वमेधफलं लभेत्, -घ-पाठान्तरम् -

वरदानं ततो गच्छेत्तीर्थं भरतसत्तम,

(०३) (१) अस्मिंस्तीर्थे; महाराज; (२) पुण्यलक्षण० लक्षितः; (४) इवोत्तमं (for अरिन्दम ),

(०४) (४)तत्र वै (for तत्रैव ); कुरुसत्तम; पुरुषर्षभ,

(०५) (२)सङ्गमे०; प्रेत्य भारत; भरतर्षभ; प्राप्य,

(०६) (२)लोकानाप्नोति वारुणान्; ऋषीन्मया० मानसः; (४) दीप्यमानं,

**अश्वमेधाद्दशगुणं प्रवदन्ति मनीषिणः ॥ ८० ॥**[०१]

**प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ।**

**तीर्थं कुरुकुलश्रेष्ठ त्रिषु लोकेषु विश्रुतम् ॥ ८१ ॥**

**दमीति नाम्ना विख्यातं सर्वपापप्रमोचनम्।**[०२]

**यत्र ब्रह्मादयो देवा उपासन्ते महेश्वरम् ॥८२॥**

**तत्र स्नात्वा अर्चयित्वा च रुद्रं देवगणैर्वृतम् ।****

**जन्मप्रभृति पापानि कृतानि नुदते नरः ॥ ८३ ॥**[०३]

**द्रमी चात्र नरश्रेष्ठ सर्वदेवैरभिष्टुताः ।****

**तत्र स्नात्वा नरव्याघ्र हयमेधमवाप्नुयात् ॥ ८४ ॥**[०४]

**जित्वा यत्र महाप्राज्ञ विष्णुना प्रभविष्णुना ।****

**पुरा शौचं कृतं राजन्हत्वा दैवतकण्टकान् ॥ ८५ ॥**[०५]

**ततो गच्छेत राजेन्द्र वसोर्धाराम् अभिष्टुताम् ।****

**गमनादेव तस्यां हि हयमेध मवाप्नुयात् ॥ ८६ ॥**[०६]

**स्नात्वा कुरुकुलश्रेष्ठ प्रयतात्मा लु मानवः ।****

---

(०१) (२)विशां पते (for युधि ); (३) अश्वमेधाद्,

(०२) (१)उपावृत्तो; (३) ०कुल० (for वरं ); (४) सर्वदेवैरभिष्टत; दमी; द्रिमी; द्रमी; दृशी; द्रुमी; शमी; रमी ( क्य०दृमी ); चात्र क्य० नाम्ना ); प्रथितं; विज्ञा (for विख्या ); ०प्रणाशनं; विनाशनं,

(०३) (१)तत्र (for यत्र ); (२) महेश्वरमुपासते; (३) च पीत्वा च; चार्चयित्वा (for (अ)र्चयित्वा च ); तु (for च ); यत्पापं -ख for पापानि ); तत्स्नातस्य प्रणश्यति; कृतानि दह्मर; कृत्वा निर्दहते नरः:; कृत्वा प्रणुदते नरः:; कृतानि प्रणुदेन्नरः,

(०४) (१)ख०अर्धचतुष्टयं नास्ति दमी; द्रिमी (for त्रिमी); दृशी; शमी (for रमी ); द्रुमी (for दृमी ); (२) अभिष्टतः:; अधिष्ठिता; अभिप्रतः:; प्लुता (३)० श्रेष्ठ (for ०व्याघ्र),

(०५) (१)चिता; गत्वा; दृष्ट्वा; इष्ट्वा; स्नात्वा (for जित्वा ); तत्र (for यत्र ); ०यज्ञा; यज्ञैर् (०यज्ञे) (for ०प्राज्ञ); (३)तत्र (for पुरा ;) (४) हत्वा दैतेयदानवान्,

(०६) (२)वसुधाराम्; (३) त्त्यैव; तस्य वै; राजेन्द्र; तस्यां तुः तस्या हि (for तस्यां हि ); (४) ०मेधफलं लभेत्,

**तर्प्य देवान्पितृंश्चैव विष्णुलोके महीयते || ८७ ||(०१)**

**तीर्थे चात्र सरः पुण्यं वसूनां भरतर्षभ ।****

**तत्र स्नात्वा च पीत्वा च वसूनां सम्मतो भवेत् || ८८ ||(०२)**

**सिन्धूत्तमम् इति ख्यातं सर्वपापप्रणाशनम् ।****

**तत्र स्नात्वा नरश्रेष्ठ लभेद्बहु सुवर्णकम् || ८९ ||(०३)**

**ब्रह्मतुङ्गं समासाद्य शुचिः प्रयतमानसः ।****

**ब्रह्मलोकमवाप्नोति सुकृती विरजा नरः || ९० ||(०४)**

**कुमारिकाणां शक्रस्य तीर्थं देवर्षिसोवितम् ।****

**तत्र स्नात्वा नरः क्षिप्रं स्वर्गलोकमवाप्नुयात् || ९१ ||(०५)**

**रेणुकायाः च तत्रैव तीर्थं सिद्धनिषेवितम् ।****

**तत्र स्नात्वा भवेद्विप्रो निर्मलश्चन्द्रमा यथा || ९२ ||(०६)**

**अथ पञ्चनदं गत्वा नियतो नियताशनः ।****

**पञ्चयज्ञानवाप्नोति क्रमशो येऽनुकीर्तिताः || ९३ ||(०७)**

**ततो गच्छेत धर्मज्ञ भीमायाः स्थानमुत्तमम् ।****

---

(०१) (१) कुरुकुलश्रेष्ठ; तत्र स्नात्वा नरश्रेष्ठ; (२) तु भारत; समाहितः; च मानवः; अनुशोचते; (३) चापि (for चैव ); तर्पयित्वा पितृन्देवान्; सन्तर्प्य पितृदेवांश्च,(३) कुरु स्नात्वा;

(०२) (१) चापि (for चात्र ); सरः; वरं; पुनः (for परं ); तत्र(रूपं) (for पुण्यं ), स्नात्वा;,

(०३) (२)विनाशनं,

(०४) (१)भद्रतुङ्ग; ब्रह्मदत्तं; ब्रह्मतीथं; (२)क०सा गतिर्विरजा नरः;ख०सुकृती विगतज्वरः अ० क्रमशो कयेऽनुकीर्तिताः शुचिः( शुचि०) शलिसमन्वितः; (४) गतिं च परमां व्रजेत्,

(०५) (१) अ०अर्धषट्कं नास्ति कुमारकाणां; (२) विधि०; शक्रं (for सिद्ध ); (३) नरश्रेष्ठ; नरः शीघ्रं क्य ( नरः क्षिप्रं ); (४) ब्रह्मलोकम्; स्वर्गलोकम्; वासवं लोकमाप्नुयात्,

(०६) (२)सिद्ध (for देव ); तीर्थ दवेर्षिसेवितं; (३) तत्र स्नात्वा; मर्त्यो (for विप्रो ); स्नात्वा तत्र नरो भाति; (४) निर्मल for विमल ); इव (for यथा ),

(०७) (४)क्रमतो (for क्रमशो ) येत्र; ये प्र०; ये तु,

**तत्र स्नात्वा तु योन्यां वै नरो भरतसत्तम ॥ ९४ ॥(०१)**

**देव्याः पुत्रो भवेद्राजंस्तप्तकुण्डलभूषणः ।****

**गवां शतसहस्रस्य फलं चैवापक्नुयान्महत् ॥ ९५ ॥(०२)**

**गिरिमुञ्जं समासाद्य त्रिषु लोकेषु विश्रुतम् ।****

**पितामहं नमस्कृत्य गोसहस्रफलं लभेत् ॥ ९६ ॥(०३)**

**ततो गच्छेत धर्मज्ञ विमलं तीर्थम् उत्तमम् ।****

**अद्यापि यत्र दृश्यन्ते मत्स्याः सौवर्णराजताः ॥ ९७ ॥**

**तत्र स्नात्वा  नरश्रेष्ठ वाचपोयमवाप्नुयात् ।****

**सर्वपापविशुद्धात्मा गच्छेत परमां गतिम् ॥ ९८ ॥(०४)**

* वितस्तां च समासाद्य सन्तर्प्य पितृदेवताः ।
नरः फलमवाप्नोति वाजपेयस्य भारत ॥

* काश्मीरेष्वेव नागस्य भवनं तक्षकस्य च ।
वितस्ताख्यमिति ख्यातं सर्वपापप्रमोचनम् ॥

* तत्र स्नात्वा नरश्रेष्ठ वाजपेयमवाप्नुयात्।
सर्वपापविशुद्धात्मा गच्छेच्च परमां गतिम ॥

**ततो गच्छेत मलदां त्रिषु लोकेषु विश्रुताम् ।****

**पश्चिमायां तु सन्ध्यायामुपस्पृश्य यथाविधि ॥ ९९ ॥(०५)**

---

(०१) (१)राजद्रें (for धर्मज्ञ ); (३) न (for तु ); (४) ततो; भवेद् (for नरो ); नृपतिसत्तम; भारत,
(०२) (१)राजा (for राजन् ); (२) तप्तकुण्डलभूषणः (काञ्चन० भूषणं; काञ्चनकुडलः ); (४) नरः (for महत् ); फलं प्रा (फलमा) प्रोति मानवः,
(०३)(१)श्रीकुञ्जं तु (च); श्रीकुम्भं तु; गिरिस्तं; श्रीकुड तु (च); (३) नमस्कृत्वा,
(०४) (१)नरो नूनं; नरः क्षिप्रं; नरो राजन्; नरव्याघ्र; (२) वासवं लोकमाप्नुयात्; सौवर्णकमवा०; वाजपेयफलं लभेत्; (३)विमुक्तात्मा; (४) ख०इदमर्धं नास्ति,  गच्छेत; लभते; लभेत; भजेच्च; परमिकां (for च ।परमां ),
(०५) (१)गच्छेच्च (for गच्छेत ); मडवां; मलवां; वडवां; मनलां; वरवां; मनवा; मोडर्ग्यः मचलं (वटपं); मवलं; वडवं for मलदां ); (२) विश्रुतं; (३) च (for तु ),

**चरुं नरेन्द्र सप्तार्चैः यथाशक्ति निवेदयेत् ।****
**पितॄणामक्षयं दानं प्रवदन्ति मनीषिणः ॥ १०० ॥**(०१)

* ऋषयः पितरो देवा गन्धर्वाप्सरसां गणाः ।
गुह्यकाः किन्नरा यक्षाः सिद्धा विद्याधरा नराः ।

* राक्षसा दितिजा रुद्रा ब्रह्मा च मनुजाधिप।
नियतः परमां दीक्षामास्थायाब्दसहस्रिकीम्।

* विष्णोः प्रसादनं कुर्वंश्चरुं च श्रपयंस्तथा।
सप्तभिः सप्तभिश्चैव ऋग्भिस्तुष्टाव केशवम्।।

* ददावष्टगुणैश्वर्यं तेषां तुष्टस्तु केशवः ।
यथाभिलषितानन्यान्कामान्दत्त्वा महीपते।।

* तत्रैवान्तर्दधे देवो विद्युदभ्रेषु वै यथा।
नाम्ना सप्तचरुं तेन ख्यातं लोकेषु भारत।।(०२)

**गवां शतसहस्रेण राजसूयशतेन च ।****
**अश्वमेधसहस्रेण श्रेयान्सप्तार्चिषे चरुः ॥१०१ ॥**(०३)

**ततो निवृत्तो राजेन्द्र भद्रा पदमथाविशेत् ।****
**अभिगम्य महादेवमश्वमेधफलं लभेत् ॥ १०२ ॥**(०४)

**मणिमन्तं समासाद्य ब्रह्मचारी समाहितः ।****

---

(०१) (१)सप्तारुच (कं )चरुं राजन्; चरुं सप्तार्चिषे (० प्तरुचे) राजन्; (२) विधि (for शक्ति ),
(०२)(१) नृपाः; तथा (for नराः ) नागा (for रुद्रा ); नियताः ०सहस्रकीं; ०स्रकां; विष्णोः प्रसादं कुर्वतः; तदा (for तथा ); चरुमश्रपयंस्ततः; चरुं संश्रपयस्तथा; ऋग्भिसुष्टुवुरच्युतं; ततस् (for तेषां ); विश्रुतं (for भारत ),
(०३) (४)समः (for श्रेयान् ); सप्तरुचे चरू; सप्तरुचश्चस्य; सप्तार्चिषे चरू ( वचः); सप्त० ऋचस्तथा,
(०४) (२)रुद्रपदम्; रु(रौ)द्रं पदम्; श्रेयापथम्; रुद्रादित्यदम्; वस्त्रा०पथम्; भद्रापादम्; भद्रापथम्; भद्रापदम् तत्रापि नियतो वसेत्; (३) अभिगत्वा-ख; अर्चयित्वा (for अभिगम्य ),

**एकरात्रोषितो राजन्नग्निष्टोमफलं लभेत्** **॥ १०३ ॥**[०१]

**अथ गच्छेत राजेन्द्र देविकां लोकविश्रुताम् ।****

**प्रसूतिर्यत्र विप्राणां श्रूयते भरतर्षभ** **॥ १०४॥**[०२]

**त्रिशूलपाणेः स्थानं च त्रिषु लोकेषु विश्रुतम् ।****

**देविकायां नरः स्नात्वा समभ्यर्च्य महेश्वरम्** **॥ १०५ ॥**[०३]

**यथाशक्ति चरुं तत्र निवेद्य भरतर्षभ ।****

**सर्वकामसमृद्धस्य यज्ञस्य लभते फलम्** **॥ १०६ ॥**

**कामाख्यं तत्र रुद्रस्य तीर्थं देवर्षिसेवितम् ।****

**तत्र स्नात्वा नरः क्षिप्रं सिद्धिं प्राप्नोति भारत** **॥ १०७ ॥**[०४]

**यजनं याजनं चैव तथैव ब्रह्म वालुकाम् ।****

**पुष्पञ्जय उपस्पृश्य न शोचेन्मरणं गतः** **॥ १०८ ॥**[०५]

**अर्धयोजनविस्तारा पञ्चयोजनमायता ।****

* (एतावती वेदिका तु पुण्या देवर्षिसेविता)

**एतां हि देविकामाहुः पुण्यां देवर्षिसेविताम्** **॥ १०९ ॥**[०६]

**ततो गच्छेत धर्मज्ञ दीर्घसूत्रं यथाक्रमम्** **॥ ११० ॥**

---

(०१) (३) क०ख०त्रिरात्रोपोषितो ; ४)क०ख०ख० ०पोषितो राजन्नश्वमेधफलं गोसहस्रफलं; अश्वमेधं,
(०२) (१)ततो (for अथ ); निवृत्तो (for गच्छेत ); (३) अभयं तत्र; अभयं यत्र (for प्रसूतिर्यत्र ),
(०३) (१)तत्स्थानं; तु स्थानं (for स्थानं च ); (२) यत्र (for त्रिषु ); (४) अभ्यर्च्य च; त तु अथाभ्यर्च्य (for सम ),
(०४) (१)तस्य (for तत्र ); (२) देवनिषेवितं; देवर्षिसंमतं; सिद्धनिषेवितं; (४) प्राप्नोति (for आ० ),
(०५) (१)चैव (for गत्वा ); (२) तत्रैव (for तथैव ); वालुकं; ०बाकुलं; (३) पुष्पभिश्च; पुष्पन्यासम्; पुष्पाम्भश्च; घुष्पाञ्जन; पुण्यञ्जय (for यम् ); पुष्पजायाम् (for न्यास ); (४) मरणे (for णं ); गतः; नरः (for ततः ),
(०६) (१)विस्तारं; विस्तारा; (२) आयता; आयतं; (३) एतां हि (for एतावद् ); एतावती देविकान्तु (च); एतावती (०ता) देविका तु; एतावती वेदिका तु; (४) पुण्यो ०सेविता; पुण्यां संमितां; पुण्यां राजर्षिसेवितां; पुण्या राजनिषेविता,

**तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः ।**

**दीर्घसत्रमुपासन्ते दीक्षिता नियतव्रताः ॥ १११ ॥**[०१]

**गमनादेव राजेन्द्र दीर्घसत्रमरिन्दम ।**

**राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥ ११२ ॥**[०२]

**ततो विनशनं गच्छेन्नियतो नियताशनः ।**

**गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे सरस्वती ॥ ११३ ॥**

**चमसे चमसोद्भेदे नागोद्भेदे च दृश्यते।**[०३]

**क्यतत्र स्नात्वा नरव्याघ्र द्योतते शशिवत्सदा ॥ ११४ ॥**

**गोसहस्रफलं चैवं प्राप्नुयाद्भरतर्षभ।क्य**

**स्नात्वा तु चमसोद्भेदे अग्निष्टोमफलं लभेत् ॥ ११५ ॥**

**शिवोद्भेदे नरः स्नात्वा गोसहस्रफलं लभेत् ।**

* (नागोद्भेदे नरः स्नात्वा नागलोकमवाप्नुयात्)।[०४]

**शतह्रदं च राजेन्द्र तीर्थमासाद्य दुर्लभम् ।**

**शतरूपप्रतिच्छन्नाः पुष्करा यत्र भारत ॥ ११६ ॥**[०५]

**सरस्वत्यां महाराज शतं संवत्सरा हि ते ।**

**सायन्ते भरतश्रेष्ठ वृत्तां वै कार्तिकीं सदा ॥ ११७ ॥**[०६]

---

(०१) (२)यथाश्रुतं; (३) तत्र (for यत्र ); उपासन्त; उपागम्य (for उपासन्ते ); उपासते दीर्घसत्रं; दक्षिणा (०क्षणे; क्षिण) नियतव्रताः; दीक्षिता नियतं,

(०२) (४)आप्नोति (for प्रा ); भारत (for मानवः ),

(०३) (४)मेरु (for मरु ); क्रमशः (for चमसे ); थ; स (for च ); चमसो (for च शिवो ),

(०४) (१)तु(for च) (२) चाग्निष्टोमफलं (वाजिपेय); गोसहस्र; (३) शिलोद्भेदे; (४) गोसहस्रमवामुयात् ,

(०५) (१) क० नृगोद्भेदे नरस्स्नात्वा गोसहस्रमवाप्नुयात् । शतहदं (for शश ); (३) ०प्रति च्छन्ना; शतरूपक्य शतरूपप्रतिच्छन्नाः पुष्करा यत्र भारत।क्य,

(०६) (१)भाग (for राज ); (२) त्वनु; शत०; शतं (for अनु ); संवत्सरा; च ते; इति; हि मे (for हि ते ); (३) दृश्यन्ते; दृश्यते; जायन्ते (for स्नायन्ते ); (४) तथा; तदा (for सदा ),

* तत्र स्नात्वा नरव्याघ्र द्योतते शशिवत्सदा ।**
गोसहस्रफलं चैव प्राप्नुयाद् भरतर्षभ ।।(०१)

कुमारकोटिमासाद्य नियतः कुरुनन्दन।
तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ॥ ११८ ॥
गवां मेधमवाप्नोति कुलं चैव समुद्धरेत् ॥ ११९॥(०२)
ततो गच्छेत धर्मज्ञ रुद्रकोटिं समास्थितः
पुरा यत्र महाराज मुनिकोटिः समागता ।**
प्रहर्षेण च संविष्टा रुद्रदर्शनकाङ्क्षया ॥ १२० ॥(०३)
अहं पूर्वमहं पूर्वं द्रक्ष्यामि वृषभध्वजम् ।**
एवं सम्प्रस्थिता राजन्नृषयः किल भारत ॥ १२१ ॥(०४)
ततो योगेश्वरेणापि योगमास्थाय भूपते ।**
तेषां मन्युप्रणाशार्थमृषीणां भावितात्मनाम् ॥ १२२ ॥(०५)
सृष्टा कोटीस्तु रुद्राणामृषीणामग्रतः स्थिता ।**
मया पूर्वतरं दृष्ट इति ते मेनिरे पृथक् ॥ १२३ ॥(०६)
तेषां तुष्टो महादेवो ऋषीणां भावितात्मनाम्।
भक्त्या परमया राजन्वरं तेषां प्रदिष्टवान् ॥ १२४ ॥

---

(०१) (२)शिववत् (for शशि ); नरः (for सदा )
(०२) (१)कुमारकोटीम्; गनामेयम्; अनामयम्; गवां मेधम् (for गवामयम् ); गवामयुत (यन)माप्नोति,
(०३) (१) राजेन्द्र (for धर्मज्ञ ); (२) रुद्रकोटीं; समास्थितः (४) मुनिकोटीं; मुनिकोटी (टि); ऋषिकोटी०; मुनिकोटिः; मुनिकोट्यः समागता; हिता; ०हितः; गताः; गतः; ऋषिकोटिसमा० गताः; हर्षेण महता विष्टा; हर्षेण च समाविष्टा; हर्षेण महता तिष्ठेर् (ष्ठ)द्; हर्षेण महता युक्ता; रुद्र (for देव ),
(०४) (१)अहं पूर्व समासाद्य; (२) प्रेक्षामि (for द्रक्ष्यामि ); द्रक्ष्यामीति वृषध्वजं,
(०५) (१)योगी० (for योगे ),
(०६) (१)सृष्ढ्वा; हृष्टा (for सृष्टा ); कोटीति; कोटी तु; तु कोटी (for कोटिस्तु ); सृष्टा तु कोटिरुद्राणां (० द्रकोटीणां ); (२) स्थिताः (for स्थिता ); (३) पूर्व नरं; पूर्वमयं; दृष्टं; दृष्टा (for दृष्टः ),

**अद्यप्रभृति युष्माकं धर्मवृद्धिर्भविष्यति।**

**तत्र स्नात्वा नरव्याघ्र रुद्रकोट्यां नरः शुचिः ॥ १२५ ॥**(०१)

**अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् ॥१२६॥**

**ततो गच्छेत राजेन्द्र सङ्गमं लोकविश्रुतम् ।****

**सरस्वत्या महीराज उपासन्ते जनार्दनम् ॥ १२७ ॥**(०२)

**यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः ।****

**अभिगच्छन्ति राजेन्द्र चैत्रशुक्लचतुर्दशीम् ॥ १२८ ॥**(०३)

**तत्र स्नात्वा नरव्याघ्र विन्देद्बहुसुवर्णकम् ।****

**सर्वपापविशुद्धात्मा ब्रह्मलोकं च गच्छति ॥ १२९ ॥**(०४)

**ऋषीणां यत्र सत्राणि समवाप्नोति मानवः ।****

**तत्रावसानमासाद्य गोसहस्रफलं लभेत् ॥ १३० ॥**(०५)

अस्मिन् तीर्थयात्रापर्वणि ६५अध्याये १३०श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पुलस्त्यतीर्थयात्रायां पञ्चषष्ठितमोऽध्यायः ॥ ६५ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 066

# ६६.षट्षष्ठिततमोऽध्यायः

(०१) (१)एवं (for तेषां ); दृष्टो (for तुष्टो ); महादेवः; (२) मुनीनां (for ऋषीणाम् ); भावितात्मनां; धर्मबुद्धिम्; धर्मे बुद्धि,

(०२)(३)सरस्वतीं; ०त्यां; महापुण्याम्; राज; (४) उपासते; उपासीत; केशवं समुपासते; जनार्दनमुपासते,

(०३) (२)ऋषयश्च तपोधनाः; (४) चैत्रे (for चैत्र०); चैत्रं (for चैत्र०) शुक्लत्रयोदशीं,

(०४) (२)लभेद् (for विन्देद् ); (४) शक्रलोकं (for ब्रह्म० ); स गच्छति; गमिष्यति; ब्रह्मलोके महीयते

(०५) (२)समस्तानि (for समा ); समवाप्नोति मानवः; (३) तत्रावसानम्; तत्र च स्नानम्,

पुलस्त्येन भीष्मं प्रति कुरुक्षेत्रे स्थितानां विविधतीर्थानां महत्त्वस्य वर्णनम्, तीर्थमहिमानुवर्णनम् च ।।१।।

**पुलस्त्यः**

**ततो गच्छेत राजेन्द्र कुरुक्षेत्रमभिष्टुतम् ।****
**पापेभ्यो यत्र मुच्यन्ते नद्गनाः सर्वचन्तव : ।।१।।(०१)**

**कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।****
**य एवं सततं ब्रूयात् सोऽपिपापैः प्रमुच्यते ।। २ ।।(०२)**

* पांसवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः ।
अपि दुष्कृतकर्माणं नयन्ति परमां गतिम्।

* दक्षिणेन सरस्वत्या दृषद्वती उत्तरेण च ।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे।।

**तत्र मासं वसेद्धीरः सरस्वत्यां युधां वर ।****
**यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः ।।३ ।।(०३)**

**गन्धर्वाप्सरसो यक्षाः पन्नगाश्च महीपते ।****
**ब्रह्मक्षेत्रं महापुण्यमभिगच्छन्ति भारत ।। ४ ।।(०४)**

**मनसाप्यभिकामस्य कुरुक्षेत्रं युधां वर ।****
**पापानि विप्रणश्यन्ति स्वर्गलोकं च गच्छति ।। ५ ।।(०५)**

---

(०१) (३)पापानि(for पापेभ्यो) यत्र नश्यन्ति(for विप्रभु) (४) दर्शनात्; तद्गत्वा(for तद्गताः)
स्नानमात्रेण सर्वशः; प्रविष्टस्यैव भारत।-घ अधिकपाठः

(०२) (१)क्षेत्रे; (४) सोपि पापात्; सर्वपापैः; सर्वपापात्; विमुच्यते,

(०३) (१)वै सं०; वासं (for मासं ); धीरः (for वीर); (२) जनेश्वरः नराधिप; युधां वर (for युधि ); (३) तत्र(for यत्र) (४) सिद्धा चारणतापसाः; यत्र सिद्धर्षिचारणाः,

(०४) (१)चैव (for यक्षाः); (३) ख०अर्धत्रयं नास्ति । ब्रह्मक्षेत्रे; महत्पुण्यम्,

(०५) (१)मनागप्यभिकामस्य; मनसा गन्तु;मनसा मुक्ति; (२) युधांवर (for युधि); (४) स्वर्ग लोकं; स्वर्गलोके; महीयते; स गच्छति,

**गत्वा हि श्रद्धया युक्तः कुरुक्षेत्रं कुरूद्वह ।****
**(फलं प्राप्नोति च तदा राजसूयाश्वमेधयोः ।)**
**राजसूयाश्वमेधाभ्यां फत्वं प्राप्नोति मानवः ॥ ६ ॥**(०१)

**ततो मचक्रुकं नाम द्वारपालं महाबलम् ।****
**यक्षं समभिवाद्यैव गोसहस्रफलं लभेत् ॥ ७ ॥**(०२)

**ततो गच्छेत धर्मज्ञ विष्णोः स्थानमनुत्तमम् ।****
**सततं नाम राजेन्द्र यत्र सन्निहितो हरिः ॥ ८ ॥**(०३)

**तत्र स्नात्वाऽर्चयित्वा च त्रिलोकप्रभवं हरिम् ।****
**अश्वमेधमवाप्नोति विष्णुलोकं च गच्छति ॥ ९ ॥**(०४)

**ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ।****
**अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत।**(०५)
**पृथिवीतीर्थमासाद्य गोसहस्रफलं लभेत् ॥ १० ॥**

**ततः शालूकिनीं गत्वा तीर्थसेवी नराधिप ।****
**दशाश्वमेधे स्नात्वा च तदेव लभते फलम् ॥ ११ ॥**(०६)

**सर्पदेवीं समासाद्य नागानां तीर्थमुत्तमम् ।****
**अग्निष्टोममवाप्नोति नागलोकं च गच्छति ॥ १२ ॥**(०७)

---

(०१) फलं प्राप्नोति च तदा ( र्ना तथा); राजसूयाश्वमेधयोः,
(०२) (१)मदाक्रकं; मदक्रकं; अक्रणकं; यत्र मरुतकं; मवक्रकं ( अरणकं ); मचकुक्रं,मकुरं मकुणकं; वल्कं स्यमन्तकं चमन्तुकं; ज्या मचन्दुकं; चमन्दुकं (for मचक्रुकं); नाम (for राजन्); ततोर्ध्वं राजन्,
(०३) (२)विष्णुस्थानम्, अरिन्द,
(०४) (१)च गत्वा; च नत्वा गम्य; च दृष्ट्वा (for (अ)र्चयित्वा);(अ)थ; (अ)पि(for च)
/*(२)श्रैलो (for त्रिलोक); (४) (for च ),
(०५) (१)परिच्छवं; आप्नोति; चा (for प्रा ); भारत (for मानवः),
(०६) (१) ख०इदमर्धं नास्ति पृथि ०व्यां (for गाम्); आगम्य (for आसा ); (२) गोसहस्रमवाप्नुयात् (३) शल्मलिः शललिकं; शाकलिनीं, दशाश्वमेधे स्नात्वा च; ०मेधके स्नात्वा, तदेवफलमाप्नुयात,
(०७) (१)सर्पिदर्शी; सर्पदेवीं; सर्पिदाव; सार्पदीर्वी; सर्पिदव;सर्पिदेवीं; सर्पिदध्मां; सर्पग्रीवीं०(४) स (for च);

**ततो गच्छेत धर्मज्ञ द्वारपालं तरन्तुकम् ।****

**तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ १३ ॥**(०१)

**ततः पञ्चनदं गत्वा नियतो नियताशनः ।**

**कोटितीर्थम् उपस्पृश्य हयमेधफलं लभेत् ॥ १४ ॥**

अ०ख०घ०नास्तीदमर्धम् ,अ०घ०अर्धपञ्चकं नास्ति

**अश्विनोस्तीर्थमासाद्य रूपवानभिजायते ॥ १५ ॥**(०२)

**ततो गच्छेत धर्मज्ञ वाराहं तीर्थमुत्तमम्।**

**विष्णुर्वाराहरूपेण पूर्वं यत्र स्थितो विभुः।**

**तत्र स्नात्वा नरश्रेष्ठ अग्निष्टोमफलं लभेत् ॥ १६ ॥**(०३)

* ततो जयन्त्यां राजेन्द्र सोमतीर्थं समाविशेत्
* स्नात्वा फलमवाप्नोति राजसूयस्य मानवः ।
* एकहंसे नरः स्नात्वा गोसहस्रफलं लभेत्।(०४)

**कृतशौचं समासाद्य तीर्थसेवी कुरूद्वह ।****

**पुण्डरीकम् अवाप्नोति कृतशौचो भवेन्नरः ॥ १७ ॥**(०५)

**ततो मुञ्जवटं नाम महादेवस्य धीमतः ।****

**नत्रोष्य रजनीमेकां गाणपत्यमवाप्नुयात् ॥ १८ ॥**(०६)

---

गच्छति (for विन्दति),

(०१) (२)तरण्डुकं; तुरण्डुकं; अनन्तकं; अवन्तकं; वसन्तकं; तरण्डकं; अलुकं, अरदुकं; अरिन्तुदं; अरिदुकं (for तरन्तुकम्),

(०२) (१)पञ्चवटीं; वटं, (३) आगम्य (for आसाद्य ),

(०३) (३)वराह (for वाराह); (४) पूर्व यत्र; पुरा (for पूर्वं); विभुः (for भुवि ); (for भवत्); यत्र (for तत्र); नरश्रेष्ठ,

(०४) (२)अनुव्रजे; समाव्रजेत् (for विशेत्); (३) स्नात्वा च फलमाप्नोति, (४) भारत (for मानवः); एकाहं च; एकाह्नेन (for एकहंसे),

(०५) (२)नराधिप (for कुरू); (३) पौण्डरीकम्, (४) तु सः; च सः; सदा; स च (for नरः),

(०६) (१)मुं(मं) जावटं, (२) स्थाणोः स्थानं स्थानंस्थाणोद् महात्मनः, (३) उपोष्य (for तत्रोष्य),

**तत्रैव च महाराज यक्षिणीं लोकविश्रुताम् ।****

**लां चाभिगम्य राजेन्द्र पुण्यलोका नवाप्नुयात् ॥ १९ ॥**(०१)

**कुरुक्षेत्रस्य तद्द्वारं विश्रुतं भरतर्षभ ।****

**प्रदक्षिणमुपावृत्य तीर्थसेवी समाहितः ॥ २० ॥**(०२)

**सम्मितं पुष्कराणां च स्नात्वाऽर्च्य पितृदेवताः ।**

**जामदग्न्येन रामेण ओपते मु महात्मना ॥ २१ ॥**

**कृतकृत्यो भवेद्राजन्नश्वमेधं च विन्दति।**(०३)

**ततो रामह्रदान् गच्छेत्तीर्थसेवी नराधिप ॥ २२ ॥**

**तत्र रामेण राजेन्द्र तरसा दीप्ततेजसा।**

**क्षत्रमुत्साद्य वीरेण ह्रदाः पञ्च निवेशिताः ॥ २३ ॥**(०४)

**पूरयित्वा नरव्याघ्र रुधिरेणेति नः श्रुतिः ॥ २४ ॥**

**पितरस्तर्पिताः सर्वे तथैव च प्रपितामहाः ।****

**ततस्ते पितरः प्रीता राममूचुर्महीपते ॥ २५ ॥**(०५)

**राम राम महाभाग प्रीताः स्म तव भार्गव**

**अनया पितृभक्त्या च विक्रमेण च ते विभो ।****

**वरं वृणीष्व भद्रं ते किमिच्छसि महाद्युते ॥ २६ ॥**(०६)

---

(०१) (२)यक्षिणीं लोकविश्रुतां,यक्षिणी विश्रुता; यक्षीं परिश्रुतां०(३) स्नात्वा० (for ताचा०); तत्र स्नात्वाभिगत्वा च, (४) सर्वकामान्; सर्वान्कामान्; सर्वकामम् पुण्यलोच्च; सर्वलोकान्,

(०२) (४)नराधिप (for समां ),

(०३) (१)संमितां; तं (for ते); तु(for च); (४) आहृतानि; हृतं तत्स० आहितानि; आहृतो वै; प्राकृते वै; आहृतं तन्; कृतं तत्स०; आहृते ह; हृदाते सु(for आहृते वै); अश्वमेधफलं लभेत्; ०मवाप्नुयात्,

(०४) (१)रामहृदं; रच्छदान्, पश्येत्; पश्यन्, (२) समाहितः (for नरा); (३) तत्र; अत्र (for यत्र); उत्सार्य; उत्सज्य; आसाद्य (for उत्साद्य); वीरप्रकल्पिताः (for निवे० ),

(०५) (२)रूधिरस्वेति विश्रुतं नः श्रुतिः (४) प्र(for च); नराधिप (for मही० ),

(०६) (१) पितर ऊचुः (४) ()नघ (for विभो); यदिच्छसि महामते,

**एवमुक्तः स राजेन्द्र रामः प्रहरतां वरः ।****
**अब्रवीत्प्राञ्जलिर्वाक्यं पितन्स गगने स्थितान् ॥ २७ ॥(०१)**

**भवन्तो यदि मे प्रीता यद्यनुग्राह्यता मयि ।****
**पितृप्रसादमिच्छेयं तप आप्यायनं पुनः ॥ २८ ॥(०२)**

**यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया।**
**ततश्च पापान्मुच्येयं युष्माकं तेजसाप्यहम् ॥२९॥(०३)**
**ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः ॥ ३० ॥(०४)**

**एतच्छ्रुत्वा शुभं वाक्यं रामस्य पितरस्तदा ।****
**प्रत्यूचुः परमप्रीता रामं हर्षसमन्विताः ॥ ३१ ॥(०५)**

**तपस्ते वर्धतां भूयः पितृभक्त्या विशेषतः ।**
**यच्च रोषाभिभूतेन क्षत्रमुत्सादितं त्वया।**
**ततश्च पापान्मुक्तस्त्वं कर्मभिस्ते च पातिताः ॥ ३२ ॥(०६)**

**ह्रदाश्च तव तीर्थत्वं गमिष्यन्ति न संशयः ॥ ३३ ॥**

**ह्रदेषु तेषु यः स्नात्वा पितन्सन्तर्पयिष्यति**
**पितरस्तस्य वै प्रीता दास्यन्ति भुवि दुर्लभम् ।****
**समीप्सितं मनःकामं स्वर्गलोकं च शाश्वतम् ॥ ३४ ॥(०७)**

**एवं दत्त्वा वरान्राजन्रामस्य पितरस्तदा ।****

---

(०१) (१)तु(for स) (४) तान्; स्वान् (for स),
(०२) (१)भवन्त्योद्य यदि प्रीता (३) पितृप्रसादम् (४) तपआप्यायनं; तपसोप्या; तपःस्वाध्यायनं,
(०३) (३)तु (for च); ततः पापाव्यमुच्येयं,
(०४) (४) भवतां (for युष्माकं); ह्ययं; (अ)प्यहं (for ह्यहम्),
(०५) (४)तोषं (for हर्ष ),
(०६) (१)तु (for त्वं ); (२) न (for च); पतितास्ते स्व कर्मभिः निहतास्ते स्व (स्तेन) कर्मभिः ( णा ),
(०७) (१)ह्रदेषु तेषु स्नात्वा यः च मनः मनसा (for मनसः); समीप्सितं मनःकामं; स इप्सितं मनःकामं स्वर्गवासं,

**आमन्त्र्य भार्गवं प्रीत्या तत्रैवान्त र्दयुस्तदा || ३५ ||(०१)**

**एवं रामह्रदाः पुण्या भार्गवस्य महात्मनः || ३६ ||**

**स्नात्वा ह्रदेषु रामस्य ब्रह्मचारी शुचिव्रतः ।****

**राममभ्यर्च्य राजेन्द्र लभेद्बहुसुवर्णकम् || ३७ ||(०२)**

**वंशमूलकमासाद्य तीर्थसेवी कुरूद्वह ।****

**स्ववंशमुद्धरेद्राजन्स्नात्वा वै वंशमूलके || ३८ ||(०३)**

**कायशोधनमासाद्य तीर्थं भरतसत्तम**

**शरीरशुद्धिः स्नातस्य तस्मिंस्तीर्थे न संशयः ।****

**शुद्धदेहश्च संयाति शुभाँल्लोकाननुत्तमान् || ३९ ||(०४)**

**ततो गच्छेत धर्मज्ञ तीर्थं त्रैलोक्यविश्रुतम् ।****

**लोका यत्रोद्दताः पूर्वं विष्णुना प्रभविष्णुना || ४० ||(०५)**

**लोकोद्धारं समासाद्य तीर्थसेवी कूरूद्वह।**

**स्नात्वा तीर्थवरे राजँल्लोकानुद्धरते स्वकान् || ४१ ||**

**श्रीतीर्थं च समासाद्य विन्दते श्रियमुत्तमाम् || ४२ ||(०६)**

* स्नात्वा नियतमानसः अर्चयित्वा पितृन्देवान्

**कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः ।**

**तत्र स्नात्वार्चयित्वा च पितन्स्वान्दैवतान्यपि ।****

---

(०१) (१)वरं (for वरान्); (३) प्रीत्या (for प्रीतास्); (४)अन्तर्हिताः (for र्दधुः); ययुः; ततः; स्वयं (for तदा),

(०२) (४)शुचि (for शुभ ),

(०३) (१)वंशमूलक अ (३) स (for स्व ); श्रीमान् (for राजन्); स्वयं समुद्धरे द्राजन्,

(०४) (१) शरीरशुद्धिमा द्धि प्राप्नोति स्नातस्तस्मिन् (for तस्मिंस्तीर्थे); शुद्धा (for शुभा ),

(०५) (१)धर्मज्ञ (for राजेन्द्र); (३) लोकयात्रोद्धृताः; लोको यत्रोद्धृतः ,

(०६) (२)तीर्थं ते लोकविश्रुतं; तीर्थ त्रैलोक्यपूजितं; तीर्थसेवीकुरूद्वह,

**कपिलानां सहस्रस्य फलं विन्दति भारत** **॥ ४३ ॥**[०१]

**सूर्यतीर्थं समासाद्य स्नात्वा नियतमानसः**

**अर्चयित्वा पितन्देवानुपवासपरायणः** **॥ ४४ ॥**

**अग्निष्टोममवाप्नोति सूर्यलोकं च गच्छति** **॥ ४५ ॥**

**गवां भवनमासाद्य तीर्थसेवी यथाक्रमम् ।****

**तत्राभिषेकं कुर्वाणो गोसहस्रफलं लभेत्** **॥ ४६ ॥**

**शङ्खिनीतीर्थमासाद्य तीर्थसेवी कुरूद्वह ।****

**देव्यास्तीर्थे नरः स्नात्वा लभते रूपमुत्तमम्** **॥ ४७ ॥**[०२]

* ततो गच्छेत राजेन्द्र द्वारपालमरन्तुकम् ।

**तस्य तीर्थं समासाद्य यक्षेन्द्रस्य महात्मनः ।****

**तत्र स्नात्वा नरो राजन्नग्निष्टोमफलं लभेत्** **॥ ४८ ॥**[०३]

**ततो गच्छेत राजेन्द्र ब्रह्मावर्तं नरोत्तमः ॥**

**ब्रह्मावर्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात्** **॥ ४९ ॥**[०४]

**ततो गच्छेत राजेन्द्र सुतीर्थकम् अनुत्तमम्।**

**तत्र सन्निहिता राजन् पितरो दैवतैः सह** **॥ ५०॥** [05]

---

(०१) (१)कपिलं; कापिलं (for कपिला); (४) पितृदेवांस्तथैव च; पिन्त्यान्दैवतान्यपि ( नि च); देवानि स्वपितृंस्तथा; पिदंश्च देवतांस्तथा; देवानिह पितरस्तथा; देवताश्च पितरस्तदा भारत (for मानवः),

(०२) (१)तत (for तत्र); चासाद्य शङ्खिनीं त्वं समासाद्य; शङ्खिनीतीर्थमा साद्य (२) नराधिप; यथाक्रमं (for कुरु ); (४) तीर्थम्; वीर्यम् (for रूपम् ),

(०३) (२)अरुं( अरं)तकं; क्व अनन्तकं; अवर्णकं; अस्तुकं; अनुत्तमं (for अरन्तुकम्); ब्रह्मावर्तं नरोत्तमं (३) तच्च; यस्य; तत्र (for तस्य); समासाद्य; महापुण्यं (for सरस्व त्यां),

(०४) (१)ब्रह्मज्ञ; राजेन्द्र (for धर्मज्ञ); (२) नरोत्तमः नरोत्तमः (for नरां ); द्वारपालमरन्तुकं (४) लभतेरूपमुत्तमं ,

(०५) (१)धर्मात्मन्; राजेन्द्र; धर्मात्मा (for धर्मज्ञ); (२) वसु तीर्थम् (for सुतीर्थकम्) ०); (३) तत्र (for यत्र); राजन् (for नित्यं) (४) देवतैः देवताः पितृभिः सह,

**तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ।****
**अश्वमेधमवाप्नोति पितृलोकं च गच्छति ॥ ५१ ॥**(०१)
**ततोऽम्बवश्यं धर्मत्र समासाद्य यथाक्रमम्**
**कौशेश्वरस्य तीर्थेषु स्नात्वा भरतसत्तम ॥ ५२ ॥**
**सर्वव्याधिविनिर्मुक्तो ब्रह्मलोके महीयते ॥ ५३ ॥**(०२)
**मातृतीर्थं च तत्रैव यत्र स्नातस्य भारत ।****
**प्रजा विवर्धते राजन्ननन्तां चाश्नुते श्रियम् ॥ ५४ ॥**(०३)
**ततः शीतवनं गच्छेन्नियतो नियताशनः ।****
**तीर्थं तत्र महाराज महदन्यत्र दुर्लभम् ॥ ५५ ॥**(०४)
**पुनाति दर्शनादेतद् दण्डेनैकं नराधिप ।****
**केशानभ्युक्ष्य वै तस्मिन्पूतो भवति भारत।**(०५)
**तीर्थं तत्र महाराज श्वाविल्लोमापहं स्मृतम् ॥ ५६ ॥**

लक्षालङ्कारः- दण्डेनैकं नराधिपक इत्यत्र दण्डो दण्डप्रणामः ।

---

(०१) (४)स (for च ),

(०२) (१) ख०इदमर्धं नास्ति ततोक्षुपश्यं; बुम (for ०मा); त्यां; ०श्ववत्यां; ०श्लपत्यां०; ०युवत्या; ततो युवत्यां; बपश्यन्; अपश्यं ततो भवस्य धर्मात्मन् (२) सुतीर्त्त्यनुत्तमं (३)कामेश्वरस्य; काशी; केशे तीर्थे च (for तीर्थे वा मे),

(०३) (२)तत्र (for यत्र); निश्चितं पार्थिव; धीमतः (for भारत); स्नात्वा वज्ज भारत (३) प्रज्ञा (for प्रजा); (अ)भिवर्धतेः सं (for वि); प्रजाभिर्विधिना राजन् (४) चाप्नते चाग्नयात्; लभते प्राप्नुते; ०अतन्वीं ( महतीं) श्रियमश्नुते,

(०४) (१)सीत०; सीता० (for शीत०); (३) तत्र तीर्थं; तीर्थे तत्र (४) लभेद् (for महद्); मनुष्याणां सुदुर्लभं,

(०५) (१)गमनाद् (for दर्शना ); ल्कं; चैकं; एनं (for व); प्ण्प्श्पुराभिगमनादेकं ( व ) (२) दण्डेनैकं नराधिपेति एकमिति तृतीयार्थे द्वितीया इष्ट्येकं; स्नात्वा चैकं; दृष्टेनैव; कुलमेकं (for दण्ढेनैकं) (३) ख०अर्धद्वयं नास्ति केशेना (for केशानां); प्णचैतस्मिन्; चैकस्मिन् (for वै त० ),

**यत्र विप्रा नरव्याघ्र विद्वांसस्तीर्थतत्पराः ।**(०१)

**गतिं प्रीतिं गच्छन्ति परमां स्नात्वा भरतसत्तम ॥ ५७ ॥**(०२)

**श्वानलोमापनयने तीर्थे भरतसत्तम ।**

**प्राणायामैर्निर्हरन्ति श्वानलोमान् लोमानि द्विजोत्तमाः ॥ ५८ ॥**

**पूतात्मानश्च राजेन्द्र प्रयान्ति परमां गतिम् ॥ ५९ ॥**(०३)

लक्षालङ्कारः- प्रणायामैर्निभा यान्ति इत्यत्र निभाः नितरां भा प्रभा येषां ते निभाः ।

**दशाश्वमेधिकं चैव तस्मिंस्तीर्थे महीपते ।****

**तत्र स्नात्वा नरव्याघ्र गच्छेत परमां गतिम् ॥ ६० ॥**(०४)

**ततो गच्छेत राजेन्द्र मानुषं लोकविश्रुतम्।**

**यत्र कृष्णमृगा राजन्व्याधेन परिपीडिताः ।****

**विगाह्य तस्मिन्सरसि मानुषत्वमुपागताः ॥ ६१ ॥**(०५)

**तस्मिंस्तीर्थे नरः स्नात्वा ब्रह्मचारीचितेन्द्रियः ।****

**सर्वपापविशुद्धात्मा स्वर्गलोके महीयते ॥ ६२ ॥**(०६)

**मानुषस्य तु पूर्वेण क्रोशमात्रे महीपते।**

**आगता नाम विख्याता नदी सिद्धनिषेविता ॥ ६३ ॥**

---

(०१) (१)तीर्थं तत्र तत्र तीर्थवरं चान्यत् स्नात्वा; राजन् (२) स्वान ( स्वानु ); लो०; स्नानलो; पेछनस्वलो०; श्वविल्लो; स्नानं लो मह्य न्यत्र दुर्लभं एव (३) तत्र ,

(०२) ख०इदमर्धनास्ति प्रीतिं (for गीतं; (for स्नाता),

(०३) (१)स्वान( स्वानु)लो०; श्वविल्लो; स्नात्वा लो; स्थानेलो विहिंसन्ति; (३) विहंसन्ति; न्यस्तलोमा; निर्हरत; हरतीह (for निर्हरन्ति ); ब्रह्म यामेन निघ्नति (४) स्वलोमानि स्वालोमानि; निरजस्का; श्वानलोमा; श्वानलोमाद्,

(०४) (१)चापि (for चैव); (२) महा मते; ; महायशाः (for मही); तीर्थं भुवि सुदुर्लभं; (३) गत्वा तत्र नर; (४) लभेते; गच्छन्ति; गच्छते; गच्छेच्च,

(०५) (३)तत्र (for यत्र); कृष्णा मृगा (४) शरपीडिताः वि (for अव); अवगाह्य सरस्तद्धि; अवगाह्य जलं तद्धि,

(०६) (२)समाहितः (for जिते ),

**श्यामाकं भोजने तत्र यः प्रयच्छति मानवः**
**देवान्पितन्समुद्दिश्य तस्य धर्मफलं महत् ॥ ६४ ॥**
**एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजितः ॥ ६५ ॥**(०७)
**तत्र स्नात्वार्चयित्वा च पिन्द्टन् स्वान् दैवतानि च ।****
**उषित्वा रजनीमेकामग्निष्टोमफलं लभेत् ॥ ६६ ॥**(०८)
**ततो गच्छेत राजेन्द्र ब्रह्मणः स्थानमुत्तमम् ।****
**ब्रह्मोदुम्बरम् इत्येव प्रकाशं भरतर्षभ ॥ ६७ ॥**(०९)
**तत्र सप्तर्षिकुण्डेषु स्नातस्य कुरुपुङ्गव ।****
**केदारे चैव राजेन्द्र कपिष्ठलमहामुने : ॥ ६८ ॥**(१०)
**ब्रह्माणमधिगत्वा च शुचिः प्रयतमानसः ।****
**सर्वपापविशुद्धात्मा गच्छेत परमां गतिम् ॥ ६९ ॥**(११)
**कपिष्ठलस्य केदारं समासाद्य सुदुर्लभम् ।****
**अन्तर्धानमवाप्नोति तपसा दग्धकिल्बिषः ।**(१२)
**ततो गच्छेत राजेन्द्र शङ्करं लोकविश्रुतम् ॥ ७० ॥**
**कृष्णपक्षे चतुर्दश्यामभिगम्य वृषध्वजम् ।****

---

(०७) (१)श्यामकं; श्यामाकं (for श्यामाक ); श्यामाकं भोजने तत्र(३)समुद्दिश्य च वो द्दिश्य; चैवोद्दिश्य (for च उद्दिश्य),

(०८) (२)स्वान्पितृन्दैवतानि च; पितृन्त्यान् दै(दे) वतानि च; पितुन्वै दैवतानि च पितृंश्च देवतानपि (नि च); पितृंस्तान्देव; तानि च,

(०९) (१)धर्मज्ञ(for राजेन्द्र) (२)ब्रह्मस्थानमनुत्तमं (३) एतत्; एवं (for एव); ब्रह्मणोदरमित्येव (४) प्रख्यातं (for प्रकाशं); भरतर्षभ (for भुवि० भा),

(१०) (१)ब्रह्मर्षि ; समेषु (for सप्तर्षि); (२) नरपुङ्गव; भरतर्षभ; कुस्तन्दन; कुरुसत्तम (४) ख०इदमर्धं नानस्ति कपिल(ष्ट) स्य महा; कपिष्ठ (कपिञ्ज) लमहामुनेः,

(११) (१)अधिगत्वा; अमि गत्वा; अधिगम्य (for अभिगम्य); च; (आ)शु (for (अ)थ ),

(१२) (१)कपिलस्य च; कपिस्थलस्य; कपिपापिष्ठ ; कपिञ्जलस्य,

**लभेत सर्वकामान्हि स्वर्गलोकं च गच्छति ॥ ७१ ॥**[०१]

**तिस्रः कोट्यस्तु तीर्थानां शङ्करे कुरुनन्दन ।**

**रुद्रकोटिः तथा कूपे ह्रदेषु च महीपते ॥ ७२ ॥**

**इलास्पदं च तत्रैव तीर्थं भरतसत्तम ॥ ७३ ॥**[०२]

**तत्र स्नात्वार्चयित्वा च पितॄन्देवांश्च भारत ।****

**न दुर्गतिमवाप्नोति वाजपेयं च विन्दति ॥ ७४ ॥**[०३]

**किन्दाने च नरः स्नात्वा किञ्जप्ये च महीपते ।****

**अप्रमेयमवाप्नोति दानं जप्यं च भारत ॥ ७५ ॥**[०४]

**कलश्यां चाप्युपस्पृश्य श्रद्दधानो जितेन्द्रियः ।****

**अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति भारत ॥ ७६ ॥**[०५]

**शखङिकसस्य तु पूर्वेण नारदस्य महात्मनः ।****

**तीर्थं कुरुवरश्रेष्ठ अलाजन्म इति विश्रुतम् ॥ ७७ ॥**[०६]

**तत्र तीर्थे नरः स्नात्वा प्राणांश्योत्सृज्य भारत ।****

**नारदेनाभ्यनुज्ञातो लोकान्प्राप्नोति दुर्लभान् ॥ ७८ ॥**[०७]

**शुक्लपक्षे दशम्यां च पुण्डरीकं समाविशेत् ।****

---

(०१) (२)शनकं; शरकं शङ्करं; शरभं (३) कृष्णपक्ष ( ततःकृष्ण ); लभेत सर्वकामांश्च; कामान्तै; कामानि,

(०२) (२)शनके; शरके; सरङ्के; सरङ्के; शङ्करे; शरभे (३) भद्रकोट्यां; रुद्रकोटी; कोट्यां; कोटिं कोटि रुद्रकोट्यां तु ( कोट्यस्तु) पुण्यायां (४) समन्ततः (for महीं ); सूइडास्पदं; शुद्धा। ( इला ); स्पद,

(०३) (२)पितृन्दैवतानि च; स्वपितरश्चैव तानि च, क०ख०अर्धत्रयं नास्ति । दैवतानि पितृनपि ०तृंस्तथा; ख-नथ स्वपितृन्दै ( ०न्दे); वतानि च; पितृदेवांस्तथैव च,

(०४) (२)किञ्जपे च ( प्येन) (४) तथैव च (for च भारत); तदानन्तं तथैव च,

(०५) (१)कोलश्यां; कलस्यां वार्युपस्पृश्य (२) ब्रह्मचारी (for श्रद्द ),

(०६) (१)शरक्स शङ्करस्य; शरभस्य (३) तर्थि कुष्ट्यश्रेष्ठ; कुरुश्रेष्ठ शुभं तीर्थं (४)अंवाजन्मेति; अन्यज०;

(०७) (१)तत्र स्नात्वा तस्मिन् (for तत्र); (४) (अ)नुत्तमान् (for दुर्ल ),

**तत्र स्नात्वा नरो राजन्पुण्डरीकफलं लभेत्** || ७९ ||(०१)

**ततस्त्रिविष्टपं गच्छेत् त्रिषु लोकेषु विश्रुतम् ।****

**तत्र वैतरणी पुण्या नदी पाप प्रमोधनी** || ८० ||(०२)

**तत्र स्नात्वार्चयित्वा च पूजयित्वा वृषध्वजम् ।** जप्यपरो**

**सर्वपापविशुद्धात्मा गच्छेत परमां गतिम्।**

**ततो गच्छेत राजेन्द्र फलजीवनमुत्तमम्** || ८१ ||

**तत्र देवाः सदा राजन्फलजीवनमाश्रिताः ।****

**नभश्चरन्ति विपुलं बहु वर्षसहस्रकम्** || ८२ ||(०३)

* तत्र स्नात्वानरो राजन्यर्वयज्ञफलं लभेत् ।

**दृषद्वत्यां नरः स्नात्वा तर्पयित्वा च देवताः**

**अग्निष्टोमातिरात्राभ्यां फलं विन्दति भारत** || ८३ || (०४)

**तीर्थे च सर्वदेवानां स्नात्वा भरतसत्तम ।****

**गोसहस्रस्य राजेन्द्र फलं विन्दति मानवः** || ८४ ||(०५)

**पाणिखाते नरः स्नात्वा तर्पयित्वा च देवताः ।**

**तत्रस्नात्वा नरो राजन्सर्वयज्ञफलं लभेत्** || ८५ ||

**अग्निष्टोमातिरात्राभ्यां फलं विन्दति भारत।**

**सराजसूयमवाप्नोति ऋषिलोकं च विन्दति** || ८६ ||(०६)

---

(०१) (१)त्रुक्कपक च(for तु) (४) पौण्डरीक ( सर्वयज्ञ ),

(०२) (१)तत्र (for तत द्वे ); त्रिपिष्टपं (४) पापप्रणाशिनी,

(०३) (२)फलजी ( लं जी ); वनम् (३) तत्र; अत्र,(for यत्र); (४) फलजी वनम् ०सहसिकं ,

(०४) (१) अ०ध०अर्धपकश्चकं नास्ति दृशद्वत्यां (४) मानवः (for भारत),

(०५) (३)गोसहस्रं च रा (३) विन्दति; आप्नोति (for प्राप्नोति),

(०६) (१)पणिख्याते; ०पाते; ०पादे; पाने तर्प्य (for श्नात्वा ); (३) अवाप्नुते ( अवा प्नोति) राजसूयं; अवाप्नुयाद्राजसत्रं (४) स (for च); विदति (for गच्छति),

**ततो गच्छेत राजेन्द्र मिश्रकं तीर्थमुत्तमम् ॥ ८७ ॥**

**तत्र तीर्थानि राजेन्द्र मिश्रितानि महात्मना।[०१]**

**व्यासेन नृपशार्दूल द्विजार्थमिति नः श्रुतम्।**

**सर्वतीर्थेषु स स्नाति मिश्रके स्नाति यो नरः ॥ ८८ ॥[०२]**

**ततो व्यासवनं गत्वा नियतो नियताशनः ।****

**मनोजवे नरः स्नात्वा गोसहस्रफलं लभेत् ॥ ८९ ॥[०३]**

**गत्वा मधुपर्दीं चैव देव्यास्तीर्थे नरः शुचिः ।**

**तत्र स्नात्वार्चयित्वा च पितन्देवांश्च पूरुषः ॥ ९० ॥**

क०ख०अर्धत्र्यं नास्ति

**स देव्या समनुज्ञातो गोसहस्रफलं लभेत् ॥ ९१ ॥[०४]**

**कौशिक्याः सङ्गमे यस्तु दृषद्वत्याश्च भारत ।****

**स्नाति वै नियताहारः सर्वपापैः प्रमुच्यते ॥ ९२ ॥[०५]**

**ततो व्यासस्थली नाम यत्र व्यासेन धीमता ।****

**पुत्रशोकाभितप्तेन देबन्यागार्यनिश्चयः ।[०६]**

**क०तो वै देवराजेन पुनरुत्थापितस्तदा ॥ ९३ ॥**

---

(०१) (१)धर्मज्ञ (for राजेन्द्र)०; (२) लोकविश्रुतं(for तीर्थमु) (३) यत्र(for तत्र) सर्वाणि(for राजेन्द्र) तत्र सर्वाणि तीर्थानि,

(०२) (१)नरशार्दूल; वेदविदुषा द्विजार्थं (for द्विजार्थम् ); ० स त्रै च्छत्वार्चमित्वा च मिश्रकै पितृदेवताः ।

(०३) (१)गत्वा (for गच्छेन्),

(०४) (१)मधुवटं; मतीं; प्रदीं; ०द्वतीं चैव (for चापि); (२) तीर्थे स्थानं,स्नानं (for तीर्थं०); अनुत्तमं (for नरः शुचिः) ; (३) स्नात्वार्चयित्वा च (४)पितृन् ( पित्त) देवांश्रच पूरुषः; देवान्पिदंश्च पूरुषः; पितृंश्च प्रयतस्तु यः,

(०५) (२)दृशद्वत्या (३) स्नायात् (for स्नाति); तु; यो (for वै ),

(०६) (४)देहत्यागे कृता मतिः; प्रे० तदेहत्यागाय गश्च) निश्चयः,

**अभिगत्वा स्थलीं तत्र गोसहस्रफलं लभेत्** || ९४ ||(०१)

**किन्दत्तं कूपमासाद्य तिलप्रस्थं प्रदाय च ।****

**गच्छेत पारमिकां सिद्धिमृणैर्मुक्तः कुरूद्वह** || ९५ ||(०२)

* वेदीतीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्।। ८६ ।।

**अहश्च सुदिनं चैव द्वे तीर्थे च सकुदुर्लभे ।****

**तयोः स्नात्वा नरव्याघ्र सूर्यलोकमवाप्नुयात्।**(०३)

**न्यङ्गधूमं ततो गच्छेत्त्रिषु लोकेषु विश्रुतम्** || ९६ ||

**नत्र गङ्गाह्रगृदे स्नात्वा ह्यर्चयित्वाच भारत ।****

**शूलपाणिंमहादेवमश्वमेधफलं लभेत्** || ९७ ||(०४)

**देवतीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्।**

**अथ वामनकं गच्छेत्त्रिषु लोकेषु विश्रुतम्** || ९८ || (०५)

**तत्र विष्णुपदे स्नात्वा अर्चयित्वा च वामनम् ।****

**सर्वपापविशुद्धात्मा विष्णुलोकं अवाप्नुयात्** || ९९ ||(०६)

---

(०१) (१)ततो (for कृतो।); तु (for च); कृतो वै देवराजेन (३) अभिगत्वा तत्र; चैव (for तस्य ),

(०२) (३)गच्छेत्परमिकां सिद्धि (४) युधिष्ठिर; नरेश्वर (for कुरु),

(०३) (१)बहुं च; आह्वंश्च; अर्हं च; अह्न च; हयश्च; अहं च सुदिन (अ)नुदिनं (for सुदिनं); (२) तु (for च); द्वे तीर्थे लोकविश्रुते; तीर्थे चैव सुदुर्लभे; द्वे तीर्थेषु सुदुर्लभे (३) तत्र (for तयोः); ,

(०४) (१)नृगधूमं; व्यङ्ग (३) रुद्रपदे (for गङ्गां); तत्राभिषेककुर्वीत (४) गङ्गायां नृप कुरुसत्तम ह्यर्चयित्वा च भारत अर्चयित्वा (for ष्म०); महात्मानम् (for महां ),

(०५) (१)देव्या स्तीर्थे; कोटि० (for देव), (३)ख०घ -अधिकः

**अमराणां हृदे स्नात्वा स्वर्गलोके महीयते ।**

**शालिहोत्रस्य राजेन्द्र शालिशूर्पे यथाविधि ।।**

**स्नात्वा नरवरश्रेष्ठ गोसहस्रफलं लभेत् ।।**

अमरे नराधिप अमराणां प्रसादेन इति पादद्वयं -ख कोशे अधिकम्,

(०६) ततो (for अथ); गत्वा (for गच्छेत् )/*(१)विष्णुहदे (२) समभ्यर्च्य; पूजयित्वा (for अर्च); (४) च गच्छति;स, गच्छति (for अवा ),

**कुलम्पुने नरः स्नात्वा पुनाति स्वकुलं नरः ॥ १०० ॥**

**पवनस्य ह्रदं स्नात्वा मरुतां तीर्थमुत्तमम् ।****

**तत्र स्नात्वा नरव्याघ्र वायुलोके महीयते ॥ १०१ ॥**(०१)

(०२)

**श्रीकुञ्जं च सरस्वत्यास्तीर्थं भरतसत्तम ।****

**तत्र स्नात्वा नरश्रेष्ठ अग्निष्टोममवाप्नुयात् ॥ १०२ ॥**(०३)

**ततो नैमिशकुञ्जं च समासाद्य यथाक्रमम् ।**

**ऋषयः किल राजेन्द्र नैमिशीयास्त पोघनाः स्विनः ।****

**तीर्थयात्रां पुरस्कृत्य कुरुक्षेत्रं गताः पुरा ॥ १०३ ॥**(०४)

**ततः कुञ्जः सरस्वत्याः कृतो भरतसत्तम ।****

**ऋषीणामवकाशः स्याद्यथा तुष्टिकरोभवेत् ॥ १०४ ॥**(०५)

**तस्मिन्कुञ्जे नरः स्नात्वा अग्निष्टोमफलं लभेत् ।****

---

(०१) (२)च कुलं स्वजनं (for स्वकुलं ); भहत्; ततः; नृप (for नरः); (३) इदेस्नात्वा विष्णु (for वायु ),
(०२)(२)ह्यमरेषु; अमरे च (for अमरेषु); समभ्यर्च्याम (र्च्य न)राधिपं (३) प्रसादेन (for प्रभां); ०

अमराणां ह्रदे स्नात्वा समभ्यर्च्यामराधिपम्।
अमराणां प्रभावेण स्वर्गलोके महीयते।
अमरैः सह संयाति विमानवरमास्थितः ।।
शालिहोत्रस्य तीर्थे च शालिसूर्ये यथाविधि।
स्नात्वा नरवरश्रेष्ठ गोसहस्रफलं लभेत् ।।

(१)तीर्थं (तीर्थे) च (for राजेन्द्र); (२) शालिशीर्षे०; ०शीर्ये; सूत्र ०होत्रे,
(०३) (१)शत्त्या च सरस्वत्या; समासः ,सरस्वत्याः (२) तीर्थे (३) नरश्रेष्ठ (for नरो राजन्); (४) ०ष्टोमभवाप्नुयात्,
(०४)(१) नैमिशकुञ्जं; नैमिशकुव्जं (२)सुदुर्लभं; यथाक्रमं (for कुरु); (४) नैमिशेयास्तपस्विनः (for तपो );

तत्र तीर्थे नरःस्नात्वाचाजिमेधफलं लभेत् ।

(०५)(१)तत्र (for ततः); कुज; कुज; कुजाः; (for कुञ्जः); सरस्वत्या; त्याः (३)ऋषीणां सावकाशः स्याद्; णाम,वकाशस्य; णामुपकारः स्याद् (४) पुष्टि करो भवेत् (for महान्),

**कन्यातीर्थे नरः स्नात्वा गोसहस्रफलं लभेत् ॥ १०५ ॥**(०१)
**ततो गच्छेत धर्मज्ञ कन्यातीर्थमनुत्तमम्।**(०२)
**ततो गच्छेत नरव्याघ्र ब्रह्मणस्तीर्थमुत्तमम् ।**
**तत्र वर्णान्तरः स्नात्वा ब्राह्मण्यं लभते नरः ॥ १०६ ॥**
**ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम् ॥१०७ ॥**(०३)
**ततो गच्छेन्नरश्रेष्ठ सोमतीर्थम् अनुत्तमम् ।****
**तत्र स्नात्वा नरो राजन्सोमलोकमवाप्नुयात् ॥ १०८ ॥**(०४)
**सप्तसारस्वतं तीर्थं ततो गच्छेन्नराधिप ।**
**यत्र मङ्कणकः सिद्धो महर्षिर्लोकविश्रुतः ॥ १०९ ॥**
**पुरा मङ्कणको राजन्कुशाग्रेणेति निश्रुतम् ।****
**क्षतः किल करे राजंस्तस्य शाकरसोऽस्रवत् ॥ ११० ॥**(०५)
**स वै शाकरसं दृष्ट्वा हर्षाविष्टः महातपाः।**
**प्रनृत्तः किल विप्रर्षिर्विस्मयोत्फुल्लोचनः ॥ १११॥**(०६)
**ततस्तस्मिन्प्रनृत्ते तु स्थावरं जङ्गमं च यत् ।****
**प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम ् ॥ ११२ ॥**(०७)
**ब्रह्मादिभिः सुरै राजन्नृषिभिश्च तपोधनैः ।**

**ब्रह्मादयः**

---

(०१) (२) क०ख०इदमर्धं नास्ति अग्निष्टोमफलं ल,
(०२) (४)गोसहस्त्र फलं; ह्यग्निष्टोम,
(०३) (१)ततो गच्छेत राजेन्द्र (२) तीर्थम् (for स्थानम्); ब्रह्म, तीर्थमनुत्तमं (३) यत्र (for तत्र ); वर्णातरः तत्र स्नात्वा नरो राजन् (for च); गच्छेत्परमिकां गर्ति,
(०४) (१)नरव्याघ्र (for श्रेष्ठ),
(०५) (४)तत्र (for तस्य ),
(०६) (२)प्रवृत्तवान् (for महा ),
(०७) (१)तु (for वै ),

**विज्ञप्तो वै महादेव ऋषेरर्थे नराधिप ।****
**यथा न नृत्यते देव तथा त्वं कर्तुमर्हसि ॥ ११३ ॥(०१)**

**पुलस्त्यः**

**नतः प्रनृत्तं समासाद्य हर्षाविष्टेन चेतसा ।****
**सुराणां हितकामार्थमृषिं देवोऽभ्यभाषत ॥ ११४ ॥(०२)**

**देवः**

**भो भो महर्षे धर्मज्ञ किमर्थं नृत्यते भवान् ।****
**हर्षस्थानं किमर्थं वा तवाद्य मुनिपुङ्गव ॥ ११५ ॥(०३)**

**ऋषिः**

**किं न पश्यसि मे देवन्कराच्छाकरसं स्रुतम्।**
**यं दृष्ट्वा सम्प्रनृत्तोवै हर्षेण महतान्वितः ॥ ११६ ॥**

* तपस्विनो धर्मपथे स्थितस्य द्विजसत्तम।(०४)

**पुलस्त्यः**

**तं प्रहस्याब्रवीद्देव मुनिं रागेण मोहितम्।**
**अहं वै विस्मयं विप्र न गच्छामीति पश्य माम् ॥ ११७॥(०५)**

**एवमुक्त्वा नरश्रेष्ठ महादेवेन वै तदा ।****

---

(०१) (१) ख० इदमर्धंनास्ति ततो देवैर् (for सुरै राजन्);, ततो ब्रह्मादिभिर्देवेः (४) मुनेट् (for ऋषेद्); यथा न नृत्यते दे,

(०२) (१)तं प्रनृत्तं समासत्य; ततो देवो मुनिं दृष्ट्वा नृत्यन्तमब्रवीच्चैनं सुराणां हितकाम्यया ,

(०३) (१)भो भो; हंहो; विभो; विप्रो (for अहो); (३) किमिव (for किमर्थं) च; ते (for वा ), (४) मुनिपुङ्गव; सुरसत्तम (for द्विज );

(०४) ( /*(१) मे विप्र; मे ब्रह्मन्; देवेश (for मे देव); (२)क्षतात् (for करात्); (३) हि; सं (for (अ)हं );(अ)हं; यं (अ)स्मि (for वै),

(०५) (१)मुनि ऋषिं ) (३) च; तु; न (for वै); (४) पश्या० (for गच्छा० ), (इ)ह (for (इ)ति ); वै (for माम्); गच्छामीति प्रपश्य मां,

**अङ्गुष्ठग्रेण राजेन्द्र स्वाङ्गुष्ठस्ताडितोऽ भवत्** **॥ ११८ ॥**(०१)

**ततो भस्म क्षताद्राजन्निर्गतं हिमसन्निभम् ।****

**तद्दृष्ट्वा व्रीडितो राजन्स मुनिः पादयोर्गतः** **॥ ११९ ॥**(०२)

**ऋषिः**

**नान्यंदेवमहे मन्ये रुद्रात्परतरं महत्।**

**सुरासुरस्य जगतो गतिस्त्वमसि शूलधृत्** **॥ १२० ॥**(०३)

**त्वया सर्वमिदं सृष्टं त्रैलोक्यं सचराचरम्** **॥१२१॥**

* ख०अर्धत्रयं नास्ति,

**त्वामेव भगवन्न्सर्वे प्रविशन्ति युगक्षये।**(०४)

**देवैरपि न शक्यंते परिज्ञातुं कुतो मया ।**

**त्वयि सर्वे प्रदृश्यन्ते सुरा ब्रह्मादयोऽनघ ।** **॥ १२२॥**(०५)

**सर्वस्त्वमसि लोकानां कर्ता कारयिता च ह**

**त्वत्प्रसादात्सुराः सर्वे निवसन्त्यकुतोभयाः** **॥ १२३ ॥**

**पुलस्त्यः**

**एवं स्तुत्वा महादेवमृषिस्स प्रणनोऽभवत्।**(०६)

---

(०१) (२) क०व०इत्युकत्वा स  नरश्रेष्ठ महादेवो द्विजर्षभम्। वै तदा (for धीमता); (३) अङ्गुष्ठाग्रेण (४) स्वोगुष्ठसू; स्वाङ्गुलिस् ()भवत्; पुनः; यथा (for नघ); स्वागुष्ठात्सावितोभवत्,

(०२) (२)निःसृतं (for निर्गतं); (३) यद्; तं (for तद् ),

(०३) (१) अन्य (for ०न्या)द् देवात् (for देवम्); परं मेने (for अहं,मन्ये); (३) चराचरस्य त्रयाणामपि लोकानां,

(०४) (१)सर्वम् (for सृष्टम्); सृष्टं; सर्वं (for विश्व); (३) त्वामेव सर्वं विशति;   त्वमेव सर्वान्ग्रससि (४) पुनरेव; पुनश्चैव (for प्रविशन्ति ),

(०५)(१)शक्यं ते (for शक्यस्त्वं); (२)  परं (for परि ); (३) सर्वे प्र; सर्वेश; सर्वे स्म; सर्वेण for सर्वे च),

(०६) (१)सर्वः शर्वस्; कार्यस्; गतिस् (for सर्वस्); (४) मोदन्ते शकुतो;० निवसन्त्य     उक्त्वा (for स्तुत्वा); ऋषिभिः; ऋषिः स छेर्मवीत् (for भवत्);    ऋषिर्वचनमब्रवीत्,

**ऋषिः**

**त्वत्प्रसादान्महादेव तपो मे न क्षयेत वै ॥ १२४ ॥**

क०घ०-क्षरेत घ०क्षमेत

**पुलस्त्यः**

**ततो देवः प्रहृष्टात्मा ब्रह्मर्षिमिदमब्रवीत् ॥ १२५ ॥**

**देवः**

**तपस्ते वर्धतां विप्र मत्प्रसादात्सहस्रधा।**(०१)

**आश्रमे चेह वत्स्यामि त्वया सह महामुने ॥ १२६ ॥**

**सप्तसारस्वते स्नात्वा अर्चयिष्यन्ति ये तु माम्।**(०२)

**न तेषां दुर्लभं किञ्चिदिहलोके परत्र च ।**

**सारस्वतं च ते लोकं गमिष्यन्ति न संशयः ॥ १२७ ॥**(०३)

**पुलस्त्यः**

**एवमुक्त्वा महादेवस्तत्रैवान्तरधीयत ।**

**ततस्त्वौशनसं गच्छेत्त्रिषु लोकेषु विश्रुतम् ।****

**यत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः ॥ १२८ ॥**(०४)

**कार्तिकेयश्च भगवांस्त्रिसन्ध्यं किल भारत ।****

**सान्निध्यमकरोन्नित्यं भार्गवप्रियकाम्यया ॥ १२९ ॥**(०५)

**कपालमोचनं तीर्थं सर्वपापप्रमोचनम् ।****

---

(०१) (४)सहस्रशः (for धा ),

(०२) (१)चैव (for चेह); (२) त्वया सह मुने वने (for महां);(४)वो मामर्चयिता द्विज यते नरः; ०यते द्विज,

(०३) (१) तस्य (for तेषां); (३) तं; वै (for ते ); गच्छेत्सारस्वतं चापि; गच्छेत्सारस्व,तांश्चैव (४) लोकान्ना ०(कं ना) स्त्वत्र संशयः,

(०४) (१) च (for तु); (उ) शनसं (for (औ)श ),

(०५) (३)तस्मै; नित्यं (for तत्र),

**तत्र स्नात्वा नरव्याघ्र सर्वपापैः प्रमुच्यते ॥ १३० ॥**[०१]

**अग्नितीर्थं ततो गच्छेत्तत्र स्नात्वा नरर्षभ ।****

**अग्निलोकमवाप्नोति कुलं चैव समुद्धरेत् ॥ १३१ ॥**[०२]

**विश्वामित्रस्य तत्रैव तीर्थं भरतसत्तम ।****

**तत्र स्नात्वा नरश्रेष्ठ ब्राह्मण्यमभिजायते ॥ १३२ ॥**[०३]

**ब्रह्मयोनिं समासाद्य शुचिः प्रयतमानसः ।****

**तत्र स्नात्वा नरव्याघ्र ब्रह्मलोकं प्रपद्यते ॥ १३३ ॥**

ख०-अयं पादोऽनन्तरश्च न स्तः

**पुनात्यासप्तमं चैव कुलं नास्त्यत्र संशयः ॥ १३४ ॥**[०४]

**ततो गच्छेत राजेन्द्र तीर्थं त्रैलोक्यविश्रुतम्**

**पृथूदकम् इति ख्यातं कार्तिकेयस्य धीमतः ।****

**तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ॥ १३५ ॥**[०५]

* पापं प्रणश्यते तत्र स्नातमात्रस्य भारत ।

**अज्ञानाज्ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ।****

**यत्किञ्चिदशुभं कर्म कृतं मानुषबुद्धिना ॥ १३६ ॥**

**तत्सर्वं नश्यते तत्र स्नातमात्रस्य भारत ।****

**अश्वमेधफलं चास्य स्वर्गलोकं च गच्छति ॥ १३७ ॥**[०६]

---

(०१) (१)नाम (for तीर्थ); (२) तीर्थे पापप्र; सर्वपापप्रणाशनं,

(०२) (२)नरोत्तम; नराधिप (for नरं ); स्नात्वा भरतसत्तम; स्नात्वा च भरतर्षभ (३)अग्निष्टोमम्,

(०३) (३)नरो राजन्; नरश्रेष्ठ नरव्याघ्र (for महा); (४) अधिगच्छति (for अभि ),

(०४) स्वकुलं; च कुलं (for (आ)सप्तमं); वीर (for चैव); सप्तमं नात्र संशयः,

(०५) (३)समासाद्य; इति ख्यातः (४) धीमतः (for वै नृप),

(०६) (१) तेन तत्र; तात (for तस्य); (३) चास्य (for चापि); (४) स (for च); विन्दति (for गच्छति); लभते स्वर्गमेव च; लभते नात्र संशयः,

**पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात्सरस्वती ।****

**सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम् ॥ १३८ ॥**(०१)

**उत्तमे सर्वतीर्थानां यस्त्यजेदात्मनस्तनुम्।**

**अश्वमेधफलं चापि स्वर्गलोकं च गच्छति ॥ १३९॥**

**पृथूदके जप्यपरो नैव श्वो मरणं भवेत्(तपेत्)।**(०२)

**गीतं सनत्कुमारेण व्यासेन च महात्मना ॥ १४० ॥**

लक्षालङ्कारः- नैनः श्वो मरणं तरेत् इत्यत्र ना पृथूदके देहत्यागी पुरुषः श्वः मरणं यस्मात्तदेनस्तरेत् । पुनर्जन्माभावात्पुनर्मरणमपि नास्तीति भावः ।

**वेदे च नियतं राजन्नभिगच्छेत्पृथूदकम् ॥ १४१ ॥**(०३)

**पृथूदकात्पुण्यतरं नान्यत्तीर्थं नरोत्तम ।****

**तन्मेध्यं तत्पवित्रं च पावनं च न संशयः ॥ १४२ ॥**(०४)

**तत्र स्नात्वा दिवं यान्ति येऽपि पापकृतो नराः ।****

**पृथूदके नरश्रेष्ठ एवमाहुर्मनीषिणः ॥ १४३ ॥**(०५)

**मधुस्रवं च तत्रैव तीर्थं कुरुकुलोद्वह ।****

**तत्र स्नात्वा नरो राजन्गोसहस्रफलं लभेत् ॥ १४४ ॥**

**ततो गच्छेत राजेन्द्र तीर्थं मेध्यं यथाक्रमम् ।****

---

(०१) (२)सरस्वती,

(०२) (१) उत्तमं (३) जाप्यं; जप (for जप्य०); (४) नूनं; नैवं (for नैनं); भवेत् (for तपेत्); नैतस्य मरणं भवेत्; नैवात्मा मरणं व्रजेत्,

(०३) (१)श्रुतं; पतिं (for गीतं ); (२) व्यासेन च महर्षिणा; नापि चधीमता (३) एवं स ( सु ) (for वेदे च); पूर्वं सारस्वतं राजन्,

(०४) (१)पुण्यतरं; तीर्थ तमं; तीर्थतरं (२) नास्तीवान्यत्; नान्यतीर्थं; नास्ति तीर्थं कुरूद्वह; नराधिप; युधिष्ठिर (३)क०ख०अर्धंचतुष्टयं नास्ति, तन्मेध्यं तत् (for एतन्मेध्यं),

(०५) (२)त्वापः ह्यपि; येपि; ये च (for अपि); नराः; दिवं (for जनाः) स्वशरीरेण मानवाः (३) नर; स्नात्वा (for नर); (४) एवमाहुर् (for प्राहुरेवं),

**सरस्वत्यारुणायाश्च सङ्गमं लकोकोविश्रुते ॥ १४५ ॥**(०१)

**त्रिरात्रोपोषितः स्नात्वा मुच्यते ब्रह्महत्यया।**

**अग्निष्टोमातिरात्राभ्यां फलं विन्दति मानवः ।****

**आसप्तमं कुलं चैव पुनाति भरतर्षभ ॥ १४६ ॥**(०२)

**अतीव तीर्था तत्रैव तीर्थं कुरुकुलोद्वह ।****

**विप्राणामनुकम्पार्थं शार्ङ्गिणा निर्मितं पुरा ॥ १४७ ॥**(०३)

**व्रतोपनयनाभ्यां चाप्युपवासेन वा द्विजः ।****

**क्रियामन्त्रैश्च संयुक्तो ब्राह्मणः स्यान्न संशयः ॥ १४८ ॥**(०४)

**क्रियामन्त्रविहीनोऽपि तत्र स्नात्वा नरर्षभ ।****

**चीर्णव्रतो भवेद्विद्वान्दृष्टमेतत्पुरातनैः ॥ १४९ ॥**(०५)

**समुद्राश्चापि चत्वारः शार्ङ्गिणााऽत्र सकमाहिताः ॥ १५० ॥**

**यत्र स्नात्वा नरव्याध्र न दुर्गतिमवाप्नुयात् ।****

**फलानि गोसहस्राणां चतुर्णां विन्दते च सः ॥ १५१ ॥**(०६)

**ततो गच्छेत राजेन्द्र तीर्थं शतसहस्रकम् ।****

---

(०१) (१)गच्छेत राजेन्द्र (२) तीर्थं मेध्यं; तीर्थसेवी (for तीर्थं देव्या); (३)सरस्वत्य (for ०त्यो );रुणा० (४) सङ्गमे,

(०२) (४)भारत (for मानव ); फलं चैव समश्नते सप्तमं च (for आसप्तमं); पुनात्यासप्तँमं चैव कुलं नास्त्यत्र संशयः,

(०३) (१)अर्धकीलं; अवकीर्णं; चीर्णं हि (for च); (४) दल्भिणा; ब्रह्मणा; शार्ङ्गिणा दक्षिणा,

(०४) (१)च (for वा); (२) (अ)श्वपवासेन; (अ)त्युप; ह्युप; (अ)प्युत वासेन (४) तत्र स्नात्वा महाभुज,

(०५) (१)वा (for पि); क्रियामन्त्रैरुपेतश्च (२) ब्राह्मणः स्यान्नसंशयः; ध्रेणेप्रस्नात्वा च, भरतर्षभ (३) चीर्णव्रती; चीर्णं भती विद्वान् (for विप्रो); चीर्णव्रतोपनयनः (४) दृढमे तत् पुरातनैः न उपवाससमन्वितः,

(०६) (१) (अ)त्र (for (अ)पि) ; (२) शाङ्गिणांत्र; दर्भिणात्र; दर्विणा च (for समानीताश्रू); सुदभणा; समाहि ताः (for च दर्भिणा); आनीता सुमहात्मना (३) तेषु; यत्र; तत्र (for येषु); स्नात्वा (for स्नातो); नरश्रेष्ठ फलं; तु वै; पुनः; पुत्र पि स; हि सः (for च सः); चत्वायर्ग्नोति मानवः; चतुर्णा स च विन्दति,

**साहस्रकं च तत्रैव द्वे तीर्थे लोकविश्रुते ॥ १५२ ॥(०१)**

**उभयोर्हि नरः स्नात्वा गोसहस्रफलं लभेत् ।****

**दानं वाप्युपवासो वा सहस्रगुणितं भवेत् ॥ १५३ ॥(०२)**

**ततो गच्छेत राजेन्द्र रेणुकातीर्थम् उत्तमम् ।**

**तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ।****

**सर्वपापविशुद्धात्मा अग्निष्टोमफलं लभेत् ॥ १५४ ॥(०३)**

**विमोचनम् उपस्पृश्य जितमन्युर्जितेन्द्रियः ।****

**प्रतिग्रहकृतैर्दोषैः सर्वैः स परिमुच्यते ॥ १५५ ॥(०४)**

**सान्निध्यं चैव राजेन्द्र रुद्रपत्न्याः कुरूत्तम ।**

**अर्चयित्वा नदीं देविं ल दुर्गतिमवाप्नुयात् ॥ १५६॥**

**ततः पञ्चवटीं गत्वा ब्रह्मचारी जितेन्द्रियः ।****

**पुण्येन महता युक्तः सतां लोके महीयते ॥ १५७ ॥(०५)**

**यत्र योगेश्वरः स्थाणुः स्वयमेव वृषध्वजः ।****

**तमर्चयित्वा देवेशं गमनादेव सिद्ध्यति ॥ १५८ ॥(०६)**

**औजस कचारुणं तीर्थं स्नात्वा हीप्यति तेजसा ॥१५९॥(०७)**

**यत्र ब्रह्मादिभिर्देवैरृषिभिश्च तपोधनैः ।****

---

(०१) (१)धर्मज्ञ (for राजेन्द्र); (२) शतसहस्रिकं; ०स्रशः; बहुसहस्रकं,(३)साहस्रिकं; सह० स्रकं; सहस्रिकं,

(०२) (१)स्त्वयार्हि (३) च (for वा) (४) ०गुणितो; समितो,

(०३) (३) अ०नास्तीदमर्धम्, अ०नास्तीदमर्धम् ,तीर्थाभिषेकं,

(०४) (१)विमोचन उपं (३) पापैः (for दोषैः); प्रतिग्रहः ०हा; ह्य गतैः पापैः (४) च (for सु ),

(०५) (१)पञ्चवटीं; नदीं ०नदं (२) चारी समाहितः,

(०६) (१) ख०अर्धद्वयं नास्ति,तत्र; ततो (for यत्र); (३) अर्चित्वा तं महादेवं; तमर्चित्वा, महादेवं (४) गिरमिष्टामवाप्नुयात,

(०७) (१) ख०अर्धचतुष्टये नास्तु,ओजसं; तेजसं०; तैजसं,

**सैनापत्येन देवानामभिषिक्तो गुहस्तदा ॥ १६० ॥**[०१]

**औजसस्य तु पूर्वेण कुरुतीर्थं कुरूद्वह ॥ १६१ ॥**

**कुरुतीर्थे नरः स्नात्वा ब्रह्मचारी जितेन्द्रियः ।****

**सर्वपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते ॥ १६२ ॥**[०२]

**स्वर्गद्वारं ततो गच्छेन्नियतो नियताशनः ।****

**स्वर्गलोकमवाप्नोति ब्रह्मलोकं च गच्छति ॥ १६३॥**[०३]

**ततो गच्छेतनरकं तीर्थसेवी कुरूद्वह ।****

**तत्र स्नात्वा लरव्याध्र न दुर्गतिमवाप्नुयात् ॥ १६४ ॥**[०४]

* तत्र ब्रह्मा स्वयं नित्यं देवैः सह महीपते ।**

* अन्वास्ते पुरुषव्याघ्र नारायणपुरोगमैः ।[०५]

* सान्निध्यं तत्र राजेन्द्र रुद्रपत्न्याः कुरूद्वह ।**

* अभिगम्य च तां देवीं न दुर्गतिमवाप्नुयात्।[०६]

**तत्रैव च महाराज विश्वेश्वरमुमापतिम् ।****

**अभिगम्य महादेवं मुच्यते सर्वकिल्बिषैः ॥ १६५ ॥**[०७]

**नारायणं चाभिगम्य पद्मनाभमरिन्दम ।****

---

(०१) (१) दीप्यमानं स्वतेजसा; दीप्यते तेजसा स्वयं; वो स्ना ( न ) त्वा दीप्यति तेजसा; स्नात्वा दिव्यं (for तीर्थं); जिते द्रियः सेनाधिपत्ये; सैनापत्येन; सेनापत्ये च०) पुरा (for तदा ),

(०२) (१)ओजसस्य; तेज; तैज ओजसस्य च पूर्वे तु,ब्रह्म; रुद्र; देव (for कुरु ),

(०३) (३)अग्निष्टोममवा (४) स (for च ),

(०४) (१)अनवकं; चानवकं; अगरुकं (for अनरकं) ततो गच्छेत राजेन्द्र ( नरकं ) (२) कुरूद्वह (for नरा ),

(०५) (१)तस्मिक्य यत्र (for तत्र); (३) कुरुश्रेष्ठ अन्वास्ते पुरुषव्याघ्र (०श्रेष्ठ),

(०६) (१)तत्र ; (for चैव); यत्र नित्यं च सांनिध्यं; (३) अर्चयित्वा अभिगत्वा ततो तु तां; नदीं; दिनं (for च तां),

(०७) (१)तथैव च तत्र चैव,

**प्रपद्यते महाराज विष्णुलोकं शोभमानो || १६६ ||(०१)**

**तीर्थेषु सर्वदेवानां स्नातः स पुरुषर्षभ ।****

**सर्वदुःखैः परित्यक्तो द्योतते शशिवन्नरः || १६७ ||(०२)**

**ततः स्वस्तिपुरं गच्छेत्तीर्थसेवी नराधिप।**

**प्रदक्षिणमुपावृत्य गोसहस्रफलं लभेत् ||१६८||(०३)**

**पावनं तीर्थमासाद्य तर्पयेत्पितृदेवताः ।****

**अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति भारत || १६९ ||(०४)**

* प्रदक्षिणमुपावृत्य गोसहस्रफलं लभेत्।। १५६ ।।(०५)

**गङ्गाह्लदश्च च तत्रैव कूपश्च भरतर्षभ।**

**तिस्रः कोट्यश्च तीर्थानां तस्मिन्कूपे महीपते || १७० ||**

**तत्र स्नात्वा नरो राजन्स्वर्गलोकं प्रपद्यते || १७१ ||(०६)**

**आपगायां नरः स्नात्वा अर्चयित्वा महेश्वरम् ।****

**गाणपत्यमवाप्नोति कुलं चोद्धरते स्वकम् || १७२ ||(०७)**

**ततः स्थाणुवनं गच्छेत्त्रिषु लोकेषु विश्रुतम् ।****

**तत्रा स्नात्वा स्थितो रात्रिं रुद्रलोकमवाप्नुयात् || १७३ ||(०८)**

---

(०१) (२)अरिन्दम (३) रोच; राज (for शोभ); (४) च गच्छति (for प्रप०),

(०२) (१)तीर्थेषु (for तीर्थे तु); (२) सन् (for स); स्नात्वा भरतसत्तम, स्नातमात्रो नराधिप (३) ख०अर्धषट्कं नास्ति,सर्वदुः; अपि (for परि ); (४) शिववत्, (for शशि); तदा नरः (for सदा),

(०३) क०नास्तीदमर्धम्,

(०४) (१)स्वस्ति पुनद्; त्वस्थि ( सि ) पुरं (for स्वस्तिं ) गत्वा; प्राप्य (for गच्छेत्); (२) तीर्थान्वेषी (for तीर्थं),

(०५) (३)वामनं (for पावनं); भारत (for मानवः),

(०६) (१)ह्रदं च (३) च (for तु); ब्रह्म (for स्वर्ग); स्वर्गलोके महीयते,

(०७) (४)च नृप (for स्वकम्); कुलं चैव समुद्धरेत् ( त्रिषु लोकेषु विश्रुतं ),

(०८) (१)तत्र (for ततः); स्थाणुपदं; ०वनं,

**बदरीपाचनं गच्छेद्वसिष्ठस्याश्रमं गतः ।****
**बदरीं भक्षयेत्तत्र त्रिरात्रोपोषितो नरः ॥ १७४ ॥(०१)**

**सम्यग्द्वादशवर्षाणि बदरादस्य यत्कलम् ।****
**त्रिरात्रोपोषितस्यैव भवेत्तुल्यो नराधिप ॥ १७५ ॥(०२)**

**इन्द्रमार्गं समासाद्य तीर्थसेवी नराधिप ।****
**अहोरात्रोपवासेन शक्रलोके महीयते ॥ १७६ ॥(०३)**

**एकरात्रं समासाद्य एकरात्रोषितो नरः ।****
**नियतः सत्यवादी च ब्रह्मलोके महीयते ॥ १७७ ॥(०४)**

**ततो गच्छेत राजेन्द्र तीर्थं त्रैलोक्यविश्रुतम् ।****
**आदित्यस्याश्रमो गत्वा तेजोराशेर्महात्मनः ॥ १७८ ॥(०५)**

**तस्मिंस्तीर्थे नरः स्नात्वा स्यानं महदवाप्नुयात् ।****
**आदित्यलोकं व्रजति कुलं चैव समुद्धरेत् ॥ १७९ ॥(०६)**

**सोमतीर्थे नरः गत्वा तीर्थसेवी कुरूद्वह ।****
**सोमलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥ १८० ॥(०७)**

**ततो गच्छेत धर्मज्ञ दधीचस्य महात्मनः ।****

---

(०१) (१)बदरीपचनं; पञ्चकं; पावनं; पवनं; काननं गत्वा (२) गतः तदा (for ततः); वसिष्ठाश्रममन्ततः (३) बदरान् बदरीं भक्षते यत्र०; राजन् (for तत्र ),

(०२) (२)बदरा; बदश्।; बदरं भक्षयति यः बदरादस्य यं; ( त)त्त्वं; बदर्या तस्य यत्फलं (३) तेन; तत्र (for चैव );पोषितस्येह(स्यैव) (४) तुल्यं,

(०३) (१) क०घ०इन्द्रतीर्थं रुद्रमार्गं; इन्द्रतीर्थ०(२) त्रिरात्रोपोषितो नरः (४) स्वर्गं (for शक्र० ),

(०४) (२)त्वेक (for एकं );क०ख०सत्य,

(०५) (१)राजेन्द्र (for धर्मज्ञ); (३) आदित्यस्याथ सोमस्म; श्रमं गत्वा ( गच्छेत्),

तस्मिंतीर्थे नरः स्नात्वा स्थानं महदवाप्नुयात् । ,

(०६) (२)स्थानं महदवाप्नुयात्,

(०७) (१)तीर्थं नरो गत्वा (२) नराधिप (for कुरू०); वाजपेयफलं लभेत्,( ४)स वै (for नरो),

**तीर्थं पुण्यतमं राजन्पावनं लोकविश्रुतम् ॥ १८१ ॥**(०१)

**यत्र सारस्वतो राजन् सोऽङ्गिरास्तपसो निधिः**

**तस्मिंस्तीर्थे नरः स्नात्वा वाजिमेधफलं लभेत् ।****

**सारस्वतीं गतिं चैव लभते नात्र संशयः ॥ १८२ ॥**(०२)

**ततः कन्याश्रमं गच्छेन्नियतो ह्रह्मचर्यया ॥ १८३ ॥**

**त्रिरात्रमुवितो राजन्नुपवाम परीयणः ।****

**लभेत्कन्याशतं दिव्यं ब्रह्मलोकं च गच्छति।**(०३)

**ततो गच्छेत धर्मज्ञ तीर्थं सन्निहतामपि ॥ १८४ ॥**

**तत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।****

**मासि मासि समायान्ति पुण्येन महतान्विताः ॥ १८५ ॥**(०४)

**सन्निहत्याम् उपस्पृश्य राहुग्रस्ते दिवाकरे ।****

**अश्वमेध शतस्याग्रयं कलं प्राप्नोति मानवः ॥ १८६ ॥**(०५)

**पृथिव्यां यानि तीर्थानि अन्तरिक्षचराणि च ।****

**नद्यो लदुास्तटाकानि सर्वप्रस्रवणानि च ॥ १८७ ॥**(०६)

**उद्पानाश्च वप्राश्च पुण्यीन् न्यायतनानि च ।**

---

(०१) (२) (आ)श्रमं ततः; नराधिप (for महा ),

(०२) (१)यातः; रत्वा; जातः (for राजन् ); (२) सः तपसां (for सो) (४)मेधफलं मतिं(for गतिं),

(०३) (१)गत्वा (for गच्छेन्); (२) ब्रह्मचर्यया; नियताशनः; ब्रह्मचार्यथ (३)त्रिरात्रमुषितो (४) सत्य वान्नियतेद्रियः; नियतो नियताशनः पुत्रं; पुण्यं; राजन् , (for दिव्यं); स्वर्गलोकं; स्वर्गं लोकं; पुण्यलोकं ब्रह्मलोके व्रजेत्तथा,

(०४) (२)संनिहिता ०हितम्; हतीम्; हताम् मया (for अपि); (३) तत्र (for यत्र); समेध्यन्ति; अमावास्यां (for समा); ब्रह्मलोकं व्रजेत्ततः,

(०५) (१)संनिहत्याम् (३) तस्य; तत्र (for तेन); अश्वमेधसहस्रं तु, ०शतस्याग्रं (४) तेने तत्रेष्टं शाश्वतं भवेत्; फलं प्राप्नोति मानवः,

(०६) (२)अन्तरीक्ष (३) हदासू (for नदाम् ); तथा कूपाः तडागानि; तटा कानि (for तडा०); (४) ह्रदाः (for सर्व ),

**मासि मासि नरव्याघ्र सन्निहत्यां न संशयः ॥ १८८ ॥**[०१]

* निःसंशयममावास्यां समेष्यन्ति नराधिप।[०२]

* श्राद्धं च तीर्थसन्निहनादेव सन्निहत्येति विश्रुता

* तत्र स्नात्वा च पीत्वा च स्वर्गलोके महीयते।

* अमावास्यां तु तत्रैव राहुग्रस्ते दिवाकरे।

* यः श्राद्धं कुरुते मर्त्यस्तस्य पुण्यफलं शृणु ।

* अश्वमेधसहस्रस्य सम्यगिष्टस्य यत्फलम्।

* स्नात एव समाप्नोति कृत्वा मानवः ।

तीर्थसंनिहतादेव; तीर्थे सनय०; तीर्थसनह०; तीर्थसंनिह संनिहत्येति विश्रुता; सनातिरिति वि ब्रह्म (for स्वर्ग ); अमावस्यां तु; वास्यायां (for वास्यान्तु); तत्र(for मर्त्यम्); अग्निष्टोमस्य (for सम्यगि); समाप्नोति (for तदा )

**यत्किञ्चिद्दुष्कृतं कर्म स्त्रिया वा पुरुषस्य वा**

**स्नातमात्रस्य तत्सर्वं नश्यते नात्र संशयः ॥ १८९ ॥**

**पद्मवर्णेन यानेन ब्रह्मलोकं स गच्छति ॥ १९० ॥**[०३]

**अभिवाद्य ततो यक्षं द्वारपालं अरुन्युकम् ।****

**कोटिरूपमुपस्पृश्य लभेद्बहुसुवर्णकम् ॥ १९१ ॥**[०४]

* गङ्गाह्रदश्च तत्रैव तीर्थं भरतसत्तम।

**तत्र स्नातस्तु धर्मज्ञ ब्रह्मचारी समाहितः ।****

**राजसूयाश्वमेधाभ्यां फलं विन्दति मानवः ॥ १९२ ॥**[०५]

---

(०१) (१)तडागानि च; उदपा नानि वाप्यश्च; कूपाश्च (२) तीयी (for पुण्यां); पुण्यापुण्यमलाम्भसः ( सा
(०२)(३)नरव्याघ्र; समेष्यन्ति (for समा); (४) संनित्त्यां; संनीतायां युधिष्ठिर; नरेश्वर (for न संशयः ),
(०३) (२)स्त्रियो त्वा पुरुषेण वा (४) दह्य (for नश्य०); प्रपद्यते (for स गच्छति),
(०४) (१)अभिगम्य (२) प्रचु ( च )क्षुकं; अचक्रकं; अवक्रकं; अवक्तकं; चमत्कुयं; चमन्दुकं; अरुन्दु ( तु )कं; अथन्दुकं; मचन्तुकं (for श्वरन्तुक ); (३)कोटिकोपम्; कोटीतीर्थम्;क्ष कोशिर्थिम्; कोर्य्यरूपः,
(०५) (१)गङ्गाहदं च कूपश्च (for तत्रैव); (२) तीर्थं परमपावन; तत्रैव भरतर्षभ, (३)स्नात्वा तु; स्नायीत (for

**पृथिव्यां नैमिषं तीर्थं अन्तरिक्षे च पुष्करम् ।****
**त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते ॥ १९३ ॥**(०१)

लक्षालङ्कारः-अन्तरिक्षे च पुष्करम् इत्यत्र न्तरिक्षे देवर्ष्यादिजनसङ्कुलान्तरिक्षे पुष्करं स्तूयत इत्यर्थः ।

**पांसवोऽपि कुरुक्षेत्राद्वायुना समुदीरिताः ।****
**अपि दुष्कृतकर्माणां नयन्ति परमां गतिम् ॥ १९४ ॥**(०२)
**दक्षिणेन सरस्वत्या उत्तरेण दृषद्वतीम् ॥ १९५ ॥**
**ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे।**

* उत्तरेण दृषद्वत्यां दक्षिणेन सरस्वतीम् ।

**कुरुक्षेत्रे गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।****
**अप्येकां वाचमुत्सृज्य सर्वपापैः प्रमुच्यते ॥ १९६ ॥**(०३)

**ब्राह्मीवेदी कुरुक्षेत्रं पुण्यं ब्रह्मर्षिसेवितम् ।****
**सदा वसन्ति या राजन् न ते शोच्याः कथञ्चन॥ १९७ ॥**(०४)

**अरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानां च मरुन्दुकस्य ।****
**एतत्कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते ॥ १९८ ॥**(०५)

अस्मिन् तीर्थयात्रापर्वणि ६६अध्याये १९८श्लोकाः सन्ति

---

स्नातस्तु ); राजेन्द्र (for धर्मज्ञ); (४) जितेन्द्रियः (for समा); मानवः (for शाश्व ),
(०१) (१)नैमिशं तीर्थम् (for पुण्यम्); पृथिव्यां नैमिशारण्यं (४) विशां पते (for विशि ),
(०२) (१)कुस्थेत्राद् (२) वायुनापि समीरिताः,
(०३) (१)कुरुक्शेत्रे (३) इत्येद्यं; अप्येतां; अथैतां (for अप्येकां); (४) वि (for प्र ); स्वर्गलोके महीयते,
(०४) (१)ब्रह्मवेद्यां; वेदिः; ब्राह्मी वेदिः दि ब्रह्मादिभिः ब्राह्मी वेदी ,कुरुक्शेत्रे (२) पुण्ये ब्रह्मर्धिसेबिते; महर्षिसेवितं; देवर्षि (३) तस्मिन्वसन्तिः सदा०; मदा० (for तदां); मर्त्या (for राजन्); ये वसन्ति महात्मानः (४) कदा (for कथं ),
(०५) (१)तरण्डुकारण्डुकयोः; अण्डं कास्तुङ्कयोः; अस्तुकास्तुकयोः; अरन्दुकारक्ष्णोः; अरत्निकारत्निश्वोः; अरतुकातिदुकयोः (२) रामं (for राम ); मरदुत्त्य; मवङ्त्य; सचक्रकस्म; मचक्रणस्य; चमदुञ्ज;पञ्चकस्य मचन्दुकस्य (३) एवं (for एतत्); (४) प्रजापतेरुत्तरं,

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पुलस्त्यतीर्थयात्रायां षट्षष्ठितमोऽध्यायः ॥ ६६ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 067

# ६७. सप्तषष्ठितमोऽध्यायः

.पुलस्त्येन भीष्मं प्रति नानातीर्थमाहात्म्यकथनम् ।।

**पुलस्त्यः**

**ततो गच्छेत धर्मज्ञ धर्मतीर्थम् अनुत्तमम्।**
**तत्र स्नात्वा नरो राजन्धर्मशीलः समाहितः ।****
**आसप्तमं कुलं राजन् पुनीते नात्र संशयः ॥ १ ॥(०१)**

* अधिकपाठः ० कपाठे यत्र धर्मो महाभागस्तप्तवानुत्तमं तपः ।। २ ।।

* तेन तीर्थं कृतं पुण्यं स्वेन नाम्ना च विश्रुतम्।

महाभाग; राज (for भाग ); महत् (for कृतं); तेन (for स्वेन),*
विश्रुतं (for चिह्नि० ); चैव (for राजन् ),
० कृच्छ्रेन महता गत्वा तत्र स्नात्वा समाहितः ।
सूर्य; विष्णु० (for मुनि ),

**ततो गच्छेत धर्मज्ञ ज्ञानपावनम् उत्तमम् ।****
**अग्निष्टोममवाप्नोति मुनिलोकं च गच्छति ॥ २ ॥(०२)**

---

(०१) (१) क०नास्तीदमर्धम् ,ततो गच्छेन्महाराज ( प्राज्ञ ) (२) ख०अयं पादोऽनन्तरश्च न स्तः, अनुत्तमं (for पुरां); ,

(०२) (१) क०राजेन्द्र मारापतनमुत्तमम् ख०धर्मज्ञ कारापचन ध०धर्मज्ञ कारापतनमुत्तमम् ,राजेन्द्र (for धर्मज्ञ); (२) कारपाचनम्; कारुषं वनम्; ज्ञानपावनम्; कालम्रवनम् मारापतनम्; कारपतनम् करपानमनुत्तमं; कायापतभनु, /*(४)सूर्य; विष्णु(for भुनि),

**सौगन्धिकवनं राजंस्ततो गच्छेत मानवः** || ३ ||[०१]

**तत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।**[02]

**सिद्धचारणगन्धर्वाः किन्नराश्च महोरगाः ।**

**तद्वनं प्रविशन्नेव सर्वपापैः प्रमुच्यते** || ४ ||[०३]

**ततो हि सा सरिच्छ्रेष्ठा नदीनामुत्तमा नदी ।****

**प्लक्षाद्देवी स्रुता राजन्महारण्या सरस्वती** || ५ ||[०४]

**तत्राभिषेकं कुर्वीत वल्मीकान्निःसृते जले।**

**अर्चयित्वा पितन्देवानश्वमेधफलं लभेत्** || ६ ||

**ईशानाध्युषितं नाम तत्र तीर्थं सुदुर्लभम् ।****

**षट्सु शम्यानिपातेषु वल्मीकादिति निश्चयः** || ७ ||[०५]

**कपिलानां सहस्रं च वाजिमेधं च विन्दतिति ।**

**तत्र स्नात्वा नरव्याघ्र दृष्टमेतत्पुरातनैः** || ८ ||[06]

**त्रिशूलखातं तत्रैव तीर्थमासाद्य भारत ।**

---

(०१) (१)गच्छेत् (for राजन्)२; ततः प्रयतमानसः),

(०२) (१) तत्र (for यत्र ),

(०३) (२)च (for  स ),

(०४) (१)चापि (for हि सा); नदी (for सरित्); (३) क०प्लक्षो देवप्रदा राजन् महापुण्या, ख०प्लक्षा देवस्रुता राजन् महापुण्य, प्लक्षा देवी स्मृ( सु ) ता राजन्; प्लक्षा देवी क्षता राजन्; प्लक्षा देवी श्रु ( स्तु ) ता राजन्; प्लक्षादेवस्य ता राजन्; स्नकृ प्लक्षदेवसुता ( तो ) राजन्,. त्त्वा देव ( ०बी ) स्रुता (४) पुण्या देवी (for महा),

(०५) (१) क०कवेराध्युषितं,कवेराध्युषितं; कवेराऋ चापि(for नाम ),

(०६) (१)सहस्रस्य (for स्रं च); (२) वाजपेयं (for वाजि); फलं विन्दति मानवः व (४) पुरातनं; वै सुगन्धां शतकुम्भां च पश्चयक्षां च भारत ।**
अभिगम्य नरश्रेष्ठ स्वर्गलोके महीयते।। ९ ।।

/*(१)शतगन्धां; शातकुम्भां्। चितकुम्भान् (२) पश्चयज्ञ; पक्षां ०गधा; ०यक्षां; यज्ञान्; ०यज्ञाशू् (३) अभिगत्वा नरव्याघ्र,

**तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ॥ १० ॥**

**गाणपत्यं च लभते देहं त्यक्त्वा न संशयः ॥ ११ ॥**(०१)

**ततो गच्छेत राजेन्द्र देव्याः स्थानं सुदुर्लभम् ।****

**शाकम्भरि इति विख्याता त्रिषु लोकेषु भारत ॥ १२ ॥**(०२)

**दिव्यं वर्षसहस्रं हि शाकेन भरतर्षभ।**

**आहारं सा कृतवती मासि मासि नराधिप ॥ १३ ॥**(०३)

**ऋषयोऽभ्यागतास्तत्र देव्या भक्त्या तपोधनाः ।**

**आतिथ्यं च कृतं तेषां शाकेन किल भारत।**

**ततः शाकम्भरीत्येव नाम तस्याः प्रतिष्ठितम् ॥ १४ ॥**(०४)

**शाकम्भरीं समासाद्य ब्रह्मचारी जितेन्द्रियः ।****

**त्रिरात्रमुषितः शाकं भक्षयेन्नियतः शुचिः ॥ १५ ॥**(०५)

**शाकाहारस्य यत्सम्यक् व कलम् र्षैर्द्वादशभिः कृतम् ।****

**तत्फलं तस्य भवति देव्याश्छन्देन भारत ॥ १६ ॥**(०६)

**ततो गच्छेत्सुवर्णाक्षं त्रिषु लोकेषु विश्रुतम् ।****

**तत्र विष्णुः प्रसादार्थं रुद्रमाराधयत्पुरा ॥ १७ ॥**(०७)

---

(०१) (१)त्रिष्मघातं आसाद्य (for तत्रैव); (२) दुर्लभं (for भारत); तीर्थ भरतसत्तम च (for स),

(०२) (१)धर्मज्ञ (for राजेन्द्र); ततो राज गृह गच्छेत् ( गत्वा ) (२) तीर्थं(for स्थानं); (३) विख्यातं (४) भारत; विश्रुतं; दुर्लभं (for विश्रुता),

(०३) (१) ख०इदमर्धं नास्ति,तु; च (for हि ); सहस्राणि (for ०स्रं हि); (२) सुव्रता; भारत; त।।का (for सुव्रत); न भरतर्षभ,

(०४) (२)भक्ताम् (for भक्त्या ); (४) न भरतर्षभ तदा; तत्र; अतः (for ततः ),

(०५) (२) क०ख०समाहितः,तपस्विनः (for ब्रह्मं); नराधिप; जितेन्द्रियः (for समा ); (४) भक्षयन् भक्षयित्वा नरः शुचिः,

(०६) (१)किञ्चिद् (for सम्यग ); कृतं (for फलम ),

(०७) (१)सुवर्णाख्यं; ०क्षीं; सुवर्णाख्यंर (क्शं) (३) तत्र (for यत्र),

**वरांश्च सुबहूँल्लेभे दैवतेषु सुदुर्लभान् ।****
**उक्तश्च त्रिपुरघ्नेन परितुष्टेन भारत ॥ १८ ॥**[०१]

**अपिचास्मत्प्रियतमो लोके कृष्ण भविष्यसि ।****
**त्वन्मुखं च जगत्सर्वं भविष्यति न संशयः ॥ १९ ॥**[०२]

**तत्राभिगम्य राजेन्द्र पूजयित्वा वृषध्वजम् ।****
**अश्वमेधमवाप्नोति गाणपत्यं च विन्दति ॥ २० ॥**[०३]

**धूमावतीं ततो गच्छेत्त्रिरात्रोपोषितो नरः ।****
**मनसा प्रार्थितान्कामाँल्लभते नात्र संशयः ॥ १९ ॥**[०४]

**देव्यास्तद्द दक्षिणार्धे रथावर्तो नराधिप**
**तत्रारोहेत धर्मज्ञ श्रद्दधानो जितेन्द्रियः ॥ २२ ॥**

**ख०इदमादि अर्धत्रयं नास्ति,**

**महादेवप्रसादाच्च गच्छेत परमां गतिम् ॥ २३ ॥**[०५]

**प्रदक्षिणमुपावृत्य ततो गच्छेत भारत।**
**धारां नाम महाप्राज्ञः सर्वपापप्रणाशिनीम् ।****
**तत्र स्नात्वा नरव्याघ्र न शोचति नरो भुवि ॥ २४ ॥**[०६]

---

(०१) (२)देवैरपि (for दैवतेषु); दे ( दै ) वतैरपि दुर्लभान(३) उक्तं च (४) सोनध; मेनघ; चानघ (for भारत),

(०२) (१)न; तु (for च); (अ)न्नात्; त्वं; (अ)र्थात्, (अ)न्यत्;(अ)न्यैः (for (अ)स्मत्); प्रियत्तमो न मे त्वत्तः प्रियतरः (२)लोके विष्णोर् रुप्रछण्ष्ठ कृष्ण लोके भविष्यति (३) सर्व(for कृत्स्नं),

(०३) (१)अत्रां (for तत्रा); (अ)भिषेके; (अ)भिगत्वाः (अ)पि गत्वा (for (अ)भिगम्य ); (२) अर्चं (for पूज ),

(०४) (१)गत्वा (for गच्छे धृ ); (२) त्रिराश्चषितो (३) लोका (for कामा ),

(०५) (१)दक्षिणार्थे च ( तु)(३)प्रसादादै; देन(दाच्च),

(०६) (२)गम्ब्येरत सत्तम; ततो गच्छेत भारत (३) महाप्राज्ञः (४) ०प्रमरेचनी; ०प्रणाशनीं महाप्राज्ञः महाराज (for नरं); न संशयः नरो भुवि (for नराः),

**ततो गच्छेत धर्मज्ञ नमस्कृत्य महागिरिम्।**
**अशीतियोजनशतं पुरस्तात्स्वर्गमुच्यते ॥ २५ ॥**

कःख०पुष्करं तीर्थमुच्यते;, घ०पुष्करात्,

**अशीतिं धर्मपृष्ठात्तु प्रवदन्ति मनीषिणः ।**
**षष्ठि प्रयागाद्राजेन्द्र कुरुक्षेत्रात्तु द्वादशयः ॥ २६ ॥**

**संयुक्तमेव राजेन्द्र गङ्गाद्वारं त्रिविष्टपम्॥**
**स्वर्गद्वारेण यत्तुल्यं गङ्गाद्वारं न संशयः ॥ २७ ॥(०१)**

**तत्राभिषेकं कुर्वीत कोटितीर्थे समाहितः ।****
**पुण्डरीकमवाप्नोति कुलं चैव समुद्धरेत् ॥ २८ ॥(०२)**

* कोटितीर्थं महाराज शुचिः प्रयतमानसः,
* उष्यैकां रजनीं तत्र गोसहस्रफलं लभेत्।

**सप्तगङ्गे त्रिगङ्गे च चक्रवर्ते चतर्पयेत् ।****
**देवान्पितंश्च विधिवत्पुण्ये लोके महीयते ॥ २९ ॥(०३)**

**ततः कनखले स्नात्वा त्रिरात्रोपोषितो नरः ।****
**अश्वमेधमवाप्नोति स्वर्गलोकं च गच्छति ॥ ३० ॥**

**कपिलावटं ततो गच्छेत्तीर्थसेवी नराधिप ।****
**तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ ३१ ॥(०४)**

---

(०१) (४)नराधिप (for न संशयः ),
(०२) (१)ततो (for तत्रा ); (२) न संशयः; नराधिप; नरः शुचिः (for समा ) पितृदेवार्चने रतः, (३)पौण्ड० (for पुण्ड०); लभते पाण्डरीकं च; लभेत पौण्डरीकाक्षं; लभते पुण्डरीकं तु; लभेद्धि पौडरीकं च (४) स्वर्गलोकं च गच्छति ,
(०३) (१) ख०ततो गच्छेत राजेन्द्र गङ्गाद्वारं त्रिविष्टपम् । स्वर्गद्वारे ण यत्कुल्यं गङ्गाद्वारं नसंशयः । तत्र स्नात्वा नरी धीमान् गृतकृत्यो भवीष्यति ।।(२)चक्रावर्ते तर्पयेत् (४) पुण्ये लोके विधीयते,
(०४) (१)कपिला वटशू ततो गच्छेत्; च तत्रैव; तु गच्छेत (for च गच्छेत); (३)उपोष्य कथैका (for उपोष्य); रात्रि तत्रैकां; उपोष्यैकां च रजनीं; तत्रोष्य रजनीमेकां,

**नागराजस्य राजेन्द्र कपिलस्य महात्मनः ।****

**तीर्थं नु ङरतश्रेष्ठ सर्वलोकेषु विश्रुतम् ॥ ३२ ॥**[०१]

**तत्राभिषेकं कुर्वीत नागतीर्थे नराधिप ।****

**कपिलानां सहस्रस्य फलं प्राप्रेति मानवः ॥ ३३ ॥**[०२]

**ततो राजेन्द्र गच्छेच्छान्तनोस्तीर्थमुत्तमम् ।****

**तत्र स्नात्वा नरवियाघ्र न दुर्गतिमवाप्नुयात् ॥ ३४ ॥**[०३]

**गङ्गायमुनयोश्चैव स्नाति यः सङ्गमे नरः ।****

**दशाश्वमेधानाप्नोति कुलं चैव समुद्धरेत् ॥ ३५ ॥**[०४]

**ततो गच्छेत राजेन्द्र सुगन्धां लोकविश्रुताम् ।****

**सर्वपापविशुद्धात्मा ब्रह्मलोके महीयते ॥ ३६ ॥**[०५]

**रुद्रावर्तं ततो गच्छेत्तीर्थसेवी नराधिप ।****

**तत्र स्नात्वा नरो राजन्स्वर्गलोके महीयते ॥ ३७ ॥**[०६]

**गङ्गायाश्च नरश्रेष्ठ सरस्वत्याश्च सङ्गमे ।****

**स्नात्वाश्वमेधं प्राप्नोति स्वर्गलोकं च गच्छति ॥ ३८ ॥**[०७]

**भद्रकर्णेश्वरं गत्वा देवमर्च्य यथाविधि ।****

---

(०१) (१)तत्रैव (for राजेन्द्र); (२) तक्षकस्य (for कपि ); (३) तीर्थं कुरुकुलश्रेष्ठ; तीर्थं तु, ( तद्) भरतश्रेष्ठ (४) सर्वतीर्थेषु; त्रिषु लोकेषु; स्वर्ग,

(०२) (४)विन्दति (for प्राप्नोति ),

(०३) (१)ललितकं; लडतिकां; ललित; ललितिकं; ललतिकां; ललतिकं; कुलिनिका; तु ललितां नलिनिकां; विलपि; विदित (२) शान्तनोस् (३) नरव्याघ्र (for नरो राजन् ),

(०४) (१)गङ्गायमुनयोः; सुगङ्गयोः; समुद्रयोः; सागरयोः; समङ्ग्याः (for सङ्गमयोः),मध्व; चापि (for चैव); (२) पुनः; क्षुप (for नरः); अग्निष्टोममवाप्नोति नागलोकं च गच्छति,

(०५) (२)सुगधं विश्रुतं (४) स्वर्गलोके स्वर्गलोकं च गच्छति,

(०६) (१)मद्रावर्तं; मन्त्रा० गोसहस्रमवाप्नोति कलेन तोत्तम (४)देवलोके च गच्छति (for महीं ),

(०७) (१) (ए)व राजेन्द्र (for नर ); (३) स्नात्वा (for स्नातो); प्राप्नोति (for आप्नोति ),

**न दुर्गतिमवाप्नोति स्वर्गलोकं च गच्छति ॥ ३९ ॥**(०१)

**ततः कुब्जावनं गच्छेत्तीर्थसेवी यथाक्रमम्।**
**गोसहस्रमवाप्नोति स्वर्गलोकं च गच्छति ॥ ४० ॥**(०२)

**अरुन्धतीवटं गच्छेत्तीर्थसेवी नराधिप ॥ ४१ ॥**

**अश्वमेधमवाप्नोति त्रिरात्रोपोषितो नरः ।****
**गोसहस्रफलं विन्देत् कुलं चैव समुद्धरेत् ॥ ४२ ॥**(०३)

* तत्र स्नात्वा नरो राजन्त्यर्गलोके महीयते ।(०४)

* सामुद्रकम् उपस्पृश्य ब्रह्मचारी समाहितः ।(०५)

**ब्रह्मावर्तं ततो गच्छेद्ब्रह्मचारी समाहितः ।****
**अश्वमेधमवाप्नोति सोमलोकं च गच्छति ॥ ४३ ॥**(०६)

**यमुनाप्रभवं गत्वा समुपस्पृश्य यामुनम् ।****
**अश्वमेधफलं लब्ध्वा स्वर्गलोके महीयते ॥ ४४ ॥**(०७)

**दर्वीसङ्क्रमणं प्राप्य तीर्थं त्रैलोक्यपूजितम् ।****
**अश्वमेधमवाप्नोति स्वर्गलोकं च गच्छति ॥ ४५ ॥**(०८)

---

(०१) (१)भद्रः ( तत्र ) कर्णह्रदे स्नात्वा ( भद्रकर्णे नरः स्नात्वा) (२) देवमभ्यर्च्य शङ्करं; तीर्थसेवी नराधिप; अर्चयित्वा यथा (४) नाकपृष्ठे च पूज्यते ( मोदते ),

(०२) (१) स्वकं; त्त्यामृके; क्कजाश्रमं; कुञ्जाम्रकं; कुञ्जावत; कुञ्जावनं; क्कजवर्तीं; कुजम्बरं; कुञ्जावक (२) नराधिप (for यथा); (४)नाग (for स्वर्गं ),

(०३) (१)पदं (for वटं); गत्वा (for गच्छेत्); मद्रावतं ततो गच्छेत् (२) यथाक्रमं (for नरा),

(०४) (३)सामुद्रक; द्रिकम् ,

(०५) विद्यात्; विद्यात्; गच्छे (for विन्देत् ),

(०६) (२)जितेन्द्रियः (for समा); (४) सोम (for स्वर्ग० ); स्वर्गलोके महीयते; पुना त्यासप्तमं कुलं,

(०७) (२)ससुप स्पृश्य (for उपस्पृश्य च); सो (for च ); यामुनं; यामुनां सिद्धगन्धर्वसेवितं (३) मेधमवाप्नोति (४) ब्रह्मलोके स्वर्गलोकं च गच्छति,

(०८) (१)दधिसक्रमणं; दीर्ध०; देवी०; दधिचक्रमण; दर्वीवङ्गमन; डर्वीसङ्क्मण (२)०पूजितं (४) ब्रह्म (for स्वर्गं); कुलं चैव समुद्धरेत्,

**सिन्धोश्च प्रभवं गत्वा सिद्धगन्धर्वसेवितम् ।**
**लत्रोषित्वा निशां पश्च विन्देद्बहुसुवर्णकम् ॥ ४६ ॥(०१)**

**अथ देवं समासाद्य नरः परमदुर्गमाम् ।**
**अश्वमेधमवाप्नोति गच्छेच्चौशनसीं गतिम् ॥ ४७ ॥(०२)**

**ऋषिकुल्यां समासाद्य वासिष्ठं चैव भारत ।**
**वासिष्ठीं समतिक्रम्य सर्वे वर्णा द्विजातयः ॥ ४८ ॥(०३)**

**ऋषिकुल्यां समासाद्य नरः स्नात्वा विकल्मषः ।**
**लरस्स्नात्यृषिकुल्यायाम् ऋषिलोकं प्रपद्यते ।**
**यदि तत्र वसेन्मासं शाकाहारो नराधिप ॥ ४९ ॥(०४)**

**भृगुतुन्दं समासाद्य वाजिमेधफलं लभेत् ।**
**गत्वा वीरप्रमोक्षं च सर्वपापैः प्रमुच्यते ॥ ५० ॥(०५)**

**कृत्तिकामघयोः चैव तीर्थमासाद्य भारत ।**
**अग्निष्टोमातिरात्राभ्यां फलमाप्नोति पुण्यकृत् ॥ ५१ ॥(०६)**

**ततः सन्ध्यां समासाद्य विद्यातीर्थम् अनुत्तमम् ।**
**उपस्पृश्य च विद्यानां सर्वासां पारगो भवेत् ॥ ५२ ॥(०७)**

---

(०१) (१)क०नासक्तीदमर्धम्, (२)०चारण० (३) उपोष्य (for तत्रोष्य); हउपोष्य रजनीमेकां; तत्रोषित्वा निशाः( नरः ) पश्च (४) विदेद् (for विन्द्या ),

(०२) (१)अन्तर् (for अथ०); दैर्वी; नदीं; वेदिं (for वेदीं); (४) प्रेष्ठस्वर्गलोकं च गच्छति,

(०३) (२)वासिष्ठीं; वसिष्ठं (३) वासिष्ठीं (४) सर्व (for सर्वे),

(०४) (३)ऋषिज्वां समासात्यां; नरः स्नात्वर्षिकुल्यायां ऋषिकुल्वां ० नर स्नात्वा विकट ।
देवस्थिवश्चार्चयित्व(३)ततः सन्ध्यां समासाद्य (४) क्षइएवइन्ध (for नरा );० द्वादशाहस्य यज्ञस्य फलं स लभते नरः ।

(०५) (१) क०द्वादशाहस्य यज्ञस्य फखलं स लभते नरः। भृगु तुन्दं (३) चीरप्रमोक्षं; तीर,

(०६) (१)कृत्तिकायामुपोष्यैव; ०माध योश्चैव; मनसां चैव (२) दुर्लभं (for भारत ); (३) ष्टोममवाप्नोति ) (४) प्र मानवः (for पुण्य); स्वर्गलोकं च गच्छति,

(०७) (१)तत्र (for ततः); (३) उपस्पृशेत् लग् स (for च); ० ताविजा; ,विझा; विद्या वै (for विद्यानां);

**महाश्रमे वसेद्रात्रिं सर्वपापप्रमोचने ।****

**एककालं निराहारो लोकन्प्राप्नोति पुष्कलान्** ॥ ५३ ॥(०१)

**षष्ठकालोपवासेन मासमुष्य महालये ।****

**सर्वपापविशुद्धात्मा विन्देद्बहुसुवर्णकम्** ॥ ५४ ॥(०२)

**तीर्णस्तारयते जन्तुर्दश पूर्वान्दशापरान् ॥**

* दृष्ट्वा माहेश्वरं दिव्यपदसुरनमस्कृतम्।
* कृतार्थः सर्वकृत्येषु न शोयेन्मरणनरः ।(०३)
* दशापरान्दश पूर्वान्नरानुद्धरते कुलम्,

**अथ वेतसिकां गत्वा पितामहनिषेविताम् ।****

**अश्वमेधमवाप्नोति गच्छेदौशनसीं गतिम्** ॥ ५५ ॥

* दशापरान्दश पूर्वान्नरानुद्धरते कुलम् कुलानुद्धरते नरः (०४)

**अथ सुन्दरिकातीर्थं प्राप्य सिद्धनिषेवितम् ।****

**रूपस्य भागी भवति दृष्टमेतत्पुरातनैः** ॥ ५६ ॥(०५)

**ततो वै ब्राह्मणीं गच्छेत् ब्रह्मचारी जितेन्द्रियः ।****

**पद्मवर्णेन यानेन ब्रह्मलोकं प्रपद्यते** ॥ ५७ ॥(०६)

**ततस्तु नैमिषं गच्छेत्पुण्यं सिद्धनिषेवितम् ।****

---

(४) यत्र ( य )त्रोपपद्यते,

(०१) (४)लोकान्माप्नोति शुष्क (मग) लान्,

(०२) (१)एक (for षष्ठ); (२) उष्य मासं; ० उष्य कालं; समनुष्य, उमालये तीर्थसेवी नराधिपः,

(०३) (४)विद्याः वेदिः लभेद् (for वित्साद्),

(०४) (१) वैतसकं; वतसिका; कुन्त्येसिका; वैतसिकां; वेतसकं; वेतसिकं (२) ०वितं; वितः (४) लभेचू (for गच्छेम्); गतिं च परमां व्रजेत्,

(०५) (२)सिद्धि तीर्थ (४) पुरातनैः,

(०६) (१)अथ वै ब्राह्मणं गच्छेद् (for गत्वा ); ततो ब्राह्मणिकां गत्वा; तथैव गत्वा ब्रह्मा (२) समाहितः (for जिते ),

**तत्र नित्यं निवसति ब्रह्मा देवगणैः वृतः ॥ ५८ ॥(०१)**

**नैमिषं मृगयानस्य पापस्यार्धं प्रणश्यति ।****

**प्रविष्टमात्रस्तु नरः सर्वपापैः प्रमुच्यते ॥ ५९ ॥(०२)**

**तत्र मासं वसेद्धीरो नैमिषे तीर्थतत्परः ।****

**पृथिव्यां यानि तीर्थानि तानि भारत नैमिषे ॥ ६० ॥**

**कृताभिषेकस्तत्रैव नियतो नियताशनः ।**

**गवां मेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ६१ ॥(०३)**

**पुनात्यासप्तमं चैव कुलं भरतसत्तम ॥ ६२ ॥(०४)**

**यस्त्यजेन्नैमिषे प्राणानुपवासपरायणः ।**

**स मोदेत्सर्वलोकेषु एवमाहुर्मनीषिणः ।**

**नित्यं मेध्यं च पुण्यं च नैमिषं कुरुसत्तम ॥ ६३ ॥(०५)**

**गङ्गोद्भेदं समासाद्य त्रिरात्रोपोषितो नरः ।****

**वाजपेयमवाप्नोति ब्रह्मभूतश्च जायते ॥ ६४ ॥(०६)**

**सरस्वतीं समासाद्य तर्पयेत्पितृदेवताः ।****

**सारस्वतेषु लोकेषु मोदते नात्र संशयः ॥ ६५ ॥(०७)**

**ततश्च बाहुदां गच्छेद्ब्रह्मचारी समाहितः ।****

---

(०१) (१)ततस्तु नैमिशं (२) द्विज ( सिद्ध) (३) निवसते (४) सह (for वृतः ),

(०२) (१)नैमिषे; नैमिशं मृगयानस्य; पार्थमासाद्य (४) सर्वपापात्,

(०३) (१)कृताभिषेकस्तत्रैव; अभिषे न्नरस्तत्र; अभिषेके कृत्ने तत्र; अभिषेकं कृतस्तत्र; अभिषेकं तत्र कृ( ग ) त्वा; अभिषेकंततः कृत्वा (३) गवांमधेस्य (for गवाम ); गवामयुतदानस्म ,

(०४) (४) प्र मानवः (for भारत ),

(०५)(१) नैमिशे (३) स्वर्गलोकस्तु; लोकेषु; सर्वलोकेषु; सर्वलोकस्य पुण्यं मेध्यं सेव्यं (for पुण्यं); नैमिशं,

(०६) (४)ब्रह्मलोकं च भवेच्च सः; भवेत्सदा (for च जायते),

(०७) (२)तर्पयन् (for येत् ),

**देवसत्रस्य यज्ञस्य फलं प्राप्नोति मानवः || ६६ ||**[०१]

* तत्रोष्य रजनीमेकां स्वर्गलोके महीयते

**ततः क्षीरवतीं गच्छेत्पुण्यां पुण्यतरैर्वृताम् ।**

**पितृदेवार्चनपरो वाजिमे ध मवाप्नुयात् || ६७ ||**[०२]

**विमलाशोकमासाद्य विराजति यथा शची ।**

**तत्रोषित्वा निशा मेकां स्वर्गलोके महीयते || ६८ ||**[०३]

**गोप्रतारं ततो गच्छेत्सरय्वास्तीर्थम् उत्तमम् ।****

**यत्र रामो गतः स्वर्गं सभृत्यबलवाहनः || ६९ ||**[०४]

**देहं त्यक्त्वा दिवं यातस् तस्य तीर्थस्य तेजसा ।****

**रामस्य च प्रसादेन व्यवसायेन चानध || ७० ||**[०५]

**तस्मिंस्तीर्थे नरः स्नात्वा गोप्रतारे नराधिप ।****

**सर्वपापविशुद्धात्मा स्वर्गलोके महीयते || ७१ ||**[०६]

**रामतीर्थे नरः स्नात्वा गोमत्यां कुरुनन्दन ।****

**अश्वमेधमवाप्नोति पुनाति च कुलं नरः || ७२ ||**[०७]

**शतसाहस्रकं तीर्थं तत्रैव भरतसत्तम || ७३ ||**

---

(०१) (१)बाहुलां; बाहुका बाहुदां (२) तीर्थसेवी नराधिप, (३)अग्निष्टोमस्य य (४) प्र भारत; कौरव (for मानवः ); ,

(०२) (१)क्षीरवले; चरिवटीं; चि ( चि )रनदीं; शरनदीं; शरावतीं; शतवतीं; शीघ्रवतीं (२) पुण्यतरैर्;जनैर्; जलैर् (३) र्चनपरः (४) वाजिमेधमवां,

(०३) (१)विमलालोकमा; विमलातीर्थमां; विश्वालोकं समासाद्य (२)क०ख०घ०शशी, विरोचति ब्रह्मचारी समाहितः; ब्रह्मचारी जितेंद्रियः (३) तत्रोषित्वा निशामेकां (४)गोसहस्र फलं लभेत्,

(०४) (१)गोप्रचारे; चारं; ०भारं ०कारं (२) सरण्ढीर्थ,

(०५) (१)स च वीरः (for देहं त्यक्त्या ); पुरा राजन्; महाराज; दिवं यान्ति; दिवं गत्वा (for दिवं यातस्) (३) प्रभावेन ( ०ण) (४) व्यवसायेन चानघ,

(०६) (२)गोप्रचारे; ०कारे (४) विष्णुलोके म,

(०७) (४)स्व (for च ); स्वकं (for नरः); चैव समुद्धरेत्,

* यत्र रामो गतस्स्वर्गं सभृत्यबलवाहनः ।

* रामस्य च प्रसादेन व्यवसायेन चानघ ।

* गोप्रतीरे नरस्स्नात्वा स्वर्गलोके महीयते ।।

**तत्रोपस्पर्शनं कृत्वा नियतो नियताशनः ।**
**गोसहस्रफलं पुण्यं प्राप्नोति भरतर्षभ ।**(०१)

* गोसहस्रमवाप्नोति नरो नास्त्यत्र संशयः

**ततो गच्छेत राजेन्द्र भर्तृस्थानम् अनुत्तमम् ।। ७४ ।।**

**कोटितीर्थे नरः स्नात्वा अर्चयित्वा गुहं नृप ।****
**गोसहस्रफलं विद्यात्तेजस्वी च भवेन्नरः ।। ७५ ।।**(०२)
**अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।। ७० ।।**(०३)

**ततो वाराणसीं गत्वा अर्चयित्वा वृषध्वजम् ।****
**कपिलानां ह्रदे स्नात्वा राजसूयमवाप्नुयात् ।। ७१ ।।**(०४)

**अविमुक्तं समासाद्य तीर्थसेवी कुरूद्वह ।****
**दर्शनाद्देवदेवस्य मुच्यते ब्रह्महत्यया ।। ७२ ।।**

* प्राणानुत्सृज्य तत्रैव मोक्षं प्राप्नोति मानवः ।

**मार्कण्डेयस्य राजेन्द्र तीर्थमासाद्य दुर्लभम् ।**
**गोमतीगङ्गयोः चैव सङ्गमे लोकविश्रुते ।। ७६ ।।**

---

(०१) (१)शतसाहस्रकं तर्थि; चैव (२) त (अ)त्रैव भरतर्षभ,

(०२) (१)धर्मज्ञ (for राजेन्द्र),

(०३) (४)ह्यर्च (for अर्च०); शुचिस्तत्र नराधिप; गुहमर्च्य नराधिप ( यथाविधि ) विद्यात विद्यात् (for विन्देत् ); ०स्वी चापि जायते,

(०४) (२)देवमर्च्य; पूजयित्वा; ह्यर्चयित्वा (३) कपिलाहदं संस्पृश्य; ह्रदमु( ह्रदे उ) पस्पृश्य। कपिलानां ह्रदे स्नात्वा; कपिलस्य हृदे स्नात्वा (४) वाजपेयफलं; गोसहस्रफलं ०राब्दयमवाप्नुयात्,

**अग्निष्टोममवाप्नोति कुलं चैव समुद्धरेत् । ॥ ७७ ॥(०१)**

**ततो वाराणासर्किं गत्वा अर्चयित्वा वृषवजम् ।**

**कपिलकानां हृदे स्नात्वा राजसूयफलं लभेत् ॥ ७८ ॥**

**वाराणस्यां विशेषेण यत्र विश्वेश्वरः शिवः ।**

**देव्या सह महाबाहो गङ्गां समवगाहते ॥ ७९ ॥**

**तत्र मासं वसेद्धीरो ब्रह्मचारी समाहितः ।**

**यावज्जीवकृतं पापं मासेनैकेन शुध्यति ॥ ८० ॥**

**ततो गयां समासाद्य ब्रह्मचारी जितेन्द्रियः ।******

**अश्वमेधमवाप्नोति गमनोदेव भारत ॥ ८१ ॥(०२)**

**यत्राक्षयवटो नाम त्रिषु लोकेषु विश्रुतः ।******

**तत्र दत्तं जितृणां तु अक्षय्यमुपाद्यते ॥ ८२ ॥(०३)**

**महानद्याम् उपस्पृश्य तर्पयेत्पितृदेवताः ।******

**अक्षयान्प्राप्नुयाल्लोकान्कुलं चैव समुद्धरेत् ॥ ८३ ॥**

**ततो ब्रह्मसरो गच्छेद् ब्रह्मारण्योपशोभितम् ।******

**पौण्डरीकमवाप्नोति प्रभातामेव शर्वरीम् ॥ ८४ ॥(०४)**

**तस्मिन् सरसि राजेन्द्र ब्रह्मणो यूप उद्धृतः**

**यूपं प्रदक्षिणं कृत्वा वाजपेयफलं लभेत् ॥ ८५ ॥**

---

(०१) (१)माकाण्डेयस्य० अश्वमेधमवाप्नोति विष्णुलोकं च गच्छति । स्नात्वा ग्निष्टोममाप्नोति,

(०२) (२)समाहितः (for जिते); (४) ब्रह्मलोकं च गच्छति; कुलं चैव समुद्धरेत्; सयायानेन भारत,

(०३) (१)यत्रा (अ)क्षय्यवटो (३) पितृभ्यसू पितृणां दत्तमन्नं हि; तत्र (for यत्र); दत्तं पितृभ्यस्तु (श्च)तत्र ( अत्र) दत्तं पितृणां तु ( च) (४) (इ)ति वै (for प्रभो ); भवत्यक्षयमुच्यते ( ०मव्यय); क्षयं भवति भारत; अक्षय्यमुपपद्यते,

(०४) (१)ब्राह्मं (for ब्रह्म ); गत्वा (for गच्छेत् ); (२) ब्रह्मारण्यो सेवितं (for शोभि तम्); (३) ब्रह्मलोकम्; पुण्डरीकम् (४) चैव; इव; एक (for एव ) शर्वरी,

* for substrute 1st Half

* (ब्रह्मणा तत्र सरसि यूपश्रेष्ठः समुच्छ्रितः)[०१]

**ततो गच्छेत राजेन्द्र धेनुकं लोकविश्रुतम् ।**

**एकरात्रोषितो राजन्प्रयच्छेत्तिलधेनुकाम्।**

**सर्वपापविशुद्धात्मा सोमलोकं व्रजेद्ध्रुवम् ॥ ८६ ॥**[०२]

**तत्र चिह्नं महद्राजन्नद्यापि हि न संशयः ॥ ८७ ॥**

**कपिला सह वत्सेन पर्वते विचरत्युत,**

* for substrute 1st Half

* (कपिलायाः सवत्सायाश्चरन्त्याः पर्वते कृतम्)

**सवत्सायाः पदानि स्म दृश्यन्तेऽद्यापि तत्र वै ॥ ८८ ॥**[०३]

**तेषूपस्पृश्य राजेन्द्र पदेषु नृपसत्तम ।****

**यत्किञ्चिदशुभं कर्म तत्प्रणश्यति भारत ॥ ८९ ॥**[०४]

**ततो गृध्रवटं गच्छेत्स्थानं देवस्य धीमतः ।****

**स्नायीत भस्मना तत्र अभिगम्य वृषध्वजम् ॥ ९० ॥**[०५]

---

(०१) (१)ब्रह्मणा तत्र सरसि (२) यूप (पः) श्रेष्ठः समु० च्छ्रितः; प्रायः पुण्योपकल्पितः; यूपश्रेष्ठः समन्वितः;यूपः श्रेष्ठः समुत्थितः (३) प्रदक्षिणी (४)वाजिमेधफलं; राजसूयं,

(०२) (२)धेनुकं ( वैनवं; धेनवं; धैनवं; वेणवं) विश्रुतं; धेनुलोकं च,विश्रुतं (४) तिलधेनुः० वसेद्; भवेद्; विशेद् (for व्रजे); सोम,लोकं स गच्छति,

(०३) (१)महद्राजन् (for महा राज); (२) च ( हि ) अद्यापि सुमहासुत्; अत्रा (द्या)पि सुमहच्चूशं; अद्यापि महदद्भुतं (३) वत्सा वै (for वत्सेन) कपिलायाः सवत्सायाः; सवत्सा कपिला तत्र; कपिला सा सवत्सा तु; कपिला सहस्रा वत्सा वै (४)च(त्व) रत्याःपर्वते कृतं; ; पर्वते विचरेत्युनः; पर्वते हि चरेत्पुनः; पर्वते विचरन्पुन पदानस्य; पदान्यस्या; पदन्यासा; पदान्यद्य (for पदानि स्म); सवत्सां गां प्रदाति स्म चापिः त्रापि (for द्यापि ); तत्र वै (for भारत); दृश्यन्ते भरतर्षभ,

(०४) (१)पादेषु (for राजेन्द्र); (२)( पदेषु कुरुनन्दने ति पादः यत्किञ्चिदशुभं पुंस,इति पादश्च ककोशे न स्तः) स्वर्गच्छेत् (for पदेषु); कुरुनन्दन ( सत्तम) (३)पुंसः; किञ्चित् पापं ( तस्य ) (for कर्म),

(०५) (२)शूलिनः (for धीमतः); (३) स्नायिता ; (४) नमस्कृत्य (for अभि ); सङ्गम्य वृषभध्वजे,

**ब्राह्मणेन भवेच्चीर्णं व्रतं द्वादशवार्षिकम् ।****
**इतरेषां तु वर्णानां सर्वपापं प्रणश्यति ॥ ९१ ॥**(०१)

**उद्यन्तं च ततो गच्छेत्पर्वतं गीतनादितम् ।****
**सावित्रं पदं तत्र दृश्यते भरतर्षभ ॥ ९२ ॥**

* ततो गच्छेत तं राजन् कुलीनो लात्र संशयः ।
* एष्टव्या बहवः पुत्रा यद्येकोऽपिगयां व्रजेत् ।।
* यावज्जीवकृतं पाजंमासेनैकेन शुध्यति ।
* ततो गयां समासाद्य ब्रह्मचारी समाहितः ।।
* गच्छेत ततः उद्यन्त च ततो गच्छे; उदयं तु (०२)

**तत्र सन्ध्यामुपासीत ब्राह्मणः संशितव्रतः ।****
**तेन ह्युपास्ता भवति सन्ध्या द्वादशवार्षिकी ॥ ९३ ॥**(०३)

**योनिद्वारं च तत्रैव विश्रुतं भरतर्षभ ।****
**तत्राभिगम्य मुच्येत पुरुषो योनिसंसरात् ॥ ९४ ॥**(०४)

**कृष्णशुक्लचतुर्दश्यां गयायां यो वसेन्नरः ।****
**पुनात्यासप्तमं राजन्कुलं नास्त्यत्र संशयः ॥ ९५ ॥**(०५)

**एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।****
**गौरीं वा वरयेत् कन्यां नीलं वा वृषमुत्सृजेत् ॥ ९६ ॥**(०६)

---

(०१) (व्रतं (for भवे ) भवेत् व्रतं (३) च (for तु ); (४) सर्वं (for सर्व ),
(०२) (तं) ततो गच्छेत् (ततोधिगच्ब्देद्यन्त); उद्यतमथ गच्छेत (२) शीतनादितं; ०वादितं (३)सावित्र्यास्तु तस्मिन् (for तत्र); सावित्र्याः पर्वतं तत्र; शौ सावित्र्यास्तत्र तु पदं,
(०३) (२)शंसितं (३) उपासिता(for उपास्ता च) तेन ह्युपास्ता भवति (४) सन्ध्या(for तेन),
(०४) (२)दृश्यते (for विश्रुतं); (३) (अ)भिगत्वा (४) योनिसङ्त्वात्,
(०५) (१)शुक्लकृष्णाबुभौ; इत्यकृष्णां; कृष्णपक्षा कृष्णपक्षचतुर्दश्यां (२) गङ्गायां नृप (for नरः ); (३) चैव (for राजन्),
(०६) (२)यदि कश्चिद् (for यद्येपि ),

* यावज्जीवकृतं पापं मासेनैकेन शुध्यति ।

* ततो गयां समासाद्य ब्रह्मचारी समाहितः ।,

* यजेद्वा वाजिमेधेन)

**ततः फल्गुं व्रजेद्राजंस्तीर्थसेवी नराधिप ।****

**अश्वमेधमवाप्नोति सिद्धिं च महतीं व्रजेत् ॥ ९७ ॥**(०१)

**पृष्ठं गच्छेत राजेन्द्र धर्मततो समाहितः ।****

**यत्र धर्मो महाराज नित्यमास्ते युधिष्ठिर ॥ ९८ ॥**(०२)

* तत्र कूपोदकं कृत्वा तेन स्नातः शुचिस्तथा ।

* पितन्देवांस्तु सन्तर्प्य मुक्तपापो दिवं व्रजेत्।।

* मतङ्गस्याश्रमस्तत्र महर्षेर्भावितात्मनः ।

* तं प्रविश्याश्रमं श्रीमच्छ्रमशोकविनाशनम्।

* गवामयनयज्ञस्य फलं प्राप्नोति मानवः ।

* धर्मं तत्राभिसंस्पृश्य वाजिमेधमवाप्नुयात्।(०३)

* अष्टौ यस्य तु शुक्लानि लामूलककुदः शिरः ।

* उरः शिरश्च चत्वारः स वृषो नीड उच्यते ।

* गत्वा च तत्र धर्मात्मन्नश्वमेधफलं लभेत् ।

( अभिगत्वा तत्र धर्ममश्व० )धर्मं तत्रापि संस्पृश्य गम्य; गत्वा च तत्र धर्मात्मन् ,०मेधमवाप्नुयात्,

**ततो गच्छेत राजेन्द्र ब्रह्मणस्तीर्थमुत्तमम् ॥ ९८ ॥**

* दत्वाच तत्र धर्मात्मन्नश्वमेधफलं लभेत् ।

---

(०१) (२)नराधिपः; शुचिर्नरः (४) परमां (for महतीं); लभेत् (for व्रजेत्),

(०२) (२)धर्मस्वस्थं; धर्मप्रस्थं नराधिप (३) तत्र (for यत्र),

(०३) कृत्वा ( गत्वा ) ( पीत्वा ) च (for तु); श्रेष्ठं (for श्रीमत् ); गवांमेधस्यः गवामयन; गोमेधस्य च (for गवामयस्य),

**तत्रार्चयित्वा राजेन्द्र ब्रह्माणं  अमितौजसम् ।****
**राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥ ९९ ॥**

* ब्रह्मज्ञानमनुत्तमं; ब्राह्मणं च यतव्रत

* ततो गच्छेतराजेन्द्र घर्मपृष्टं समाहितः।

* यत्र धर्मो महाराज नित्य्मास्ते युधिष्टिरः ।।

* गत्वाऽपि तत्र घर्मात्मन्नश्वमेघफलं लभेत् ।(०१)

**ततो राजगृहं गच्छेत्तीर्थसेवी नराधिप ।****
**उपस्पृश्य ततस्तत्र कक्षीवानिव मोदते ॥ १०० ॥(०२)**

**यक्षिण्या नैत्यकं तत्र प्राश्नीत पुरुषः शुचिः ।****
**यक्षिण्यास्तु प्रसादेन मुच्यते भ्रूणहत्यया ॥ १०१ ॥(०३)**

**मणिनागं ततो गत्वा गोसहस्रफलं लभेत् ॥ १०२ ॥**

**नौत्यकं  भुञ्जते यस्तु मणिनागस्य मानवं।(०४)**

* भुक्तवांस्तत्र मणिना तीर्थाभिगम्य मानवः ।

**दष्टस्याशीविषेणाशु न तस्य क्रमते विषम्।**
**तत्रोष्य रजनीमेकां सर्वपापैः प्रभुच्यते ॥ १०३ ॥(०५)**

---

(०१) तत्राभिगम्य राजेन्द्र ( ब्रह्माणम्); सावित्र्यास्तु पदं तत्र (४) पुरुषर्षभः भरतर्षभ ;द्येनियतव्रतः (for अमितौ ); अर्चयेन्नियतव्रतः; अर्चयित्वा यतव्रतः; दृष्ट्वा भरतसत्तम सूयमवाप्नोति, विन्दति (for प्राप्नोति); भारत (for भानवः); तत्र स्नात्वा नरोत्तम (०नघ),

(०२) (३)ततस्तत्र; ततो देवं; नरस्तत्र; च देवेषु; च तोयेषु; ततोदेषु (for तपोदेषु); (४) कक्षी०(for काक्षी); रोचते (for मोदं ),

(०३) (१)उदकं; नित्यकं (for नैत्यकं); (२) प्राश्नीयात् (४) ब्रह्म (भ्रातृ) (for भ्रण ),

(०४) (१)गच्छद् (for गत्वा ); (३) तैर्थिकं; तैखिक; तथैकं; तेथिकं (for नैत्यकं);   भजते (for भुञ्जते); तैर्थिकं भुक्तवांस्तत्र (४) भारत (for मानवः); फलं लेभेत तैर्थिकं,

(०५) (१)(अ) स्य (for (अ)पि); (२) विषं न क्रमते भुवि ( नृप ); न तस्याक्रमते विषं; विषं नाक्रमते नृप० (४) गोसहस्रफलं लभेत्,

**ततो गच्छेत ब्रह्मर्षेर्गौतमस्य आश्रमं नरः ॥ १०४ ॥**

**अहल्याया ह्रदे गत्वा गच्छेत परमां गतिम् ।****

**अभिगम्याश्रियं राजन्विन्दते श्रियमुत्तमाम् ॥ १०५ ॥**(०१)

**तत्रोदपानं धर्मज्ञ त्रिषु लोकेषु विश्रुतम् ।****

**तत्राभिषेकं कृत्वा तु वाजिमेधमवाप्नुयात् ॥ १०६ ॥**(०२)(०३)

**जनकस्य तु राजर्षेः कूपस्त्रिदशपूजितः ।****

**तत्राभिषेकं कृत्वा तु विष्णुलोकमवाप्नुयात् ॥ १०७ ॥**(०४)

**ततो विनशनं गच्छेत्सर्वपापप्रमोचनम् ।****

**वाजपेयमवाप्नोति सोमलोकं च गच्छति ॥ १०८ ॥**(०५)

* ततो विपाशं धर्मज्ञ समाविश्य ततोनध ।

* गुह्यलोके महाराज मोदते नात्र संशयः ।

* विपाशां सभाविश्येत्; समा साद्य तपोधन (०६)

**गण्डकीयं ततो गच्छेत् सर्वतीर्थजलोद्भवाम् ।****

**वाजपेयमवाप्नोति सूर्यलोकं च गच्छति ॥ १०९ ॥**(०७)

**ततोऽधिवङ्गं धर्मज्ञ समाविश्य तपोवनम् ।****

---

(०१) (१)राजेन्द्र; विप्रर्षे धर्मज्ञ (for ब्रह्मर्षेर् ); (२) प्रियं; महत्; नरः (for नृप); गौतमस्याश्रमं ततः (३) अहिल्याया ह्रदं (for ह्रदे); गत्वा (for स्नात्वा); (४) गच्छेत; व्रजते (for व्रजेत०); अभिगत्वा; अभिक्रम्य ओज द्व्यी)श्रमं; श्रुतं (for श्रियं); आत्मनः (for उत्तमाम् ); शोभते नात्र संशयः,

(०२) (तत्रोपदानं विश्रुतं (३) कुर्वाणं; कुर्वीत (for कृत्वा तु); (४) विष्णुलोकम् ,

(०३) मेधफलं लभेत्,

(०४) (३)कुर्वीत (for कृत्वा तु),

(०५) (२)प्रणाशनं (४) सूर्यलोकं,

(०६) (for ततोनघ); गुह्यक्ष्वे;गुह्यलोक,

(०७) (१)गण्डकीं यः; ०कीं यां; कीलं; कीयं (for की तु); गण्डकीयं, सर्वतीर्थं (२) शुद्धं ब्रह्मजलो,

**गुह्यकेषु महाराज मोदते नात्र संशयः ॥ ११० ॥**(०१)

**कम्पनां तु समासाद्य नदं सिद्धनिषेविताम् ।****
**पुण्डरीकमवाप्नोति स्वर्गलोकं च गच्छति ॥ १११ ॥**(०२)

**ततो विशल्यामासाद्य नदीं त्रैलोक्यविश्रुताम् ।****
**अग्निष्टोममवाप्नोति स्वर्गलोकं च गच्छति ॥ ११२ ॥**(०३)

**अथ मोहेश्वरीं धारां समासाद्य नराधिप ।****
**अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् ॥ ११३ ॥**(०४)

**दिवौकसां पुष्करिणीं समासाद्य नरश्शुचिः ।****
**न दुर्गतिमवाप्नोति वाजिमेधं कलं लभेत् ॥ ११४ ॥**(०५)

**माहेश्वरपदं गच्छेद्ब्रह्मचारी समाहितः ।****
**माहेश्वरपदे स्नात्वा वाजिमेधफलं लभेत् ।**(०६)
**तत्र कोटिस्तु तीर्थानां विश्रुता भरतर्षभ ॥ ११५ ॥**

**कूर्मरूपेण रजेन्द्र मह्यासुरेण दुरात्मना ।****
**ह्नियमाणा हृता पूर्वं विष्णुना प्रभविष्णुना ॥ ११६ ॥**(०७)

लक्षालङ्कारः-कूर्मरूपेण राजेन्द्र इत्यत्र आसुरेण ह्नियमाणा मही मन्दरगिरिरूपा मही महात्मना

---

(०१) (१)०वङ्गं; वंशं; रम्यं (for वंश्यं); शर्वज्ञं (for धर्मज्ञ ); ततो विहङ्गान्धर्मज्ञ (२) समासाद्य तपोधनः; तपोधनं; ततो वनं (३) भाग (for ०राज),

(०२) (१)किम्पुण्यां; किम्पुमां; कंवदां ( किम्पुनां कसुमां); कर्बुदां; कथकं (for कम्पना ); अथ कम्पुनमासाद्य (२) नदं निषेवितं; तीर्थं निषेवितं (३)पौण्डरीकम् (४) स्वर्गलोकं; सोम,

(०३) (१)विशल्याम् (for विशालाम्); (४) सूर्यलोकं वाजिमेधं च विन्दति,

(०४) (२)धराधिप; युधिष्ठिर (for नरा ); (४) सूर्यलोकं च गच्छति,

(०५) (२)नराधिप; युधिष्ठिर (for नरः शुचिः); (४) वाजिमेधं; स्वर्गलोकं विद्यति; गच्छति वाजिपेयफलं लभेत्,

(०६) (१)अथ माषपदं ( ०वणं); अथ सोमपदं; अथ मासपदं (for महेश्वरं) (३) माहेश्व (४) वाजपेयफलं ल,

(०७) (१)कोटि कोटि (for कोटिस् );(इ)ति; च(for तु) (३) रूपेणासुरेण(४) ह्यसुरेन्द्रः राजन्यो वै; राजन्यो वै महात्मना ह्रियमाणा धृता; ०णोद्धृता; णो हृतः ; पूर्वं (for राजन्),

कूर्मरूपेण विष्णुना द्धृतेति योजना ।

**तत्राभिषेकं कुर्वाणः तीर्थकोट्यां युधिष्ठिर****
**पौण्जरीकमवाप्नोति विष्णुलोकं च गच्छति ॥ ११७ ॥**(०१)

लक्षालङ्कारः-तीर्थकोट्यां युधिष्ठिर इत्यत्र युधि युद्धे स्थिर भीष्म ।

**ततो गच्छेत राजेन्द्र स्थानं नारायणस्य च ।****
**सदा सन्निहितो यत्र विष्णुर्वसति भारत ॥ ११८ ॥**(०२)

* यत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः,

**आदित्या वसवो रुद्रा जनार्दनमुपासते ।****
**शालग्राम इति ख्यातो विष्णुरद्भुतकर्मणः ॥ ११९ ॥**(०३)

**अभिगम्य त्रिलोकेशं वरदं विष्णुमव्ययम् ।****
**अश्वमेधमवाप्नोति विष्णुलोकं च गच्छति ॥ १२० ॥**(०४)

**तत्रोदपानं धर्मज्ञ सर्वपापप्रमोचनम्।**
**समुद्रास्तत्र चत्वारः कूपे सन्निहिताः सदा।**
**तत्रोपस्पृश्य राजेन्द्र न दुर्गतिमवाप्नुयात् ॥ १२१ ॥**(०५)

**अभिगम्य महादेवं वरदं रुद्रमव्ययम् ।****
**विराजति यथा सोम ऋणैर्मुक्तो युधिष्ठिर ॥ १२२ ॥**(०६)

---

(०१) ()१कुर्वीत (for कुर्वते); (२) नराधिप; युधांवरः कुरूद्वह (for युधि०); (३)पौण्डरीकम् (४) स(for च); विन्दति (for गच्छति); विष्णुलोके महीयते,

(०२) (१)ततोगच्छेन्नर ०(for न्नप) श्रेष्ठ ; (२) च; ह; वै (for तु ); (४) विष्णुर्; रविर्(for हरिर्),

(०३) उपागताः(for उपासते); शालिग्राम; साल ख्यातं विष्णुम् (for विष्णोः); अद्भुतदर्शनः; अद्भुतकर्मकः,

(०४) (१)अभिगत्वा हृषीकेशं (for त्रिलो ); (२) तं देवं (for वरदं ); अच्युतं (for अव्ययम्); (४) स(for च) विष्णुलोके महीयते,

(०५) (१)तत्रोदपानं (०णं) ०पदानं; दपाने (२) ०प्रमोचवं; प्रणाशनं; ०प्रणाशनः (३) चापि(for तत्र); (४) तदा; शुभाः शुचिः (for सदा); ,

(०६) (१)अभिगत्वा त्रिलोकेशं (for महा ); (२) रुद्रम् (for विष्णुम् ); (३) विराजते मेरुम् (for सोम);

**जातिस्मरम् उपस्पृश्य शुचिः प्रयतमानसः ।****
**जातिस्मरत्वमाप्नोति स्नात्वा तत्र न संशयः ॥ १२३ ॥**(०१)

**माहेश्वरपुरं गत्वा अर्चयित्वा वृषध्वजम् ।****
**ईप्सितांल्लभते कामानुपवासान्न संशयः ॥ १२४ ॥**(०२)

* तत्राश्रमो वसिष्ठस्य त्रिषु लोकेषु विश्रुतः ।

**ततस्तु वामनं गत्वा सर्वपापप्रमोचनम् ।****
**अभिगम्य हरिं देवं न दुर्गतिमवाप्नुयात् ॥ १२५ ॥**(०३)

**भरतस्याश्रमं गच्छेत्सर्वपापप्रमोचनम् ॥ १२६ ॥**

**कौशिकीमभिसेवेत महापापप्रणाशिनीम् ।****
**राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १२७ ॥**(०४)

**ततो गच्छेत धर्मज्ञ चम्पकारण्यमुत्तमम् ।****
**तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ १२८ ॥**(०५)

**अथ ज्येष्ठिलमासाद्य तीर्थं भरतसत्तम ।****
**उपोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ १२९ ॥**(०६)

---

(४) मेघैद्; ऋक्षैर् (for ऋणैर् ); तस्मिं स्तीर्थे युधिष्ठिर,

(०१) (१)जातिं स्मरेद्; जाति स्मरम् तु स्पृष्ट्वापः (for उपस्पृश्य); (३) प्र जातिस्मरो भवेद्राजन् (४) स्नातस्; ज्ञात्वा (for स्नात्वा); तस्मिन् (for तत्र); विष्णुलोकं च गच्छति; पुरुषो नात्र संशयः,

(०२) (१)माहेश्वरपुरं गत्वा०; वटेश्वरपुरोगं च; पुरे स्नात्वा; सुरे योगी (२) ह्यर्चयित्वा; समभ्यर्च्य हरं विभुं; वृषध्वजं; च केशवं; (अ)थ केशवं; हरिं प्रभुः ईप्सितार्थांल्लभेत्कामा नुपवासपरायणः,

(०३) (२)०प्रणाशनं (३) गम्य (for वाद्य ); महा; ; नरं (for हरिं),

(०४) (१)कुशिक० (for भरत ); गच्छेत् (for गत्वा ); (२) सर्व पापप्रणाशनं; महापातकनाशनं (३) अभि(for तत्र ); सेवीत (४) महापापप्रणाशिनीं व्राजि , (for राज),

(०५) (१)राजेन्द्र (for धर्मज्ञ ),

(०६) (१) ख०व०अग्निष्टोमफलं, ततः (for अथ); जेष्ठिल०; ज्योष्ठिल; गोष्ठिल; गोष्टिन; ज्यैष्ठिल; जातिल०; ज्योति अथ ज्ये (ष)ष्टि समासाद्य (२) परमदुर्लभं परममङ्गलं; परमसंमितं; भरतसत्तम तीर्थसेवी कुरूद्वह (३) तत्रोष्य (for उपोष्य); (४)गोसह स्वफलं ल,

**तत्र विश्वेश्वरं दृष्ट्वा देव्या सह महाद्युतिम् ।****
**मित्रावरुणयोर्लोकानाप्नोति भरतर्षभ ॥ १३० ॥**[०१]
* त्रिरात्रोपोषितस्तत्र अग्निष्टोमफलं लभेत्।[०२]

**कन्यासंवेद्यमासाद्य नियतो नियताशनः ।****
**मनोः प्रजापतेर्लोकानाप्नोति भरतर्षभ ॥ १३१ ॥**[०३]

**कन्यायां ये प्रयच्छन्ति पानमन्नं च भारत ।****
**तदक्षय्यमिति प्राहुरृषयः संशितव्रताः ॥ १३२ ॥**[०४]

**निर्वीरां(निश्चीरां) नु समासाद्य त्रिषु लोकेषु विश्रुताम् ।****
**अश्वमेधमवाप्नोति विष्णुलोकं च गच्छति ॥ १३३ ॥**[०५]

**ये तु दानं प्रयच्छन्ति निर्वीरा(निश्चीरा)सङ्गमे नराः ।****
**ते यान्ति नरशार्दूल ब्रह्मलोकं न संशयः ॥ १३४ ॥**[०६]

**तत्राश्रमो वसिष्ठस्य त्रिषु लोकेषु विश्रुतः ।****
**तत्राभिषेकं कुर्वाणो वाजपेयमवाप्नुयात् ॥ १३५ ॥**[०७]

**देवकूटं समासाद्य ब्रह्मर्षिगणसेवितम् ।****

---

(०१) (४)प्राप्नोति; आप्नुयात् भरतर्षभ,
(०२) ( वह्नि (for अग्नि ); त्त्रोममवाप्नुयात् (for ष्टोमफल लभेत्); ),
(०३) (१)कन्यासंवेश्य; कन्यासम्भेद; ०सवमथत्साद्य; ०संवेद्यमानस्य; वेद्यां समासाद्य (४) प्राप्नोति (for आप्नोति ); पुरुषर्षभ,
(०४) (१)कन्यानां; कन्यका; कन्यकां (for कन्यायां); यत् (for ये); (२) दानम् (for पानम्); अण्वपि; अर्थं च; अन्नोथ; एकेपि (for अन्नं च); (३)अक्षय्यम् इह (for इति); इतीहाहुर् (४) मुनयः(for ऋषयः),
(०५) (१)निचीरां च; निवीरा च; निश्चीनां तु ( च ); निश्चिरां तु ततो निर्वीरमासाद्य; ततो निचीरामासाद्यः ततोभिगम्य निश्चिरां (२) विश्रुतं (४) कुलं चैव समुद्धरेत्; पुनात्यासप्तमं कुलं,
(०६) (१)(इ)धनं (for दानं); (२) निवीरी; निर्वरितं; निर्विराः सङ्गमे निश्चितां निश्चिरप; निश्चीराः सङ्गमे निश्चीरायां नरर्षभ (४) शत्र्क ( ब्रह्म) लोकमनामयं,
(०७) (४)वाजिपेयम्; वाजिमेधम् वाजपेयफलं लभेत्; वाजिमेधफलं लभेत्,

**अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत्** **॥ १३६ ॥**(०१)

**ततो गच्छेत राजेन्द्र कौशिकस्य मुनेर्हृदम् ।****

**यत्र सिद्धिं परां प्राप्तो विश्वामित्रोऽथकौशिकः ॥ १३७ ॥**(०२)

**तत्र मासं वसेद्धीरः कौशिक्यां भरतर्षभ ।****

**अश्वमेधेन यत्पुण्यं तन्मासेनाधिगच्छति** **॥ १३८ ॥**(०३)

**सर्वतीर्थमये चैव यो वसेत महाह्रदे ।****

**न दुर्गतिमवाप्नोति विन्देद्बहु सुवर्णकम्** **॥ १३९ ॥**(०४)

**कुमारम् अङ्गित्वा च वीराश्रमनिवासिनम् ।****

**अश्वमेधमवाप्नोति नरो नास्त्यत्र संशयः** **॥ १४० ॥**(०५)

**अग्निधारां समासाद्य त्रिषु लोकेषु विश्रुताम्**

**तत्राभिषेकं कुर्वाणो ह्यग्निष्टोममवाप्नुयात्** **॥ १४१ ॥**

* अधिगम्य महादेवं वरदं विष्णुमव्ययम्।(०६)

**पितामहसरो गत्वा शैलराजप्रतिष्ठितम् ।****

**तत्राभिषेकं कुर्वाणो ह्यग्निष्टोममवाप्नुयात्** **॥ १४२ ॥**(०७)

**पितामहस्य सरसः प्रस्नुता लोकपावनी ।****

---

(०१) (१)देवरूपं देवर्षिकूटमासाद्य (२) देवर्षि,

(०२) (१)तत्र (for ततो ); धर्मज्ञ (for राजेन्द्र); (३) तत्र (for यत्र), पुरा (for परां); प्राप ( प्राप्य ) (for प्राप्तो ),

(०३) (१)वसन् (for वसेद्); वीरः धीमान् ( धीर); धीरः (for वीर), (३)अश्वमेधेन (४) तत्पुण्यमधिं; तम नेनाधि,

(०४) (४)लभेद्; विद्याद् विद्याद् (for विन्देद् ); नरो नास्त्यत्र स्थंवः,

(०५) (१)अभिगम्याथ (for अभि गस्वा च); तु (for च); अभिगम्य कुमारं च (२)पुरा; सरा,

(०६) (१)अग्नि धामं; वासं; धारं (२) विश्रुतं; विश्रुता विष्णुलोकेति विश्रुतं (३)तत्राभिषेकं कुर्वाणः (४) नरो नास्त्यत्र संशयःन दुर्गतिम वाप्नुयात्; ह् (अ) ग्निष्टोभमवाप्नुयात्; न च दुर्गाणि पश्यति (सेवते); न च दुर्गतिमाप्नुयात्,

(०७) (२)समर्पितः(४) अ(ह्य त्व ) ग्निष्टोममवाप्नुयात्; न दुर्गतिमवाप्नुयात्,

**कुमारधारा तत्रैव त्रिषु लोकेषु विश्रुता ॥ १४३ ॥(०१)**

**यत्र स्नात्वा कृतार्थोऽस्मीत्यात्मानमवगच्छति ।****

**षष्ठकालोपवासेन मुच्यते ब्रह्महत्यया ॥ १४४ ॥(०२)**

* (४३१) ततो गच्छेत धर्मज्ञ तीर्थसेवनतत्परः ।(०३)

**शिखरं वै महादेव्या गौर्यास्त्रैलोक्यविश्रुतम्।**

**समारुह्य नरश्रेष्ठ स्तनकुण्डेषु संविशेत् ॥ १४५ ॥(०४)**

* स्तनकुण्डम् उपस्पृश्य वाजपेयफलं लभेत्।(०५)

**तत्राभिषेकं कुर्वाणः पितृदेवार्चने रतः ।****

**हयमेधमवाप्नोति शक्रलोकं च गच्छति ॥ १४६ ॥(०६)**

**ताम्रारुणं समासाद्य ब्रह्मचारी समाहितः ।****

**अश्वमेधमवाप्नोति ब्रह्मलोकं च गच्छति ॥ १४७ ॥(०७)**

**नन्दिन्यां च समासाद्य कूपं त्रिदशसेवितम् ।****

**नरमेधस्य यत्पुण्यं तदाप्नोति कुरूद्वह ॥ १४८ ॥(०८)**

---

(०१) (२)प्रसूता; प्रवृत्ता (for प्रसुता); भाविनी; भावनी,

(०२) (१)तत्र (२) अधि गच्छति; उपलक्षयेत्,

(०३) राजेन्द्र (for धर्मज्ञ); तीर्थं त्रैलोक्य विमुत; तीर्थसेवी नराधिप,

(०४) ततो गौर्यास्तु शिखरं देव्यास्त्रैलोक्यं (३) तत्रा; तमा (for समा); ततः (for नरः); श्रद्धी; शुद्धः; स्रग्वी; श्राद्धी; दृष्ट्वा; श्रीमान् (for श्राद्धः); (४)पुनःकुण्डेषु; ततः कुडेषु; देव (for स्तन); संवसेत् ततः क्रुद्धं समाविशेत्; स्तनकुडे समा ,

(०५) पुनः(for स्तन ); वाजिमेधः (for वाजपेय ),

(०६) (२)वाजिमेधफलं लभेत्,

(०७) (१)ताम्रारुणां (४) ब्रह्मलोकं; स्वर्ग,

(०८) (१)नळिन्याशू: नन्दिन्याशू (for नन्दिन्यां ); (२) त्रिदशपूजितं; देवनिषेवितं (४)प्र नराधिप; न संशयः (for कुरू); ० वाजिमेधफलं प्राप्य शक्रलोकं च गच्छति ।

कालङ्क्यासङ्गमे स्नात्वा कौशिक्यरुणयोर्पुनः ।**

त्रिरात्रोपोषितो विद्वान् सर्वपापैः प्रमुच्यते।

/*(१) क०ख०ग०कलिका घ०कालिक्या,कालङ्के; कलिङ्गां; कालिका। कालिन्या; कालिन्द्याः; कालिकां (for

**उर्वशीतीर्थमासाद्य ततः सोमाश्रमं ब्रजेत्** ॥ १४९ ॥

**कुम्भकर्णाश्रमं गत्वा पूज्यते दिवि मानवः** ॥ १५० ॥(०१)

**स्नात्वा कोलमुखे पुण्ये ब्रप्मचारि समाहितः**

* for substrute 1st Half

* (कोकामुखम् उपस्पृश्य ब्रह्मचारी यतव्रतः) ।**

**जातिस्मरत्वमाप्नोति दृष्टमेतत्पुरातनम्** ॥ १५१ ॥(०२)

**मृगतुङ्गं समासाद्य विपाप्मा भवति द्विज ।**

**सर्वपापविशुद्धात्मा ब्रह्मलोकं च गच्छति** ॥ १५२ ॥

**सकृन्नन्दां(प्राङ्नदीं) च समासाद्य पूतात्मा भवति द्विजः ।**

**सर्वपापविशुद्धात्मा ब्रह्मलोकं च गच्छति** ॥ १५३ ॥(०३)

**ऋषभद्वीपमासाद्य मेध्यं क्रौञ्चनिषूदनम् ।****

**सरस्वत्यामुपस्पृश्य विमानस्थो विराजते** ॥ १५४ ॥(०४)

**औद्दालकं समासाद्य तीर्थं मुनिनिषेवितम् ।****

**तत्राभिषेकं कृत्वा वै सर्वपापैः प्रमुच्यते** ॥ १५५ ॥(०५)

---

कालिका); (२) कौशिक्यरुणयोः; कौशिका; कौशिक्यामुभयोः; कोशकास्त्रायोः तथा; गतः; पुरा; पुनः (for यतः); (३) राजन् (for विद्वान्),

(०१) (२)तदा; तथा। यत्र (for ततः); ०क्लव श्रमं (३) गत्वा दिवि (for भुवि ),

(०२) (१) क०ख०शखोकामुखे ० यतव्रतः;, ग०कोके;, घ०लोकमुखे, काकमुस्वे; कोक; कोकामृते कोकामुखा (०क) मुपस्पृश्य; कोका तीर्थे ततो गत्वा; कौ ( को ) कामुखं उ( खमु ) पस्पृश्य (२) जितेन्द्रियः; (for यतं); उपवासपरायणः (३) प्र (४) पुरातनैः नं,

(०३) (१) शक्रनदी; शक्रनदा; सकृन्नदी लछृ० च; नदा; मृगतुग; सकृन्नलां (२)पूतात्मा; ; विपाप्मा (for कृतात्मा); (४) स्वर्गलोकं; ब्रह्मलोकं पूज्यते भुवि मानवः शक्रलोके च पूज्यते; स्वर्गलोके महीयते,

(०४) (१)स्वर्णद्वीपं समासाद्य (२) मेध्यं; देवं काञ्चनिसूदन; ०निपूदकं; मुनिनिषेवितं भवसूदनं देवकुञ्जनिषेविते; यकुजनिसूदनं,

(०५) (१)उद्दालकं; उद्दालके; औद्दालके तदा राजन्; समासाद्य; महातेजाः (for महाराज); (३) कृत्वा वै;

**धर्मतीर्थं समासाद्य पुण्यं ब्रह्मन्षेवितम् सेवितम् ।****
**वाजपेयमवाप्नोति नरो नास्त्त्र संशयः ॥ १५६ ॥**(०१)

**अथ चापां समासाद्य भागीरथ्यां कृतोदकः ।****
**दणर्कमभिगम्यैव गोसहस्रफलं लभेत् ॥ १५७ ॥**(०२)

**लवेलिकां सेविताम् ततो गच्छेत्पुण्यां पुण्यपशोभिताम् ।****
**वाजपेयमवाप्नोति विमानस्थश्च पूज्यते ॥ १५८ ॥**(०३)

अस्मिन् तीर्थयात्रापर्वणि ६७अध्याये १५८श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पुलस्त्यतीर्थयात्रायां सप्तषष्ठितमोऽध्यायः ॥ ६७ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 068

# अष्टषष्ठितमोऽध्यायः

नारदेन युधिष्ठिरं प्रति भीष्माय पुलस्त्योदिततीर्थमहिमानुवादपूर्वकमिष्टदेशगनम् ॥ प्रयागप्रभृतीनां तीर्थानां गङ्गायाश्च माहात्म्यकथनम् ॥

**पुलस्त्यः**

**अथ सन्ध्यां समासाद्य समिबन्धे तीर्थ उत्तमे ।****
**उपस्पृश्य नरो विद्वान् भवेन्नास्त्यत्र संशयः ॥ १ ॥**(०४)

---

त्त्यैव; कृत्वा तु (for कुर्वीत),
(०१) (१)ब्रह्मतीर्थे (२) ब्रह्मनिषेवितं; धर्मनिवेवितं; देवर्षिसेवितं (४) विमानस्थश्च इज्यते,
(०२) (१) क०घ०पम्पां; ख०तथा चम्पां, अथ (for तथा ); चण्डं; पम्पां (for चम्पां); (३) दण्डर्षम्; दन्द्वार्वमृत दण्डार्थम्; दण्डार्षम्; दण्डार्द्धिम् अभिगत्वा तु, (for (ए)व ); दण्डार्पणं समासाद्य (चाभिवाद्य),
(०३) (१)नवेडिकां; ललतिका; लवेलिकां;लपेडिकां ततो लविलकां (लवलि०; लेवूलिं; लवेलि०) गच्ब्दे (२) पुण्यनिषेविताः पुण्योपशोभितां (३) वाजि मेध; रुव्यच्छतः,
(०४) (२)सवेद्ये (सम्बन्धे); संवेद्या; संविष्दे; संवेध्ये (for संवेद्यं); तीर्थ उ ( र्थमु ) त्तमे (३) स्नात्वा; विद्यां;

**रामस्य च प्रसादेन तीर्थं राजन्कृतं पुरा ।****
**तल्लौहित्यं समासाद्य विन्द्याद्बहु सुवर्णकम् ॥ २ ॥**(०१)

**करतोयां समासाद्य त्रिरात्रोपोषितो नरः ।****
**अश्वमेधं दशगुणं पितामहकृतो विधिः ॥ ३ ॥**(०२)

**गङ्गायास्तत्र राजेन्द्र सागरस्य च सङ्गमे ।****
**अश्वमेधं दशगुणं प्रवदन्ति मनीषिणः ॥ ४ ॥**(०३)

**गङ्गायास्त्वपरं तीरं प्राप्य यः स्नाति मानवः ।****
**त्रिरात्रमुषितो राजन्सर्वान् कामानवाप्नुयात् ॥ ५ ॥**(०४)

**ततो वैतरणीं गत्वा सर्वपापप्रमोचनीम् ।****
**विरजं तीर्थमासाद्य विराजति यथा शशी ॥ ६ ॥**(०५)

**प्रभवेध्च कुलं पुण्यं सर्वपापं व्यपोहति ।****
**गोसहस्रफलं लब्ध्वा पुनाति चकुलं नरः ॥ ७ ॥**(०६)

**शोणस्य ज्योतिरथ्याश्च सङ्गमे स्नाति यो नरः ।****
**तर्पयित्वा पितन्देवानग्निष्टोमफलं लभेत् ॥ ८ ॥**(०७)

---

राजन् (for विद्वान् ); (४) लभते नात्र सं; भवत्येव न सं,

(०१) (१)रामचन्द्र ; रामस्य तु प्रभावेण; प्रदानेन (२) तीर्थराजं कृतं; तर्थिराजा कृतः; तीर्थराजीकृतं इदं (for कृतं); (३) तं (for सृन्); लौहित्यं; लोहितं; लौहितं (४) विन्देद्बहु; विद्या,

(०२) (३)सौत्रामणिमवा (४) प्रजा पतिकृतो विधिः; पितामहविधौ कृते; पितामहकृतो विधिः; शक्र( स्वर्ग ) लोकं च गच्छति ( स्वर्गलोके महीयते); पितामहस लोकतां,

(०३) (१)तत्र (for त्वथ ); (३) अश्वमेधाद्,

(०४) (१)च (for तु); परं (for (अ)परं ); पारं (for द्वीपं); (२) मानवः; माधवः, (for भारत); (३) त्रिरात्रमुषितो (४) स्वर्गलोक मवा; सर्वपापैः प्रमुच्यते,

(०५) (१)नदीं (for ततो); गच्छेत् (for गत्वा); (२) सर्व (for नदीं ); प्रमोचिनीं; ०प्रणाशि( श); नीं (३) वैराजं; विरजस्। त्रिरात्रोपोषितो नरः । अश्वमेधमवाप्नोति,

(०६) (१)प्रभवं च; प्रतरेच्च; प्रजायेच्च कुलं शुपुण्यं पुंसां पुण्याः पपूस्त (२)प्रणश्यति; अपोहति(for व्यपो); (४) स्व ; स (for च); नृप (for नरः),

(०७) (१)०रथ्यायाः (for ०ययाश्च); (२) नियतः शुचिः स्नाति यो नरः,

**शोणस्य नर्मदायाश्च प्रभवे कुरुनन्दन ।****

**वंशगुल्म उपस्पृश्य वाजिमेधफलं लभेत्** ॥ ९ ॥(०१)

**ऋषभं तीर्थमासाद्य कोसलायां नराधिप ।****

**वाजपेयमवाप्नोति त्रिरात्रोपोषितो नरः ।**

**गोसहस्रफलं लब्ध्वा पुनाति स्वकुलं नृप** ॥ १० ॥(०२)

**कोसलां तु समासाद्य कालतीर्थम् उपस्पृशेत् ।****

**ऋषभैकादशफलं लभते नात्र संशयः** ॥ ११ ॥(०३)

* अश्वमेघफलं पुण्यं लभते नास्त्यत्र संशयः ।

**पुष्पवत्याम् उपस्पृश्य त्रिरात्रोपोषितो नरः**

**गोसहस्रफलं विन्देत्कुलंचैव समुद्धरेत्** ॥ १२ ॥(०४)

**ततो बदरिकातीर्थं स्नात्वा प्रयतमानसः।**

**दीर्घमायुरवाप्नोति स्वर्गलोकं च गच्छति** ॥ १३ ॥(०५)

* अथ चम्पां समासाद्य भागीरथ्यां कृतोदकः ।

* दण्डाख्यम् अभिगम्यैव गोसहस्रफलं लभेत्।

* लपेटिकां ततो गच्छेत्पुण्यां पुण्योपशोभिताम्।

* वाजपेयमवाप्नोति देवैः सर्वैश्च पूज्यते।

**ततो महेन्द्रमासाद्य जामदग्न्यनिषेवितम् ।****

---

(०१) (२)प्रभेदे; प्रभवेत् कुरुपुङ्गव (३) गुल्मम्,

(०२) (२)को मलायां; कौशलायां; कौसल्यायां; कौसम्याया। कोसलायां (३) वाजिमेधः/*(१)पुष्पन्यास ( सम्) (for वत्याम् ),

(०३) (१)कोशलां तु (च); कोसलायां; कौशिलां तु; कोशलं तु;कौसल्यां तु; क्यैखलां तुः कीसल्याया;कोसलां तु (२) कालतीर्थम्; यस्त्रिकालम् (३)ऋषभै (for वृषभै); सर्वपाप विनिर्मुक्तो (४) भवेन्नास्त्यत्र संशयः,

(०४) (३) लब्ध्वा; विन्देत् (for विन्द्यात्); (४) पुनाति च कुलं नरः; क्ष पुनाति स्वकुलं नृप,

(०५) (१)०तर्थि (२) स्नात्वा भरतसत्तम (३) दीर्घायुष्व ( ष ) म्; दिव्यमायुर्; दीर्घायुष्यम्,

**रामतीर्थे नरः स्नात्वा अश्वमेधफलं लभेत्  ॥ १४ ॥(०१)**

**मतङ्गस्य तु केदारस्तत्रैव कुरुनन्दन ।****

**तत्र स्नात्वा लरो राजन् गोसहस्रफलं लभेत्  ॥ १५ ॥(०२)**

**श्रीपर्वतं समासाद्य नदीतीरमुपस्पृशेत् ।****

**अश्वमेधमवाप्नोति स्वर्गलकोकं चगच्छति  ॥ १६ ॥(०३)**

**श्रीपर्वते महादेवो देव्या सह महाद्युतिः  ॥ १७ ॥**

**वसतेपरमप्रीतो ब्रह्मा च त्रिदशैः सह ।(०४)**

**तत्र देवह्रदे स्नात्वा शुचिः प्रयतमानसः ।**

**अश्वमेधमवाप्नोति परां सिद्धिं च गच्छति  ॥ १८ ॥(०५)**

**ऋषभं पर्वतं गत्वा  पाण्ड्येषु सुर पूजितम् ।****

**वाजपेयमवाप्नोति नाकपृष्ठे च मोदते  ॥ १९ ॥(०६)**

*    ततो गच्छेत कावेरीं वृतामप्सरसां गणैः  ।**

*    तत्र स्नात्वा नरो राजन्गोसहस्रफलं लभेत्।(०७)

*    कावेर्याः सङ्गमे चैव खात्वा दशगुणो समे ।

*    सेततीर्थं समासाद्य ब्रह्महत्यामपोहति ।।

*    ततस्तीरे समुद्रस्य कन्यातीर्थमुपस्पृशेत् ।**

---

(०१) (४)अश्वमेध; वाजपेयं,

(०२) (१)भरतर्षभ नरपुङ्गव (for कुरु); (३) नरव्याघ्र; नरश्रेष्ठो। नरश्रेष्ठ; कुरुश्रष्ठ (for  नरो राजन्),

(०३) (२)नदीतीरम्; ०तीर्थम्; ०नीरम्; ०तीर्थ; तत्र तीर्थम् (४) सूर्य (for स्वर्ग); परां सिद्धि च गच्छति पूजयित्वा वृषध्वजं,

(०४)   महादेवो तत्र (३) वसते (for न्यवसत्); (४) ब्रह्मादित्रि अपि; सह (for वृतः),

(०५)   तत्र (४) स्वर्गलोकं (for परां सिद्धिं); विन्दति (for गच्छन्ति); पूजयित्वा वृषध्वजं; सिद्धि च (for संसिद्धिं); परमां व्रजेत्; कुलं चैव सह द्धरेत्,

(०६) (१)पाण्ड्येषु; वृषभं (for ऋषभं); (२) षौण्ड्रेषु नृपपूजितं ऋषभं देव, पूजितं (३) वाजिमेधम्; पौण्डरीकम् (४) स्वर्गलोके च पूज्यते; पूजिते गच्छति,

(०७) (१)कौवेरीं; कौवीरौ(for कावेरीं)०; (२) विस्यतामप्सरोगणैःआव्रुतामप्सरो; व्रुतमप्सरसो ,

* तत्रोपस्पृश्य राजेन्द्र सर्वपापैः प्रमुच्यते। ।।(०१)

* अथ गोकर्णमासाद्य त्रिषु लोकेषु विश्रुतम् ।**

* समुद्रमध्ये राजेन्द्र सर्वलोकनमस्कृतम्।(०२)

**यत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।****

**भूतयक्षपिशाचाश्च किन्नराः समहोरगाः ॥ २० ॥**(०३)

* सिद्धचारणगन्धर्वमानुषाः पन्नगास्तथा।(०४)

* सरितः सागराः शैला उपासन्त उमापतिम्।।(०५)

**तत्रेशानं समभ्यर्च्य त्रिरात्रोपोषितो नरः ।**

* अश्वमेधमवाप्नोति गाणपत्यं च विन्दति।

* उष्य द्वादशरात्रं तु पूतात्मा च भवेन्नरः ।(०६)

**दशाश्वमेधानाप्नोति कुलं चैव समुद्धरेत् ॥ २१ ॥**

**ततो गच्छेत कावेरीं वृतामप्सरसां गणैः ।**

**तत्र स्नात्वा नरो राजन्गोसहस्रफलं लभेत् ॥ २२ ॥**

**ततस्तीरे समुद्रस्य कन्यातीर्थमुपस्पृशेत्।**

**तत्रोपस्पृश्य राजेन्द्र सर्वपापैः प्रमुच्यते ॥ २३ ॥**

---

(०१) (२)कन्यातीर्थम्,

(०२) (१)तीर्थं समा (for गोकर्णमा); (४) सर्वलोकेषु विश्रुतं; सर्वभूतनम; सर्वपापैःप्रमुच्यते,

(०३) (१)तत्र (for यत्र ); (२) मुनयश्च० (for त्रष); भूताश्चैव; भूतयक्ष० (for भूतयक्ष); सिद्दचारणगन्धर्वाः सर्षिसङ्घाः सहोरगाः,

(०४) (१)गन्धर्व (२) पतगाः (for पन्नगाः); सर्षिसङ्घाःसहोरगाःऋषिसङ्घाप्सरोगणाः ,

(०५) (३)चैव (for शैला); (४) उपासन्ति उपासन्ते; य उपासन्त्युमा० पतिं महादेवमुपासते,

(०६) (१) समासाद्य समुद्दिश्य(for समभ्यर्च्य) ईशानं तत्र चाभ्यर्च्य (३)दशाश्वमेधानाप्नोति; अश्वमेधमवाप्नोति (४) कुलं चैव समुद्धरेत् तस्य; तच्च (for उष्य); ( उष्य ) उपोष्य द्वादशं रात्रं; उपोष्य द्वादशीं राजन्; उषित्वा दशरात्रं तु कृतार्थो (for कृतात्मा ); जायते; तु भवेत्; भवति (for भवते); नृप प्रभो (for नरः); पूतात्मा च भवेन्नरः; कृती भवति मानवः,

**अथ गोकर्णमासाद्य त्रिषु लोकेषु विश्रुतम्।**
**समुद्रमध्ये राजेन्द्र सर्वलोकनमस्कृतम् ॥ २४ ॥**

**यत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।**
**भूतयक्षपिशाचाश्च किन्नरास्समहोरगाः ॥ २५ ॥**

**सिद्धचारणगन्धर्वमानुषाः पन्नगास्तथा।**
**सरितस्सागराश्शैला उपासन्त उमापतिम् ॥ २६ ॥**

* ख०ग०ध०-सरितस्सागराश्चैव महादेवमुपासते ।

**तत्रेशानं समभ्यर्च्य त्रिरात्रोपोषितो नरः।**
**अश्वमेधमवाप्नोति गाणपत्यं च विन्दति ॥ २७ ॥**

* ०दशाश्वमेधानाप्नोति गाणपत्यं च विन्दति ।

**उष्य द्वादशरात्रं तु कृतात्मा भविता नरः ॥ २८ ॥**

**तत एव च गायत्र्याः स्थानं त्रैलोक्यविश्रुतम्।**
**त्रिरात्रमुषितस्तत्र गोसहस्रफलं लभेत्।**(०१)
**निदर्शनं च प्रत्यक्षं ब्राह्मणानां नराधिप ॥ २९ ॥**

**गायत्रीं पठते यत्र योनिसङ्करजस्तथा ।****
**गाथा च गीतिका चापि तस्य सम्पद्यते नृप ॥ ३० ॥**(०२)

* **अब्राह्मणस्य सावित्रीं पठतस्तु प्रणश्यति।**

( पठतः सावित्री तु (for सावित्रीं पठतस्तु); )

**संवर्तस्य तु विप्रर्षेर्वापीमासाद्य दुर्लभाम् ।****

---

(०१) (१)तस्मिन् (for तत); प्रवर; एव च; सज्येति (for एव तु); (२) पूजितं ०मुत्तमं,

(०२) (३) घ०गाथा वा गीतिका वीपि तस्य योत्र (for यस्तु); (४) जो द्विजः (for जो नरः); सम्भवः योनिसंस्कारसम्भवं गाथां (for गाथा); च ( वा) गीथिकां; गीतिकां; गाथिका; गाथिका; गीतिका चापि; तत्र (for वापि); सर्वं; तत्र (for तस्य); तदा; नरः (for नृप),

**रूपस्य भागी भवति सुभगश्चैव जायते ॥ ३१ ॥**(०१)

**ततो वेणां समासाद्य तर्पयेत् पितृदेवताः ।****

**मयूरहंससंयुक्तं विमानं अधिरोहति ॥ ३२ ॥**(०२)

**ततो गोदावरीं प्राप्य नदिं सिद्धनिषेविताम्।**

**अवाप्य गोमेधफलं वासुकेर्लोकमाप्नुयात् ॥ ३३ ॥**

for substrute 1st Half

**(गवां मेधमवाप्नोति वासुकेर्लोकमुत्तमम्)**(०३)

**वेणायाः सङ्गमे स्नात्वा वाजिमेधफलं लभेत्।**

**वरदासङ्गमे स्नात्वा गोसहस्रफलं लभेत् ॥ ३४ ॥**(०४)

* ० बाहुदासङ्गमे स्नात्वा वाजिमेधफलं लभेत् ।

**ब्रह्मस्थानं समासाद्य त्रिरात्रोपोषितो नरः ।****

**गोसहस्रफलं विन्द्यात्स्वर्गलोकं च गच्छति ॥ ३५ ॥**(०५)

**कुशप्लवनमासाद्य ब्रह्मचारी समाहितः ।****

**त्रिरात्रमुषितः स्नात्वा अश्वमेधफलं लभेत् ॥ ३६ ॥**(०६)

**ततो देवह्रदेऽरण्ये कृष्णवेणाजलोद्भवे**

---

(०१) (१)ब्रह्म (for विप्र); (३) रूपभागी च भवति (४) प्र (for (ए)व ),

(०२) (१)वीणां; वेणां (for वेण्णां); (२) तर्पयन् (for ०येत्);त्रिरात्रोपोषितो नरः (४)नृप(for नरः) विमानमधिरोहति,

(०३) (२)पुण्यां; नदीं (for नित्यं); (३) गवां मेधम् (for गवामयम्); ह्लग् (for अवाप्नोति ); गोमेधस्य फलं प्राप्य; अवाप्यगोमेध फलं (४) उत्तमं (for आप्नुयात्); वायुलोकं चगच्छति; वायुर् (for वसोद्); लोकमवाप्नुयात्,

(०४) (१)सिन्धुगा; वेणायाः; वेण्णायां वाजिमेधफलं; गोसहस्रं वाजपेयमवाप्नुयात्,

(०५) (१)स्थलं; स्थूणां (for स्थानं); (२) त्रिरात्रोपोषितो (३) लब्ध्वा; विन्द्यात् (for विन्देत्); (४) विन्दति (for गच्छति); लोके महीयते,

(०६) (१)शश; शक्र (for कुश ); कुशं ( कुश ) प्लवंसमासाद्य (२)पुण्यं राजन्नुपस्पृशेत्, (३)त्रिरात्रोपोषितः (४) त्वश्वमेध०; वाजिमेधं; गोसहस्रं; हयमेध विदेद्धहु सुवर्णकं,

**जातिस्मरह्रदे चौव तथा कन्याश्रमे नृप ॥ ३७ ॥**

१)पुण्ये; चैव (for रम्ये ); (२) वेणा; वेण्या (for वेण्णा); ( गोसहस्रं वाजपेयं) पितामह ज्योतिमात्र; ज्योतिर्मात्र; जातिस्मर० स्नात्वा (for चैव); (४) (अ)पि च (for नृप ); भवेज्जातिस्मरो नरः नृप)

* ग०-बेणायास्सङ्गमे स्नात्वा गोसहस्रफलं लभेत् ।

**यत्र क्रतुशतैरिष्ट्वा देवराजो दिवं गतः ।****

**अग्निष्टोमफलं विन्धाद्गमनादेव भारत ॥ ३८ ॥**(०१)

**ततः सर्वह्रदे(सर्वदेवह्रदे) स्नात्वा गोसहस्रफलं लभेत् ।**

**जातिमात्रह्रदे स्नात्वा भवेज्जातिस्मरो नरः ॥ ३९ ॥**(०२)

* ततो वापीं महापुण्यां पयोष्णीं सरितां वराम्।

* पितृदेवार्चनरतो गोसहस्रफलं लभेत्।(०३)

* दण्डकारण्यमासाद्य महाराजउपस्पृशेत्।

* गोसहस्रफलं तस्य स्नातमात्रस्य भारत।(०४)

* शरभङ्गाश्रमं गत्वा निनितेद् बहु सुवर्णकम् ।

* न दुर्गतिमवाप्नोति पुनाति च कुलं नरः ।(०५)

**ततः शूर्पारकं गच्छेज्जामदग्न्यनिषेवितम् ।****

**रामतीर्थे नरः स्नात्वा विन्धाद्बहुसुवर्णकम् ॥ ४० ॥**(०६)

---

(०१) (३)फल (for शतं); विद्याद्; विद्याद् (for विन्देत ); (४) तत्र तु (for भारत),

(०२) (१)ततः सर्व (for सर्वदेव); (२) भवेज्जातिश्मरो नरः,

(०३) (१)तत्र (for ततो); वाप्यां; प्राप्य; वापीं ( तापीं ); व्याप्त (for वाप्य); समासाद्य; महत्पुण्यं (for महा०); (३) ०परो,

(०४) (२)पुण्यं राजन् (for महां ) (३) तस्य (for तत्र ),

(०५) (१)प्राप्स (for गत्वा ); (२) शुक्र (for शुक); विदेद्दहु सुवर्णकं,

(०६) (१)तत्र (for ततः ), शूर्पाकरं; सूर्पारकं सूर्पारकं (४) विद्याद्; विदेद् (for विन्धाद् ),

**सप्तगोदावरे स्नात्वा नियतो नियताशनः ।****

**महत्पुण्यमवाप्नोति देवलोकं च गच्छति ॥ ४१ ॥**

**ततो देवपथं कच्छेत् नियतो नियताशनः ।****

**देवसत्रस्य यत्पुण्यं तदेवाप्नोति मानवः ॥ ४२ ॥**(०१)

**क्यततोऽवाप्य महापुण्यां पयोष्णीं सरितां वराम् ।****

**पितृदेवार्चनपरो गोसहस्रफलं लभेत् ॥ ४३ ॥**

**दण्डकारण्यमासाद्य महाराज उपस्पृशेत्।**

**गोसहस्रफलं तस्य स्नातमात्रस्य भारत ॥ ४४ ॥**

**शरभङ्गाश्रयं गत्वा विन्देद्बहु सुवर्णकम् ॥ ४५ ॥**

**तुङ्गकारण्यमासाद्य ब्रह्मचारी जितेन्द्रियः ।****

**देवान(वेदान)ध्यापयत्तत्र ऋषिः सारस्वतः पुरा ॥ ४६ ॥**(०२)

**तत्र वेदान् प्रनश्टांस्तु मुनेरङ्गिरसः सुतः ।**
for substrute 1st Half

**ऋषीणामुत्तरीयेषु सूपविष्टो यथासुखम्।**

**उपविष्टो महर्षीणाम् उत्तरीयेषु भारत ॥ ४७ ॥**(०३)

**ओङ्कारेण यथान्यायं सम्यगुच्चारितेन ह ।****

**येन यत्पूर्वमभ्यस्तं तस्य तत् समुपस्थितम् ॥ ४८ ॥**(०४)

**ऋषयस्तत्र देवाश्च वरुणोऽग्निः प्रजापतिः ।****

---

(०१) (१)सुर; देवपदं; गतिं गत्वा (for गच्छेत्); (४) तदेवाप्नोति; भारत (for मानवः); ,

(०२) (२)समाहितः (for जिते); (३) ०पयद्यत्र; पयामास (for पयत्तत्र); (४) ऋषीन् (for ऋषिः); सारस्वतान् (for ०स्वतः); तथा (for पुरा),

(०३) (१)ततो (for तत्र); वेदेषु नष्टेषु; वेदान्पुनर्नष्टान् च (for तु); (२) मुनिर्; ऋषिः ऋषेद् (for मुने); ऋषी णामुत्तरीयेषु ( ०मन्तरीये तु); उप (सूप)विष्टेषु भारत,

(०४) (१)०न्याथ्यं (for ०न्यायं); (२) सकृद् (for सम्यग्); उच्चरि० (for उच्चारि), ह; हि(for च); (४) तत्सर्व;तस्य तत् तच्च तस्योपतिष्ठते,

**हरिर्नाराऽ.यणो देवो महादेवस्तथैव च ॥ ४९ ॥**(०१)

**पितामहश्च भगवान्देवैः सह महाद्युतिः ।****

**भृगुं नियोजयामास याजनार्थे महाद्युतिम् ॥ ५० ॥**(०२)

**ततः स चक्रे भगवानृषीणां विधिवत्तदा ।****

**सर्वेषां पुनराधानं विधिदृष्टेन कर्मणा ॥ ५१ ॥**(०३)

**आज्यभागेन तत्राग्नि तर्पयित्वा यथाविधि ।****

**देवाः स्वृत्रिभुवनं याता ऋषयश्च यथाक्रमम् ॥ ५२ ॥**(०४)

**तदरण्यं प्रविष्टस्य तुङ्गकं राजसत्तम ।****

**पापं प्रणश्यते सर्वं स्त्रियो वा पुरुषस्य वा ॥ ५३ ॥**(०५)

**तत्र मासं वसेद्धीरो नियतो नियताशनः ।****

**ब्रह्मलोकं व्रजेद्राजन्कुलं चैव समुद्धरेत् ॥ ५४ ॥**(०६)

**मेधाविकं समासाद्य पितन्देवांश्च तर्पयेत् ।****

**अग्निष्टोममवाप्नोति स्मृतिं मेधां च विन्दति ॥ ५५ ॥**(०७)

**ततः कालञ्जरं नाम पर्वतं लोकविश्रुतम् ।****

---

(०१) (३)तथा; यथा (for हरिर्); तत्र (for देवो ),

(०२) (२)सह शतक्रतुः (३) ०मासुः (४) यजनार्थं ( र्थे); याजनार्थं, द्युतिः,

(०३) (४)देवदृष्टेन; वेद,

(०४) (१)तत्रैव; वै देवान्; तत्राग्नि (for वै तत्र); आज्येन रूप्यभागेन (२)तर्पयित्वा (for तर्पितास्तु); तं; च (for तु); (३) त्रिविष्टपं; स्वभ वनं (for त्रिभु० ); (४) क्रमं (for सुखम्),

(०५) (३)प्रणश्यत्यखिलं; विनश्यते सद्यः (४) स्त्रिया वा,

(०६) (३) वसेद्धीमान् कुलं चैव समुद्धरेत्,०लोके वसेद्राजन् (४) पुनीयाच्च पुनः (for नरः); कुलं चैव समुद्धरेत्,

(०७) (२)पितृ (for पितृन् )-

.....नदी पापप्रमोचनीम् ।

तत्राभिषेकं कुर्वीत ब्रह्मचारी जितेन्द्रियः ॥

ब्राह्मणान्भोजयित्वा तु..........,

**तत्र देवह्लदे स्नात्वा गोसहस्रफलं लभेत्                    ॥ ५६ ॥(०१)**

**योऽऽत्मानं साधयेत्तत्र गिरौ कालञ्जरे नृप ।****

**स्वर्गलोके स पुज्येत नास्त्यत्र संशयः                    ॥ ५७ ॥(०२)**

**ततो गिरिवरश्रेष्ठे चित्रकूटे विशाम्पते ।****

**मन्दाकिनीं समासाद्य नदीं पापप्रमोचनीम्                    ॥ ५८ ॥(०३)**

**तत्राभिषेकं कुर्वाणः पितृदेवार्चने रतः ।****

**अग्निष्टेम मवाप्रोति गतिं च परमां व्रजेत्                    ॥ ५९ ॥(०४)**

**ततो गच्छेत राजेन्द्र भर्तृस्थानमनुत्तमम् ।****

**यत्र देवो महादेवो नोत्यं सन्निहितो नृप।(०५)**

**पुमांस्तत्र नरश्रेष्ठ दर्शनादेव नृपश्रेष्ठ गमनादेव सिध्यति॥ ६० ॥**

**कोटितीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्                    ॥ ६१ ॥(०६)**

*   ततो गच्छेत राजेन्द्र तीर्थयात्रापरो नृप ।

*   गोसहस्रमवाप्रोति फलं चैव सुपुष्कलम् ।

**प्रदक्षिणमुपावृत्य ज्येष्ठस्थानं व्रजेन्नृप ।****

---

(०१) (१) क०घ०तत्र; ख०ततः कालाञ्जनं; अ ततः करञ्जरं, अत्र (for ततः); पुण्यजलं; काळाञ्जनं; कारञ्जरं नाम (for गत्वा),

(०२) (१)यत्मौनं; योस्नातः (तं); योस्माकं योत्मानं (for आत्मानं);   स्वापं; तार (for साध); (२) काळाञ्जने; कारञ्जरे (३) महीयेत्स; स पूज्येत (for महीयेत ); महीयते स्वर्गलोके,

(०३) (२)नरोत्तमः (for विशां पते); (४) सर्व (for नदीं); ०प्रमोचिनीं; ०प्रणाशिनीं,

(०४) (१)कुर्वीत (for कुर्वाणः); (४) लभेत् (for व्रजेत्); परां सिद्धि च गच्छति,, तथा स्नानादी (स्नानम) नुत्तमम्,

(०५) (१)धर्मज्ञ (for राजेन्द्र ) (३) तत्र (for यत्र); नित्यं; सेनो (for देवो); देवो (for सेनो); यत्र वै चागता राजन् (४) गुहः (for नित्यं ); विभुः; ()नघः स्थितः; गुहः (for नृप ),

(०६) (१)तत्र गत्वा तत्र स्नात्वा; तत्र तीर्थे (for पुमांस्तत्र); नृपश्रेष्ठ (३) तीर्थ समासाद्य अभिगम्य (४) ब्रह्मचारी समाहितः,

**अभिगम्य महादेवं विराजति यथा शशी ॥ ६२ ॥**(०१)

**तत्र कूपे महाराज विश्रुता भरतर्षभ ।****

**समुद्रास्तत्र चत्वारो निवसन्ति युदं वर ॥ ६३ ॥**(०२)

**तत्रोपस्पृश्य राजेन्द्र क०त्वा चाभिप्रदक्षिणम् ।****

**नियतात्मा नरः पूतो गच्छेत परमां गतिम् ॥ ६४ ॥**(०३)

**ततो गच्छेत कुरुश्रेष्ठ शृङ्गवेरपुरं महत् ।****

**यत्र तीर्णो महाराज रामो दाशरथिः पुरा ॥ ६५ ॥**(०४)

* तस्मिंस्तीर्थे महाबाहो स्नात्वा पापैः प्रमुच्यते।

**गङ्गायां तु नरः स्नात्वा ब्रह्मचारी समाहितः ।****

**विधूतपाप्मा भवति वाजपेयं च विन्दति ॥ ६६ ॥**(०५)

**ततो मुञ्जवटं गच्छेत्स्थानं देवस्य धीमतः ॥ ६९ ॥**

**अभिगम्य महादेवमभ्यर्च्य च नराधिप ।****

**प्रदक्षिणमुपावृत्य गाणपत्यमवाप्नुयात् ॥ ६७ ॥**(०६)

* तस्मिंस्तीर्थे तु जाह्नव्यां स्नात्वा पापैः प्रमुच्यते।(०७)

**ततो गच्छेत राजेन्द्र प्रयागमृषिसंस्तुतम् ।****

---

(०१) (अभिगम्य (१) वृत्त (for वृत्य ); तत्र चैव वसित्वा तु (२) श्रेष्ठं (for ज्येष्ठं),

(०२) (१)यत्र (for तत्र); इदो कूपे (for कूपो); (२) विश्रुता (३) यत्र; तस्य (for तत्र),

(०३) (२)चाभि ; चैव; वापि (for चापि);पितृ देवार्चने रतः; ब्रह्मचारी समाहितः (३)प्रीतो; कृत्वा (for पूतो ); (४) गच्छेच्च (for त),

(०४) (१)गच्छेच्च धर्मज्ञ; ०न्नरश्रेष्ठ; ०त राजद्र (२) श्रृङ्गवीरपुरं; श्रृङ्गिबेर०; श्रृङ्गिवेरं प्रति (for भहत्); (३) तीर्थे (for तीर्णो); ०प्रज्ञ;०प्राज्ञो (for ०राज),

(०५) (२)जितेन्द्रियः (for समा ),

(०६) (२)समभ्यर्च्य (for अभ्यर्च्य च ); यथाविधि (for नरा); अभि वाद्य च भारत (३) वृत्त्वो (for वृत्य),

(०७) च (for तु); नरः कुप्यां; नर कूर्च्यं (for तु जाह्नव्यां),

**तत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः ॥ ६८ ॥**[०१]

**लोकपालाश्च साध्याश्च पितरो लोकसम्मताः ।****

**सनत्कुमारप्रमुखास्तथैव परमर्षयः ॥ ६९ ॥**[०२]

**अङ्गिरःप्रमुखाश्चैव तथा ब्रह्मर्षयोऽपरे ।****

**तथा नागाः सुपर्णाश्च सिद्धाश्च परमर्षयः ॥ ७० ॥**[०३]

**सरितः सागराश्चैव गन्धर्वाप्सरसस्तथा ।****

**हरिश्च भगवानास्ते प्रजापतिपुरस्कृतः ॥ ७१ ॥**[०४]

**तत्र त्रीण्यग्निकुण्डानि येषां मध्येन जाह्नवी ।****

**प्रयागादभिनिष्क्रान्ता सर्वतीर्थपुरस्कृता ॥ ७२ ॥**[०५]

**तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता ।****

**यमुना गङ्गया सार्धं सङ्गता लोकपावनी ॥ ७३ ॥**[०६]

**गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम् ।****

**प्रयागं जघनस्थानमुपस्थमृषयो विदुः ॥ ७४ ॥**[०७]

**प्रयागं सप्रतिष्ठानं कम्बलाश्वतरौ तथा।**

---

(०१) (२)ऋषिसंश्रुतं; भिष्टुतं; भिः स्तुतं,

(०२) (१)सिद्धाश्च (२) नियताः;निरताः (for नैर्ऋताः); पितरो लोकसंमताः (सत्तमाः) (३) तत्रैव च महर्षयः; भरतर्षभ परमर्षयः,

(०३) (२) ()मलाः; गणाः (for परे); (३) सुपर्णनागा० (for नागा सुपर्णा); सरितः सागरास्चैव (४) चक्रध(व)रा;च प्रवरां; च खचरा (for चक्रचरा); तथा ब्रह्मर्षयोपरे सिद्धाश्च परमर्षयः,

(०४) (१)शैला (for चैव ); (२) (अ)पि च (for तथा); ,

(०५) (१)त्रीणि चाप्यग्नि (त्र) कुण्डानि (२) तेषां (for येषां); मध्येन; मध्ये तु (for मध्ये च); (३) अपि (for अभि); वेगेन (प्रयागं) समतिक्रान्ता,

(०६) (१)यत्र; देवी (for तत्र); (२) सर्व (for त्रिषु); (३) समागता महाभागा (४)संमिता; सस्मिता; सततं (यमुना) लोकभाविनी; भावनी,

(०७) (१)मध्ये; सार्धं (for मध्यं); (२) पृथिवी (for पृथिव्या); (३) स्थानम् (for स्यान्तम्); (४) मुनयो (for ऋषयो),

**तीर्थं भोगवती चैव नदि प्रोक्ता प्रजापतेः || ७५ ||(०१)**

**तत्र देवाश्च यज्ञाश्च मूर्तिमन्तो युधां वर**

**प्रजापतिमुपासन्ते ऋषयश्च महाव्रताः ।****

**यजन्ते क्रतुभिर्देवास्तथा चक्रधरा नृपः || ७६ ||(०२)**

**ततः पुण्यतरं नास्ति त्रिषु लोकेषु भारत ।****

**प्रयागं सर्वतीर्थेभ्यः प्रवदन्त्यधिकं विभो || ७७ ||(०३)**

**गमनात्तस्य तीर्थस्य नामसङ्कीर्तनादपि ।****

**मृत्युकालभयाच्चापि नरः पापात्प्रमुच्यते || ७८ ||(०४)**

**तत्राभिषेकं यः कुर्यात्सङ्गमे संशितव्रतः ।****

**पुण्यं सक(स फ)लमाप्नोति राजसूयाश्वमेधयोः || ७९ ||(०५)**

**एषा यजनभूमिर्हि देवानामपि सत्कृता ।****

**अत्र दत्तं सुसूक्ष्मं च महद्भवति भारत || ८० ||(०६)**

**न वेदवचनात्तात न लोकवचनादपि ।****

**मतिरुत्क्रमणीया ते प्रयागगमनं प्रति || ८१ ||(०७)**

---

(०१) (१)प्रयागे; प्रयोगे अप्रति; सम्प्रति; सुप्रति (२) उभौ (for तथा); (३) चैषा (for चैव); भोगां ( तोय; भग) वत्यपि या चैषा (४) वेदिरेका; वेदिरेषा; नदी प्रोक्ते (for वेदी प्रोक्ता); पते (for पतेः),
(०२) (१)ततो; यत्र (for तत्र); देवा (for वेदा); वेदा यज्ञा (३) सन्ति; सन्त (for सन्ते); (४) मुनयश्च तपोधनाः धरा; परा (for ०चरा); नृपाः (for नृप); तथाचक्रुर्नराधिपः,
(०३) (१)नाम (for नास्ति); (३) प्रयागं;गे (४) प्रवदन्त्यधिकं बभौ।; प्रभो; भवेत्; भुवि (for विभो),
(०४) (१)गमनात्तस्य श्रवणाच्च प्रयागस्य (३) मृत्तिकालभनात्; मृत्युकालभयात् चापि (for वापि); (४) सर्वपापैः; सर्वपापात्; नरः पापैः,
(०५) (२)लोकविश्रुते; शंसितव्रतः; सागरस्य च; स श्रितव्रतः (३) तुल्यं (for पुण्यं); फलमवाप्नोति; सुः ( स ) महदा; रूपमवा (for स फलमा ),
(०६) (२)अभि (अपि); इति संस्कृता; संमता (for सत्कृता); (३) यत्र दत्तं;
दत्तं तत्र ; अत्र दत्तं स्वल्पमपि; हि (सु) सूक्ष्मं च,
(०७) (१)देव (for वेद ); (४) प्रयागे (for प्रयाग); क्षरणं गमनं (for मरणं); प्रयागेष्वेव वै प्रति,

**दश तीर्थसहस्राणि षष्टिः कोट्यस्तथापराः ।****

**येषां सान्निध्यमत्रैव कीर्तितं कुरुनन्दन ॥ ८२ ॥**(०१)

**चातुर्वेद्ये च यत्पुण्यं सत्यवादिषु चैव यत् ।****

**स्नात एव तदाप्नोति गङ्गायमुनसङ्गमे ॥ ८३॥**(०२)

**तत्र भोगवती नाम वासुकेस्तीर्थमुत्तमम् ।****

**तत्राभिषेकं यः कुर्यात्सोऽश्वमेधफलं लभेत् ॥ ८४ ॥**(०३)

**तत्र हंसप्रपतनं तीर्थं त्रैलोक्यविश्रुतम् ।****

**दशाश्वमेधिकं चैव गङ्गायां कुरुनन्दन ॥ ८५ ॥**(०४)

* कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता ।**

* विशेषो वै कनखले प्रयागे परमं महत्॥ ॥

* यद्यकार्यशतं कृत्वा कृतं गङ्गाभिषेचनम्।

* सर्वं तत्तस्य गङ्गाम्भो दहत्यग्निरिवेन्धनम्

* सर्वं कृतयुगे पुण्यं त्रेतायां पुष्करं स्मृतम् ।**

* द्वापरेऽपि कुरुक्षेत्रं गङ्गा कलियुगे स्मृता।

* पुष्करे तु तपस्तप्येद्दानं दद्यान्महालये ।**

* मलये त्वग्निमारोहेद्भृगुतुङ्गे त्वनशनम् ।

* पुष्करे तु कुरुक्षेत्रे गङ्गायां मगधेषु च ।**

* स्नात्वा तारयते जन्तुः सप्तसप्तावरांस्तथा।

* पुनाति कीर्तिता पापं दृष्टा भद्रं प्रयच्छति ।**

---

(०१) (२)षष्टिः (शत ); दश (for षष्टि ); (३) येषां तत्रैव सांनिध्यं,

(०२) (१)चातुर्वेद्ये च; चतुर्वेदेषु; चा। (च) तुर्विद्ये च (द्येषु); सर्ववेदेषु; चातुर्वैये च; चातुर्वेद्या च; चातुर्वेद्य च (३) तत्र(for एव),

(०३) (१)ततो (for तत्र); (४) सः फलं लभेत् (for मवाप्नुयात्),

(०४) (१)ततो यत्र (for तत्र) गङ्गा; प्रभवनं (४) गङ्गायाः ,

* अवगाढा च पीता च पुनात्यासप्तमं कुलम् ।

* यावदस्थि मनुष्यस्य गङ्गायाः स्पृशते जलम् ।**

* तावत्स पुरुषो राजन्स्वर्गलोके महीयते।

* यथा पुण्यानि तीर्थानि पुण्यान्यायतनानि च ।**

* उपास्य पुण्यं लब्ध्वा च भवत्यमरलोकभाक्।

* न गङ्गासदृशं तीर्थं न देवः केशवात्परः ।।**

* ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः ।

**यत्र गङ्गा महाराज स देशस्तत्तपोवनम् ।****

**अधीत्य द्विजमध्ये विमलत्वमवाप्नुयात् ॥ ८६ ॥**

**सिद्ध(द्धि)क्षेत्रं च तज्ज्ञेयं गङ्गातीरसमाश्रितम् ॥ ८७ ॥**(०१)

**इदं सत्यं द्विजातीनां साधूनामात्मनश्च यत् ।****

**सुहृदां च मसेतानां शिष्यस्यानुगतस्य च ॥ ८८ ॥**(०२)

**इदं धर्म्यमिदं पुण्यम् इदं मेध्यम्दं सुखम् ।**

**इदं स्वर्गमिदं सम्यं इदं पावनमुत्तमम् ॥ ८९ ॥**(०३)

* for substrute 1st Half

* इदं धन्यमिदं मेध्यमिदं स्वर्ग्यमनुत्तमम् ।

* इदं पुण्यमिदं रम्यं पावनं धर्म्यमुत्तमम् ।।

**महर्षीणामिदं पुण्यं सर्वपापप्रमोचनम् ।****

---

(०१) (३)सिद्धि (०द्धिं) (for सिद्ध ); च (for तु); विज्ञेयं; तत्रैव (for तज्ज्ञेयं); ४)तीर्थ ; तीरं (for तीर ); (०२)(१)सर्व (for सत्यं); (२) आत्म नोपि (for आत्मजस्य ); वा; यत् (for च); (३) सूक्त चैव (for सुहृदां च); वा (for च); समेतानां (for जपे०); सुहृदां सत्यशीलानां वा (for च ); (४) शिष्यायानुगताय च, (०३) (१)ध्रन्यम्; धर्मयः सक्त (for धर्म्यम्); मेध्यम् ( वापि) स्वर्ग्यम् (for पुण्यम्); (२) स्वर्ग्यम्; स्नर्गम्; सत्यम् (for मेध्य ) अनुत्तमं ०तर तत् (for इदं सुखम्); इदं स्वर्गस्य वै सुसं (३) इदं पुण्यमिदं ध्यै धर्श्यम्; राजन् स्त्वन्दे (४) पावनं धर्म्यां धर्म ; रम्य मुत्तमं,

**अधीत्य द्विजमध्ये च न्र्मलत्वमवाप्नुयात्                ॥ ९० ॥**[०१]

* श्रीमत्स्वर्ग्यं तथा पुण्यं सपत्नशमनं शिवम् ।**

* मेधाजननमग्र्यं वै तीर्थवंशानुकीर्तनम् ॥

* अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ।**

* मही विजयते राजा वैश्यो धनमवाप्नुयात्।

* शूद्रो यथेप्सितान्कामान्ब्राह्मणः पारगः पठन् ॥

**यश्चेदं शृणुयान्नित्यं तीर्थपुण्यं सदा शुचिः ।****

**जातीश्च स्मरते बह्वीर्नाकपृष्ठे च मोदते                ॥ ९१ ॥**[०२]

**अन्यान्यपि च तीर्थानि कीर्तितान्यगमानि च ।****

**मनसा तानि गच्छेत सर्वतीर्थसमीक्षया                ॥ ९२ ॥**[०३]

**एतानि वसुभिः साध्यैरादित्यैर्मरुदश्विभिः ।****

**ऋषिभिर्देवकल्पैश्च स्नातानि सुकृतैषिभिः                ॥ ९३ ॥**[०४]

**एवं त्वमपि कौरव्य विधिनानेन सुव्रत ।****

**व्रज तीर्थानि नियतः पुण्यं पुण्येन वर्धयन्                ॥ ९४ ॥**[०५]

**भाषितैःकारणैः पूर्वमास्तिक्याच्छ्रुतिदर्शनात् ।****

* प्राप्यन्ते तानि तीर्थानि सद्भिः शास्त्रानुदर्शिभिः ।[०६]

* सद्भिः शास्त्रार्थतत्त्वज्ञैर्ब्राह्मणैः सह गम्यताम् ॥

---

(०१) (१)ग्राह्यं पुण्यं (for गुह्यं); (२) ०प्रणाशनं (३) तु (for च); (४) निर्मलः स्वर्ग सुख माप्नुयात्,

(०२) (१)तीर्थवशं; तीर्थं पुण्यं नरः (for सदा); (३) सं च (for स); स्मरते नित्यं; बह्वीः स्मरते (ति) (४) पूज्य० (for मोदं ),

(०३) (१) अन्या (for गम्या); (२) उत्तमानि; आगमानि (for अगः); (३) तात, (for तानि); गम्यानि (for गच्छेत),

(०४) (४)भूतानि; स्नातानि; कृतानि; श्रुतानि तथा चैव कृतैषिभिः,

(०५) (१)कौन्तेय (for कौरव्य); (४) वर्धयन्; ति; येत्,

(०६) (१)भाषितैः करणैः पूर्वैर् कारणैः पूर्वमासीत (४) शास्त्रानु०; शिष्टार्थ; शास्त्रानुवर्तिभिः शास्त्रार्थदर्शिभिः,

**नाव्रतो नाकृतात्मा च नाशुचिर्न च तस्करः ।****
**स्नाति तीर्थेषु कौरव्य न च वक्रमतिर्नरः ॥ ९५ ॥(०१)**

**त्वया तु सत्यवृत्तेन नित्यं धर्मार्थदर्शिना ।****
**पितसरस्तारितास्सर्वे सर्वे च प्रपितामहाः ॥ ९६ ॥(०२)**

**पितामहपुरोगाश्च देवाः सर्षिगणा नृप ।****
**तव धर्मेण धर्मज्ञ नित्यमेवाभितोषिताः ॥ ९७ ॥(०३)**

**अवाप्स्यसि त्वं लोकांश्च वसूनां वासवोपम ।****
**कीर्तिं च महतीं भीष्म प्राप्स्यसे भुवि शाश्वतीम्॥ ९८ ॥(०४)**

**नारदः**

**एवमुक्त्वाभ्यनुज्ञाय पुलस्त्यो भगवानृषिः ।****
**प्रीतः प्रीतेन मनसा तत्रैवान्तरधीयत ॥ ९९ ॥(०५)**

**भीष्मश्च कुरुशार्दूल शास्त्रतत्त्वार्थदर्शिवान् ।****
**पुलस्त्यवचनाच्चैव पृथिवीं अनुचक्रमे ॥ १०० ॥(०६)**

* एवमेषा महाभाग प्रतिष्ठाने प्रतिष्ठिता ।
* तीर्थयात्रा महापुण्या सर्वपापप्रमोचनी ।।(०७)

---

(०१) (१) क०ग०- प्राप्यन्तेपानि तीर्थाति सत्भिश्शास्त्रार्थदर्शिभिः । नाव्रती नाकृताचारो (४) क्रूर० (for वक्र ),
(०२) (१)त्वया यत्सत्य०; त्वया सम्यक्प्र (२) धर्मानुदर्शिना; नुवर्तिना (३) तर्पितासू (for त्तारितास ); तेन; सर्वे; ते च (for तात); पिता पितामहश्चैव ( महा ये च); पितरस्तात सर्वे (४) तारिताः (for सर्वे च),
(०३) (३)धर्मेण धर्मज्ञ (४) रक्षिताः,
(०४) (१)त्वं (for च); त्वं (for वै); (२) वासवो यथा; शा(श)श्वता नथ (३)कीर्तिश्च महती (४) भुवि प्राप्स्यसि शा; प्राप्यते भुवि शाश्वती,
(०५) (१) (अ) पिः हि (for (अ) भि ); (अ)नुज्ञाय (अ)नुज्ञातः (for (अ)नुज्ञाप्य ); (३) पश्यता मेव सर्वेषां,
(०६) (२)दर्शनः; दर्शनात् (३) दर्शनादेव (४) उपचक्रमे (सञ्चरिष्यति); परि चक्रमे,
(०७)(राज; भाग (for भागा ),

**अनेन विधिना यस्तु पृथिवीं सञ्चरिष्यति ।****

**अश्वमेधशतस्याग्र्यं फलं प्रेत्य स भोक्ष्यते ॥ १०१ ॥**(०१)

**अतश्चाष्टगुणं पार्थ प्राप्स्यसे धर्ममुत्तमम् ।****

* नेता च त्वमृषीन्यस्मात्तेन तेऽष्टगुणं फलम्।(०२)

**भीष्मः कुरूणां प्रवरो यथापूर्वमवाप्तवान् ॥ १०३ ॥**(०३)

**रक्षोगणविकीर्णानि तीर्थान्येतानि भारत ।****

**अगम्यानि मनुष्येन्द्रैस्त्वामृते कुरुनन्दन ॥ १०४ ॥**(०४)

**इदं देवर्षिचरितं सर्वतीर्थानु आग्चिम् ।****

**यः पठेत्काल्यमुत्थाय सर्वपापैः प्रमुच्यते ॥ १०५ ॥**(०५)

**ऋषिमुख्याः सदा यत्र वाल्मीकिस्त्वथ कश्यपः ।****

**आत्रेयः कोण्डिन्यो विश्वामित्रोऽथ गौतमः ॥ १०६ ॥**(०६)

**असितो देवलश्चैव मार्कण्डेयोऽथ गालवः ।****

**वसकिष्ठश्च महातेजो मुनिरुद्दालकस्तथा ॥ १०७ ॥**(०७)

---

(०१)(२)पृथिव्यां पर्यटिष्यति (३) ०सहस्राग्र्यं; शतं साग्रं; ०शतस्याग्रं; शतं चान्यत्; फलं ग्रामं; ( साग्रं;सान्द्रं) फल स्थाग्र्यं० (४) पुण्यं (for फलं ); प्रेत्य च; स प्रेत्य; च प्रेत्य; प्रेत्येह; सम्प्रेत्य; प्राप्य च भोक्ष्यति,

(०२) (१)अथ; ततम् (for अतश् ),

(०३) (२)ख०लेदमर्धम्, (३)नेता तु; तेन चेत्; नेतासि (for नेता च); एतान् (for यस्मात्); ऋषीन्ने (ऋषिर्ने) तासि यस्मात्त्वं (४) त्वष्ट लभेत्; स्मृतं (for फलम्),

(०४) (१)०गणविकी (३) न गतानि मनुष्येन्द्रैः; अग म्यानि मनुष्यैस्तु,

(०५) (२) र्थसम्भृतं ०भिसम्भृतं; ०भिसंश्रितं; भिसंसृतं; ०नुसंश्रितं; ०भि संवृतं; ०नुचिन्तनं; ०नुसश्रितं; ०र्थसंश्रयं; सर्वतीर्थसमन्वितं(३)प्रातर् कल्य; काल्यम् (for कत्यम्); शृणुयाद्वा(च्चा)पि (for कल्यमुत्थाय); (४)सोपि (for सर्व),

(०६) (१)ऋपिर्व्यासः (for ऋषिमुख्याः); कोहड (कहोलो; कोहलो) देवशर्मा च (२)कपणस्तथा; त्वथ कश्यपः; त्वथ कौशिकः; काश्यपस्तथा (३)आत्रेयः कुड(कण्व) जठरो आत्रेय कुण्डजठरौ (४) च (for (अ)थ); रूरू काश्यप एव च (उच्यते ),

(०७) (२)भार्का डेयोथ गौतमः (३) भारं (for भर०); च धर्मात्मा (for वसि ); वसिष्ठश्च महातेजाः (४) औद्दालब्धिम् लिकसू; (for उद्दालक ),

**शौनकः सह पुत्रेण व्यासश्च जपतां वरः ।****

**भारद्वाजे मुनिश्रेष्ठो युर्वासाश्च महातपाः ॥ १०८ ॥**(०१)

* वशिष्ठश्च मुनिश्रेष्ठो दुवर्त्साश्च महातपाः ।

**एते ऋषिवराः सर्वे त्वत्प्रतीक्षास्तपोधनाः ।****

**एभिः सह महाराज तीर्थान्येतान्यनुव्रज ॥ १०९ ॥**(०२)

**एष ते लोमशो नाम महर्षिरमितद्युतिः ।****

**समेष्यति महाराज तेन सार्धमनुव्रज ॥ ११० ॥**(०३)

**मया च सह धर्मज्ञ तीर्थान्येतान्यनु वंज ।****

**प्राप्स्यसे महतीं सिद्धिं यथा राजा महाभिषक् ॥ १११ ॥**(०४)

**यथा ययातिर्धर्मात्मा यथा राजा पुरूरवाः ।****

**तथा त्वं कुरुशार्दूल स्वेन धर्मेण शोभसे ॥ ११२ ॥**(०५)

**यथा भगीरथो राजा यथा रामश्च विश्रुतः ।****

**तथा त्वमपि राजेन्द्र भ्राजसे रश्मिवानिव ॥ ११३ ॥**(०६)

**यथा मनुर्यथेक्ष्वाकुर्यथा पूरुर्महायशाः ।****

**यथा वैन्यो महाराज तथा त्वमपि विश्रुतः ॥ ११४ ॥**(०७)

---

(०१) (२)तप०; वद (for जपं ); (३) भ (भा)रद्वाजो; शौनकोथ (कश्च) (for दुर्वा०); (४) जावा० लिश्च; गौतम; दुर्वासा; संवर्त,

(०२) (१) ()प्यृषि (for ऋषिं ); (३) एतैः सह महाभस,

(०३) (१)वो; ते(for वै) लोकदेवानां; देवलोकानां (for लोमशो नम ); (२) महर्षिर् (३)त्वया राजन्; महाराज; त्वया सार्ध (for त्वया चैव); (४) चैवम् (for सार्धम्); लोमशः सुमहातपाः,

(०४) (१)मयापि; एतेन (for मया च); (२) क्रमं; क्रम; क्रमात् (for व्रज), (३)परमां (for महतीं); सिद्धि (for कीर्ति ); (४) महाभिषक्,

(०५) (१)तीर्थज्ञो; धर्मज्ञो (for धर्मात्मा ); भरत; (३) त्वं राज (for त्वं कुरु ),

(०६) (३)सर्वराजन्यो; सर्वं राजन्ये; च स राजन्यो; अपि राजेन्द्र (for सर्वराजभ्यो); (४) राजसे रश्मिमानिव,

(०७) (२)स्थः (for यशाः); (३) यथा वैण्यो महाराज,

**यथा च वृत्रहा सर्वान्सपत्नान्निर्दहन्पुरा ।****
**तथा शत्रुक्षयं कृत्वा त्वं प्रजाः पालयिष्यसि ॥ ११५ ॥**[०१]

* त्रैलोक्यं पालयामास देवराड्विगतज्वरः ।[०२]

**स्वधर्मविजितामुर्वीं प्राप्य राजीवलोचन ।****
**ख्यातिं यास्यसि धर्मेण कार्तवीर्यार्जुनो यथा ॥ ११६ ॥**[०३]

**वैशम्पायनः**

**एवमाश्वास्य राजानं नारदो भगवानृषिः ।****
**अनुज्ञाप्य महाराज तत्रैवान्तरधीयत ॥ ११७ ॥**[०४]

**युधिष्ठिरोऽपि धर्मात्मा तमेवार्थं विचिन्तयत्****
**तीर्थयात्राश्रितं पुण्यमृषीणां प्रत्यवेदयत् ॥ ११८ ॥**[०५]

अस्मिन् तीर्थयात्रापर्वणि ६८अध्याये ११८ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पुलस्त्यतीर्थयात्रायां नारदवाक्ये अष्टषष्ठितमोऽध्यायः ॥ ६८ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 069

# ६९.एकोनसप्ततितमोऽध्यायः,

युधिष्ठिरेण धौम्यं प्रति अर्जुनेन विना स्वस्य काम्यकवने अनभिरुचिकथनबुर्धकं निवासाय

---

(०१) (१)स; वै (for च); (२) व्यदहत; अदहत्; निर्दहन् (for निर्दहत्),
(०२) (४)त्वं प्रजा प्रजा सं,
(०३) (१)स्वधर्मेण विजित्योर्वीं; विजिता मुर्वी; मैणाविवत्युर्वी विजितं सर्वं (३) कीर्तिं यास्यति; प्राश्यसि वीर्येण; धर्मज्ञ कर्मणा यास्यसि ख्यातिं (४)०वीर्योर्जुनो,
(०४) (२)मुनिसत्तमः (for भग); (३) राज; राजं; ज्ञानं (for त्मानं -ख),
(०५) (३)मयं; श्रियं; श्रितं (श्रुतं) (for श्रयं ),

स्थानान्तरकथनप्रार्थना ।।

**वैशम्पायनः**

**भ्रातणां मतमाज्ञाय नारदस्य च धीमतः ।****
**पितामहसमं धौम्यं प्राह राजा युधिष्ठिरः ।। १ ।।(०१)**

**युधिष्ठिरः**

**मया स पुरुषव्याघ्रो जिष्णुः सत्यपराक्रमः ।****
**अस्त्रहेतोर्महाबाहुरमितात्मा प्रवसितः ।। २ ।। (०२)**

**स हि वीरोऽनुरक्तश्च समर्थश्च तपोधनः ।****
**कृती च भृशमप्यस्त्रे वासुदेव इव प्रभुः ।। ३ ।।(०३)**

**अहं ह्येतावुभौ ब्रह्मन्कृष्णावरिविघातिनौ।**
**अभिजानामि विक्रान्तौ तथा व्यासःपरन्तपौ ।। ४ ।।**

**त्रियुगौ पुण्डरीकाक्षौ वासुदेवधनञ्जयौ।(०४)**
**नारदोऽपि तथा वेद योऽप्यशंसत्सदा मम ।। ५ ।।**

**तथाहमपि जानामि नरनारायणावृषी।(०५)**
**शक्तोऽयमित्यतो मत्वा मया स प्रेषितोऽर्जुनः ।। ५ ।।**

**इन्द्रादनवरः शक्रं सुरसूनुः सुराधिपम् ।****
**द्रष्टुमस्त्राणि चादातुमिन्द्रादिति विवासितः ।। ७ ।।(०६)**

---

(०१) (४)इदमाह (for प्राह राजा );,
(०२) (१) तु स नर (for स पुरुष); (४) प्र (for वि );,
(०३) (२)तपोधनः (३) भृशशस्त्रेषु; मर्थेषु; मस्त्रेषु (४) इव प्रभो; समः प्रभुः ( समप्रभः); इवाजितः,
(०४) (१)त्वेता० (for ह्येत); (२) विघातिनौ; ०निषू(निसू) दनौ (४) यथा (for तथा); ज्ञेज्ञ त्रियुगं ,
(०५) (१)यथा (for तथा); वेदात् (for वेद); (२) यो (for सो); तथा (for सदा); (३) यथा (for तथा); तान् ( ह ) अभि (for अपि);,
(०६) (१)श (स)र्वमाराधयस्वेति (२) तं स; तु (for सं); (३) इन्द्रारुणवरः; नवमः ,शक्रः; शक्रं (४) पुत्रः (for सूनुः);,

**भीष्मद्रोणावतिरथौ कृपो द्रौणिश्च दुर्जयः ।**
**धृतराष्ट्रस्य पुत्रेण धृता युधि महाबलाः ॥ ८ ॥**
**सर्वे वेदविदः शूराः सर्वेऽस्त्रकुशलास्तथा।**(०१)
**० सर्वे महारथाः ख्याताः सर्वे जितपरिश्रमाः ।**(०२)
**योद्धुकामाश्च पार्थेन सततं ये महाबलाः ॥ ९ ॥**
**स च दिव्यास्त्रवित्कर्णः सूतपुत्रो महारथः ।**(०३)
**योऽस्त्रवेगानिलबलः शरार्चिस्तलनिःस्वनः ॥ १० ॥**
**रजोधूमोऽस्त्रसम्पातो धार्तराष्ट्रानिलोद्धतः ।**(०४)
**निसृष्ट इव कालेन युगान्ते ज्वलनो यथा ॥ ११ ॥**
**मम सैन्यमयं कक्षं प्रधक्ष्यति महाबलः ॥ १२ ॥**(०५)
**तं स कृष्णानिलोद्धूतो दिव्यास्त्रज्वलनो महान् ।****
**श्वेतवाजिबलाकाभृद्गाण्डीवेन्द्रायुधोल्बणः ॥ १३ ॥**(०६)
**म च तं शरधाराभिः प्रदीप्तं कर्णपावकम् ।****
**उदीर्णोऽर्जुनमेधोऽयं शमयिष्यति संयुगे ॥ १४ ॥**(०७)
**स साक्षादेव सर्वाणि शक्रात्परपुरञ्जयः ।****

---

(०१) (२)सु (स०); तु (for च); दुर्जयौ; याः (४) धृता युधि; सुवृताः सु सुकृताः सु; सुधृताः सु ;सुव्रताः सु महा रथाः०सर्वास्त्रकुशलाः; सर्वे विदुषः; सर्वास्त्रविदुषः; सर्वेसुकुशलाः रणे; तदा (for तथा);,

(०२) मुख्याः (for ख्याताः ); सर्वे रथिमहामुख्याः सर्वेमितपराक्रमाः,

(०३) (१)कामाश्च कामस्तु; कामः स (२) ये ते; वै महाबलाः (३)सर्व (for स च); (४) ०मनाः; बलः (for रथः );,

(०४) (१) सोस्त्र०; योस्त्र० (३) धूमास्र ;धूम्रोस्त्र सम्पातो; सन्त्रासो,

(०५) (२)युगान्ते ज्व महान् (for यथा); (४) महाबलः (for न संन्नयः);,

(०६) (१)स च (for तं स); (२) ०ज्वलनो (for जलदो); (३) बलाकाभिर्; ०भ्यो; ०भो; ०वान्; धृग् सग् श्च (४) ज्वलं; ल्वणः र्जुनः ज्वरः,

(०७) (१)संस्ऽधः सं (स) वर्षन् संनद्धः; सततः (२) सुदीप्तं (३) अर्जुनोदीरितो मेघः (४) (अ)संशयं (for संयुगे );,

**दिव्यान्यस्त्राणि बीभत्सुर्यथावत् प्रतिपत्स्यते ॥ १५ ॥**[०१]

**अलं स तेषां सर्वेषामिति मे धीयते मतिः ।****

**नास्ति त्वतिक्रिया तस्य रणेऽरीणां प्रतिक्रिया ॥ १६ ॥**[०२]

**ते वयं पाण्डवं सर्वे गृहीतास्त्रं धनञ्जयम् ।****

**द्रष्टारो न हि बीभत्सुर्भारमुद्यम्य सीदति ॥ १७ ॥**[०३]

**वयं तु तमृते वीरं वनेऽस्मिन्द्विपदां वर ।****

**अवधानं न गच्छामः काम्यके सह कृष्णया ॥ १८ ॥**[०४]

**भवानन्यद्वनं साधु बह्वन्नं फलवच्छुचि ।****

**आख्यातु रमणीयं च सेवितं पुण्यकर्मभिः ॥ १९ ॥**[०५]

**यत्र कञ्चिद्वयं कालं वसन्तः सत्यविक्रमम् ।****

**प्रतीक्षामोऽर्जुनं वीरं वृष्टिकामा इवाम्बुदम् ॥ २० ॥**[०६]

लक्षालङ्कारः- वत्पुकाम इवाम्बुदम् इत्यत्र वप्तुं बीजवापं कर्तुं कामो यस्य स कृषीवल इत्यर्थः ।

**विविधानाश्रमान्कांश्चिद्द्विजातिभ्यः प्रतिश्रुतान् ।****

**सरांसि सरितश्चैव रमणीयांश्च पर्वतान् ॥ २१ ॥**[०७]

---

(०१) (१)इव (for एव); कार्याणि (for सर्वाणि); साक्षादेव स स; साक्षाद्देवस्य स
शक्राद् अस्त्राणि (४) ततश्च; यथावत् ( संयतः) (for तत्त्वतः );,
(०२) (३)ख०इदमर्धं न,नास्मिन् (for नास्ति); त्वतिकृते; तत्वकृताः त्वति ( अति; त्ववि)कृता; त्यनिकृतौ; त्वयि क्रिया; णौ त्वत्र क्रिया (for त्वति क्रिया ); नाम ( तात); (अ)र्थानां (अ)स्त्रणां (for तस्य);,
(०३) (१)ते वयं ( तत्स्वयं) (तं वयं) द्रहुमिच्छामः (for पाण्डवं सर्वे); (२)अरिन्दमं (for धनं );,
(०४) (२)वरः वरं (for वर); (३) अवसानं (for धानं); पश्यामः (for गच्छा );,
(०५) (१)यद्यद् (for अन्यद्); तस्माद् (for साधु); (२) ब्रह्माद्यं ( ब्रह्मण्यं) (for बह्वन्नं); जलं ( बलं) (for फलं); शुचिः (३) तु; ते; मे; वा; नः (for च);,
(०६) (१)क्वचिद्; कं च; किं चिद् (for कश्चिद्); (३) क्षेमा; क्षामा (for क्षामो); (४)वस्तुकामाः; वनि;वव्रु वर्षाकाले; वृष्टिकामा; वप्तु वसु ,
(०७) (२)प्रति (for परि); द्विजातिजनविश्रुतान्; सर्बदिग्भ्यः परि,

**आचक्ष्व न हि मे ब्रह्मन्रोचते तमृतेऽर्जुनम्।**

**वनेऽस्मिन्काम्यके वासो गच्छामोऽन्यां दिशं प्रति ॥ २२ ॥**

अस्मिन् तीर्थयात्रापर्वणि ६९अध्याये २२श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि धौम्यतीर्थयात्रायां एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 070

# ७०.सप्ततितमोऽध्यायः

धौम्येन युधिष्ठिरं प्रति प्राचीस्थतीर्थकथनम् ।।

**वैशम्पायनः**

**तान्सर्वानुत्सुकान्दृष्ट्वा पाण्डवान्दीनचेतसः ।****

**आश्वासयंस्तथा धौम्यो बृहस्पतिसमोऽब्रवीत् ॥ १ ॥**

**धौम्यः**

**ब्राह्मणानुमतान्पुण्यानाश्रमान्भरतर्षभ ।****

**दिशस्तीर्थानि शैलांश्च शृणु मे वदतो नृप ॥ २ ॥**

* याञ्छ्रुत्वा गदतो राजन्विशोको भवितासि ह ।**

* द्रौपद्या चानया सार्धं भ्रातृभिश्च नरेश्वर।

* श्रवणाच्चैव तेषां त्वं पुण्यमाप्स्यसि पाण्डव ।**

* गत्वा शतगुणं चैव तेभ्य एव नरोत्तम।

**पूर्वं प्राचीं दिशं राजन्राजर्षिगणसेविताम् ।****

**रम्यां ते कथयिष्यामि युधिष्ठिर यथास्मृति ॥ ३ ॥**

**तस्यां देवर्षिजुष्टायां नैमिषं नाम भारत ।****
**यत्र तीर्थानि देवानां सुपुण्यानि पृथक्पृथक् ॥ ४ ॥**

**यत्र सा गोमती नाम पुण्या देवर्षिसेविता ।****
**यज्ञभूमिश्च देवानां शामित्रं च विवस्वतः ॥ ५ ॥**

लक्षालङ्कारः- शामित्रं कच विवस्वत इत्यत्र शमितुः शान्दस्य भावः शामित्रं, विवस्वतः सूर्यस्य ।

**यस्यां गिरिवरः पुण्यो गयो राजर्षिसेवितः ।****
**शिवं ब्रह्मसरो यत्र सेवितं त्रिदशर्षिभिः ॥ ६ ॥**

**यदर्थे पुरुषव्याघ्र कीर्तयन्ति पुरातनाः ।****
**एष्टव्या बहवः पुत्रा यदि कश्चिद् गयां व्रजेत् ॥ ७ ॥**

* यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ।**
* उत्तारयति सन्तत्या दशपूर्वान्दशावरान्॥ ॥

**महानदी च तत्रैव तथा हयशिरोऽनध ।****
**यत्रासौ कीर्त्यते विप्रैरक्षय्यकरणो वटः ॥ ८ ॥**

**यत्र दत्तं पितृभ्योऽन्नमक्षय्यं भवति प्रभो ।****
**सा च पुण्यजला तत्र फल्गुः नाम महानदी ॥ ९ ॥**

**बहुमूलफला चापि कौशिकी भरतर्षभ ।****
**विश्वामित्रोऽध्यगाद्यत्र ब्राह्मणत्वं तपोधनः ॥ १० ॥**

**गङ्गा यत्र नदी पुण्या यस्यास्तीरे भगीरथः ।****
**अयजत्तत्र बहुभिः क्रतुभिर्भूरिदक्षिणैः ॥ ११ ॥**

**पञ्चालेषु च कौरव्य कथयन्ति उत्पलावनम् ।****
**विश्वामित्रोऽयजद्यत्र शक्रेण सह कौशिकः ॥ १२ ॥**

तत्रानुवंशं भगवाञ्जामदग्न्यस्तथा जगौ ।**
विश्वामित्रस्य तां दृष्ट्वा विभूतिमतिमानुषीम् ॥ १३ ॥
कान्यकुब्जेऽपिबत् सोममिन्द्रेण सह कौशिकः ।**
ततः क्षत्रादपाक्रामद्ब्राह्मणोऽस्मीति चाब्रवीत् ॥ १४ ॥
पवित्रमृषिभिर्जुष्टं पुण्यं पावनमुत्तमम् ।**
गङ्गायमुनयोर्वीर सङ्गमं लोकविश्रुतम् ॥ १५ ॥
यत्रायजत भूतात्मा पूर्वमेव पितामहः ।**
प्रयागमिति विख्यातं लस्मिन् भरत सत्तम ॥ १६ ॥
अगस्त्यस्य च राजेन्द्र तत्राश्रम जदं मपत् ।**
* तत्तथा तापसारण्यं तापसैरुपशोभितम्।
हिरण्यबिन्दुः कथितो गिरौ कालञ्जरे नृप ॥ १७ ॥
अत्यन्यान् पर्वतान् राजन् पुण्यो गिरिवरः शिवः ।
महेन्द्रो नाम कौरव्य भार्गवस्य महात्मनः ॥ १८ ॥
अयजत्तत्र कौन्तेय पूर्वमेव पितामहः ।
यत्र भागीरथी पुण्या सरस्यासीद्युधिष्ठि ॥ १९ ॥
यत्र सा ब्रह्मशाल इति पुण्या ख्याता विशाम्पते।
धूतपाप्मभिराकीर्णा पुण्यं तस्याश्च दर्शनम् ॥ २० ॥
पवित्रो मङ्गलीयश्च ख्यातो लोके सनातनः ।
केदारश्च मतङ्गस्य महानाश्रम उत्तमः ॥ २१ ॥
कुण्डोदः पर्वतो रम्यो बहुमूलफलोदकः ।
नैषधस्तृषितो यत्र जलं शर्म च लब्धवान् ॥ २२ ॥
यत्र देववनं पुण्यं तापसैरुपशोभितम्।

**बाहुला च नदी यत्र नन्दा च गिरिमूर्धनि ॥ २३ ॥**

**तीर्थानि सरितः शैलाः पुण्यान्यायतनानि च ।**

**प्राच्यां दिशि महाराज कीर्तितानि मया तव ॥ २४ ॥**

**तिसृष्वन्यानि राजेन्द्र दिक्षु तीर्थानि मे शृणु।**

**सरितः पर्वतांश्चैव पुण्यान्यायतनानि च ॥ २५ ॥**

अस्मिन् तीर्थयात्रापर्वणि ७०अध्याये २५श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि धौम्यतीर्थयात्रायां सप्ततितमोऽध्यायः ॥ ७० ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 071

# ७१.एकसप्ततितमोऽध्यायः

धौम्येन युधिष्ठिरं प्रति दक्षिणदिक्स्थनानातीर्थानुकीर्तनम् ॥

**धौम्यः**

**दक्षिणेन तु पुण्यानि शृणु तीर्थानि भारत ।****

**विस्तरेण यथाबुद्धि कीर्त्यमानानि भारत ॥ १ ॥**

**यस्यामाख्यायते पुण्या दिशि गोदावरी नदी ।****

**बह्वारामा बहुजला तापसाचरिता शुभा ॥ २ ॥**

**वाण्णा भीमनती चोभे नद्यौ पापभयापहे ।****

**मृगद्विजसमाकीर्णे तापसालयभूषिते ॥ ३ ॥(०१)**

**राजर्षेस्तस्य च सरिन्नृगस्य भरतर्षभ ।****

(०१) (१)क०ग०घ०हैमवती; ख०ङीमरथी,

**रम्यतीर्था बहुजला तापसाचरिता शुभा ॥ ४ ॥**(०१)

**अपि चात्र महाबाहो मार्कण्डेयो महातपाः ।**

**अनुवंश्यां जगौ गाथां नृगस्य वसुधाधिप ॥ ५ ॥**

**नृगस्य यजमानस्य प्रत्यक्षमिति नः श्रुतम् ।**

**अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ ६ ॥**

* पयोष्ण्यां यजमानस्य वाराहे तीर्थ उत्तमे।

* उद्धृतं भूतलस्थं वा वायुना समुदीरितम् ।**

* पयोष्ण्या हरते तोयं पापमामरणान्तिकम्।

* स्वर्गादुत्तुङ्गममलं विषाणं यत्र शूलिनः ।**

* स्वमात्मविहितं दृष्ट्वा मर्त्यः शिवपुरं व्रजेत्।

* एकतः सरितः सर्वा गङ्गाद्याः सलिलोच्चयाः ।**

* पयोष्णी चैकतः पुण्या तीर्थेभ्यो हि मता मम।

**माठरस्य वनं पुण्यं बहुमूलफलं शिवम् ।**

**यूपश्च भरतश्रेष्ठ वरुणस्रोतसे गिरौ ॥ ७ ॥**(०२)

**प्रवेणी उत्तरमार्गे तु पुण्ये कण्वाश्रमे तथा ।**

**तापसानामरण्यानि कीर्तितानि यथाश्रुति ॥ ८ ॥**

**वेदी शूर्पारके तात जमदग्नेर्महात्मनः ।**

**रम्या पाषाणतीर्था च पुरश्चन्द्रा च भारत ॥ ९ ॥**

**अशोकतीर्थं तत्रैव कौन्तेय बहुलाश्रमम् ।**

**अगस्त्यतीर्थं पाण्ड्येषु वारुणं च युधिष्ठिर ॥ १० ॥**

---

(०१) (१)क०ख०ग०पयोष्णी द्विजसेविता,

(०२) (१)क०ग०आपश्च ,स्रोतसो गिरः घ०यूपं च,

कुमार्यः कथिताः पुण्याः पाण्ड्येष्वेव नरर्षभ ।**
ताम्रपर्णीं तु कौन्तेय कीर्तयिष्यामि तां शृणु ॥ ११ ॥
यत्र देवैस्तपस्तप्तं महदिच्छद्भिराश्रमे ।**
गोकर्ण इति विख्यातस्त्रिषु लोकेषु भारत ॥ १२ ॥
शीततोयो बहुजलः पुण्यस्तात शिवश्च सः ।**
ह्रदः परमदुष्प्रापो मानवैः रकृतात्मभिः ॥ १३ ॥
तत्रैव तृणासोमाग्नेः सम्पन्नः फलमूलवान् ।**
आश्रमोऽगस्त्यशिष्यस्य पुण्यो द्रुसहे गिरौ ॥ १४ ॥
वैदूर्यपर्वतस्तत्र श्रीमान्मणिमयः शुभ्रः ।**
अगस्त्यस्याश्रमश्चैव बहुमूलफलोदकः ॥ १५ ॥(०१)
सुराष्ट्रेष्वपि वक्ष्यामि पुण्यान्यायतनानि ते ।**
आश्रमान्सरितश्शैलान् सरांसि च नराधिप ॥ १६ ॥
तनसो मजिजनं विप्रास्तत्रापि कथयन्त्युत ।**
प्रभासं चोदधेस्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ १७ ॥
तत्र पिण्डारकं नाम तापसाचरितं शिवम् ।**
उज्जयन्तश्च शिखरी क्षिप्रं सिद्धिकरो महान् ॥ १८ ॥
तत्र देवर्षिवर्येण नारदेनानुकीर्तितः ।**
पुराणः श्रूयते श्लोकस्तं निबोध युधिष्ठिर ॥ १९ ॥
पुण्ये गिरौ सुराष्ट्रेषु मृगपक्षिनिषेविते ।**
उज्जयन्ते स्म तप्ताङ्गो नाकपृष्ठे महीयत ॥ २० ॥
पुण्या द्वारवती तत्र यत्रासौ मधुसूदनः ।**

(०१) (२) ख०घ०शिवः,

**साक्षाद्देवः पुराणोऽसौ स हि धर्मः सनातनः ॥ २१ ॥**

* ख०एष नारायणश्श्रीमान् क्षीरार्णवनिकेतनः ।

* लागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीम् ।।

**ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।****

**ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥ २२ ॥**

**पवित्राणां हि गोविन्दः पवित्रं परमुच्यते।**

**पुण्यानामपि पुण्योऽसौ मङ्गलानां च मङ्गलम् ॥ २३ ॥**

**त्रैलोक्ये पुण्डरीकाक्षो देवदेवः सनातनः ।**

* ख-

* मङ्गलं भगवान् विष्णुरमङ्गलं मधुसुदनः ।

* मङ्गलंपुण्डरीकाक्षो मङ्गलं गरुत्मध्वजः ।।

* अव्ययात्मा व्ययात्मा च क्षेत्रज्ञः परमेश्वरः ।

**आस्ते हरिरचिन्त्यात्मा तत्रैव मधुसूदनः ॥ २४ ॥**(०१)

अस्मिन् तीर्थयात्रापर्वणि ७१अध्याये २४श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि धौम्यतीर्थयात्राया एकसप्ततितमोऽध्यायः ॥ ७१ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

# 03- 04 - 072

## द्विसप्ततितमोऽध्यायः

(०१) (१)ख०आदिरन्तो ह्यचिन्त्यात्मा मघ्यश्व,

धौम्येन युधिष्ठिरं प्रति प्रतीचीस्थतीर्थकथनम् ।।

**धौम्यः**

**अवन्तीषु प्रतीच्यां वै कीर्तयिष्यामि ते दिशि ।****

**यानि तत्र पवित्राणि पुण्यान्यायतनानि च ॥ १ ॥**

**प्रियङ्ग्वाम्रवणोपेता वानीरवनमालिनी ।****

**प्रत्यक्स्रोता नदी पुण्या नर्मदा तत्र भारत ॥ २ ॥**

लक्षालङ्कारः-वानीरवनमालिनी इत्यत्र 'वानीरो वञ्जुनः शीतः' इत्यभिधानात् वीनीरवनं वेत्रवनम् ।

**त्रैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च ।**

* सरिद्वनानि शैलेन्द्रा देवाश्च सपितामहाः ।

* नर्मदायां कुरुश्रेष्ठ सह सिद्धर्षिचारणैः ।

* स्नातुमायान्ति पुण्यौघैः सदा वारिषु भारत।

**निकेतः ख्यायते पुण्यो यत्र विश्रवसो मुनेः ।****

**जज्ञे धनपतिर्यत्र कुबेरो नरवाहनः ॥ ३ ॥**

**वैडूर्य शिखरो नाम पुण्यो गिरिवरः शुभः ।****

**दिव्यपुष्पफलास्तत्र पादपा हरितच्छदाः ॥ ४ ॥**

**तस्य शैलस्य शिखरे सरः तरुवनाकुलम् ।****

**प्रफुल्लनलिनं राजन् देवगन्धर्वसेवितम् ॥ ७ ॥**

**बह्वाश्चर्यं महाराज दृश्यते तत्र पर्वते ।****

**पुण्ये स्वर्गोपमे चैव देपुण्यर्षिगणसेविते ॥ ५ ॥**

**ह्लादिनी पुण्यतीर्था च राजर्षेस्तत्र वै सरित् ।****

विश्वामित्रनदी परापुण्या परपुरञ्जय ॥ ६ ॥

विश्वामित्रनदी पारा पुणाय परपुरञ्जय ॥ ७ ॥

यस्यास्तीरे सतां मध्ये ययातिर्नहुषात्मजः ।**

पपात स पुनर्लोकाँल्लेभे धर्मान्सनातनान् ॥ ८ ॥

तत्र पुण्यो ह्रदः ख्यातो मैनाकश्चैव पर्वतः ।**

बहुमूलफलो वीर असितो नाम पर्वतः ॥ ९ ॥

आश्रमः कक्षसेनस्य पुण्यस्तत्र युधिष्ठिर।

च्यवनस्य आश्रमश्चैव ख्यातस्सर्वत्र पाण्डव ।

तत्राल्पेनैव सिध्यन्ति मानवास्तपसा विभो ॥ १० ॥

जम्बूमार्गो महाराज सततं तापसैयुतः।

आश्रमः शाम्यतां श्रेष्ठ मृगद्विजगणायुतः ॥ ११ ॥

जम्पुमागौ महाराज सततं तापसैर्युता।

केतुमाला च मेध्या च गङ्गाद्वारं च भूमिप ॥ १२ ॥

ख्यातं च सैन्धवारण्यं पुण्यं मुनि निषेवितम् ॥ १३ ॥

पितामहसरः पुण्यं पुष्करं नाम भारत ।**

वैखानसानां सिद्धानामृषीणामाश्रमः प्रियः ॥ १४ ॥

अप्यत्र संस्तवार्धाय प्रजापति रथो जगौ ।**

पुष्करेषु नर श्रेष्ठ गाथां सुकृतिनां व ॥ १५ ॥(०१)

मनसाप्यभिकामस्य पुष्कराणि मनस्विनः ।

विप्रणश्यन्ति पापानि नाकपृष्ठे च पूज्यते ॥ १६ ॥

---

(०१) (१) ख०ग०घ०रुदाजगौ,

अस्मिन् तीर्थयात्रापर्वणि ७२ अध्याये १६ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि धौम्यतीर्थयात्रायां द्विसप्ततितमोऽध्यायः ॥ ७२ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 073

# त्रिसप्ततितमोऽध्यायः

धौम्येन तयिधिष्ठिरं प्रत्युदीचीस्थतीर्थकथनम् ।।

**धौम्यः**

**उदीच्यां राजशार्दूल दिशि पुण्यानि यानि वै ।****
**तानि ते कीर्तयिष्यामि पुण्यान्यायतनानि च ॥ १ ॥**

* शृणुष्वावहितो भूत्वा मम मन्त्रयतः प्रभो।

* कथाप्रतिग्रहो वीर श्रद्धां जनयते शुभाम्।

**सरस्वती महापुण्या ह्रादिनी वनमालिनी ।****
**समुद्रगा महावेगा यमुना यत्र पाण्डव ॥ २ ॥**

**यत्र पुण्यतरं तीर्थं प्लक्षावतरणं शुभम् ।****
**यत्र सारस्वतैरिष्ट्वा गच्छन्त्यवभृथैर्द्विजाः ॥ ३ ॥**

**पुण्यं चाख्यायते दिव्यं शिवमग्निशिरोऽनघ ।****
**सहदेवोऽयजद्यत्र शम्याक्षेपेण भारत ॥ ४ ॥**

**एतस्मिन्नेव चार्थेऽसाविन्द्रगीता युधिष्ठिर ।****
**गाथा चरति लोकेऽस्मिन्गीयमाना द्विजातिभिः ॥ ५ ॥**

**अग्नयः सहदेवेन सेविता यमुनामनु ।****

**शतं शतसहस्राणि सहस्रशतदक्षिणाः ॥ ६ ॥**

**तत्रैव भरतो राजा चक्रवर्ती महायशाः ।****

**विंशतिः सप्त चाष्टौ च हयमेधा नुपाहरत् ॥ ७ ॥**(०१)

**कामकृद्यो द्विजातीनां श्रुतस्तात मया पुरा ।****

**अत्यन्तमाश्रमः पुण्यः शङ्करस्तत्र विश्रुतः ॥ ८ ॥**

**सरस्वती नदी सद्भिः सततं पार्थ पूजिता ।****

**बालखिल्यैर्महाराज यत्रेष्टमृषिभिः पुरा ॥ ९ ॥**

**दृषद्वती पुण्यतमा यत्र ख्याता युधिष्ठिर ।****

* न्यग्रोधाख्यस्तु पुण्याख्यः पाश्चाल्यो द्विपदां व।

* दाल्भ्यघोषश्च दाल्भ्यश्च धरणीस्थो महात्मनः ।

* कौन्तेयानन्तयशसः सुव्रतस्यामितौजसः ।

* आश्रमः ख्यायते पुण्यस्त्रिषु लोकेषु विश्रुतः ।

**तत्र वै वर्य्यवर्णौ च सुपुर्ण्येमनुजाधिप ॥ १० ॥**

**वेदज्ञौ वेदविदितौ वेदविद्याविदावुभौ ।****

**यजन्तौ क्रतुभिर्नित्यं पुण्यैर्भरतसत्तम ॥ ११ ॥**

**समेत्य बहुशो देवाः सेन्द्राः सवरुणाः पुरा ।****

**विशाखयूपेऽतप्यन्त तस्मान्पुण्यतमस्स च ॥ १२ ॥**(०२)

**ऋषिर्महान्महाभागो जमदग्निर्महायशाः ।****

**पलाशकेषु पुण्येषु रम्येष्वयज ताभिभूः ॥ १३ ॥**

**यत्र सर्वाः सरिच्छ्रेष्ठाः साक्षात्तमृषिसत्तमम् ।****

**स्वं स्वं तोयमुपादाय परिवार्योपतस्थिरे ॥ १४ ॥**

---

(०१) (१) क०ख०ग०घ०नुदाहरत्,

(०२) (१) अ०पुण्यात्,

**अपि चात्र महाराज स्वयं विश्वावसुर्जगौ ।****
**इमं श्लोकं तदा वीर यज्ञं वीक्ष्य महात्मनः ॥ १५ ॥**

**यजमानस्य वै देवाञ्जमदग्नेर्महात्मनः ।****
**आगम्य सरितो सर्वान्मधुना समतर्पयन् ॥ १६ ॥**

**गन्धर्वयक्षरक्षोभिरप्सरोभिश्च शोभितम् ।****
**किरातकिन्नरावासं शैलं शिखरिणां वरम् ॥ १७ ॥**

**बिभेद तरसा गङ्गा गङ्गाद्वारं युधिष्ठिर।**
**पुण्यं तत्ख्यायते राजन्ब्रह्मर्षिगणसेवितम् ॥ १८ ॥**

**सनत्कुमारः कौरव्य पुण्यं कनखलं तथा ।****
**पर्वतश्च पुरुः नाम यत्र जातः पुरूरवाः ॥ १९ ॥**

**भृगुर्यत्र तपस्तेपे महर्षिगणसेविते ।****
**राजन्स आश्रमः ख्यातो भृगुतुङ्गो महागिरिः ॥ २० ॥**(०१)

**यः स भूतं भविष्यच्च भवच्च भरतर्षभ ।****
**नारायणः प्रभुर्विष्णुः शाश्वतः पुरुषोत्तमः ॥ २१ ॥**(०२)

**तस्यातियशसः पुण्यां विशालां बदरीमनु ।****
**आश्रमः ख्यायते पुण्यस्त्रिषु लोकेषु भारत ॥ २२ ॥**(०३)

**उष्णतोयवहा गङ्गा शीततोयवहाऽपरा ।****
**सुवर्णसिकता राजन्विशालां बदरीमनु ॥ २३ ॥**(०४)

---

(०१) (१)तत्र (for यत्र); (२) ; संवृतः; ; सेविते ;संवृते; ; पूजितः, (३) ० ;राजन्स ;नामतः (for आश्रमः ); (४)०तुङ्गे गिरौ; तुदो ०गिरिः,
(०२) (१)यः स; यः सं (for यच्च); भविष्यं च, (२) भविष्यत् (for भवच्च); भरत (for पुरुष); (३) विभुः भृगुः परं (for प्रभु,); जिष्णुः (for विष्णुः);,
(०३) (४)भारत (for विश्रुतः);,
(०४) (१) उष्ण० शीत० कृष्ण (for उष्ण); श्वेत (for शीत); पुरा; वरा; , च या (for (अ)परा, );,

**ऋषयो यत्र देवाश्च महाभागा महौजसः ।****
**प्राप्य नित्यं नमस्यन्ति देवं नारायणं प्रभुम् ॥ २४ ॥**(०१)

**यत्र नारायणो देवः परमात्मा सनातनः ।****
**तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च ॥ २५ ॥**(०२)

**तत्पुण्यं परमं ब्रह्म तत्तीर्थं तत्तपोवनम् ।****
**तत्र देवर्षयः सिद्धाः सर्वे चैव तपोधनाः ॥ २६ ॥**(०३)

(४६७) तत्परं परमं देवं भूतानां परमेश्वरम्
* शाश्वतं परमं चैव धातारं परमं पदम् ।
* यं विदित्वा न शोचन्ति विद्वांसः शास्त्रदृष्टयः ।(०४)

**आदिदेवो महायोगी यत्रास्ते मधुसूदनः ।****
**पुण्यानामपि तत्पुण्यं मा ङ्क्तु् ते संसायोऽत्र वै ॥ २७ ॥**(०५)

**एतानि राजन्पुण्यानि पृथिव्यां पृथिवीपते ।****
**कीर्तितानि नरश्रेष्ठ तीर्थान्यायतनानि च ॥ २८ ॥**(06)

**एतानि वसुभिः साध्यैरादित्यैर्मरुदश्विभिः ।****
**ऋषिभिर्देवकल्पैश्च सेवितानि महात्मभिः ॥ २९ ॥**(०७)

**चरन्नेतानि कौन्तेय सहितो ब्राह्मणर्षभैः ।****

---

(०१) (१)()त्र हि (for यत्र); (२) (अ)मितौ (for महौ); (३) प्राप्ता (for प्राप्य); तं च (for नित्यं); नमन्ति स्म; नमस्यते; , उपासन्ते, (४) नारायणमजं (for देवं नारा); प्रभुं; विभो; भुवि (for विभुम्);,
(०२) (३)सर्वं (for पार्थ);,
(०३) (१)तीर्थं (for पुण्यं); परमं (तत्युनद्) (for तत्परं); (२) तीर्थ पवित्रं (for तत्तीर्थं);,
(०४) (४)देव (for चैव);,
(०५) (३)यत् (for तत्); (४) अत्र (for तत्र); मे; वा (for मा); मा भूत्ते संशयोत्र वै,
(०६) (३)कुरुं (for नर); (४) पुण्या (for तीर्था०); सेवितानि महर्षिभि;,
(०७) (३)देवताकल्पैः; देवकल्पैश्च (४) महर्षिभिः (for महां);,

**भ्रातृभिश्च महाभागैरुत्कण्ठां विजयिष्यसे ॥ ३० ॥**(०१)

अस्मिन् तीर्थयात्रापर्वणि ७३अध्याये ३०श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि धौम्यतीर्थयात्रायां त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 074

# ७४. चतुस्सप्ततितमोऽध्यायः

महर्षेर्लोमशस्यागमनम् । लोमशेनेन्द्रवचनाद्युधिष्ठिरं प्रति पार्थस्य पाशुपतादिप्राप्तिकथनपूर्वकनिन्द्रसन्देशनिवेदनम् ॥१॥ लोमशेन युधिष्ठिरं प्रति स्वसाहित्येन तीर्थयात्रा-विधायकपार्थवचननिवेदनम् ॥२॥ युधिष्ठिरेण लोमशाज्ञया अधिकपरिजन-विसर्जनम् ॥३॥

**वैशम्पायनः**

**एवं सम्भाषमाणे तु धौम्ये कौरवनन्दन ।****
**लोमशः सु महातेजा ऋषिस्तत्राजगाम ह ॥ १ ॥**(०२)

**तं पाण्डवाग्रजो राजा सगणो ब्राह्मणाश्च ते ।****
**उपातिष्ठन्महाभागं दिवि शक्रमिवामराः ॥ २ ॥**(०३)

**लोमशः**

**समभ्यर्च्य यथान्यायं धर्मपुत्रो युधिष्ठिरः ।****

---

(०१) (२)सहितैः (सेवितैः), ब्रह्मवादिभिः; ब्राह्मणर्षिभिः०(३) ०वेगैर (for भागैर्); (४) सोत्कण्ठो , (for उत्कष्ठां); विहरिष्यसि(ति) विज०यिष्यसे ( ०सि),

(०२) (२)कौरवनन्दनं; कौरव्यनन्दन (३) स; तु (for सु );,

(०३) (२)ये (for ते); (३) उपातिष्ठन् महाभागाः; राज; भाग; त्मानं ,

**पप्रच्छागमने हेतुमटने च प्रयोजनम्** ॥ ३ ॥(०१)

**स पृष्टः पाण्डुपुत्रेण प्रीयमाणो महामनाः ।****

**उवाच श्लक्ष्णया वाचा हर्षयन्निव पाण्डवान्** ॥ ४ ॥(०२)

**सञ्चरन्नस्मि कौन्तेय सर्वाल्लोँकान्यदृच्छया ।****

**गतः शक्रस्य भवनं तत्रापश्यं सुरेश्वरम्** ॥ ५ ॥(०३)

**तव च भ्रातरं वीरमपश्यं सव्यसाचिनम् ।****

**शक्रस्यार्धासनगतं तत्र मे विस्मयो महान्** ॥ ६ ॥

**आसीत्पुरुषशार्दूल दृष्ट्वा पार्थं तथागतम्।**

**आह मां तत्र देवेशो गच्छ पाण्डुसुतानिति** ॥ ७ ॥

**सोऽहमभ्यागतः क्षिप्रं दिदृक्षुस्त्वां सहानुजम्।**(०४)

**वचनात्पुरुहूतस्य पार्थस्य च महात्मनः** ॥ ८ ॥

**आख्यास्ये ते प्रियं तात महत्पाण्डवनन्दन।**(०५)

**भ्रातृभिः सहितो राजन्कृष्णया चैव तच्छृणु** ॥ ९ ॥

**यत्त्वयोक्तो महाबाहुरस्त्रार्थं पाण्डवर्षभ।**(०६)

**तदस्त्रमाप्तं पार्थेन रुद्रादप्रतिमं विभो** ॥ १० ॥

---

(०१) (१)समं (for तम); (२) धर्मपुत्रो (४) ख०अयं पादोऽनन्तरश्च नस्तः,गमने (for अटने); महर्षि लोकविश्रुतं,

(०२) (२)मतिः; त्मना मते; ०तपाः (for मनाः );,

(०३) (१)इव (for अस्मि); (२) सर्वान् (for सर्व ); (३) भवनं (for सदनं);,

(०४) (१)आह तत्र प्राह (for आह); देवेन्द्रो (for देवेशो); (२) प्रति (for इति); (४) महसाभुजं;; मुहाभुज (for सहा );,

(०५) (३)राजन्; तावद्(त्ती तात) (४)अहं (for महत्); महान्तं कुरुनदन; सुमहस्पाण्डुनन्दन,

(०६) (१)ऋषि (for भ्रातृ); (२) ०सह (for चैव); (३) यम्; तत् (for यत्); त्वयोक्तं; स्वयं भ्रातुर् (for महा ); (४) भरतर्षभ; पाण्डवो गतः; पाण्डुनन्दनः; पाण्डवर्षभः,

**यत्तद्ब्रह्मशिरो नाम तपसा रुद्रमागमत्।**(०१)

**अमृतादुत्थितं रौद्रं तल्लब्धं सव्यसाचिना ॥ ११ ॥**

**तत्समन्त्रं ससंहारं सप्रायश्चित्तमङ्गलम्।**(०२)

**वज्रमस्त्राणि चान्यानि दण्डादीनि युधिष्ठिर ॥ १२ ॥**

**यमात्कुबेराद्वरुणादिन्द्राच्च कुरुनन्दन ।****

**अस्त्राण्यधीतवान्पार्थो दिव्यान्यमितविक्रमः ॥ १३ ॥**(०३)

**विश्वावसोस्तु तनयाद्गीतं नृत्यं च साम च ।****

**वादित्रं च यथान्यायं प्रत्यविन्दद्यथाविधि ॥ १४ ॥**(०४)

**एवं कृतास्त्रः कौन्तेयो गान्धर्वं वेदमाप्तवान् ।****

**सुखं वसति बीभत्सुरनुजस्यानुजस्तव ॥ १५ ॥**(०५)

**यदर्थं मां सुरश्रेष्ठ इदं वचनमब्रवीत् ।****

**तच्च ते कथयिष्यामि युधिष्ठिर निबोध तत् ॥ १६ ॥**(०६)

यच्च ते० कीर्तयिष्यामि गुप्त (४) तत् (for मे);

**इन्द्रः**

**भवान्मनुष्यकाय गमिष्यति न संशयः ।****

**ब्रूयाद्युधिष्ठिरं तत्र वचनान्मे द्विजोत्तम ॥ १७ ॥**(०७)

---

(०१) (१)तदस्त्रं प्राप्तं; प्राप्तं तदस्त्रं; तदस्त्रमात्त (२) विभो (for महत्); (४)आगमत् (for आगतम्);,
(०२) (३)तं (for तत्),
(०३) (१)शस्त्राणि (for चास्त्राणि); वज्रं चास्त्राणि च तथा; वज्रम( वज्रं चा) स्त्राणि चान्यानि (२) दण्डनीतिर्; इन्द्रादीनि; दण्डानीति; दण्ड्यादीनि (३) (अ)वाप्त (for (अ)धीत); कुरुनन्दन ; (for (अ)मितविक्रमः );,
(०४) (१)तु (for च); (२) गति ; दिव्यं (for गीतं); नृत्यं (for नृत्तं ); (४)खं० अयं पादोऽनन्तरश्चन स्तः,०गृह्वाद् (for विन्द );,
(०५) (४)(अ)वरस् (for (अ)नुजस् ); अनुजस्तव सुव्रतः,
(०६) (१)यच्च (यश्च) मां स (for यदर्थं मां); नर (for सुर); (३) तत्वतः;,
(०७) (१)लोकं हि; लोकेपि; एश् लोकेषु (०लोकात्त्व) भगवान्मानुषे लोके,

**आगमिष्यति ते भ्राता कृतास्त्रः क्षिप्रमर्जुनः ।****
**सुरकार्यं महत्कृत्वा यदशक्यं दिवौकसाम् ॥ १८ ॥**[(०१)]

**तपसा तु त्वमात्मानं योजय भ्रातृभिः सह ।****
**तपसो हि परं नास्ति तपसा विन्दते महत् ॥ १९ ॥**[(०२)]

**अहं च कर्णं जानामि यथावद्भरतर्षभ।**
**न स पार्थस्य सङ्ग्रामे कलामर्हति षोडशीम् ॥२०॥**[(०३)]

*  सत्यसन्धं महोत्साहं महावीर्यं महाबलम्
*  महाहवेष्वप्रतिमं महायुद्धविशारदम् ।**
*  महाधनुर्धरं वीरं महास्त्रं वरवर्णिनम्।
*  महेश्वरसुतप्रख्यमादित्यतनयं प्रभुम् ।**
*  तथार्जुनमतिस्कन्दं सहजोल्बणपौरुषम्।

**यच्चापि ते भयं तस्मान्मनसिस्थमरिन्दम ।****
**तच्चाप्यपहरिष्यामि सव्यसाचाविहागते ॥ २१ ॥**[(०४)]

**यच्च ते मानसं वीर तीर्थयात्रामिमां प्रति ।****
**स महर्षिर्लोमशस्ते कथयिष्यत्यसंशयम् ॥ २२ ॥**[(०५)]

**यच्च किञ्चित्तपोयुक्तं फलं तीर्थेषु भारत ।****
**ब्रह्मर्षिरेष ब्रूयात्ते तच्छ्रद्धेयं न चान्यथा ॥ २३ ॥**

---

(०१) (२)कृतार्थः(स्त्रः) (४) दिवालयैः; सुरालयैः; दिवौकसां ,
(०२) (१)तत् (च); (अ)पि (for तु); तप्तम् (for तु त्वम्); तपसा त्वं च तीर्थेन (२) योजय भ्रातृभिः सह ,
(०३) (१) महात्मानं (for महो); कृतास्त्रं (for महास्त्रं); ०वर्मिणं (for ०वर्णिनम्); ह्येनं (for स्कन्धं ); तथार्जुनमति स्कन्ध ( दं); तथा शानं सहसो ( जो )ज्वनकुडलं; सहस्रनयनोपमं (३)च(त्त्री स),
(०४) (१)कर्णान् (for तस्मान्); (२) ;अनिन्दित (for अरिन्दम); मनसि स्थितमच्युत (३) ष्येहं (for ष्यामि); (४)क०ख०घ०सव्यसाचिनि चागते, ०साचिनि (for साचाव्); (अ)तो गते; (उ)पागते (इ)तो गते (for (इ)हागते );,
(०५) (१)दुःखं (for वीर); (३) महर्षिलोंमशस्ते वै (शस्तत्ते); स महर्षिलोमज्ञस्ते,

* स र्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्य ते(०१)

अस्मिन् तीर्थयात्रापर्वणि ७४अध्याये २३ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशसंवादे चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥**

( तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 075

# ७५.पञ्चसप्ततितमोऽध्यायः

लोमशमुखादिन्द्रार्जुनयोः सन्देशं निशाम्य युधिष्ठिरस्य प्रहर्षः । तीर्थयात्रार्थमुद्यम्याधिकसहचारिणां विसर्जनं च ।

**लोमशः**

**धनञ्जयेन चाप्युक्तं यत्तच्छृणु युधिष्ठिर।**
**भ्रतरं मेऽनुजैस्सार्धं धिया योजयेर्धर्म्यया श्रिया ॥ २४ ॥**(०२)

**त्वं हि धर्मान्परान्वेत्थ तपांसि च तपोधन ।****
**श्रीमतां चापि जानासि धर्मं राज्ञां सनातनम् ॥ २५ ॥**(०३)

**स भवान् यत्परमं वेद पावनं पुरुषान् प्रति ।****
**तेन संयोजयेथास्त्वं तीर्थपुण्येन पाण्डवम् ॥ २६ ॥**(०४)

---

(०१) (३)ब्रह्मर्षिर् (for महर्षिर् ); एव (for एष ); लोमशो ब्रूयात् (for एष यद्ब्रूयात्); वै; तद् (for यद्); ब्रूयात्त्वां ( ते) (for यद्ब्रूयात्); (४)तच्छ्रद्देयम्; तज्जज्ञेयम्; तच्छ्रेयोयं; तच्छ्रद्धव्यं (for तच्छ्रद्धयम्); न चान्यथा (for अनन्यथा); तच्छ्रद्धेयमन्यथा ,

(०२) (१) (अ)स्मि (अ)स्ति (for (अ)पि ); (उ)क्तः (for (उ)क्तं); तच्छणुष्व (for यत्तच्छृणु); नराधिप (for युधि); फलं तीर्थेषु भारत (३) भ्रातरं मेनुजैः सार्धं (४) योजयेद् (for येर्); वन्द्यया (for धर्म्यया); गिरा; धिया (for श्रिया); योज येथास्तपश्रिया ,

(०३) (१)धर्म परं वेत्सि (for वेत्थ); (३) चाभि ; च वि (for चापि ); (४)धर्मं राज्ञां ; धर्म राज्यं ,

(०४) (१)परमं (for यत्परं); (२) पुरुषं (for षान् ); (४) पाण्डवान्; पार्थिवं ,

**यथा तीर्थानि गच्छेत गाश्च दद्यात्स पार्थिवः ।****
**तथा सर्वात्मना कार्यमिति मामर्जुनोऽब्रवीत् ॥ २७ ॥[०१]**

**भवता चानुगुप्तोऽसौ चरेत्तीर्थानि सर्वशः ।****
**रक्षोभ्यो रक्षितव्यश्च दुर्गेषु विषमेषु च ॥ २८ ॥**

**दधीच इव देवेन्द्रं यथा चाप्यङ्गिरा रविम् ।****
**तथा रक्षस्व कौन्तेयान्राक्षसेभ्यो द्विजोत्तम ॥ २९ ॥[०२]**

**यातुधाना हि बहवो राक्षसाः पर्वतोपमाः ।**
**त्वया हि गुप्तन् कौन्तेयान् नातिवर्तेयुरन्तिकात् ॥ ३० ॥**

* for substrute 1st Half

* (त्वयाभिगुप्तं कौन्तेयं न विवर्तेयुरन्तिकम्)[०३]

* आगतस्त्वां महाबाहो कुरु पुण्यं युधिष्ठिर ।

**सोऽहमिन्द्रस्य वचनान्नियोगादर्जुनस्य च ।****
**रक्षमाणो भयेभ्यस्त्वां चरिष्यामि त्वया सह ॥ ३१ ॥**

**द्विस्तीर्थानि मया पूर्वं दृष्टानि कुरुनन्दन ।****
**इदं तृतीयं द्रक्ष्यामि तान्येव भवता सह ॥ ३२॥[०४]**

**इयं राजर्षिभिर्याता पुण्यकृद्भिर्युधिष्ठिर।**
**मन्वादिभिर्महाराज तीर्थयात्रा शुभावहा ॥ ३३ ॥[०५]**

---

(०१) (१)तीर्थेन (for तीर्थानि); (२) गत्वा (for गाश्च ); (३) सर्वं त्वया (for सर्वा ); (४) अर्जुनो (विजने) (for विजयो);,
(०२) (३)कौतेयान् (for यं); तथा रक्ष्यश्च कीतेयो,
(०३) (१)च (for हि); (३) (अ)भियुक्तं; (अ)भिगुप्तं हि गुप्तान्; गुप्तान्हि (for (अ)भिगुप्तान् ); कौन्तेयं (४) नाभिवर्तेयुर्; नाभिवर्धेयुर्; न विवर्तेयुर् अन्तिकं ),
(०४) (१)द्विस्तीर्णानि; द्विवारन्था; विस्ती र्णानिः महाबाहो; ; मयाबाहो (२)तीर्थानि (for दृष्टानि); (३) इमं (for इदं); यास्यामि; वक्ष्यामि (for द्रक्ष्यामि);,
(०५) (४)शुभावहा ( युधिष्ठिर) (for भया );,

नानृजुर्नाकृतात्मा च नाविद्यो न च पापकृत् ।**
स्नाति तीर्थेषु कौरव्य न च वक्रमतिर्नरः ॥ ३४ ॥[०१]

त्वं तु धर्ममतिर्नित्यं धर्मज्ञः सत्यसङ्गरः ।**
विमुक्तः सर्वसङ्गेभ्यो भूय एव भविष्यसि ॥ ३५ ॥[०२]

यथा भगीरथो राजा राजानश्च गयादयः ।**
यथा ययातिः कौन्तेय तथा त्वमपि पाण्डव ॥ ३६ ॥[०३]

युधिष्ठिरः

न हर्षात्सम्प्रपश्यामि वाक्यस्यास्योत्तरं क्वचित् ।**
स्मरेद्धि देवराजोऽयं को नामाभ्यधिकस्ततः ॥ ३७ ॥[०४]

भवता सङ्गमो यस्य भ्राता चैव धनञ्जयः ।**
वासवः स्मरते यस्य को नामाभ्यधिकस्ततः ॥ ३८ ॥[०५]

यच्च मां भगवानाह तीर्थानां दर्शनं प्रति ।**
धौम्यस्य वचनादेषा बुद्धिः पूर्वं कृतैव मे ॥ ३९ ॥[०६]

तद्यदा मन्यसे हष्द्वा गमने तीर्थदर्शने ।**
तदैव गन्तास्मि हदम् एष मे निश्चयः परः ॥ ४० ॥[०७]

वैशम्पायनः

गमने कृतबुद्धिं तु पाण्डवं लोमशोऽब्रवीत्।

---

(०१) (१)नानृती (for नानृजुर्); नानृतात्मा च (२) तृतीयं; नाविद्यो ,
(०२) (१)रतिर् (for मतिर्); (३) सर्वसङ्गेभ्यो ,
(०३) (४)पार्थिव (for पाण्डव);,
(०४) (२)मुने (for क्वचित् ); (३) मां; यत् (for यं); (४) को नामाभ्यधिकस्ततः,
(०५) (२)चैव (for यस्य); (४) किं (को) नामाभ्यधिकं ततः,
(०६) (१)तद्; मा (for मां); (२) गमनं (for दर्शनं); (४) तथैव (for कृतैव );,
(०७) (१)यद्; स (for तद्); यथा (for यदा ); द्रष्टुं (दृष्द्वा) (for ब्रह्मन्); तथैव (for तदैव); तीर्था न्येष; परमेष (for दृढं );,

**लोमशः**

**लघुर्भव महाराज लघुः स्वैरं गमिष्यसि ॥ ४१ ॥**[०१]

**युधिष्ठिरः**

**भिक्षाभुजो निवर्तन्तां ब्राह्मणा यतयश्च ये।**

**ये चाप्यनुगताः पौराराजभक्तिपुरस्कृताः ॥ ४२॥**[०२]

* क्षुत्तृडध्वश्रमायासशीतार्तिमसहिष्णवः
* ते सर्वे विनिवर्तन्तां ये च मिष्टभुजो द्विजाः ।
* पक्वान्नलेह्यपानानां मांसानां च विकल्पकाः ।
* तेऽपि सर्वे निवर्तन्तां ये य सूदानुयायिनः ।
* मया यथोचिताजीव्यैः संविभक्ताश्च वृत्तिभिः ।
* ये चाप्यनुगताः पौरा राजभक्तिपुरस्कृताः ।

०वर्तन्तु (for ०वतन्र्ता); ०लेह्यमानानां; ०पानलेह्यानां; ०पानभोज्यानां विकल्पनं बिकत्थनाः सूदाभिरनुयाथिनः; मुदाभिरनुजीविनः सदा (for मया); यथोचितैर बीजैः द्रव्यैः (for जीव्यैः); (३) (अ)न्ये(for (अ)पि); (४) ०पुरःसराः; ये च भक्तिपुरं

**धृतराष्ट्रं महाराजमभिगच्छन्तु चैव ते ।****

**सददाति यथाकालमुचिता यस्य या भृतिः ॥ ४३ ॥**[०३]

**स चेद्यथोचितां वृत्ति न दद्यान्मनुजेश्वरः ।****

**अस्मत्प्रियहितार्थाय पाश्चाल्यो वः प्रदास्यति ॥ ४४ ॥**[०४]

**वैशम्पायनः**

---

(०१) (१)तु (for तं );,

(०२) (२)तापसाश्च ये; ये तपस्विनः (for यतयश्च ये); तथा (for च ये );,

(०३) (२)तेभि (for अभि ); चैव ह; चैव हि; ते च(त्र) वै (for चैव ते); (३)ददाति (for दस्नति);,

(०४) (२)पृथिवीपतिः (for मनुजे); पाश्चालो,

**ततो भूयिष्ठशः पौरा गुरौ भारेसमाहिते ।****
**विप्राश्च यतयो मुख्या जग्मुर्नागपुरं प्रति ॥ ४५ ॥**[०१]

**तान्सर्वान्धर्मराजस्य प्रेम्णा राजाम्बिकासुतः ।****
**प्रतिजग्राह विधिवद्धनैश्च समतर्पयत् ॥ ४६ ॥**

**ततः कुन्तीसुतो राजा लघुभिर्ब्राह्मणैः सह ।****
**लोमशेन च सुप्रीतस्त्रिरात्रं काम्यकेऽवसत् ॥ ४७ ॥**[०२]

अस्मिन् तीर्थयात्रापर्वणि ७४अध्याये ४७श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 075

# ७५.पञ्चसप्ततितमोऽध्यायः

युधिष्ठिरेण लोमशादिभिस्सह तीर्थसेवनाय प्रार्थना । ऋषीनभिवाद्य पाण्डवानां तीर्थयात्रायां प्रस्थानम् ॥

**वैशम्पायनः**

**ततः प्रयान्तं कौन्तेयं ब्राह्मणा वनवासिनः ।****
**अभिगम्य तदा राजन्निदं वचनमब्रुवन् ॥ १ ॥**[०३]

**ब्राह्मणाः**

**राजंस्तीर्थानि गन्तासि पुण्यानि भ्रातृभिः सह ।****

---

(०१) (२)प्रपीडिताः गुरौ(रु) भारे समाहिते (ताः) (३) मुनयो (for यतयो); मुख्याः विप्रा (for युक्ता);,
(०२) (२)भ्रातृभिः (for ब्राह्मणैः); वृतः (for सह);,
(०३) (१)प्रयातं (३) महाराजं (for तदा राजन्);,

**देवर्षिणा सहितो लोमशेन महात्मना ॥ २ ॥**(०१)

**अस्मानपि महाराज नेतुमर्हसि पाण्डव ।****
**अस्माभिर्हि न शक्यानि त्वदृते कुरुनन्दन ॥ ३ ॥**(०२)

**श्वापदैरुपसृष्टानि दुर्गाणि विषमाणि च ।****
**अगम्यानि नरैरल्पैस्तीर्थानि मनुजेश्वर ॥ ४ ॥**(०३)

**भवतो भ्रातरः शूरा धनुर्धरवराः सदा ।****
**भवद्भिः पालिताः शूरैर्गच्छामो वयमप्युत ॥ ५ ॥**(०४)

**भवत्प्रसादाद्धि वयं प्राप्नुयाम फलं शुभम् ।****
**तीर्थानां पृथिवीपाल वनानां च विशाम्पते ॥ ६ ॥**(०५)

**तव वीर्यपरित्राताः शुद्धास्तीर्थपरिप्लुताः ।****
**भवेम धूतपाप्मानस्तीर्थसन्दर्शनान्नृप ॥ ७ ॥**(०६)

**भवानपि नरेन्द्रस्य कार्तवीर्यस्य भारत ।****
**अष्टकस्य च राजर्षेर्लोमपादस्य चैव ह ॥ ८ ॥**(०७)

**भरतस्य च वीरस्य सार्वभौमस्य पाण्डव ।****
**त्वं हि प्राप्स्यसि दुष्प्रापाँल्लोकांस्तीर्थपरिप्लुतः ॥ ९ ॥**(०८)

**प्रभासादीनि तीर्थानि महेन्द्रादींश्च पर्वतान्।**
**गङ्गाद्याः सरितश्चैव प्लक्षादींश्च वनस्पतीन् ॥ १० ॥**

---

(०१) (३)ऋषिणा चैव स,
(०२) (२)इच्छसि(त्ती अर्हसि) (३) हि न (४) कुरुनन्दन (for तानि कौरव);,
(०३) (१)जुष्टानि; मृष्टानि; ०विष्टानि (३) अन्यैम् (for अल्पैस्); (४)भरतर्षभ(त्ती मनुजे),
(०४) (१)भवतो(त्ती न्तो) भ्रातरो भवतः शूरा (२) पराः (for सदा); (४) गच्छाम; गच्छामो (for गच्छेम );,
(०५) (२)प्राप्नुयाम फलं सुखं सुखं ( शुभं) फलं ,
(०६) (२)शुभ; शुभाम् (for शुद्धास्); (४) ०संस्पर्श० (for सन्दर्श ); पावनं तीर्थदर्शनं,
(०७) (२)धीमतः (for भारत); (३) तु (for च); (४) चैव हि; चानघ ,
(०८) (१)दिलीपस्य (for च वीरस्य); (२) भारत; धीमतः; पाण्डव (for पार्थिव); (३)प्राप्स्यति; यास्यसि ,

**त्वया सह महीपाल द्रष्टुमिच्छामहे वयम्।**(०१)
**भवद्भिः पालिताश्शूरैस्तीर्थान्यायतनानि च ॥ ११ ॥**

**यदि ते ब्राह्मणेष्वस्ति काचित्प्रीतिर्जनाधिप ।****
**कुरु क्षिप्रं वचोऽस्माकं ततः श्रेयोऽभिपत्स्यसे ॥ १२ ॥**(०२)

**तीर्थानि हि महाबाहो तपोविघ्नकरैः सदा ।****
**अनुकीर्णानि रक्षोभिस्तेभ्यो नस्त्रातुमर्हसि ॥ १३ ॥**(०३)

**तीर्थान्युक्तानि धौम्येन नारदेन च धीमता ।****
**यान्युवाच च देवर्षिर्लोमशः सुमहातपाः ॥ १४ ॥**(०४)

* नारदस्य च राजेन्द्र देवर्षेः पर्वतस्य च ।

**विधिवत्तानि सर्वाणि पर्यटस्व नराधिप ।****
**धूतपाप्मा सहास्माभिर्लोमशेनाभिपालितः ॥ १५ ॥**(०५)

**वैशम्पायनः**

* ऋषिज्वाश्च कार्त्स्नेन लोडयस्व युधिष्ठिर ।(०६)

**स राजा पूज्यमानस्तैर्हर्षादश्रुपरिप्लुतः**
**भीमसेनादिभिर्वीरैर्भ्रातृभिः परिवारितः ॥ १६ ॥**

**बाढमित्यब्रवीत्सर्वांस्तानृषीन्पाण्डवर्षभः ।**(०७)
**लोमशं समनुज्ञाप्य धौम्यं चैव पुरोहितम् ॥ १७ ॥**

---

(०१) (१)पुण्यानि (for तीर्थानि); महाराज (for मही);,
(०२) (२)प्रीतिरस्ति (for काचित्प्रीतिद्); नरा (for जना); (४) तत्र;वचः (for ततः);,
(०३) (१)तु (for हि); (२) सह (for सदा); (३) अव (for अनु );,
(०४) (१)तानि ह्युक्तानि; तथात्यु; तथाप्सु; तथेत्यु (for तीर्थान्यु) (३)यान्युवाचाथ; यानि वक्ता च यान्या न्युवाच देवर्षि ,
(०५) (२)महीपते (for नरा );,
(०६) (४) (अ) भि (for च );,
(०७) (१)तदा; राजा (for तथा); (३) भरतर्षभ (भः) (for पाण्ड० );,

ततः स पाण्डवश्रेष्ठो भ्रातृभिः सहितो वशी ।**
द्रौपद्या चानवद्याङ्ग्या गमनाय मनो दधे ॥ १८ ॥[०१]

अथ व्यासो महाभागस्तथा पर्वतनारदौ ।**
काम्यके पाण्डवं द्रष्टुं समाजग्मुर्मनीषिणः ॥ १९ ॥[०२]

तेषां युधिष्ठिरो राजा पूजां चक्रे यथाविधि ।**
सत्कृतास्ते महाभागा युधिष्ठिरमथाब्रुवन् ॥ २० ॥

व्यासनारदपर्वताः

युधिष्ठिर यमौ भीम मनसा कुरुतार्जवम् ।**
मनसा कृतशौचा वै शुद्धास्तीर्थानि गच्छत ॥ २१ ॥[०३]

शरीरनियमं प्राहुर्ब्राह्मणा मानुषं व्रतम् ।**
मनोविशुद्धां बुद्धिं च दैवमाहुर्व्रतं द्विजाः ॥ २२ ॥[०४]

मनो ह्यदुष्टं शौचाय पर्याप्तं वै नराधिप ।**
मैत्रीं बुद्धिं समास्थाय शुद्धास्तीर्थानि गच्छत ॥ २३ ॥[०५]

ते यूयं मानसैः शुद्धाः शरीरनियमव्रतैः ।**
दैवं व्रतं समास्थाय यथोक्तं फलमाप्स्यथ ॥ २४ ॥[०६]

ते तथेति प्रतिज्ञाय कृष्णया सह पाण्डवाः ।**
कृतस्वस्त्ययनाः सर्वे मुनिभिर्दिव्यमानुषैः ॥ २५ ॥

लोमशस्योपसङ्गृह्य पादौ द्वैपायनस्य च ।**

---

(०१) (१)प्राप्य (for ज्ञाप्य );,
(०२) (२)पर्वतनारदौ (३) पाण्डवान् प्रष्टुं दृष्ट्वा(त्ती द्रष्टुं) ,
(०३) (२)सेन; सु; मनःसु;मानसं; मनसः (for मनसा); (४)यास्यथ (०त); गच्छथ (for गच्छत );,
(०४) (१)शारीरं नियमं प्राहुद्; त्वाहुर् ज्ञाहुद् (for ज्ञाहुद् ); (२) मानसं (for मानुषं); महत् (for व्रतम्); ब्राह्मणानां च साम्प्रतं; ०णानां महद्व्रतं (३) मनोविशुद्धिं; शुद्ध्या; ०शुद्धं (४) बुधाः (for द्विजाः );,
(०५) (१)शौचाय (र्थं) (for शूराणां); (४) गच्छथ द्रक्ष्यथ (यास्यथ) (for गच्छत );,
(०६) (2)देवं (for दिव्य );(१)मनसः; मनुषैः; मानुषैः (for मानसैः); ये चाप्यनुगताः पौराः,

**नारदस्य च राजेन्द्र देवर्षेः पर्वतस्य च || २६ ||**

**धौम्येन सहिता वीरास्तथा तैर्वनवासिभिः ।****
**मार्गशीर्ष्यामतीतायां पुष्येण प्रययुस्ततः || २७ ||(०१)**

**कठिनानि समादाय चीराजिनजटाधराः ।****
**अभेद्यैः कवचैर्युक्तास्तीर्थान्यन्वचरंस्ततः || २८ ||(०२)**

**इन्द्रसेनादिभिर्भृत्यै रथैः परिचतुर्दशैः ।****
**महानसव्यापृतैश्च तथान्यैः परिचारकैः || २९ ||(०३)**

**सायुधा बद्धनिस्त्रिंशांस्तूणवन्तः समार्गणाः ।****
**प्राङ्मुखाः प्रययुर्वीराः पाण्डवा जनमेजय || ३० ||(०४)**

अस्मिन् तीर्थयात्रापर्वणि ७५ अध्याये ३०३लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां पञ्चसप्ततितमोऽध्यायः || ७५ ||**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 076

# ७६.षट्सप्ततितमोऽध्यायः

**लोमशेन युधिष्ठिरं प्रति सोदाहरणं धर्माधर्मसमृद्ध्यसमृद्धिलक्षणोदर्ककारणत्वा-भिधानं तदाश्वासनं च ।।**

### युधिष्ठिरः

---

(०१) (२)तथा तैर्,

(०२) (१)काञ्चनानि; कार्मुकाणि(त्ती कठि) (३) अभेद्य(त्ती द्यैः) (४) अनुचरन्; ; उपच०; अभ्यच तथा; ततः (for तदा);,

(०३) (२) ख०अयं पादोऽनन्तरश्च न स्तः,

(०४) (२)तूणावन्तः समार्गणैः,

**न वै निगुणमात्मानं मन्ये देवर्षिसत्तम ।****
**तथास्मि दुःखसन्तप्तो यथा नान्यो महीपतिः ॥ १ ॥**

**परांश्च निर्गुणान्मन्ये न च धर्मगतानपि ।****
**ते च लोमश लोकेऽस्मिन्नृध्यन्ते केन हेतुना ॥ २ ॥**(०१)

**लोमशः**

**नात्र दुःखं त्वया राजन्कार्यं पार्थ कथञ्चन ।****
**यदधर्मेण वर्धेयुरधर्मरुचयो नराः ॥ ३ ॥**(०२)

**वर्धत्यधर्मेण नरस्ततो भद्राणि पश्यति ।****
**ततः सपत्नाञ्जयति समूलस्तु विनश्यति ॥ ४ ॥**(०३)

**यत्र धर्मेण वर्धन्ते राजानो राजसत्तम ।**
**सर्वान्सपत्नान्बाधन्ते राज्यं चैषां विवर्धते ॥ ५ ॥**

**मया हि दृष्टा दैतेया दानवाश्च महीपते ।****
**वर्धमाना ह्यधर्मेण क्षयं चोपगताः पुनः ॥ ६ ॥**

**पुरा देवयुगे चैव दृष्टं सर्वं मया विभो ।****
**अरोचयन्सुरा धर्मं धर्मं तत्यजिरेऽसुराः ॥ ७ ॥**(०४)

**तीर्थानि देवा विविशुर्नाविशन्भारतासुराः ।****
**तानधर्मकृतो दर्पः पूर्वमेव समाविशत् ॥ ८ ॥**(०५)

---

(०१) (२)तानधर्म (र्मे) तथाधर्म (for न च धर्म ); गतान्; परान् (for रतान्); (४) तप्यन्ते; स्पृश्यं; नन्दं०; दृश्यं तुर्यं; वधं०; दीर्णे; शयं० (for ऋध्यन्ते);,

(०२) (१) राजन् कार्यं कर्तव्यं तत् (for कार्यं पार्थ); कदा (for कथं); (३) वर्धेयुर्; सिध्येरन् (४) तेधर्मरु०; अधर्मरतयो; मतयो नराः,

(०३) (१)अधर्मेणैव ते तावत्; अधर्मेणधत्त राजन् (४) समूलं च (for तु);,

(०४) (१)चैतत्; सर्वं (for चैव); (२) सर्वं दृष्टं चैवं; चैव (for सर्वं); प्रभो (for विभो); (३) धर्मान् (for धर्मं); (४) अधर्मं भेजिरे; धर्मं तं भेजिरे (for धर्मं तत्यजिरे);,

(०५) (१)देवास्तीर्थानि (२) पार्थिवा (for भारता); (४) सर्वान् (for पूर्वम्);,

**दर्पान्मानः समभवन्मानात्क्रोधो व्यजायत ।****
**क्रोधादह्रीस्ततोऽलज्जा वृत्तं तेषां ततोऽनशत्  ॥ ९ ॥(०१)**

**तानलज्जान्गतह्रीकान्हीनवृत्तान्यथाचरान्।**
**क्षमा लक्ष्मीश्च धर्मश्च न चिरात्प्रजहुस्ततः ।****
**लक्ष्मीस्तु देवानगमदलक्ष्मीरसुरान्नृप  ॥ १० ॥(०२)**

**तानलक्ष्मीसमाविष्टान्दर्पोपहतचेतसः ।**
* दैतेयान्दानवांश्चैव कलिरप्याविशत्ततः ।

**तानलक्ष्मीसमाविष्टान्दानवान्कलिना तदा।**
**दर्पाभिभूतान्कौन्तेय क्रियाहीनानचेतसः  ॥ १२ ॥(०३)**
**तथाभिभूतानचिराद्विनाशः समपद्यत  ॥ १३ ॥(०४)**
**निर्यशस्कास्तथा दैत्याः कृत्स्नशो विलयं गताः ।**
**अधर्मरुचयो राजन्नलक्ष्म्या समधिष्ठिताः  ॥ १४ ॥**

**ततो देवास्सागारंश्च सरितश्च सरांसि च ।****
**अभ्यगच्छन्धर्मशीलाः पुण्यान्यायतनानि च  ॥ १५ ॥(०५)**

**तपोभिः क्रतुभिर्दानैराशीर्वादैश्च पाण्डव ।****

---

(०१) (१)मानः समभवत् (२) ()स्य जायते; (ऽ)भ्यजायतः भ्यजायत;  ह्यजायत; ()भिजायते; ()प्य जायत (३) मोहस्; नश्यत्; अश्रीस्; अभीस् (for अह्रीस्); राज्ञां; राजन् (for लज्जा); क्रोधोद्भवात्तथा तेषां (४)लज्जा वृत्तं; प्रज्ञा वृत्तं; वृत्तमेषां (for वृत्तं तेषां);,

(०२) (१)विलज्जान्; निर्लज्जान् (for अलज्जान्); नष्टवृत्तान्; अनहीकान्; गतश्री०; हतश्री० (for गतह्री०); तान्नष्ठ लज्जान्निवृत्तान् (२)क०ख०ग०वृथाव्रतान् :, वृथाचारान्; पापाचारा वृथादानान् (for हीनवृत्तान्); वृथा मतीः तथामतीन्; गतव्रतान्; तथागतान्; वृथा स्थितान् (for वृथा); (३) समं (for क्षमा); सत्यं (for लक्ष्मीश् ); च दर्पश्च; स्वधर्मश्च च (for तु );,

(०३) (२) ख००अयं पादोऽनन्तरश्च नस्तः, भृशं; हतान् ( सह); तदा (for तथा ); कौन्तेय ०स्तान् ,

(०४) मानाभिभूतान् (२) सम० (for प्रत्य०); (३) निर्यशस्कास् तथा; तदा (for ततो);

(०५) (१)देवांस्तु (for देवा); च (for तु); ततो देवाः सागरांश्च (३) पुण्य० (for धर्मं);,

**प्रजहुः सर्वपापानि श्रेयश्च प्रतिपेदिरे ॥ १६ ॥**(०१)

**एवमादानवन्तश्च निरादानाश्च सर्वशः ।**

**तीर्थान्यगच्छन्विबुधास्तेनापुर्भूतिमुत्तमाम् ॥ १७ ॥**(०२)

**तथा त्वमपि राजेन्द्र स्नात्वा तीर्थेषु सानुजः ।**

**पुनर्लप्स्यसि तां लक्ष्मीमेष पन्थाः सनातनः ॥ १८ ॥**

**यथैव हि नृगो राजा शिबिरौशीनरो यथा ।****

**भगीरथो वसुमना गयः पूरुः पुरूरवाः ॥ १९ ॥**(०३)

**जरमाणाश्च युक्ताश्च स्पर्शनादम्भसश्च ते ।****

**तार्थानांदर्शनात् पूता दर्शनाच्च महात्मनाम् ॥ २० ॥**(०४)

**अलभन्त यशः पुण्यं धनानि च विशाम्पते ।****

**तथा त्वमपि राजेन्द्र लब्ध्वा सु विपुलां श्रियम् ॥ २१ ॥**(०५)

**यथा च इक्ष्वाकुः अभवत्सपुत्रजनबान्धवः ।****

**मुचुकुन्दोऽथ मान्धाता मरुत्तश्च विशखां पति : ॥ २२ ॥**(०६)

**कीर्तिं पुण्यामविन्दन्त यथा देवास्तपोबलात् ।****

**देवर्षयश्च कार्त्स्न्येन तथा त्वमपि लप्स्यसे ॥ २३ ॥**(०७)

**धार्तराष्ट्रास्त्वधर्मेण मोहेन च वशीकृताः ।****

---

(०१) (३)प्राजहुः सर्वदुःखानि (दुष्टानि) ,

(०२) (१) आदान (ते दान) (for हि दानं );(२) निरादाना० (for क्रियावन्त०);धर्मम् (for भूतिम्); उत्तमम् (for उत्तमाम्); (४) धृतिम्;,

(०३) (४)यथा (for गयः); गयः पूरुरवा यथा,

(०४) (१)नित्याः; युक्ताः (for नित्यं );,

(०५) (१)तेलभन्त (for अलभन्त); (४) लब्ध्वा सु (च) लब्ध्वाशु; लप्स्यसे (for लब्धासि; ); यम् लप्स्यसे (for लब्धासि);,

(०६) (१)अभवत्; कुरवः (for अचरत्);,

(०७) (४)लन्त्यसे; वैल्कश्चि (for से );,

**न चिराद्वै विनङ्क्ष्यन्ति दैत्या इव न संशयः ॥ २४ ॥**(०१)

अस्मिन् तीर्थयात्रापर्वणि ७६ अध्याये २४ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां षट्सप्ततितमोऽध्यायः ॥ ७६ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

# 03- 04 - 077

## ७७.सप्तसप्ततितमोऽध्यायः

युधिष्ठिरादिभिः क्रमेण ब्रह्मसरस्वतीतीर्थगमनम् ।।१।। तत्र शमठेन युधिष्ठिरादीन् प्रति राज्ञो गयस्य महायज्ञसन्ततीनां माहात्म्यश्रवणं च गययज्ञवर्णनम् ।।२।।

**वैशम्पायनः**

**ते तथा सहिता वीरा वसन्तस्तत्र तत्र ह ।****
**क्रमेण पृथिवीपाल नैमिषारण्यमागताः ॥ १ ॥**(०२)

**ततस्तीर्थेषु पुण्येषु गोमत्याः पाण्डवा नृप ।****
**कृताभिषेकाः प्रददुर्गाश्च वित्तं च भारत ॥ २ ॥**

**तत्र देवान्पितन्विप्रांस्तर्पयित्वा पुनः पुनः ।****
**कन्यातीर्थेऽश्वतीर्थे च गवां तीर्थे च भारत ॥ ३ ॥**(०३)

**पालकोट्यां वृषप्रस्थे गिरावुष्य च पाण्डवाः ।****

(०१) धार्तराष्ट्रः; च (for तु); (अ)धर्मेण (for दर्पेण) दर्पेण मोहेन वशीकृतः; (३) नचिरद्दि (द्दै) विनङ्क्ष्यन्ति ( नशिष्यन्ति ),

(०२) (१)तदा (for तथा); (२) हि (for ह); (३) पालाः (४) नैमिशा,

(०३) (१)चैव (for विप्रान् ); (३) तीर्थे अश्वतीर्थे; ० तीर्थे च श्वतीर्थे; तीर्थे येच भक्त्या; तीर्थे च तीर्थे च (४) स्नातास्तीर्थे; महातीर्थे (for गवां तीर्थे); च कौरवः च भारत स्नाताः सर्वे तु पाण्डवाः,

**बाहुदायां महीपाल चक्रुः सर्वेऽभिषेचनम्** ॥ ४ ॥(०१)

**प्रयागे देवयजने देवानां पृथिवीपते ।****

**ऊषुराप्लुत्य गात्राणि तपश्चातस्थुरुत्तमम्** ॥ ५ ॥(०२)

**गङ्गायमुनयोश्चैव सङ्गमे सत्यसङ्गराः ।****

**विपाप्मानो महात्मानो विप्रेभ्यः प्रददुर्वसु** ॥ ६ ॥(०३)

**तपस्विजनजुष्टां च ततो वेदीं प्रजापतेः ।****

**जग्मुः पाण्डुसुता राजन्ब्राह्मणैः सह भारत** ॥ ७ ॥(०४)

**तत्र ते न्यवसन्वीरास्तपश्चातस्थुरुत्तमम् ।****

**सन्तर्पयन्तः सततं वन्येन हविषा द्विजान्** ॥ ८ ॥(०५)

**ततो महीधरं जग्मुर्धर्मज्ञेनाभिसंस्कृतम् ।****

**राजर्षिणा पुण्यकृता गयेनानुपमद्युते** ॥ ९ ॥(०६)

**नगो गयशिरो यत्र पुण्या चैव महानदी ।****

**ऋषिजुष्टं सुपुण्यं तत्तीर्थं ब्रह्मसरोत्तमम्** ॥ १० ॥(०७)

* वानीरमालिनी रम्या नदी पुलिनशोभिता।

---

(०१) (१) क०ख०चक्रुस्स,कालकूट्यां; कालकोट्यां; पाल विषप्रस्थे (रवि;विषप्रस्थैः) (२) कौरवाः (for पाण्डवाः);,

(०२) (३)आप्लाव्य; चाप्लाव्य (for आप्लुत्य );,

(०३) (१)चापि (for चैव ),

(०४) (१)०सञ्जुष्टाः; सङ्घुष्टाः; ० सञ्जुष्टां (for जुष्टां च); वा (for च); (२)देशान्; वेदिं (for वेदी ); विशां पते (for प्रजा );,

(०५) (१)राजन् (for वीराः); (२) च,

(०६) (१)(अ) नु (अ)पि(त्ती (अ)भि) संस्कृतं; पालितं; सत्कृताः ( रक्षितं) (for सत्कृतम्); (४) द्युता (for द्युते );,

(०७) (१)नगो (for सरो); नाम (for यत्र ); (२) यत्र पुण्या; पुण्या यत्र (for पुण्या चैव);(३) स्वर्गपुण्यं; सुपुण्यं च; सुपुण्यं तु; सुपूर्णं तत् (४) ब्रह्मसरो नृप०; ०सरो तुलं; ०सरोमलं; ०सरो अलं; ०सरोभवत्; पुण्य (ब्रह्म) सरोतुलं (जलं),

दिव्यं पवित्रकूटं च पवित्रं धरणीधरम्।

**अगस्त्यो भगवान्यत्र गतो वैवस्वतं प्रति ।****
**उवास च स्वयं तत्र धर्मराजः सनातनः ॥ ११ ॥**[०१]

**सर्वासां सरितां चैव समुद्भेदो विशाम्पते।**
**यत्र सन्निहितो नित्यं महादेवः पिनाकधृक् ॥ १२ ॥**[०२]

**तत्र ते पाण्डवा वीराश्चातुर्मास्यैस्तदेजिरे ।****
**ऋषियज्ञेन महता यत्र अक्षयवटो महान् ॥ १३ ॥**[०३]

* अक्षये देवयजने अक्षयं यत्र वै फलम्।
ते तु तत्रोपवासांस्तु चक्रुर्निश्चितमानसाः ।।[०४]

**ब्राह्मणास्तत्र शतशः समाजग्मुस्तपोधनाः ।**
* चातुर्मास्येनायजन्त आर्षेण विधिना तदा।
**वर्तमानेषु वै तस्य चातुर्मास्येषु भारत ॥ १४ ॥**

**तत्र विद्यातपोवृद्धा ब्राह्मणा वेदपारगाः ।****
**कथां प्रचक्रिरे पुण्यां सदसिस्था महात्मनाम् ॥ १५ ॥**[०५]

**तत्र विद्याव्रतस्नातः कौमारं व्रतमास्थितः ।****
**शमठोऽकथयद्राजन्नामूर्तरयसं गयम् ॥ १६ ॥**[०६]

**शमठः**

---

(०१) (१)यत्र भगवान् (३) तत्र (for यत्र ); (४) धर्मराजः; राजधर्मः; राजन्धर्मः राजा धर्मः; राजधमं,
(०२) (१)यत्र (for चैव); (२) समुद्भेदे ()पि दृश्यते (for विशां पते); (४) धृत् (for धृक्);,
(०३) (१)राजन् (for वीराः); (२) तथेजिरे; च भेजिरे (for तदेजिरे); चातुर्मास्येन (४)ईजिरे तत्र (for यत्र); अक्षय्य; अक्षय्यो (for अक्षय ); महावटः(त्त्री वटो महान्),
(०४) (१) तत्र (for यत्र); नियत० (for निश्चित० );,
(०५) (१)यत्र (for तत्र ); वर्णा; वृद्धा; युक्ता (३) कथां० (for कथाः); पुत्रा ; पुण्यं; पुण्यां; सर्वे (for पुण्याः); (४) सर्व एव; सद स्याग्र्या (for सिस्था);,
(०६) (१)तप; ०उप० (for व्रत); (२) कौमार (४) आधूर्तरजसं; आसूर्तरय(ज) सं ,

**अमूर्तरयसः पुत्रो गयो राजर्षिसत्तमः ।**
**पुण्यानि यस्य कर्माणि तानि मे शृणु भारत ॥ १७ ॥**[०१]

**यस्य यज्ञो बभूवेह बह्वन्नो बहुदक्षिणः ।**
**यत्रान्नपर्वता राजञ्शतशोऽथ सहस्रशः ॥ १८ ॥**[०२]

**घृतकुल्याश्च दध्नश्च नद्यो बहुशतास्तथा ।**
**व्यञ्जनानां प्रवाहाश्च महार्हाणां सहस्रशः ॥ १९ ॥**[०३]

**अहन्यहनि चाप्येवं याचतां सम्प्रदीयते ।**
**अन्ये च ब्राह्मणा राजन्भुञ्जतेऽन्नं सुसंस्कृतम् ॥ २० ॥**[०४]

**तत्र वै दक्षिणाकाले ब्रह्मघोषो दिवं गतः ।**
**न च प्रज्ञायते किञ्चिद्ब्रह्मशब्देन भारत ॥ २१ ॥**[०५]

**पुण्येन चरता राजन्भूर्दिशः खं नभस्तथा ।**
**आपूर्णमासीच्छब्देन तदप्यासीन्महाद्भुतम् ॥ २२ ॥**[०६]

**यत्र स्म गाथा गायन्ति मनुष्या भरतर्षभ ।**
**अन्नपानैः शुभैस्तृप्ता देशे देशे सुवर्चसः ॥ २३ ॥**[०७]

**गयस्य यज्ञे के त्वद्य प्राणिनोऽभोक्तुमीप्सवः ।**

---

(०१) (१) आधू (अधू नाधू ; आस्)र्तरजसः पुत्रो (२) ०सत्तम (३)तस्य (for यस्य); (४) पाण्डव (for भारत);,
(०२) (१)तस्य (for यस्य); (२) वसतो भूरिदक्षिणः (४) आसव्शतसह ,
(०३) (३)प्रकाराश्च प्रवाहश्च (४) च सर्वशः (for सह );,
(०४) (१)एवं (for एतद्); (२) च (for सं); (३) ततः स्म; तत्र स्म; अन्यत्र; अन्ये च; अन्ये तत् तत्र स्म; अन्यं तु; अश्चन्तु (for अन्यत्तु);,
(०५) (१)तत्रैव (for तत्र वै); (३) च;सं(त्त्री स्म) (४) अह्यश्वोषेण ,
(०६) (१)पुण्ये नाचरता; ०नोच्चारिता; ०नोच्चरिता (२) नभस्तदा; दिवस्तथा; वियत्तदा; तथा (दा) नृप (४) अस्यासीन्; अस्य च (for अप्यासीन्); तदासीन्महदद्भुतं; तत्तदासीन्महाद्भुतं ,
(०७) (१)ततः;यत्र (for तत्र); (२) गयस्य (for मनुष्या); (३) गुणैस् (for शुभैस्);,

**तत्र भोजनशिष्टस्य पर्वताः पञ्चविंशतिः ॥ २४ ॥**(०१)

लक्षालङ्कारः-प्रणीनोऽभोक्तुमीप्सव इत्यत्र अभोक्तुमीप्सपः के ।

**न तत्पूर्वे जनाश्चक्रुर्न करिष्यन्ति चापरे ।****
**गयो यदकरोद्यज्ञे राजर्षिरमितद्युतिः ॥ २५ ॥**(०२)

**कथं तु देवा हविषा गयेन परितर्पिताः ।****
**पुनः शक्ष्यन्त्युपादातुमन्यैर्दत्तानि कानिचित् ॥ २६ ॥**(०३)

* सिकता वा यथा लोके यथा वा दिवि तारकाः ।
यथा वा वर्षतो धारा असङ्ख्येयाः स्म केनचित्।
* तथा गणयितुं शक्या गययज्ञे न दक्षिणाः ।(०४)

**एवंविधाः सुबहवस्तस्य यज्ञा महीपतेः ।****
**बभूवुरस्य सरसः समीपे कुरुनन्दन ॥ २७ ॥**(०५)

अस्मिन् तीर्थयात्रापर्वणि ७७अध्याये २७श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां गययज्ञकथने सप्तसप्ततदितमोऽध्यायः ॥ ७७ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 078

(०१)(१)न्वद्य त्वन्नं; त्वत्र त्वस्य (for त्त्वद्य ); (२) इच्छवः (for ईप्सवः); (३) तत्र ०शिष्टाश्च; शेषस्य ,
(०२) (१)पुरा स्म; तत्पूर्वे; स्म पृष्ठे (for स्म पूर्वे ); नरां (for जना); (३) यथा (for यद);,
(०३) (१)तु (for नु ) ,
(०४) (२)च वा -वर्षाम्भसो (for वा वर्षतो); च काश्चन (for स्म केनचित्);,
(०५) (१)स्युः(तु; सु) बहुशः (for सुबहवः); एवं बहुविधा वाचः (२) यज्ञा (for यज्ञे); महीपतेः; महीपते (३) तस्य (for अस्य); गाथाश्च (for सरसः);,

# ७८.अष्टसप्ततितमोऽध्यायः

लोमशेन युधिष्ठिरं प्रत्यगस्त्यचरितकथनारम्भः ।।१।। अगस्त्यचरित्रे वातापील्वलयोर्वृत्तान्तकथनम् ।।२।। तथा लोपामुद्रोत्पत्तिप्रकारकथनम् ।।३।। विदर्भराजेन सन्तानार्थं कन्यां कामयमानायागस्त्याय लोपामुद्राया यथाविधि प्रदानम् ।।४।। अगस्त्येन लोपामुद्राया महार्हवसनाभरणत्याजनेन वल्कलादिग्राहणपूर्वकं स्वाश्रमं प्रत्यानयनम् ।।५।। ऋतुकाले समाहूतया तया महार्हवसमाभरणानि याचितेनागस्त्येन तत्सम्पादनाय प्रस्थानम् ।।६।।

**वैशम्पायनः**

**ततः सम्प्रस्थितो राजा कौन्तेयो भूरिदक्षिणः ।****
**अगस्त्याश्रममासाद्य दुर्जयायाम् उवास ह ॥ १ ॥**
**तत्रैव लोमशं राजा पप्रच्छ वदतां वरः ।****
**अगस्त्येनेह वातापिः किमर्थमुपशामितः ॥ २ ॥**(०१)
**आसीद्वा किं प्रभावश्च स दैत्यो मानवान्तकः ।****
**किमर्थं चोदितो मन्युरगस्त्यस्य महात्मनः ॥ ३ ॥**(०२)

**लोमशः**

**इल्वलो नाम दैतेय आसीत्कौरवनन्दन ।****
**मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः ।**
**स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः ॥ ४ ॥**
**पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु ॥ ५ ॥**(०३)
**तस्मै स ब्राह्मणो नादात्पुत्रं वासवसम्मितम् ।****

---

(०१) (१)तत्रैव (for तत्र वै ); (२) द्विपदां; गदतां (for वदतां); वर; रं (for रः);,
(०२) (३)चोद्धतो; चोद्यतो; चोदितो; चोद्यते; चोत्थितो,
(०३) (२)उक्तवान् (for उवाच);,

**चुक्रोध सोऽसुरस्तस्य ब्राह्मणस्य ततो भृशम् ॥ ६ ॥**(०१)

**तदाप्रभृति राजेन्द्र इल्वलो ब्रह्महासुरः ।****

**मन्युमान्भ्रातरं छागं मायावी प्रचकार ह ॥ ७ ॥**(०२)

* मेषरूपी च वातापिः कामरूप्यभवत्क्षणात् ।
संस्कत्य च भोजयति ततो विप्रं जिघांसति ।।(०३)

**समाह्वयति यं वाचा गतं वैवस्वतक्षयम् ।****

**स पुनर्देहमास्थाय जीवन्स्म प्रत्यदृश्यत ॥ ८ ॥**(०४)

लक्षालङ्कारः- समाह्वयति यं वाचा इत्यत्र यं पक्षीकृत्य ब्राह्मणैर्भुक्तं अत एव वैवस्वतक्षयं गतं मृतं अनुजं वातापिम् ।

**ततो वातापिमसुरं छागं कृत्वा सुसंस्कृतम् ।****

**तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत् ॥ ९ ॥**(०५)

**तस्य स्वनेन महता स्वरेणगिरमीरिताम् ।**

* (तामिल्वलेन महता स्वरेण वाचमीरिताम्।)

**श्रुत्वातिमायो बलवान्क्षिप्रं ब्राह्मणकण्टकः ॥ १० ॥**(०६)

**तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः ।****

**वातापिः प्रहसन्राजन्निश्चक्राम विशाम्पते ॥ ११ ॥**(०७)

---

(०१) (१)तस्मिन्त्य; स तस्मै नैच्छत् (for नादात्); (२)पुत्रं दातुं तथाविधं (३) दितिजस् (for सोसुरस्); तस्मै (for तस्य); चुक्रोध वज्री तस्मै तु (४) ब्राह्मणाय (for णस्य );,

(०२) (४)ह्यकरोत्ततः (क),

(०३) (१) इल्वलो ब्रह्महासुरः ह्यकरोत्ततः (for द्रम्प्रचकारह); ०रूपम्(त्ती रूपी); रूपी (for रूपो); भोजयामास; च (तं) भोजय (for भोजयति तं); ब्राह्यणात्स जिघांसया; ततो विप्रं जिघांसति ,

(०४) (१)स चा० (for समा ); तं (for यं); (४) स; सं ; च (for स्म); प्रत्यदृश्यत; परिदृश्यते,

(०५) (३)ब्राह्मणं भोजयित्वासौ (त्वा तं; णो त्वा स) (४) सोसुरः पुनराह्गयत् ,

(०६)(१) असुरेण (for स्वरेण); वाचम्(त्ती गिरम );,

(०७) (१)कुक्षिं (for पार्श्व); स तस्य पार्श्वं निर्भिद्य (४) महामते; महीपते (for विशां पते);,

**एवं स ब्राह्मणान्राजन्भोजयित्वा पुनः पुनः ।****
**हिंसयामास दैतेय इल्वलो दुष्टचेतनः ॥ १२ ॥**

**अगस्त्यश्चापि भगवानेतस्मिन्काल एव तु ।****
**पितन्ददर्श गर्ते वै लम्बमानानधोमुखान् ॥ १३ ॥**(०१)

**सन्तानहेतोरिति ते प्रत्यूचुर्ब्रह्मवादिनः ।****
**सोऽपृच्छल्लम्बमानांस्तान् गच्छन्त इव किङ्कराः ।**(०२)
**किमर्थं वेह लम्बध्वं गर्ते यूयमधोमुखाः ॥ १४ ॥**(०३)

लक्षालङ्कारः- गच्छन्त इव किङ्करा इत्यत्र दृष्ट्वा किं करोमीति विचारयन्तः कृपालवः किङ्कराः ।

**ते तस्मै कथयामासुर्वयं ते पितरः स्वकाः ।****
**गर्तमेतमनुप्राप्ता लम्बामः प्रसवार्थिनः ॥ १५ ॥**

**यदि नो जनयेथास्त्वमगस्त्यापत्यमुत्तमम् ।****
**स्यान्नोऽस्मान्निरयान्मोक्षस्त्वं च पुत्राप्नुया गतिम् ॥ १६ ॥**(०४)

**स तानुवाच तेजस्वी सत्यधर्मपरायणः ।****
**करिष्ये पितरः कामं व्येतु वो मानसो ज्वरः ॥ १७ ॥**

* स चाथ जनयामास भारतापत्यमुत्तमम् ।

* लेभिरे पितरश्चास्य लोकान्राजन्यथेप्सितान् ।

**ततः प्रसवसन्तानं चिन्तयन्भगवानृषिः ।****

---

(०१) (२)एकस्मिन्; आगते; आगतः (for एव तु); (३) कौन्तेय; गर्ते तु० (४)अवाङ्मुखान् (for अधों );,
(०२) (१)लंवतस्तानपृच्छत्स (२) भगवन्तश्च (for भवन्त इह);इति इव (for इह) के परे;के पराः; कस्पिताः कम्पिताः किं पुरा; केचन किं वरः (for किम्पराः), भवन्त इव कम्पिताः -ख
(०३) (४) क०ग०लभध्वे, प्रत्यूचुर् ब्रह्माचारिणः; ब्रह्मचारिणं,
(०४) (४)त्वं पुत्र प्राप्नुया गतिं; लोकांश्चैवाप्नयामहे ,

**आत्मनः प्रसवस्यार्थे नापश्यत्सदृशीं स्त्रियम् ॥ १८ ॥**

लक्षालङ्कारः- स चापि जनयामास इत्यत्रोक्तमेव प्रमेयं विस्तरेणाह- ततः प्रसव-सन्तानमिति । प्रसवस्य सन्ततेः सन्तानं विस्तारम्।

* ऋषिर्हि प्रतपा नाम विधाय वरमुत्तमम् ।

**स तस्य तस्य सत्त्वस्य तत्तदङ्गमनुत्तमम् ।****
**सङ्गृह्य तत्समैरङ्गैर्निर्ममे स्त्रियमुत्तमाम् ॥ १९ ॥**(०१)

**स तां विदर्भराजस्य पुत्रार्थं तप्यतस्तपः ।****
**निर्मितामात्मनोऽर्थाय मुनिः प्रादान्महातपाः ॥ २० ॥**(०२)

**सा तत्र जज्ञे सुभगा विद्युत्सौदामनी यथा ।****
**विभ्राजमाना वपुषा व्यवर्धत शुभानना ॥ २१ ॥**(०३)

**जातमात्रां च तां दृष्ट्वा वैदर्भः पृथिवीपतिः ।****
**प्रहर्षेण द्विजातिभ्यो न्यवेदयत भारत ॥ २२ ॥**(०४)

**अभ्यनन्दन्त तां सर्वे ब्राह्मणा वसुधाधिप ।****
**लोपामुद्रा इति तस्याश्च चक्रिरे नाम ते द्विजाः ॥ २३ ॥**(०५)

**ववृधे सा महाराज बिभ्रती रूपमुत्तमम् ।****
**अप्स्विवोत्पलिनी शीघ्रमग्नेरिव शिखा शुभा ॥ २४ ॥**

**तां यौवनस्थां राजेन्द्र शतं कन्याः स्वलङ्कृताः ।****

---

(०१) (१)ख०सन्वाऽकपि स्वस्य सर्पस्य,(३)संहत्य; सङ्गृह्य त्तद्गस; संहृत्य; संसृत्य; संस्मृत्य तन्मयैर् (for तत्समैर्);,

(०२) (१)राजस्य (२) धीमते; श्रम्य; शाम्य (for ताम्य); पुत्रार्थं तप्यतस् (ते) तपः,

(०३) (२)सौदामनी (४) वरा ( शुभा );,

(०४) (१)तु (for च );,

(०५) (१)तं (for तां); (२) पृथिवीपते (for वसु );,

**दास्यः शतं च कल्याणीमुपातस्थुर्वशानुगाः ॥ २५ ॥**(०१)

**सा स्म दासीशतवृता मध्ये कन्याशतस्य च ।****
**आस्ते तेजस्विनी कन्या रोहिणीव दिवि प्रभा ॥ २६ ॥**(०२)

**यौवनस्थामपि च तां शीलाचारसमन्विताम् ।****
**न वव्रे पुरुषः कश्चिद्भयात्तस्य महात्मनः ॥ २७ ॥**(०३)

**सा तु सत्यवती कन्या रूपेणाप्सरसोऽप्यति ।****
**तोषयामास पितरं शीलेन स्वजनं तथा ॥ २८ ॥**(०४)

**वैदर्भीं तु तथायुक्तां युवतीं प्रेक्ष्य वै पिता ।****
**मनसा चिन्तयामास कस्मै दद्यामिमां सुताम् ॥ २९ ॥**(०५)

**लोमशः**

**यदा त्वमन्यतागस्त्यो गार्हस्थ्ये तां क्षमामिति ।****
**तदाभिगम्य प्रोवाच वैदर्भं पृथिवीपतिम् ॥ ३० ॥**(०६)

**अगस्त्यः**

**राजन्निवेशे बुद्धिर्मे वर्तते पुत्रकारणात् ।****
**वरये त्वां महीपाल लोपामुद्रां प्रयच्छ मे ॥ ३१ ॥**(०७)

---

(०१) (१)तां यौवनमतां राजन्; शुभां तां यौ वनगतां (३) दास्यः (for दासी); च (४) क्ख०ग०घ०उपतस्थुर्,उपातस्थुर्; उपतस्थे वशं गताः; वशानुगं ,

(०२) (४)दिवि प्रभा; दिवप्रभ ,

(०३) (१)शुभां (for च तां); (२) तथा रूप (for शीलाचार० );,

(०४) (१)च (for तु); (२) (अ)प्सरसामति; (अ)प्यप्सरोपमा; (अ)प्सरसो ह्यति; (अ)प्सरसोपमा; (अ)तीव सुन्दरी रोहिणीव दिवि प्रभो (४) प्रति (for तथा );,

(०५) (१)तां यौवनवतीं दृष्ट्वा वैदर्भाधिपतिर्नृप (४) इमां सुतां (शुभां); सुतामिमां (for मिति);,

(०६) (२)क्षमामिव; अनिदितां (for क्षमामिति); योग्य(ग) रूपामि वात्मनः,

(०७) (१)विवाहे; निवेश (for निवेशे ); (२) ()पत्य (for पुत्र); (३)त्वा (for त्वां); महाभाग; महाराज (for मही );,

**एवमुक्तः स मुनिना महीपालो विचेतनः ।****
**प्रत्याख्यानाय चाशक्तः प्रदातुं चैव नैच्छत ॥ ३२ ॥**(०१)

**ततः स भार्यामभ्येत्य प्रोवाच पृथिवीपतिः ।**

**विदर्भराजः**

**महर्षिर्वीर्यवानेष क्रुद्धः शापाग्निना दहेत् ॥ ३३ ॥**(०२)

**लोमशः**

**तं तथा दुःखितं दृष्ट्वा सभार्यं पृथिवीपतिम् ।****
**लोपामुद्राभिगम्येदं काले वचनमब्रवीत् ॥ ३४ ॥**

**लोपामुद्रा**

**मत्कृते न महीपाल पीडामभ्येतुमर्हसि ।****
**प्रयच्छ मामगस्त्याय त्राह्यात्मानं मया पितः ॥ ३५ ॥**(०३)

**लोमशः**

**दुहितुर्वचनाद्राजा सोऽगस्त्याय महात्मने ।****
**लोपामुद्रां ततः प्रादाद्विधिपूर्वं विशाम्पते ॥ ३६ ॥**(०४)

**प्राप्य भार्यामगस्त्यस्तु लोपामुद्रामभाषत ।****

**अगस्त्यः**

**महार्हाण्युत्सृजैतानि वासांस्याभरणानि च ॥ ३७ ॥**

**लोमशः**

**ततः सा दर्शनीयानि महार्हाणि तनूनि च ।****

---

(०१) (१)तु (for स); ऋषिणा (for मुनिना); (४) वापि; चापि; चैव (for अपि );,
(०२) (१)आहूय (for अभ्येत्य); (२) महीं (for पृथिवी);,
(०३) (१)मत्कृते न (४) पाहि; रक्ष (for त्राहि);,
(०४) (१)राजन् (for राजा); (४) प्रीति पूर्वं महात्मने (for विशां पते);,

**समुत्ससर्ज रम्भोरुर्वसनान्यायतेक्षणा ॥ ३८ ॥(०१)**

**ततश्चीराणि जग्राह वल्कलान्यजिनानि च ।****

**समानव्रतचर्या च बभूवायतलोचना ॥ ३९ ॥(०२)**

**गङ्गाद्वारमथागम्य भगवानृषिसत्तमः ।****

**उग्रमातिष्ठत तपः सह पत्न्यानुकूलया ॥ ४० ॥(०३)**

**सा प्रीता बहुमानाच्च पतिं पर्यचरत्तदा ।****

**अगस्त्यश्च परां प्रीतिं भार्यायामचरत्प्रभुः ॥ ४१ ॥(०४)**

**ततो बहुतिथे काले लोपामुद्रां विशाम्पते ।****

**तपसा द्योतितां स्नातां ददर्श भगवानृषिः ॥ ४२ ॥**

**स तस्याः परिचारेण शौचेन च दमेन च ।****

**श्रिया रूपेण च प्रीतो मैथुनायाजुहाव ताम् ॥ ४३ ॥(०५)**

**ततः सा प्राञ्जलिर्भूत्वा लज्जमानेव भाविनी ।****

**तदा सप्रणयं वाक्यं भगवन्तमथाब्रवीत् ॥ ४४ ॥(०६)**

**लोपामुद्राः**

**असंशयं प्रजाहेतोर्भार्यां पतिरविन्दत ।****

**या तु त्वयि मम प्रीतिस्तामृषे कर्तुमर्हसि ॥ ४५ ॥(०७)**

---

(०१) (३)रम्भोरुर् (४) दिव्यान्या (सर्वाण्या)भरणानि च ,

(१/२) ततः सा तानि वासांसि तनूनि च मृदूनि (मृदाभरणानि) च

(०२) (४)चचार (for बभूव); (अ)स्य तदा नृप; वशवर्तिनी(त्ती (आ)यतलो );,

(०३) (१)अथासाद्य; उपागम्य,

(०४) (१)प्रीता (for प्रीत्वा); (४) आचरत्; अचरत्; अम मत्; अहरत् (for अकरोत ); पुनः; तदा (for प्रभुः);,

(०५) (२)शमेन (for शौचेन); (३) प्रीत्या (for प्रीतो) ,

(०६) (२)भाविनी (४) भर्तारमिदमब्रवीत् ,

(०७) (३)तथा (for या तु ) (अ)पि या (for त्वयि);,

**यथा पितुर्गृहे विप्र प्रासादे शयनं मम ।****
**तथाविधे त्वं शयने मामुपैतुमिहार्हसि ॥ ४६ ॥(०१)**

**इच्छामि त्वां स्रग्विणं च भूषणैश्च विभूषितम् ।****
**उपसर्तुं यथाकामं दिव्याभरणभूषिता ॥ ४७ ॥(०२)**

* नैवापवित्रो विप्रर्षे भूषणोऽयं कथश्चन।

**अगस्त्यः**

* नैवापवित्रो विप्रर्षे भूषणोऽयं कथश्चन ।

* अन्यथा नोपतिष्ठेयं चीरकाषायवासिनी।

**न ते धनानि विद्यन्ते लोपामुद्रे तथा मम ।****
**यथाविधानि कल्याणि पितुस्तव सुमध्यमे ॥ ४८ ॥(०३)**

**लोपामुद्रा**

**ईशोऽसि तपसा सर्वं समाहर्तुं तपोधन ।****
**क्षणेन जीवलोके यद्वसु किश्चन विद्यते ॥ ४९ ॥(०४)**

**अगस्त्यः**

**एवमेतद्यथाऽऽत्थ त्वं तपोव्ययकरं तु तत्।**
**यथा तु मे न नश्येत तपस्तन्मां प्रचोदय ॥ ५० ॥(०५)**

---

(०१) (१)पितृगृहे (for पितुर्गृहे),

(०२) (१)त्वा (for त्वां ); (२) (अ)पि(त्ती वि) (३) उपासितुं; उपपन्नं; ०भोक्तुं (for सर्तु); (४) भूषितं भूषितां,

(०३) (१)ते (for वै );,

(०४) (२)ममाहर्तुम्; उपा तपोधन (for द्विजोत्तम); महेश्वर; ममेप्सितं (४)वसु विद्यति (विद्यते वसु) किश्चन; वसु विद्येत किश्चन ,

(०५) (१) ऋषिः (for अगस्त्य उ); /*(१) एव (for एतद्); र्थत्वं तत्त्वं (for त्यत्वम); (२) हि तत्; तु तत्; मम (for तु मे); (३) मे न प्रणश्येत्; न प्रणश्येत्; (for मे न नश्येत); (४) मे(त्ती मां) प्रणश्येत्; तपस्तदुपधारय,

**लोपामुद्रा**

**अल्पावशिष्टः कालोऽयमृतोर्मम तपोधन ।****
**न चान्यथाहमिच्छामि त्वामुपैतुं कथञ्चन ॥ ५१ ॥**(०१)

**न चापि धर्ममिच्छामि विलोप्तुं ते कथञ्चन ।****
**एवं तु मे यथाकामं सम्पादयितुमर्हसि ॥ ५२ ॥**(०२)

**अगस्त्यः**

**यस्त्वेष कामः सुभगे तव बुद्ध्या विनिश्चितः ।****
**हर्तुं गछाम्यहं भद्रे चर काममिह स्थिता ॥ ५३ ॥**(०३)

* कामे कृते चरिष्यामि धर्मं दृष्टं यथास्मृति ।

* यद्ययं चेप्सितः कामः मम धर्मविलोपकः । (०४)

अस्मिन् तीर्थयात्रापर्वणि ७८अध्याये ५३श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामगस्त्योपाख्याने अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 079

# ७९.एकोनशीतितमोऽध्यायः

धनयाचनाय श्रुतर्वादिनृपत्रयमुपगतेनागस्त्येन तद्धनानां समायव्ययतापरिज्ञानेन तैस्सह इल्वलं प्रति गमनम् ॥

---

(०१) (२)ऋतोर् (for ऋतौ); (३) ख०ग०घ० इच्छेयं (for इच्छामि);,
(०२) (२)कथञ्चन (for तपो); (३) एवं (for एतत्);मे त्वं; एतद्; सर्वं (for तु मे); यथाकालं; तत्वं (४) सम्पादयसि तत्कुरु ,
(०३) (१)तथैष (व) (for यद्येष ख०घ );,
(०४) (३)हर्तुं (for हन्त) (४) धर्मम् (for कामम्);,

**लोमशः**

**ततो जगाम कौरव्य सोऽगस्त्यो भिक्षितुं वसु ।****
**श्रुतर्वाणं महीपालं यं वेदाभ्यधिकं नृपैः ॥ १ ॥**(०१)

**स विदित्वा तु नृपतिः कुम्भयोनिमुपागतम् ।****
**विषयान्ते सहामात्यः प्रत्यगृह्णात्सुसत्कृतम् ॥ २ ॥**(०२)

**तस्मै चार्घ्यं यथान्यायमानीय पृथिवीपतिः ।****
**प्राञ्जलिः प्रयतो भूत्वा पप्रच्छागमनेऽर्थिताम् ॥ ३ ॥**(०३)

* किमर्थमागमो ब्रह्मन्धश्चऽस्मागमनेन ते ।

**अगस्त्यः**

**वित्तार्थिनमनुप्राप्तं विद्धि मां पृथिवीपते ।****
**यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ मे ॥ ४ ॥**(०४)

**लोमशः**

**तत आयव्ययौ पूर्णौ तस्मै राजा न्यवेदयत् ।****
**अतो विद्धन्नुपादत्स्व यदत्र वसु मन्यसे ॥ ५ ॥**(०५)

**तत आयव्ययौ दृष्ट्वा समौ सममतिर्द्विजः ।****
**सर्वथा प्राणिनां पीडामुपादानादमन्यत ॥ ६ ॥**(०६)

---

(०१) (१)तत्रैव (for कौरव्य ); (२) धनम् (for वसु); (३) राजानं श्रुतवर्माणं ,

(०२) (१)विदित्वा च; ०त्वाथः त्वैव स तं विदित्वा नृपतिः (२) निमुपस्थितं स च तं विषयस्यान्ते पूजयित्वा यथाविधि,

(०३) (१)तस्वादर्धम तस्य चार्व्य; तस्मा अर्घ(२) उपहृत्य ( पात्य; गृह्य; उपानीय) महीपतिः (३) प्रणतो (for य); (४) आगमनक्रियां; आगमने द्विजं ,

(०४) (१)इह ( अहं) (for अनु ); (३) शक्त्या; ०वद० (for ०शक्त्य० );,

(०५) (२)राजा तस्मै (३) ततो (for अतो); ततो ज्ञात्वा समादत्स्व (४)ख०यतन्यत्राधि, बहु (for वसु); यदन्यत्राधिकं वसु; यदत्र व्यतिरिच्यते; यदत्राभ्यधिकं वसु ,

(०६) (२) ख० इदमर्धनास्ति, तत्तत् (for समौ );,

**स श्रुतर्वाणमादाय ब्रध्नश्वमगमत्ततः ।****
**स च तौ विषयस्यान्ते प्रत्यगृह्णाद्यथाविधि ॥ ७ ॥(०१)**

**तयोरर्घ्यं च पाद्यं च ब्रध्नश्वः प्रत्यवेदयत् ।****
**अनुज्ञाप्य च पप्रच्छ प्रयोजनमुपक्रमे ॥ ८ ॥(०२)**

**लोमशः**

**तत आयव्ययौ पूर्णौ ताभ्यां राजा न्यवेदयत् ।****
**अतो ज्ञात्वा तु गृह्णीतं यदत्र व्यतिरिच्यते ॥ १० ॥(०३)**

**तत आयव्ययौ दृष्ट्वा समौ सममतिर्द्विजः ।****
**सर्वथा प्राणिनां पीडामुपादानादमन्यत ॥ ११ ॥(०४)**

**पौरुकुत्सं ततो जग्मुस्त्रसदस्युं महाधनम् ।****
**अगस्त्यश्च श्रुतर्वा च ब्रध्नश्वश्च महीपतिः ॥ १२ ॥(०५)**

**त्रसदस्युस्तु तान्दृष्ट्वा प्रत्यगृह्णाद्यथाविधि ।****
**अभिगम्य महाराज विषयान्ते महामनाः ॥ १३ ॥(०६)**

---

(०१) (१)श्रुतर्वाणमयादाय (२) त्रघ्नश्वम्; वाध्यश्वम्; वाध्रीयम् ,
(०२) (१)तयोरर्ध; ततस्त्वर्व्य; ततश्चार्थं; ततः सोर्घ्य राज्यं (for पाद्यं); (२)ब्रध्नश्व बाध्यश्व वाध्रीय ० वद कामं मुनिश्रेष्ठ धन्योब्दभ्यागमनेन ते ।
अगस्त्यः
वित्तकामाविह प्राप्तौ विद्ध्यावां पृथिवीपते ।**
यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ नौ।। ९ ।।
/*(३)यथत्वास्त्वां (४) मे (for नौ );,
(०३) (२) क०ख०ग० राजा ताभ्यां तयो राजा अतो (for ततो ); तु गृह्यति; तु (नु) गृह्णीतं समादाय (for दत्तां ); ह्यतिरिच्यते (अ)प्यतिरि यदत्र व्यतिरिक्तं वै तेन कार्यं प्रवर्त ( र्त्य ) तां (ह्यतिरिक्तं ) ,
(०४) (२)तदा (for द्विजः); (४) अपश्यताम्; अमन्यताम्; विर्चित्य च (for अमन्यत);,
(०५) (१)पौरकुत्सं; पौरकुत्स्यं; पौरुकुत्सिं; पुरुकुत्सं;पौरुकुत्सं पौरुकुत्सं (३) (अ)थ (for च); श्रुतर्वाणो (for र्वौ च); (४) ब्रध्नश्व वाध्रयश्व वाध्रीयस (for च),
(०६) (१)तु; स (for च); दृष्ट्वा (for सर्वान्); (२) पर्य(र्त्ती प्रत्य ); (४) महामनाः;स चादृतः; स तान्नपः

**अर्चयित्वा यथान्यायमिक्ष्वाकू राजसत्तमः ।****
**समास्तांश्च ततोऽपृच्छत्प्रयोजनमुपक्रमे ॥ १४ ॥(०१)**

**अगस्त्यः**

**वित्तकामानिह प्राप्तान्विद्धि नः पृथिवीपते ।****
**यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ नः ॥ १५ ॥(०२)**

**लोमशः**

**तत आयव्ययौ पूर्णौ तेषां राजा न्यवेदयत् ।****
**एतज्ज्ञात्वा ह्युपादध्वं यदत्र व्यतिरिच्यते ॥ १६ ॥(०३)**

**ततायव्ययौ दृष्ट्वा समौ सममतिर्द्विजः ।****
**सर्वथा प्राणिनां पीडामुपादानादमन्यत ॥ १७ ॥(०४)**

**ततः सर्वे समेत्याथ ते नृपास्तं महामुनिम् ।****
**इदमूचुर्महाराज समवेक्ष्य परस्परम् ॥ १८ ॥(०५)**

**राजानः**

**अयं वै दानवो ब्रह्मन्निल्वलो वसुमान्भुवि ।****

---

(for सवा );,
(०१) (२)ऐक्ष्वाको (for इक्ष्वाकू); (३) समस्तांश्च; समासीनान्; समाश्वस्तौ
(त्ती श्वस्तान्);,
(०२) (३)यथाशक्त्या,
(०३) (२)राजा तेषां; तेभ्यो (ताभ्यां) राजा (३) एतज्; ततो (for अतो); ह्युपा((अ)प्युपा); दध्वं (०दत्स्व; दत्त) (for समादद्दं ); (४) यदन्यद् अति; ह्यति (for व्यति );,
(०४) (२)तदा (for द्विजः); तस्यापि स मुनिस्तदा ( स तस्य मुनिसत्तमः) (४)पश्य (for मन्य );,
(०५) (१)समेत्याशु; समेतास्ते (२) तपोधनं (नाः) (for महा ); नृपास्ते, सत्तम,

**तमतिक्रम्य सर्वेऽद्य वयं चार्थामहे वसु ॥ १९ ॥**(०१)

**लोमशः**

**तेषां तदासीदुचितमिल्वलस्यैव भिक्षणम् ।****
**ततस्ते सहिता राजन्निल्वलं समुपाद्रवन् ॥ २० ॥**(०२)

अस्मिन् तीर्थयात्रापर्वणि ७९अध्याये २०श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥**

तीर्थयात्रापर्वणि ......ऽध्यायः

## 03- 04 - 080

# ८०.अशीतितमोऽध्यायः

८०. इल्वलेनागस्त्याय मेपीकृतवातापिमासपरिवेषणम् ।।१।। इल्वलेन वातापेराह्त्राने अगस्त्येन स्वेन तस्य जीर्णोकीणोक्तिः ।।२।। भीतेनेल्वलेनागस्त्याय धनदानपूर्वकं तज्जिघांसया तदनुगमनम् ।।३।। अगस्त्येन हुङ्करेणेल्वलस्य भस्मीकरणपूर्वकं लोपामुद्रायै बहुधनदानेन तस्यां गुणवदेकापत्योत्पादनम् ।।४।।

धनार्थमगस्त्यस्येल्वलसमीपे गमनम् वातापील्वलयोर्वधः लोपामुद्रायाः पुत्रप्राप्तिः भृगुतीर्थनिमज्जनेन दाशरथिहृततेजसः परशुरामस्य पुनस्तत्प्राप्तिः

**लोमशः**

**इल्वलस्तान्विदित्वा तु महर्षिसहितान्नृपान् ।****
**उपस्थितान्सहामात्यो विषयान्ते ह्यपूजयत् ॥ १ ॥**(०३)

---

(०१) (१)हि (for वै); (२) धन वान् (for वसुमान्); धनवा( बलवा ; वसुमा)न्निल्वलो भुवि) (३) उप; अति; अप (for अभि); संवेद्य (for सर्वेद्य); (४) चार्था (for याचा);,
(०२) (१) रुदितम्; उचितम् (for रुचितम्); (२) (ए)व (उ)त; (इ)तिः (अ)थ च (for (उ)प );,
(०३) (१)विदित्वा च; ०त्वाथ;त्वैव (३) उपतस्थे; ०तस्थौ; आगतांस्तान् (for उपस्थितान्); (४) ह्यपूजयत्;

**तेषां ततोऽसुरश्रेष्ठस्त्वातिथ्यमकरोत्तदा ।****
**सुसंस्कृतेन कौरव्य भ्रात्रा वातापिना यदा ॥ २ ॥**[०१]

**ततो राजर्षयः सर्वे विषण्णा गतचेतसः ।****
**वातापिं संस्कृतं दृष्ट्वा मेषभूतं महासुरम् ॥ ३ ॥**

* अथाब्रवीदगस्त्यस्तान्राजर्षीनृषिसत्तमः ।

**अगस्त्यः**

**विषादो वो न कर्तव्यो ह्यहं भोक्ष्ये महासुरम् ॥ ४ ॥**[०२]

**लोमशः**

**धुर्यासनमथासाद्य निषसाद महानृषिः ।****
**तं पर्यवेषद्दैत्येन्द्र इल्वलः प्रहसन्निव ॥ ५ ॥**[०३]

**अगस्त्य एव कृत्स्नं तु वातापिं बुभुजे ततः ।****
**भुक्तवत्यसुरोऽऽह्वानमकरोत्तस्य चेल्वलः ॥ ६ ॥**[०४]

० बह्वन्नाशापि ते मेऽस्तीत्यवदद्भक्षयन्त्ययन्।[०५]

**इल्वलः**

**वातापे प्रतिबुध्यस्व दर्शयन्बलतेजसी ।****
**तपसा दुर्जयो यावदेष त्वां नातिवर्तते ॥ ७ ॥**

**लोमशः**

---

अभिपूजः,
(०१) (१) तु (४) तदा; नृप (for किल);,
(०२) (२)मुनिसत्तमः; द्विज; नृपसत्तम; शजसंसदि; राजसत्तमः (३) न भवद्भिर् (भवद्भिर्न) भयं कार्यं; मा विवादो नृपा वो हि (४) त्वहं; ह्यहं; स्वयं (for अहं); सुरद्विषं (for महा );,
(०३) (१)अतिक्रम्य; अथाक्रम्य (for अथासाद्य); धुर्यासनमाक्रम्य ( ०मासाद्य) (२)महानृषिः (३) संन्यवेशद्; प्रत्यवेश्य पर्यवेशद् ,
(०४) (१)तं कृत्स्नं; कृत्स्नं तं; तत्कृत्स्नं (for कृत्स्नं तु) ;,
(०५) ( मेस्तीति अवदद् (for ते मे स्तीत्यवदद्) ) (४) चेल्वलः (for इ ०);,

**ततस्तस्योदरं भेत्तु वातापिर्वेगमाहरत्।**

**तमबुध्यत तेजस्वी कुम्भयोनिर्महातपाः ।****

**स वीर्यात्तपसोग्रस्तु ननर्द भगवानृषिः ॥ ८ ॥**

**अगस्त्यः**

**एष जीर्णोऽसि वातापे मया लोकस्य शान्तये ॥ ९ ॥**

**लोमशः**

**इत्युक्त्वा स्वकराग्रेण उदरं समताडयत्।**

**त्रिरेवं प्रतिसंरब्धस्तेजसा प्रज्वलन्निव ॥ १० ॥**

**ततो वायुः प्रादुरभूदधस्तस्य महात्मनः ।****

**इल्वलस्तु विषण्णोऽभूद्दृष्ट्वा जीर्णं महासुरम्।**(०१)

* शब्देन महता तात गर्जन्निव यथा घनः

लक्षालङ्कारः- ततो वायुः प्रादुरभूत् इत्यत्र वायुः अन्ने जीर्णे सति जायमानः फूत्कारवायुः ।

* वातापे निष्क्रमस्वेति पुनः पुनरुवाच ह ।

* तं प्रहस्याब्रवीद्राजन्नगस्त्यो मुनिसत्तमः ।

* कुतो निष्क्रमितुं शक्तो मया जीर्णस्तु सोऽसुरः ।(०२)

**प्राञ्जलिश्च सहामात्यैरिदं वचनमब्रवीत् ॥ ११ ॥**

**इल्वलः**

**किमर्थमुपयाताः स्थ ब्रूत किं करवाणि वः ॥ १२ ॥**(०३)

**लोमशः**

---

(०१) (१) आसीद् (for अभूद्) ; (२) अधस्तस्य (for अगस्त्यस्य);,

(०२) ( राजन् (for तात); महा (for यथा); शक्तिर् (for शक्मे); ततोसुरः (for तु सोष्टरः) ) (३) तु (for च);,

(०३) (१)स प्राञ्जलिः (for प्राञ्जत्स्निश्च ); स सामात्वैर्; सहामात्य (३) स्म(त्ती स्थ);,

**प्रत्युवाच ततोऽगस्त्यः प्रहसन्निल्वलं तदा ।****
**ईशं ह्यसुर विद्मस्त्वां वयं सर्वे धनेश्वरम् ॥ १३ ॥**
**तमगस्त्यो हसन्वाक्यमिल्वलं प्रत्यभाषत ॥ १२ ॥** (०१)

**एते च नातिधनिनो धनार्थश्च महान्मम ।****
**यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ नः ।**(०२)

**लोमशः**

**ततोऽभिवाद्य तमृषिमिल्वलो वाक्यमब्रवीत् ॥ १४ ॥**

**इल्वलः**

**दित्सितं यदि वेत्सि त्वं ततो दास्यामि ते वसु ॥ १५ ॥**(०३)

**अगस्त्यः**

**गवां दशसहस्राणि राज्ञामेकैकशो वसु।**
**तावदेव सुवर्णस्य दित्सितं ते महासुर ॥ १६ ॥**(०४)

**मह्यं ततो वै द्विगुणं रथश्चैव हिरण्मयः ।**
**मनोजवौ वाजिनौ च दित्सितं ते महासुर ॥ १७ ॥**(०५)

**लोमशः**

**इल्वलस्तु मुनिं प्राह सर्वमस्ति यथाऽऽत्थ माम् ।****
**रथं तु यमवोचो मां नैनं विद्मो हिरण्मयम् ॥ १८ ॥**(०६)

---

(०१) (३)ईशोस्यसुर विन्न त्वा (४) धनार्थिनः (for धने );,
(०२) (१)एते (for इमे); (३) यथाशक्त्या,
(०३) (१)भिमान्यः ()नुमान्यः ()भिगम्य ()वमत्य; ()पगत्य (for ()भि वाद्य); (३) ईप्सितं (for दित्सितं); यदिह ब्रूहि (for यदि वेत्सि त्वं); नो वेत्सि; वेद्मि (for वेत्सि त्वं); दित्सां मुने ममावेत्सि (४) तत्ते; तद्धि (for ततो); दातास्मि (for दास्यामि); (अ)हं (for ते),
(०४) (१)शत (for दश); (२) वसु; नृप (for सुर),
(०५) (२)रथं ०मयं चाथ (for चैव); (३) महां (for मनो); द्वौ (for च);,
(०६) रथस्यु स ह याचामो नैव (for नैनं)

**अगस्त्यः**

**न मे वागनृता काचिदुक्तपूर्वा महासुर।**
**जिज्ञास्यतां रथः सद्यो व्यक्त एष हिरण्मयः ॥ १९ ॥**

* तत्र यदात्थ सर्वमेतअदास्यामि हिरण्यं गाश्च यद्धनम् ।(०१)

**विरावश्च सुरावश्च तस्मिन्युक्तौ रथे हयौ।**
**ऊहतुः सवसूनाशु तावगस्त्याश्रमं प्रति।**
**सर्वान्राज्ञः सहागस्त्यान्निमेषादिव भारत ॥ २१ ॥**(०२)

**(४९३) (इल्वलस्त्वनुगम्यैनमगस्त्यं हन्तुमैच्छत ।****
**भस्म चक्रे महातेजा हुङ्कारेण महासुरम् ॥ २२ ॥**

* मुनेराश्रममश्वौ तौ निन्यतुर्वातरंहसौ।

**अगस्त्येनाभ्यनुज्ञाता जग्मू राजर्षयस्तदा ।****
**कृतवांश्च मुनिः सर्वं लोपामुद्राचिकीर्षितम् ॥ २३ ॥**

**लोपामुद्रा**

**कृतवानसि तत्सर्वं भगवन्मम काङ्क्षितम् ।****

---

(०१) (१)असत्यं व्याहृतं ब्रह्मन्रथो नैष हिरण्मयः) (३)विज्ञास्यतां; विज्ञायतां (४)साधु (धुट्) (for सद्यो); व्यक्त (for व्यक्तम्); एव ( अस्ति) (for एष),/*
लोमशः
जिज्ञास्यमानः स रथः कौन्तेयासीद्धिरण्मयः ।**
ततः प्रव्यथितो दैत्यो ददावभ्यधिकं वसु।। २० ।।
/*(१)विज्ञाय (for ०जिज्ञास्य); स (for प्र );,
(०२) (१)विराज(०जा)श्च सुराजा (०जा)श्च; वि(न)वाजाश्च सुवाजाश्च; विरावश्च सुरावश्च; विचित्रौ च सुवर्णेन; विवालिश्च सुवाजिश्च; व (वि)वाजी च सुवाजी च; ववाजिश्च सुवाजिश्च (३) सुबहून्या (ना)शु चैव तानर्थान्; सव सूना (न्या) शु स्म वसूनाशु;स्म बहूनाशु; च वसून्याशु (for तौ वसून्याशु); (४) तान; ताव; तदा० (for तान्य); सहामात्यान्; सहा० गस्त्यो इति (एव) (for इव);,

**उत्पादय सकृन्मह्यमपत्यं वीर्यवत्तरम् ॥ २४ ॥**[०१]

* तस्मात्सकृन्मय्यपत्यं त्वमुत्पादय वीर्यवत्

**अगस्त्यः**

**तुष्टोऽहमस्मि कल्याणि तव वृत्तेन शोभने ।****
**विचारणामपत्ये तु तव वक्ष्यामि तां शृणु ॥ २५ ॥**[०२]

**सहस्रं तेऽस्तु पुत्राणां शतं वा दशसम्मितम् ।****
**दश वा शततुल्याः स्युरेको वापि सहस्रजित् ॥ २६ ॥**[०३]

**लोपामुद्रा**

**सहस्रसम्मितः पुत्र एकोऽप्यस्तु तपोधन ।****
**एको हि बहुभिः श्रेयान्विद्वान्साधुरसाधुभिः ॥ २७ ॥**[०४]

लक्षालङ्कारः- विद्वान् साधु इत्यत्र तृतीया पञ्चम्यर्थे । असाधुभ्यः बहुभ्यः विद्वान् एकोऽपि श्रेयान् ।

**लोमशः**

**स तथेति प्रतिज्ञाय तया समभवन्मुनिः ।****
**समये समशीलिन्या श्रद्धावाञ्छ्रद्दधानया ॥ २८ ॥**[०५]

**तत आधाय गर्भं तमगमद्वनमेव सः ।****
**तस्मिन्वनगते गर्भो ववृधे सप्त शारदान् ॥ २९ ॥**

---

(०१) तत्पादय (for उत्पा०); (अ)सकृन् (for सकृन्); ०त्तमं; ०त्तमः ०(त्ती त्तरम्), ,

(०२) (३)अपत्येत्र; त्येषु (for त्ये तु); (४) तव (श्रृणु) वक्ष्यामि यामहं ( तत्वतः;यत्त्वहं); वक्ष्यामि श्रूयतां (श्रृणु तन्; श्रृणुतां) मम ,

(०३) (२)तत्समं तव (समं तपः) (३) तु; च; ते; वै (for स्युर्); (४) वाथ; वास्तु (for वापि); वान्; जित् ०भाक् (for वत्);,

(०४) (२)प्यस्तुः वास्तु (for भेस्तु) (३) ()पि (for हि );,

(०५) (२)समगमन्,

**सप्तमेऽब्दे गते चापि प्राच्यवत्स महाकविः ।**

**ज्वलन्निव प्रभावेण दृढस्युर्नाम भारत ॥ ३० ॥**

**साङ्गोपनिषदान्वेदाञ्जपन्निव महातपाः ।**(०१)

**तस्य पुत्रोऽभवदृषेः स तेजस्वी महाद्विजः ॥ ३१ ॥**

**स बाल एव तेजस्वी पितुस्तस्य निवेशने ।****

**इध्मानां भारमाजह्रे इध्मवाहस्ततोऽभवत् ॥ ३२ ॥**(०२)

**तथायुक्तं तु तं दृष्ट्वा मुमुदे स मुनिस्तदा ।****

**एवं सजनयामास भारतापत्यमुत्तमम् ॥ ३३ ॥**

**लेभिरे पितरश्चास्य लोकान्राजन्यथेप्सितान् ॥ ३४ ॥**(०३)

* एवं स जनयामास भारतापत्यमुत्तमम्।। (०४)

**अगगस्त्यस्याश्रमश्चायम् अत ऊर्ध्वं विशाम्पते ।**

**ख्यातो भुवि महाराज ताजसा तस्य धीमतः ॥ ३५॥**(०५)

* तत ऊर्ध्वमयं ख्यातस्त्वगस्त्यस्याश्रमो भुवि।

**प्राह्लादिरेवं वातापिरगस्त्येनोपशामितः ।**(०६)

**एवं विनिहतो राजन्नगस्त्येन महात्मना ॥ ३६ ॥**(०७)

---

(०१) (१)वापि (for चापि); (२) प्रादुर्भूत्; प्रज्ञावान् (for प्राच्यवत्); (३) प्रभावेण (४)दृढच्युर् (for स्युर्); ०निषदो (for निषदान्); जपन्निव महातपाः; ०मना; त्मना ,

(०२) (१)राजन् (for ऋषेः); ऋषेस्तस्याभवत्पुत्रः (२) महाद्विज तेजस्वी भगवानृषिः,

(०३) (१) तु (for च);,

(०४) (१) ( स चाथ; एवं सं (for एवं स ); ),

(०५) (१) ख०अयं पादोऽनन्तरश्च न स्तः,

(०६) (१) चायं (for ख्यातः); तत ऊर्ध्वमयं ख्यातः (२) त्वगस्त्वस्या श्रमो भुवि; अत ऊध्वं विशाम्पते; ततऊर्ध्वमयं भुवि ,

(०७) (३)प्राह्लादिः; शं प्रहादिः; ष्टम् प्रह्लादिः छ चापि (एवं)० ब्रह्मघ्नो दुष्टचेतनः । एवं विनाशिष्ठो राजन् (४) (उ)पशामिक्त; महत्त्यना (for विना० );,

**तस्यायमाश्रमो राजन्नमणीयैर्गुणैर्युतः ।****
**एषा भागीरथी पुण्या देवगन्धर्वसेविता ॥ ३७ ॥**(०१)
* वातेरिता पताकेव विराजति नभस्तले

अस्मिन् तीर्थयात्रापर्वणि ८०अध्याये ३७ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि अशीततमोऽध्यायः ॥ ८० ॥**

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 081

# एकाशीतितमोऽध्यायः

वृत्रासुरनिपीडितशक्रादिभिर्ब्रह्मवचनाद्वज्रायुधनिर्माणाय दधीचं प्रति तच्छरीरास्थि-प्रार्थनम् ॥१॥ त्वष्ट्रा दधीचास्थिभिर्वज्रायुधनिर्माणम् ॥२॥ इन्द्रेण वृत्रहननम् ॥३॥ ततो देवगणाभिपीडनात् समुद्रं प्रविष्टैर्दैत्यैर्जगद्विनाशनाध्यवसायः ॥ ४ ॥ समुद्रान्तर्हितैर्दैत्यै रात्रौरात्रौ बहिर्निर्गत्याश्रमेषु ऋषिगणेषु निहनेषु देवगणै-र्नारायणस्य शरणीकरणम् ॥५॥ विष्णुना समुद्रान्तर्हितदैत्यनिधने समुद्र-शोषणस्योपायत्वं ज्ञापि तैर्देवैर्ब्रह्मलोकगमनम् ॥६॥ ब्रह्मचोदनया देवैरगस्त्यमेत्य सागराशोषणप्रार्थनम् ॥ ७ ॥

**युधिष्ठिरः**

**भूय एवाहमिच्छामि महर्षेस्तस्य धीमतः ।****
**कर्मणां विस्तरं श्रोतुमगस्त्यस्य द्विजोत्तम ॥ १ ॥**

**इतः परं ३० श्लोकाः पूर्वाध्यायसङ्गतत्वेन कृष्णाचार्यपाठे लिखिताः**

---

(०१) (२)रत्म्यीय; रमणीयैः गुणत्त्यितः; गुणैर्वृतः; गुणोच्युतः (३) गङ्गा (for पुण्या); (४)क०मवगाहत; ख०मवन्गम्यताम् ;, ग०-मवगाहताम्, रमणीयैर्गुणान्विता (०र्गुणैर्वृता) देव गन्धर्वसेविता ,

* प्रतार्यमाणा कूटेषु यथा निम्नेषु नित्यशः ।
शिलातलेषु सन्त्रस्ता पन्नगेन्द्रवधूरिव ।।
* दक्षिणां वै दिशं सर्वां प्लावयन्ती च मातृवत्।
पूर्वं शम्भोर्जटा भ्रष्टा समुद्रमहिषी प्रिया।
* अस्यां नद्यां सुपुण्यायां यथेष्टमवगाह्यताम्।
युधिष्ठिर निबोधेदं त्रिषु लोकेषु विश्रुतम्।
* भृगोस्तीर्थं महाराज महर्षिगणसेवितम्।
यत्रोपस्पृष्टवान्रामो हृतं तेजस्तदाऽऽप्तवान्।
* अत्र त्वं भ्रातृभिः सार्धं कृष्णया चैव पाण्डव ।।
दुर्योधनहृतं तेजः पुनरादातुमर्हसि।
कृतवैरेण रामेण यथा चोपहृतं पुनः ।।
वैशम्पायनः
* स तत्र भ्रातृभिश्चैव कृष्णया चैव पाण्डवः ।
स्नात्वा देवान्पितंश्चैव तर्पयामास भारत।।
* तस्य तीर्थस्य रूपं वै दीप्तादीप्ततरं बभौ।
अप्रधृष्यतरश्चासीच्छात्रवाणां नरर्षभ।।
* अपृच्छच्चैव राजेन्द्र लोमशं पाण्डुनन्दनः ।
भगवन्किमर्थं रामस्य हृतमासीद्वपुः प्रभो।
* कथं प्रत्याहृतं चैव एतदाचक्ष्व पृच्छतः ।।
लोमशः
* शृणु रामस्य राजेन्द्र भार्गवस्य च धीमतः ।
जातो दशरथस्यासीत्पुत्रो रामो महात्मनः ।

* विष्णुः स्वेन शरीरेण रावणस्य वधाय वै।
पश्यामस्तमयोध्यायां जातं दाशरथिं ततः ।।

* ऋचीकनन्दनो रामो भार्गवो रेणुकासुतः ।
तस्य दाशरथेः श्रुत्वा रामस्याक्लिष्टकर्मणः ।।

* कौतूहलान्वितो रामस्त्वयोध्यामगमत्पुनः ।
धनुरादाय तद्दिव्यं क्षत्रियाणां निबर्हणम्।।

* जिज्ञासमानो रामस्य वीर्यं दाशरथेस्तदा।
तं वै दशरथः श्रुत्वा विषयान्तमुपागतम्।।

* प्रेषयामास रामस्य रामं पुत्रं पुरस्कृतम्।
स तमभ्यागतं दृष्ट्वा उद्यतास्त्रमवस्थितम्।।

* प्रहसन्निव कौन्तेय रामो वचनमब्रवीत्।
कृतकालं हि राजेन्द्र धनुरेतन्मया विभो।।

* समारोपय यत्नेन यदि शक्नोषि पार्थिव ।
इत्युक्तस्त्वाह भगवंस्त्वं नाधिक्षेप्तुमर्हसि।।

* नाहमप्यधमो धर्मे क्षत्रियाणां द्विजातिषु।
इक्ष्वाकूणां विशेषेण बाहुवीर्ये न कत्थनम्।।

* तमेवंवादिनं तत्र रामो वचनमब्रवीत्।
अलं वै व्यपदेशेन धनुरायच्छ राघव ।।

* ततो जग्राह रोषेण क्षत्रियर्षभसूदनम्।
रामो दाशरथिर्दिव्यं हस्ताद्रामस्य कार्मुकम्।।

* धनुरारोपयामास सलील इव भारत।
ज्याशब्दमकरोच्चैव स्मयमानः स वीर्यवान् ।।

* तस्य शब्दस्य भूतानि वित्रसन्त्यशनेरिव ।
अथाब्रवीत्तदा रामो रामं दाशरथिस्तदा।।

* इदमारोपितं ब्रह्मन्किमन्यत्करवाणि ते।
तस्य रामो ददौ दिव्यं जामदग्न्यो महात्मनः ।
शरमाकर्णदेशान्तमयमाकृष्यतामिति।।

लोमशः

* एतच्छ्रुत्वाब्रवीद्रामः प्रदीप्त इव मन्युना।
श्रूयते क्षम्यते चैव दर्पपूर्णोऽसि भार्गव ।।

* त्वया ह्यधिगतं तेजः क्षत्रियेभ्यो विशेषतः ।
पितामहप्रसादेन तेन मां क्षिपसि ध्रुवम्।।

* पश्य मां स्वेन रूपेण चक्षुस्ते वितराम्यहम्।
ततो रामशरीरे वै रामः पश्यति भार्गवः ।।

* आदित्यान्सवसून्रुद्रान्साध्यांश्च समरुद्गणान्।
पितरो हुताशनश्च नक्षत्राणि ग्रहास्तथा।।

* गन्धर्वा राक्षसा यक्षा नद्यस्तीर्थानि यानि च ।
ऋषयो बालखिल्याश्च ब्रह्मभूताः सनातनाः ।।

* देवर्षयश्च कार्त्स्न्येन समुद्राः पर्वतास्तथा।
वेदाश्च सोपनिषदो वषट्कारैः सहाध्वरैः ।।

* चेतोमन्ति च सामानि धनुर्वेदश्च भारत।
मेघवृन्दानि वर्षाणि विद्युतश्च युधिष्ठि।।

* ततः स भगवान्विष्णुस्तं वै बाणं मुमोच ह ।
शुष्काशनिसमाकीर्णं महोल्काभिश्च भारत।।

* पांसुवर्षेण महता मेघवर्षैश्च भूतलम्।
भूमिकम्पैश्च निर्घातैर्नादैश्च विपुलैरपि।।

* स रामं विह्वलं कृत्वा तेजश्चाक्षिप्य केवलम्।
आगच्छज्ज्वलितो बाणो रामबाहुप्रचोदितः ।।

* स तु विह्वलतां गत्वा प्रतिलभ्य च चेतनाम्।
रामः प्रत्यागतप्राणः प्राणमद्विष्णुतेजसम्।।

* विष्णुना सोऽभ्यनुज्ञातो महेन्द्रमगमत्पुनः ।
भीतस्तु तत्र न्यवसद्व्रीडितस्तु महातपाः ।।

* ततः संवत्सरेऽतीते हृतौजसमवस्थितम्।
निर्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन्।।

पितरः

* न वै सम्यगिदं पुत्र विष्णुमासाद्य वै कृतम्।
स हि पूज्यश्च मान्यश्च त्रिषु लोकेषु सर्वदा।।

* गच्छ पुत्र नदीं पुण्यां वधूसरकृताह्वयाम्।
तत्रोपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि।।

* दीप्तोदं नाम तत्तीर्थं यत्र ते प्रपितामहः ।
भृगुर्देवयुगे राम तप्तवानुत्तमं तपः ।।

* तत्तथा कृतवान्रामः कौन्तेय वचनात्पितुः ।
प्राप्तवांश्च पुनस्तेजस्तीर्थेऽस्मिन्पाण्डुनन्दन।।

* एतदीदृशकं तात रामेणाक्लिष्टकर्मणा ।
प्राप्तमासीन्महाराज विष्णुमासाद्य वै पुरा।।

**लोमशः**

**शृणु राजन्कथां दिव्यामद्भुतामतिमानुषीम् ।****

**अगस्त्यस्य महाराज प्रभावममितौजसः ॥ २ ॥**[०१]

**आसन्कृतयुगे घोरा दानवा युद्धदुर्मदाः ।****

**कालकेया इति ख्याता गणाः परमदारुणाः ॥ ३ ॥**[०२]

**ते तु वृत्रं समाश्रित्य नानाप्रहरणोद्यताः ।****

**समन्तात्पर्यधावन्त महेन्द्रप्रमुखान्सुरान् ॥ ४ ॥**[०३]

**ततो वृत्रवधे यत्नमकुर्वंस्त्रिदशाः पुरा ।****

**पुरन्दरं पुरस्कृत्य ब्रह्माणमुपतस्थिरे।**

**कृताञ्जलींस्तु तान्सर्वान्परमेष्ठीत्युवाच ह ॥ ५ ॥**

**परमेष्ठी**

**विदितं मे सुराः सर्वं यद्वः कार्यं चिकीर्षितम्।**[०४]

**तमुपायं प्रवक्ष्यामि यथा वृत्रं वधिष्यथ ॥ ६ ॥**

**दधीच इति विख्यातो महानृषिरुदारधीः ।**[०५]

**तं गत्वा सहिताः सर्वे वरं वै सम्प्रयाचत ॥ ७ ॥**

**स वो दास्यति धर्मात्मा सुप्रीतेनान्तरात्मना ॥ ८ ॥**[०६]

**स वाच्यः सहितैः सर्वैर्भवद्भिर्जयकाङ्क्षिभिः ।**

**स्वान्यस्थीनि प्रयच्छेति त्रैलोक्यस्य हिताय वै ।****

---

(०१) (३)अर्धद्वयं नास्ति, (४)अमितौजसः; अतिमानुषं (for अमितात्मनः );,

(०२) (१)राजन्; तात (for घोरा); (३) कालेय इति विख्यातो; कालकेया इति ख्याताः (४) गणः दारुणः,

(०३) (१)तत्र (for ते तु); ; साद्य (for श्रित्य );,

(०४) (१)लीन्सुरान्; लिपुटान् (for लींस्तु तान्); दिव्यान् (for सर्वान्); (२)परमेष्ठिम्; परमेष्ठिर्; प्रजापतिर् (for परमेष्ठी); (अ)भ्युवाच; (इ)त्युवाचः जगाद; ह्युवाच (for उवाच); (३) सर्वे (for सर्वं);,

(०५) (१) अ०दधीचिरिति,तत्रो (for तमु ); येन (for यथा ),

(०६) (२)यूयं प्र च सम; विप्रं प्र० (for वै सम्प्र०); (३) वै (for वो);,

**स शरीरं समुत्सृज्य स्वान्यस्थीनि प्रदास्यति ॥ ९ ॥**(०१)

**तस्यास्थिभिर्महाघोरं वज्रं संस्क्रियतां दृढम् ।****

**महच्छत्रुहणं घोरं षडश्रं भीमनिःस्वनम् ॥ १० ॥**(०२)

**तेन वज्रेण वै वृत्रं वधिष्यति शतक्रतुः ।****

**एतद्वः सर्वमाख्यातं तस्माच्छीघ्रं विधीयताम् ॥ ११ ॥**(०३)

**लोमशः**

**एवमुक्तास्ततो देवा अनुज्ञाप्य पितामहम् ।****

**नारायणं पुरस्कृत्य दधीचस्याश्रमं ययुः ॥ १२ ॥**(०४)

**सरस्वत्याः परे पारे नानाद्रुमलतावृतम्**

**षट्पदोद्गीतनिनदैर्विघुष्टं सामगैरिव ॥ १३ ॥**(०५)

**पुंस्कोकिलरवोन्मिश्रं जीवं जीवकनादितम्।**

**महिषैश्च वराहैश्च सृमरैश्चमरैरपि ॥ १४ ॥**(०६)

**तत्र तत्रानुचरितं शार्दूलभयवर्जितैः ।**

**करेणुभिर्वारणैश्च प्रभिन्नकरटामुखैः ॥ १५ ॥**

**सरोऽवगाढैः क्रीडद्भिः समन्तादनुनादितम्।**

**अपरैश्चापि संलीनैर्गुहाकन्दरवासिभिः ॥ १६ ॥**

---

(०१) (३)दधीचास्थीन् (for स्वान्य); स्वशरीरात्; शरीरात्स (for स शरीरं); परित्यज्य (for समु );,

(०२) (२)सम्भ्रियते; संस्क्रियतां; सश्रयता; सम्पाद्यतां (३) हनं (for हणं); घोरं; तीव्रं; भीमं (for तीक्ष्णं); (४) षडस्रं; षडश्रि; षडस्रि; षडस्रं; षडस्रि; षडश्रु तीव्र (for भीम ); विक्रमं (for निस्वनम् );,

(०३) (२)हनि (for वधि );,

(०४) (३)शतक्रतुं (for नारा );,

(०५) (२)वृते; चितं युतं (युते) (for वृतम्); (३) निनदं (४) सं (for वि ); सारसैरपि (for सामगै); जीव (for जीवं);,

(०६) (२)शूकरैश्; भ्रमरैश् कोकिलैर् (for सृमरैश्); चामरैर्; भ्रमरैर् (for चमरैर्); सृमरैश्च सशम्बरैः (३) चरितैः (४) मृगेन्द्र ,

**सिंहव्याघ्रैर्महानादान्नदद्भिरनुनादितम् ।****
**अपरैश्चापि संलीनैर्गुहाकन्दरशायिभिः ॥ १७ ॥(०१)**

**तेषु तेष्ववकाशेषु शोभितं सुमनोरमम् ।****
**त्रिविष्टपसमप्रख्यं दधीचाश्रममागमन् ॥ १८ ॥(०२)**

**तत्रापश्यन्दधीचं ते दिवाकरसमद्युतिम् ।****
**जाज्वल्यमानं वपुषा यथा लक्ष्म्या पितामहम् ॥ १९ ॥(०३)**

**तस्य पादौ सुरा राजन्नभिवाद्य प्रणम्य च ।****
**अयाचन्त वरं सर्वे यथोक्तं परमेष्ठिना।**
**ततो दधीचः परमप्रतीतः सुरोत्तमांस्तानिदमभ्युवाच ॥ २० ॥**

**दधीचिः**

**करोमि यद्वो हितमद्य देवाः स्वं चापि देहं स्वयमुत्सृजामि।(०४)**
**स एवमुक्त्वा द्विपदां वरिष्ठः प्राणान्वशी स्वान्सहसोत्ससज॥ २१ ॥**
**ततः सुरास्ते जगृहुः परासोरस्थीनि तस्याथ यथोपदेशम्॥ २१ ॥(०५)**
**प्रहृष्टरूपाश्च जयाय देवास्त्वष्टारमागम्य तमर्थमूचुः ॥ २२ ॥**
**त्वष्टा तु तेषां वचनं निशम्य प्रहृष्टरूपः प्रयतः प्रयत्नात्॥**
**चकार वज्रं भृशमुग्ररूपं कृत्वा च शक्रं स उवाच हृष्टः ॥ २३ ॥**

**त्वष्टा**

---

(०१) (१)ख०इदमर्धंनास्ति,सिहैर् (for सिंह); ० व्याघ्र ०(त्री व्याघ्रैद्); नादैर्; ० नादं;० नागैर् (for नादान्); (२) महद्भिर् (for नदद्भिर्); (३)चमरै०; चामरै; पामरै (for अपरै); चानु (for चापि); (४) शायिभिः (for गामिभिः );,
(०२) (२)नादितं सुमनोहरं (३) त्रिपिष्टपं; ० सदः प्रख्यं (४) आगताः (for आगमन्);,
(०३) (४)साक्षात् (for लक्ष्म्या );,
(०४) (३)तद्वो ; (for यद्वो); (४) स्वयम्; इह (for त्वहम्);,
(०५) (२)स्वयमु (for सहसो); सुरास्ततोस्थीनि गतायुषस्ते यथोपजोषं अयु, स्म तस्य,

**अनेन वज्रप्रवरेण देव भस्मीकुरुष्वाद्य सुरारिमुग्रम्।**(०१)

**ततो हतारिः सगणः सुखं वै प्रशाधि कृत्स्नं त्रिदिवं दिविष्ठः ॥ २४ ॥**

**लोमशः**

**त्वष्ट्रा तथोक्तस्तु पुरन्दरस्तद्वज्रं प्रहृष्टः प्रयतो ह्यगृह्णात्॥ २५ ॥**(०२)

**लोमशः**

**ततः स वज्री बलिभिर्देवतैरभिरक्षितः ।****

**आससाद ततो वृत्रं स्थितमावृत्य रोदसी ॥ २६ ॥**(०३)

**कालकेयैर्महाकायैः समन्तादभिरक्षितम् ।****

**समुद्यतप्रहरणैः सशृङ्गैरिव पर्वतैः ॥ २७ ॥**(०४)

**ततो युद्धं समभवद्देवानां दानवैः सह ।****

**मुहूर्तं भरतश्रेष्ठ लोकत्रासकरं महत् ॥ २८ ॥**(०५)

**उद्यतप्रतिपिष्टानां खड्गानां वीरबाहुभिः ।****

**आसीत्सुतुमुलः शब्दः शरीरेष्वभिपात्यताम् ॥ २९ ॥**(०६)

**शिरोभिः प्रपतद्भिश्चाप्यन्तरिक्षान्महीतलम् ।****

**तालैरिव महाराज वृन्ताद्भ्रष्टैरदृश्यत ॥ ३० ॥**(०७)

**ते हेमकवचा भूत्वा कालेयाः परिघायुधाः ।****

---

(०१) (२)०वीर्यं (for रूपं); (२) अब्रवीत्प्रहृष्टः समुवाच,हृष्टः (३) शस्त्रं (for वज्रं); शक्रः वीर (for देव);,

(०२) (१)सुखं त्वं; सुखी त्वं (for सुस्वं वै); तं (for वै); (२) वरिष्ठ दिविस्थः (३)तु (for स); सट् (for तु) (४) ()भिगृ; ह्यगृ; ()न्वगृ; त्वगृ (for भ्यगृ०); प्रहष्टरुपः प्रथितो ह्यगृष्ट्य,

(०३) (१)तु (for स); सवज्रो (for स वज्री ); बलभिद् (for बलिभिर् ); (२) देवतैर् परि (for अभि ); देवैः समभिरक्षितः (३) तदा (for ततो );,

(०४) (२) अ०क०ग०घ०कालकेयैर्,

(०५) (२)अपि दानवैः; दानवैः सह,

(०६) (१)सृष्टानां विद्धानां (३) तु (for सु ); (४) पातितः; पातिनां ,

(०७) (१) अपि तले (for तलम्); (३) क०ग०फलैरिव;, ख०ध०तोलैरिव, महाराज (for महं।० );,

**त्रिदशानभ्यवर्तन्त दावदग्धा इवाद्रयः ॥ ३१ ॥**[०१]

**तेषां वेगवतां वेगं साभिमानं प्रधावताम् ।****

**न शेकुस्त्रिदशाः सोढुं ते भग्नाः प्राद्रवन्भयात् ॥ ३२ ॥**[०२]

**तान्दृष्ट्वा द्रवतो भीतान्सहस्राक्षः पुरन्दरः ।****

**वृत्रे विवर्धमाने च कश्मलं महदाविशत् ॥ ३३ ॥**[०३]

* कालेयभयसन्त्रस्तो देवः साक्षात्पुरन्दरः ।
जगाम शरणं शीघ्रं तं तु नारायणं प्रभुम्॥

**तं शक्रं कश्मलाविष्टं दृष्ट्वा विष्णुः सनातनः ।****

**स्वतेजो व्यदधाच्छक्रे बलमस्य विवर्धयन् ॥ ३४ ॥**[०४]

**विष्णुना गोपितं शक्रं दृष्ट्वा देवगणास्ततः ।****

**सर्वे तेजः समादध्युस्तथा ब्रह्मर्षयोऽमलाः ॥ ३५ ॥**[०५]

**स समाप्यायितः शक्रो विष्णुना दैवतैः सह ।****

**ऋषिभिश्च महाभागैर्बलवान्समपद्यत ॥ ३६ ॥**

**ज्ञात्वा बलस्थं त्रिदशाधिपं तु ननाद वृत्रो महतो निनादान् ।****

**तस्य प्रणादेन धरा दिशश्च खं द्यौर्नगाश्चापि चचाल सर्वम् ॥ ३७ ॥**[०६]

**ततो महेन्द्रः परमाभितप्तः श्रुत्वा रवं घोररूपं महान्तम् ।****

---

(०१) (३)वर्तेरन्; वर्षन्त; ०धावन्त (४) इव द्रुमाः (for इवाद्रयः );,

(०२) (२)महतां च; सहतां च; साभिमानं (for सहि); (३) सहिताः; संहताः (for त्रिदशाः);,

(०३) (३) ()पिः ()ति ()भि (for वि); तु; ()पि (for च),

(०४) (३)व्यदधत् (४) व्यवर्धयत्(न्) (अ)भिवर्धय ,

(०५) (१)धिष्ठितं; दिष्टिः गोपितं (for अर्धेप्यायितं ); (१/२)शक्रं दृष्ट्वा तदा; तथा (for ततः); (३) सर्वे (for स्वं स्वं ); समादद्युम्; समः (मा )दधुस्; स्वमादाय,

(०६) (१)तं (for तु); (२) विविधान् (for महतो); ()थ (for नि); (४) (अ)भि (for (अ)पि );,

भये निमग्नस्त्वरितो मुमोच वज्रं महत्तस्य वधाय राजन् ॥ ३८ ॥[०१]

स शक्रवज्राभिहतः पपात महासुरः काञ्चनमाल्यधारी ।**

यथा महाशैलवरः पुरस्तात्स मन्दरो विष्णुकराद्विमुक्तः ॥ ३९ ॥[०२]

तस्मिन्हते दैत्यवरे भयार्तः शक्रः प्रदुद्राव सरः प्रवेष्टुम् ।**

वज्रं स मेने न कराद्विमुक्तं वृत्रं भयाच्चापि हतं न मेने ॥ ४० ॥[०३]

सर्वे च देवा मुदिताः प्रहृष्टा महर्षयश्चेन्द्रमभिष्टुवन्तः ।**

सर्वांश्च दैत्यांस्त्वरिताः समेत्य जघ्नुः सुरा वृत्रवधाभितप्तान्।[०४]

वृत्रं हतं सन्ददृशुः पृथिव्यां वज्राहतं शैलमिवावकीर्णम् ॥ ४१ ॥

तैस्त्रास्यमानास्त्रिदशैः समेतैः समुद्रमेवाविविशुर्भयार्ताः ॥ ४२ ॥

प्रविश्य चैवोदधिमप्रमेयं झषाकुलं नक्रसमाकुलं च ।[०५]

तदा स्म मन्त्रं सहिताः प्रचक्रुस्त्रैलोक्यनाशार्थमभिस्मयन्तः ॥ ४३ ॥[०६]

तत्र स्म केचिन्मतिनिश्चयज्ञास्तांस्तानुपायानुपवर्णयन्ति।[०७]

तेषां तु तत्र क्रमकालयोगाद्धोरा मतिश्चिन्तयतां बभूव ॥ ४४ ॥

---

(०१) (२)घोरमुग्रं; शब्दं; तरं(त्त्री रूपं); घोरमुदग्रकल्पं (for घोररूपं ; महा) श्रुत्वा च वाचमथ घोररूपं (३) योद्धुं (for भये); त्वरितो (for तं );,

(०२) (२)माल (for माल्य); (३) महा (for महाज् ०); (४) वि (for प्र );,

(०३) (३)च स; स्म; तु (for न); शक्रस्य (for मेने स्व ); च; स; न (for स्व ); वि (for प्र); (४) हतं भयात् वृत्रं भयान्नैव हतम (हतं त्व)पश्यत्; वृत्रं भयाच्च निहतं न मेने ,

(०४) (१)सहिताः (for मुदि०); (२) अथ (for अभि ); /*(३)शेषान् (for सर्वान्) तु (for च);,

(०५) (१)तैस् (ते); त्रास्य (for ते वध्य); समेतैः (for तदानीं); (४) नक्र०; वृत्रं (for रवं );,

(०६) (१) क०ख०ग०स्म,

(०७) (२)प्रयाताः प्रयत्नात् (०प्रयुक्ताः); प्रवृत्ताः; ०प्रयन्नाः (for स्मयन्तः); (३) ततः (for तत्र); (४) नृप; उप अभि (for अनु); वर्णयन्तः (for वर्णयन्ति );,

**ये सन्ति विद्यातपसोपपन्नास्तेषां विनाशः प्रथमं तु कार्यः ।** [०१]
**लोका हि सर्वे तपसा ध्रियन्ते तस्मात्त्वरध्वं तपसः क्षयाय ॥ ४५ ॥**
**ये सन्ति केचिच्च वसुन्धरायां तपस्विनो धर्मविदश्च तज्ज्ञाः ।****
**तेषां वधः क्रियतां क्षिप्रमेव तेषु प्रणष्टेषु जगत्प्रणष्टम् ॥ ४६ ॥**[०२]
**एवं हि सर्वे गतबुद्धिभावा जगद्विनाशे परमप्रहृष्टाः ।****
**दुर्गं समाश्रित्य महोर्मिमन्तं रत्नाकरं वरुणस्यालयं स्म ॥ ४७ ॥**[०३]
**समुद्रं ते समाश्रित्य वारुणं निधिमम्भसः ।****
**कालेयाः सम्प्रवर्तन्त त्रैलोक्यस्य विनाशने ॥ ४८ ॥**[०४]
**ते रात्रौ समभिक्रुद्धा भक्षयन्ति सदा मुनीन् ।****
**आश्रमेषु च ये सन्ति पुण्येष्वायतनेषु च ॥ ४९ ॥**[०५]
**वसिष्ठस्याश्रमे विप्रा भक्षितास्तैर्दुरात्मभिः ।****
**अशीतिः शतमष्टौ च नव चान्ये तपस्विनः ॥ ५० ॥**[०६]
**च्यवनस्याश्रमं गत्वा पुण्यं द्विजनिषेवितम् ।****
**फलमूलाशनानां हि मुनीनां भक्षितं शतम् ॥ ५१ ॥**[०७]
**एवं रात्रौ स्म कुर्वन्ति विविशुश्चार्णवं दिवा ।**
**कालेयाश्च दुरात्मानो भक्षयन्तस्तपोधनान् ॥ ५२ ॥**[०८]

---

(०१) (१)क्षय (for क्रम ); चोगकालाद् (for कालयोगाद्);,
(०२) (२)चरध्वं; यत (for त्वर०); (३) च; तु(त्तॎ हि); प्रणष्टेषु प्रशष्टं हि(प्र) ,
(०३) (१)दैत्या (for सर्वे); (२) परमं (for परम ); (४) लयं च; लयस्य (for लयं स्म );,
(०४) (१)समुद्रान्तः; ०द्रान्तं; द्रान्ते साद्य (for श्रित्य); (२) वरुणिं; निधिमम्भसः वरुणालयमम्भसां (३) समवर्तत; समपद्यन्त सम्प्रवर्तते सम्प्रावर्तत कालेयाः,
(०५) (१)समतिक्रुद्धा; सहिताः क्रुद्धा (२) महामुनीन्; सदा ऋषीन्,
(०६) (३)अशीतिं; अशीतिः (४) नियता ब्रह्मचारिणः,
(०७) (१)आश्रमे (for आश्रमं)!;,
(०८) (३)भार (for भर ); सर्वदेवताः; सन्ति देवताः; स्म निषूदिताः; (for तु); निसूदि०; विनिपूदि;

**भरद्वाजाश्रमे चैव नियता ब्रह्मचारिणः ।****
**बाष्पा(वाय्वा)हाराम्बुभक्षाश्च विंशतिः संनिषूदिताः ॥ ५३॥** (०१)
* (५००) एवं क्रमेण सर्वांस्तानाश्रमान्दानवास्तदा(०२)
**निशायां परिबाधन्ते मत्ता भुजबलाश्रयात् ॥ ५४ ॥**
**कालोपसृष्टाः कालेया घ्नन्तो द्विजगणान्बहून्।**
**न चैनानन्वबुध्यन्त मनुजा मनुजोत्तम ॥ ५५ ॥**(०३)(०४)
**एवं प्रवृत्तान्दैत्यांस्तांस्तापसेषु तपस्विषु।**
**क्षयाय जगतः क्रूराः पर्यटन्ति स्म मेदिनीम् ॥ ५६ ॥**
**प्रभाते समदृश्यन्त नियमा(ता)हारकर्शिताः ।****
**महीतलस्था मुनयः शरीरैर्गतजीवितैः ॥ ५७ ॥**(०५)
**क्षीणमांसैर्विरुधिरैर्विमज्जान्त्रैर्विसन्धिभिः ।****
**आकीर्णैराबभौ भूमिः शङ्खानामिव राशिभिः ॥ ५८ ॥**(०६)
**कलशैर्विप्रविद्धैश्च स्रुवैर्भग्नैस्तथैव च ।****
**विकीर्णैरग्निहोत्रैश्च भूर्बभूव समावृता ॥ ५९ ॥**(०७)

---

संनिवेशि; सुनि पाति.,
(०१) (१) प्रवर्तते; प्रवर्तन्तौ; विकुर्वति; प्रकुर्वति (for स्म कु);,
(०२) (३)पर्वधावन्त; परिबाधन्ते (४) समुद्राम्बुबलाश्रयात् ( ०श्रयाः) मुनि (त्ी द्विज );,
(०३) (३) प्रवृत्ताः (for प्रवृत्तान्); तांस्तत्र; ते तत्र; ते दैत्याः; दैत्यास्ये; दैतेयाः (for दैत्यांस्तान्); (४) आश्र मेषु (for तापसेषु);,*/
(०४) (१)चैतान्; वै तान् (for चैनान् );अनु अव ; एव (for अन्व ); (२)मनुजाधिप (for ०जोत्तम);,
(०५) (२)नियमाहार कर्षिताः,
(०६) (१)क्षीणवासैर्; क्षतमांसैर् (for क्षीणमां सैर्); (२) निर्मज्जं तैर्; निर्मज्जान्त्रि; (३)विकीर्णैर् विकर्णैर्;आकीर्णा आबभौ; आवृता; चास्थिभि; रुचिरा (for आचिता); (४) राजिभिः (for राशि ) ;,
(०७) (१)चापविद्धैस्च; विप्रभग्नैश्च (२) च भारत (for तथैव च); (३) विशीर्णैर्; आकीर्णैर् (४) बभूव च (for भूर्बभूव); समाकुला बभूव वसुधावृता ,

**निःस्वाध्यायवषट्कारं नष्टयज्ञोत्सवक्रियम् ।**
**जगदासीन्निरुत्साहं कालेयभयपीडितम् ॥ ६१ ॥**

**एवं सङ्क्षीयमाणाश्च मानवा मनुजेश्वर ।**
**आत्मत्राणपराभीताः प्राद्रवन्त दिशो भयात् ॥ ६१ ॥**(०१)

**केचिद्गुहाः प्रविविशुर्निर्झरांश्चापरे तथा ।**
**अपरे मरणोद्विग्ना भयात्प्राणान्समुत्सृजन् ॥ ६२ ॥**(०२)

**केचिदत्र महेष्वासाः शूराः परमहर्षिताः ।**
**मार्गमाणाः परं यत्नं दानवानां प्रचक्रिरे ॥ ६३ ॥**(०३)

**न चैतानधिजग्मुस्ते समुद्रं समुपाश्रितान् ।**
**श्रमं जग्मुश्च परममाजग्मुः क्षयमेव च ॥ ६४ ॥**(०४)

**जगत्युपशमं याते नष्टयज्ञोत्सवक्रिये ।**
**आजग्मुः परमामार्तिं त्रिदशा मनुजेश्वर ॥ ६५ ॥**(०५)

**समेत्य समहेन्द्राश्च भयान्मन्त्रं प्रचक्रिरे ।**
**तेऽभिगम्य नमस्कृत्य वैकुण्ठमपराजितम् ।**(०६)
* शरण्यं शरणं देवं नारायणमजं विभुम् ।
**ततो देवाः स्समेतास्ते तदोचुर्मधुसूदनम् ॥ ६६ ॥**(०७)

---

(०१) (१)सं (for प्र); स्म; तु (for च); (४) प्र(प्रा)द्रवन्ति दिशो दश ,
(०२) (१)गृहान् गुहां (for गुहाः); (२) चापरे तथा; च तथापरे (for चापरे श्रिताः); (३) च भयोद्विग्ना; तद्भयादेव (४) अवासृजन्; समत्य० (for समुक्तं); सहसारन्त्य मत्यजन्,
(०३) (१)तत्र (for अत्र); (२) परमहर्षिताः परमदर्पिताः,
(०४) (१)चैनान् (for चैतान्); अनुजज्ञुस्ते; अभिजग्मु(घ्नु)स्ते (२) समुपासृतान्; ०परिस्थतान् (३) जज्ञुश्च श्रमं च परमं जग्मुः०(४) आजज्ञु; सञ्जग्मुः; न जग्मुः (for आजग्मुः); ते (for च);,
(०५) (२)सञ्ज्ञो (for यज्ञो०); (३) ते (for आ); (४) मनुजाधिप ( जा इव ) ,
(०६) (१)तु (for च); (३)तेभिगम्य (त्वा) (for नारा०); नमस्कृत्य (for पुरं );,
(०७) (१) अ०स्समस्तास्ते,

**त्वं नः स्रष्टा च भर्ता च हर्ता च जगतः प्रभो ।****
**त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति ॥ ६७ ॥**(०१)

**त्वय्येव पुण्डरीकाक्ष पुनस्तत्प्रविलीयते ॥ ६८ ॥**

**त्वया भूमिः पुरा नष्टा समुद्रात्पुष्करेक्षण ।****
**वाराहं वपुराश्रित्य जगदर्थे समुद्धृता ॥ ६९ ॥**(०२)

**आदिदैत्यो महावीर्यो हिरण्यकशिपुः पुरा ।****
**नारसिंहं वपुः कृत्वा सूदितः पुरुषोत्तम ॥ ७० ॥**(०३)

**अवध्यः सर्वभूतानां बलिश्चापि महासुरः ।****
**वामनं वपुराश्रित्य त्रैलोक्याद्भ्रंशितस्त्वया ॥ ७१ ॥**(०४)

**असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः ।****
**यज्ञकषोभकरः क्रूरस्त्वयैव विनिपातितः ।**(०५)
**एवमादीनि कर्माणि येषां सङ्ख्या न विद्यते ॥ ७२॥**

**अस्माकं भयभीतानां त्वं गतिर्मधुसूदन।**
**तस्मात्त्वां देवदेवेश लोकार्थं ज्ञापयामहे ॥ ७३ ॥**(०६)

**रक्ष लोकांश्च देवांश्च शक्रं च महतो भयात्।**(०७)

---

(०१) (१)समस्तां (for समेतां); (२) तमू चुर्; तुष्टुवुर् तत्रोचुर् (३) गोप्ता; कर्ता (भर्ता) (for पाता); त्वं नः कर्ता चस्रष्टा च(४) इम्रं (for भर्ता); जगत् (for इदं); विश्वं; कृत्स्व (for सर्वं); नेङ्गते; नेगितं; नैगतं (for ति); यच्चेगे भ्यश्च नेङ्गते; स्थावरं जङ्गमं च यत् ,

(०२) (१)सृष्टा (for नष्टा); (२) समुद्राः; द्रं;द्रे (for द्रात्); (३) वराह (for वाराहं) वपुर् (for रूपम्); आश्रित्य (for आस्थाय);,

(०३) (२)पुरा (for त्वया); (३) नारसिंह,

(०४) (२)नाम; चैव (for चापि); (३) वपुरास्थाय रूपमास्थाय ,

(०५) (३) ख०इदमर्धं नास्ति,जगत, (for ग्रज्ञ ); क्रुद्धस्; शूरस् (for क्रूरस्);,

(०६) (३) क०ख०ग०ज्ञापयानहे,

(०७) (१)त्वं; त्वा (for त्वां); अपि; एव (for देव); (३) लोकांश्च देवांश्च ,

शरणागतसन्त्राणे त्वमेकोऽसि दृढव्रतः ॥ ७४ ॥[०१]

तव प्रसादाद्वर्धन्ते प्रजाः सर्वाश्चतुर्विधाः ।**

ता भाविता भावयन्ति हव्यकव्यैर्दिवौकसः ॥ ७५ ॥[०२]

लोका ह्येवं विवर्धन्ते ह्यन्योन्यं समुपाश्रिताः ।**

त्वत्प्रसादान्निरुद्विग्नास्त्वयैव परिरक्षिताः ॥ ७६ ॥[०३]

इदं च समनुप्राप्तं लोकानां भयमुत्तमम् ।**

न च जानीम केनेमे रात्रौ वध्यन्ति ब्राह्मणाः ॥ ७७ ॥[०४]

क्षीणेषु च ब्राह्मणेषु पृथिवी क्षयमेष्यति ।**

ततः पृथिव्यां क्षीणायां त्रिदिवं क्षयमेष्यति ॥ ७८ ॥[०५]

त्वत्प्रसादान्महाबाहो लोका सर्वे जगत्पते ।**

विनाशं नाधिगच्छेयुस्त्वया वै परिरक्षिताः ॥ ७९ ॥[०६]

विष्णुः

विदितं मे सुराः सर्वे(वं) प्रजानां क्षयकारणम् ।**

भवतां चापि वक्ष्यामि शृणुध्वं विगतज्वराः ॥ ८० ॥[०७]

कालेय इति विख्यातो गणः परमदारुणः ।**

---

(०१) (४) अ०ख०घ०नास्तीदमर्घम्,( धृतं (for दृढं); ),

(०२) (१)क०ग०प्रघानाद् वर्धन्ते; ख०घ०प्रदानाद् वर्तन्ते, तव भवत् (for इतः); प्रसादाद् (for प्रदानाद्); वर्धते (for वर्तन्ते); त्वत्प्रसादात्प्रवर्तते ,

(०३) (१) अ०प्रवर्तन्ते; विवर्धन्ते; वर्षं यन्ति (for वर्तयन्ति); (२) तेन्योन्यं; ह्यन्योन्यं (for अ ); (३) त्वत्प्रभावान् (४) त्वया वै (for त्वयैव );,

(०४) (२)इत्युत (for उत्तमम्); (३) न हि जानन्ति; जानीमो न च कालका नाम (for न च जानीम); केनैते; विध्यन्ते; वध्यन्ते; केपि पीर्धेमे; केनैव; केनेति (for केनेमे); न च जानीमहे केन (४) वै द्विजाः (for ब्राह्मणाः); वर्ण्यते ( केनैते; केनैव) ब्राह्मणा निशि ,

(०५) (१)क्षीणे ब्राह्म हि (for च),

(०६) (३)नाति ; नाभि ; नैव (for नाधि); (४) त्वयैव (for त्वया वै );,

(०७) (for विष्णुरुं); (२) पृथिवी (for श्वप्रजानां );,

**तैश्च वृत्रं समाश्रित्य जगत्सर्वं प्रमाथितम् ॥ ८१ ॥**(०१)

**ते वृत्रं निहतं दृष्ट्वा सहस्राक्षेण धीमता ।****

**जीवितं परिरक्षन्तः प्रविष्टा वरुणालयम् ॥ ८२ ॥**

**ते प्रविश्योदधिं घोरं नक्रग्राहसमाकुलम् ।****

**उत्सादनार्थं लोकानां रात्रौ घ्नन्ति ऋषीनिह ॥ ८३ ॥**(०२)

**न तु शक्याः क्षयं नेतुं समुद्राश्रयगा हि ते।**

**समुद्रस्य क्षये बुद्धिर्भवद्भिः सम्प्रधार्यताम् ।****

**अगस्त्येन विना को हि शक्तोऽन्योऽर्णवशोषणे ॥ ८४ ॥**(०३)

* अन्यथा हि न शक्यास्ते विना सागरशोषणम्।

**लोमशः**

**एतच्छ्रुत्वा तदा देवा विष्णुना समुदाहृतम् ।****

**परमेष्ठिनमाज्ञाप्य अगस्त्यस्याश्रमं ययुः ॥ ८५ ॥**(०४)

* विष्णुमेव पुरस्कृत्य ब्रह्माणं समुपस्थिताः ।

**ततस्ते प्रणता भूत्वा तमेवार्थं न्यवेदयन्।**

**सर्वलोकविनाशार्थं कालेयाः कृतनिश्चयाः ॥ ८६ ॥**

**तेषां तद्वचनं श्रुत्वा पद्मयोनिस्सनातनः ।****

**उवाच परमप्रीतस्त्रिदशानर्थवद्वचः ॥ ८७ ॥**

**परमेष्ठी**

**विदितं मे सुरास्सर्वं दानवानां विचेष्टितम् ।****

---

(०१) (१)कालेया; विख्याता गणाः ०दारुणाः (४) प्रमाथितं (for प्रवा० );,

(०२) (२)नाना (for नक्र ); (३) लोकस्य (for लोकानां) (४) ऋषीन् (for मुनीन्); अथ (for इह);,

(०३) (१)हि (for तु ); (२) समुद्रक्षयगा; द्राश्रयिणो समुद्राश्रयमाश्रिताः; समुद्रस्य क्षयं विना; प्रेठसमुद्रक्षयगामिनः
(४) संविधीयतां (for सम्प्रधा०);,

(०४) (१)ततो; तदा (for वचो);,

**मनुष्यादेश्च निधनं कालेयैः कालचोदितैः ॥ ८८ ॥**

**क्षयस्तेषामनुप्राप्तः कालेनोपहताश्च ते ।****

**उपायं सम्प्रवक्ष्यामि समुद्रस्यापि शोषणे ॥ ८९ ॥**

**अगस्त्य इति विख्यातो वारुणिस्सुसमाहितः ।****

**तमुपागम्य सहिता इममर्थं प्रयाचत ॥ ९० ॥**

**स हि शक्तो महाभागः क्षणात्पातुं महोदधिम् ।****

**समुद्रे च क्षयं नीते कालेयान्निहनिष्यथ ॥ ९१ ॥**

**लोमशः**

**एवं श्रुत्वा वचो देवा ब्रह्मणः परमेष्ठिनः ।**

**समनुज्ञाप्य ब्रह्माणं वारुणिं समुपस्थिताः ॥ ९२ ॥**(०१)

**तत्रापश्यन्महात्मानं वारुणिं दीप्ततेजसम् ।****

**उपास्यमानमृषिभिर्देवैरिव पितामहम् ॥ ९३ ॥**

**तेऽभिगम्य महात्मानं मैत्रावरुणिमच्युतम् ।****

**आश्रमस्थं तपोराशिं कर्मभिः स्वैरभिष्टुवन् ॥ ९४ ॥**(०२)

**देवाः**

**नहुषेणाभितप्तानां त्वं लोकानां गतिः पुरा ।****

**भ्रंशितश्च सुरैश्वर्यात्स्वर्लोकाल्लोककण्टकः ॥ ९५ ॥**(०३)

**क्रोधात्प्रवृद्धः सहसा भास्करस्य नगोत्तमः ।****

---

(०१) ततस्ते ते नीचैः (for ते तस्मै ); मनुष्याणां च(त्त्री व्यादेश्च); अपि(त्त्री त्वे); ०भागः (for ०त्त्योः ); अस्थित्य; (for च्छज्ञाप्य ); परमेष्ठ्यभ्यज्ञज्ञाता समनुज्ञाप्य ब्रह्माणं वासमैंसमुपस्त्विताः,

(०२) (४)अभिष्ट्वतं; अधिष्ठितं; तु तुष्टुवुः (for अभिहुवन्);,

(०३) (१)नाहुषेण (२) त्वन्देवानां; देवानां त्वं (for त्वं लोकानां); (४) लोकार्थे; स्वलोकाल् (for लोकार्थं ) ,

**वचस्तवानतिक्रामन्विन्ध्यः शैलो न वर्धते ॥ ९६ ॥**(०१)

**तमसा चावृते लोके मृत्युनाभ्यर्दिताः प्रजाः ।****
**त्वामेव नाथमासाद्य निर्वृत्तिं परमां गताः ॥ ९७ ॥**(०२)

**अस्माकं भयभीतानां नित्यशो भगवान्गतिः ।****
**ततस्त्वार्थाः प्रयाचामो वरं त्वां वरदो ह्यसि ॥ ९८ ॥**(०३)

अस्मिन् तीर्थयात्रापर्वणि ८१अध्याये ९८श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥**

---

(०१) (१) ख०घ०प्रवृत्तास्तरसा,सुमहान्; तरणं; सरणं; तरसा (for सहसा); (२)क०ग० नभोगतः; नभोत्तमः(त्री नगो); (३) क्रम्य (for क्रामन् );,
(०२) (१)दर्पिते; संवृते; चार्दिते; च वृते; ह्यावृत्ते सा चावृतो लोको (२)ह्य(त्री भ्य० );,
(०३) (२)ऋषिः (for गतिः); (३) प्रयाचाम (४) वरं त्वां वरदं; त्वां वयं; त्वां परं दोत्तम (for दो ह्यसि);,